टिप्पणी - **चित्रभानु**-अर्थपति के ग्यारह पुत्र थे जिनमें एक चित्रभानु भी थे। अर्थपति के ग्यारहपुत्रों के विषय में महाकवि बाणभट्ट ने हर्षचरित में लिखा है- "सोऽजनयद् १. भृगुं, २. हंसं, ३. शुचिं, ४. कविं, ५. महदत्तं, ६. धर्मं, ७. जातवेदसं, ८. चित्रभानुं, ९. लक्षं, १०. अहिदत्तं, ११. विश्वरूपञ्चेत्येकादशरुद्रानिव। सोमामृतरसशीकरच्छुरितमुखान् पवित्रान् पुत्रान्।" **अवाप**=प्राप्त किया। **स्फुटिकोपलामलम्**-स्फटिकोपलैः अमलमिति स्फटिकोपलामलम् अर्थात् स्फटिक मणि के सामान स्वच्छ। 'अमलम् के स्थान पर 'उपमम्' पाठान्तर होने पर अर्थ इस प्रकार होगा-स्फटिक मणि है उपमा जिसकी। **क्षमाभृताम्**-इसमें श्लेष है। इसके दो अर्थ हैं-(क) क्षमां पृथ्वीं बिभ्रति धारयन्ति, तेषाम् अर्थात् पृथ्वी को धारण करने वाले-पर्वत, क्षमां क्षान्तिं बिभ्रति तेषाम् अर्थात् क्षमा नामक गुण को धारण करने वाले।। 'क्षितिक्षान्त्योः क्षमा' इत्यमरः। तनयः-तनोति विस्तारयति कुलमिति तनयः तनु (विस्तारे)+कयन्। 'आत्मजस्तनयः सूनुः' इत्यमरः।

उपमालङ्कार। प्रसाद गुण, वैदर्भी रीति। वंशस्थ छन्द ॥१६॥

महात्मनो यस्य सुदूरनिर्गताः कलङ्कमुक्तेन्दुकलामलत्विषः।
द्विषन्मनःप्राविविशुः कृतान्तरा गुणा नृसिंहस्य नखाङ्कुरा इव॥१७॥

अन्वयः – यस्य महात्मनः सुदूरनिर्गताः कलङ्कमुक्तेन्दुकलामलत्विषः गुणाः नृसिंहस्य नखाङ्कुराः इव कृतान्तरा द्विषन्मनः प्राविविशुः॥ १७ ॥

हिन्दी अनुवाद – जिस महात्मा (चित्रभानु) के दिगन्त व्यापी, निष्कलङ्क चन्द्रकला के समान स्वच्छ कान्ति वाले, तथा अवकाश बना लेने वाले गुण अत्यधिक प्रवृद्ध, निष्कलङ्क चन्द्रकला के समान धवल कान्ति वाले तथा शत्रु हिरण्यकशिपु के हृदय में प्रविष्ट महात्मा भगवान् नृसिंह के नखाग्रभागों के समान शत्रुओं के भी अन्तःकरण में प्रविष्ट हो गये थे।

संस्कृत-व्याख्या-**यस्य महात्मनः**=यस्य महापुरुषस्य, **सुदूरनिर्गताः**= दूरदेश-पर्यन्तं गताः, नखाङ्कुरपक्षे तु अतिदीर्घत्वात् नखराग्राद्बहिर्भूताः, **कलङ्कमुक्तेन्दु-कलामलत्विषः**=कलङ्केन मृगलाञ्छनेन मुक्ता वर्जिता या इन्दुकला चन्द्रकला तद्वत् अमला स्वच्छा त्विट् छविर्येषां ते (गुणाः नखाङ्कुराश्च) **गुणाः** = दयादाक्षिण्यादयः, **नृसिंहस्य**=नृसिंहावतारस्य विष्णोः, **नखाङ्कुराः**=नखाग्रभागाः, **इव कृतान्तराः**=कृतं विहितम् अन्तरं प्रवेशावकाशः यैः ते (गुणाः) नखपक्षे तु कृतं विहितम् अन्तरं विदारणात् अन्तः प्रवेशमार्गः यैस्ते, **द्विषन्मनः**=द्विषतां शत्रूणां मनः अन्तकरणम्, नखपक्षे द्विषतः शत्रोः हिरण्यकशिपोः मनः वक्षःस्थलम्, **प्राविविशुः**=प्रवेशं विदधुः॥ १७ ॥

टिप्पणी-**सुदूरनिर्गताः**-इसके दो अर्थ हैं-(क) गुणपक्ष में दूर-दूर स्थानों तक फैले हुए, (ख) नख पक्ष में-दूर तक बाहर निकले हुए। **त्विट्**=कान्ति। **द्विषत्**=शत्रु। सुदूरनिर्गताः, कलङ्कमुक्तेन्दुकलामलत्विषः, तथा कृतान्तराः ये तीनों पद गुणाः तथा नखाङ्कुराः इन दोनों के विशेषण के रूप में प्रयुक्त हुए हैं। **प्राविविशुः**=प्र+आङ् विश् धातु लिट् लकार प्र० पु० ए० व०। यहाँ उपमान, उपमेय, वाचक तथा साधारण धर्म इन चारों अङ्गों के होने से **पूर्णोपमा** नामक अलङ्कार है। **प्रसाद गुण, वैदर्भी रीति। वंशस्थ छन्द** ॥१७॥

दिशामलीकालकभङ्गतां गतस्त्रयीवधूकर्णतमालपल्लवः।
चकार यस्याध्वरधूमसञ्चयो मलीमसः शुक्लतरं निजं यशः॥१८॥

अन्वयः – दिशामलीकालकभङ्गतां गतः, त्रयीवधूकर्णतमालपल्लवः यस्य मलीमसः अध्वरधूमसञ्चयः निजं यशः शुक्लतरं चकार॥१८॥

हिन्दी अनुवाद – वधू रूप दिशाओं के ललाट प्रदेश पर घुँघराली अलकों की भङ्गिमा उत्पन्न करने वाले तथा वेदत्रयीरूप वधू के कर्ण प्रान्तों पर तमाल पल्लव के समान जिस चित्रभानु के यज्ञों से उत्पन्न धूम समूह ने कृष्णवर्ण होने पर भी उनके वैयक्तिक यश को और अधिक उज्ज्वल बना दिया।

संस्कृतव्याख्या – **दिशां**=पूर्वादीनां वधूस्वरूपाणाम्, **अलीकालकभंगतां**= अलीकेषु ललाटप्रदेशेषु 'अलीकमप्रिये भाले' इति हैमः ये अलकाश्चूर्णकुन्तलाः तेषां भङ्गतां रचनाविशेषत्वम्, **गतः**=प्राप्तः, **त्रयीवधूकर्णतमालपल्लवः**=त्रयी वेदत्रयी सैव वधूः स्नुषा तस्याः कर्णे श्रवणे तमालपल्लवः तापिच्छवृक्षकिसलयस्वरूपः, 'तापिच्छोऽपि तमालः स्यात्' इत्यमरः, **मलीमसः**=प्राकृतिकमलिनः, **यस्य**= चित्रभानोः, **अध्वरधूमसञ्चयः**=अध्वराणां यज्ञानां यो धूमः तस्य सञ्चयः यज्ञधूमसमूहः, शुक्लतरं=अतिशयेनोज्ज्वलं, **निजं**=स्वीयं, **यशः**=कीर्तिं, **चकार**=विदधे ॥१८॥

टिप्पणी – **दिशाम्**–दिशारूपी वधूगण के। **अलक**–घुँघराले बाल, 'अलकाश्चूर्णकुन्तलाः' इत्यमरः। **अलीक**–ललाट, भाल। अलीक शब्द के दो अर्थ लिखते हुए कहा गया है–'अलीकमप्रिये भाले'। **त्रयी**–तीन वेदों का समूह– ऋग्वेद,यजुर्वेद तथा सामवेद। **अध्वरः**=यज्ञ। अध्वानं सत्पथं राति ददाति– अध्वन्+रा+क अथवा न ध्वरति न कुटिलो भवति–नञ्+ध्वृ+अच्। चकार–कृ धातु लिट् प्र० पु० ए० व०। यहाँ दिशा और वेदत्रयी में वधू का तथा यज्ञ–धूम में कर्णतमालपल्लव का समारोप होने से रूपक अलंकार है। मलिन धूम के सञ्चय के द्वारा शुक्लतर यश के उत्पन्न होने से अतएव कारण गुण विपरीत कार्य गुण के उत्पन्न होने से **विषम** अलंकार है। इन दोनों के अङ्गाङ्गिभाव होने से **संकर** है। **प्रसाद गुण, वैदर्भी रीति। वंशस्थ छन्द** ॥१८॥

सरस्वतीपाणिसरोजसम्पुटप्रभृष्टहोमश्रमशीकराम्भसः।
यशोंऽशुशुक्लीकृतसप्तविष्टपात्ततः सुतो बाण इति व्यजायत ॥१९॥

अन्वयः – सरस्वतीपाणिसरोजसम्पुटप्रमृष्टहोमश्रमशीकराम्भसः यशोंऽशुशुक्ली–कृतसप्तविष्टपात् ततः बाण इति सुतः व्यजायत ॥१९॥

हिन्दी अनुवाद – सरस्वती के कमलसदृश कर युगल से स्वयमेव पोंछे जाते हुए होमादिकर्मों के परिश्रमजन्य स्वेद जल वाले तथा सुयश की रश्मियों से शुभ्र किए गए सातो भुवनों वाले उन्हीं चित्रभानु से बाण नामक पुत्र उत्पन्न हुए।

संस्कृतव्याख्या – **सरस्वतीपाणिसरोजसम्पुटप्रभृष्टहोमश्रमशीकराम्भसः**=

सरस्वत्याः भारत्याः पाणिसरोजसम्पुटेन करकमलद्वयेन प्रमृष्टानि प्रमार्जितानि होमश्रमस्य **यज्ञजन्य**-परिश्रमस्य शीकराम्भसि प्रस्वेदजलानि यस्य तस्मात् (चित्रभानोः), तथा **यशोंऽशुशुक्लीकृतसप्तविष्टपात्**=यशसः सुकीर्तेः अंशुभिः मयूखैः शुक्लीकृतानि शुभ्रीकृतानि सप्तविष्टपानि सप्तभुवनानि येन तस्मात् 'विष्टपं भुवनं जगत्' इत्यमरः, **ततः**=चित्रभानोः, **बाण इति**=बाणनामधेयः, **सुतः**=पुत्रः, **व्यजायत**=अभवत् ॥१९॥

टिप्पणी-सरस्वती-सरस्+मतुप्=सरस्वत्+ङीप्=सरस्वती। प्रभृष्टः-प्रभृज्+क्त। **सरस्वती....अम्भसः**-इसके द्वारा बाणभट्ट ने अपने पिता चित्रभानु को वैदिक यज्ञों का परमानुष्ठाता तथा समस्त विद्याओं का ज्ञाता बतलाया है। **अंशु**=किरण। **विष्टप**= भुवन, 'विष्टपं भुवनं जगत्' इत्यमरः। **व्यजायत**-वि उपसर्ग पूर्वक जन् धातु लङ् प्र० पु० ए० व०। यहाँ सरस्वती के करकमलों के द्वारा चित्रभानु के श्वेद जलकणों के प्रोञ्छण रूपी असम्बन्ध में सम्बन्ध का प्रतिपादन करने से **अतिशयोक्ति** अलंकार है। इसी प्रकार शुभ्रीकरण असम्बन्ध में सम्बन्ध के प्रतिपादन से **अतिशयोक्ति** अलंकार है। दोनों की निरपेक्ष स्थिति होने से संसृष्टि है। **प्रसाद गुण, पाञ्चाली रीति। वंशस्थ छन्द** ॥१९॥

द्विजेन तेनाक्षतकण्ठकौण्ठ्यया महामनोमोहमलीमसान्धया।
अलब्धवैदग्ध्यविलासमुग्धया धिया निबद्धेयमतिद्वयी कथा॥२०॥

अन्वयः - तेन द्विजेन अक्षतकण्ठकौण्ठ्यया महामनोमोहमलीमसान्धया अलब्धवैदग्ध्यविलासमुग्धया धिया इयम् अतिद्वयी कथा निबद्धा॥२०॥

हिन्दी अनुवाद - उस ब्राह्मण (बाणभट्ट) के द्वारा अविनष्ट कण्ठ की जडता वाली, उत्कृष्ट मनोमोह से मलीन होने से अन्धी (सद् असत् प्रतिपादन में असमर्थ) तथा वैदुष्यचातुर्य प्राप्त न करने के कारण मुग्ध (अप्रगल्भ) बुद्धि से यह अतिद्वयी (बृहत्कथा तथा वासवदत्ता-का अतिक्रमण करने वाली) कथा (कादम्बरी) को निबद्ध किया गया है।

संस्कृत व्याख्या - सम्प्रति महाकविः बाणभट्टः स्वाहंकारं परिहरति **द्विजेनेति**। **तेन द्विजेन**=ब्राह्मणेन बाणेन, **अक्षतकण्ठकौण्ठ्यया**=अक्षतम् अविनष्टं कण्ठकौण्ठ्यं गलस्य मान्द्यं यस्याः सा तया, **महामनोमोहमलीमसान्धया**=महान् उत्कृष्टो यो मनोमोहः चित्तवैकल्यं तेन मलीमसा मलिना अतएत अन्धा सदसत्प्रतिपादनासमर्था तया, **अलब्धवैदग्ध्यविलासमुग्धया**=अलब्धः अप्राप्तः यः वैदग्ध्यविलासः वैदुष्यचातुर्यं तेन मुग्धा मूढा तया, 'मुग्धः सुन्दरमूढयोः' इत्यमरः, **धिया**=प्रज्ञया,

इयं=कादम्बरीरूपा, **अतिद्वयी**=द्वयीं बृहत्कथां वासवदत्तां च अतिक्रान्तेति अतिद्वयी, **कथा**=प्रबन्धकल्पना, **निबद्धा**=निर्मिता ॥२० ॥

टिप्पणी - "**अक्षत.....कौण्ठ्यया, महा...न्धया, अलब्ध....मुग्धया**" ये तीनों धिया के विशेषण हैं। **कौण्ठ्य**-कुण्ठाया भाव:-कुण्ठा+ष्यञ्=कौण्ठ्य-जडता। **अलब्धः**-लभ+क्त=लब्धः, न लब्धः अलब्धः। **वैदग्ध-विदग्ध**+ष्यञ्=चतुरता। **मुग्धः**-मुह्+क्त=मूढः। **अतिद्वयी**-कादम्बरी के संस्कृत टीकाकार भानुचन्द्र ने इस शब्द की व्याख्या की है-'द्वयी बृहत्कथां वासवदत्तां चातिक्रान्तेत्यर्थः।' अर्थात् कादम्बरी इस अर्थ में अतिद्वयी है कि इसने बृहत्कथा (गुणाढ्यकृत) तथा वासवदत्ता (सुबन्धुकृत) का अतिक्रमण कर दिया है। श्री पीटर्सन महोदय इस शब्द का सीधा अर्थ करते हैं 'अद्वितीय'। देखिए-'अतिद्वयींति...अतिक्रान्तेत्यर्थः' (भानुचन्द्र) this seems fas fetched अतिद्वयी is that which can not be put along with any thing else so that the two shall from a द्वयम् "incomparable" यहाँ प्रथम चरण में **छेकानुप्रास**, शेष भाग में **वृत्त्यनुप्रास** तथा दोनों की निरपेक्ष स्थिति होने से संसृष्टि। **प्रसाद गुण, पाञ्चाली रीति। वंशस्थ छन्द** ॥२० ॥

कथामुखम्

आसीदशेषनरपतिशिरःसमभ्यर्चितशासनः पाकशासन इवापरः, चतुरुदधिमालामेखलाया भुवो भर्ता, प्रतापानुरागावनतसमस्तसामन्तचक्रः, चक्रवर्तिलक्षणोपेतः, चक्रधर इव करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः, हर इव जितमन्मथः, गुह इवाप्रतिहतशक्तिः, कमलयोनिरिव विमानीकृतराजहंसमण्डलः, जलधिरिव लक्ष्मीप्रसूतिः, गङ्गाप्रवाह इव भगीरथपथप्रवृत्तः, रविरिव प्रतिदिवसोपजायमानोदयः,मेरुरिव सकलोपजीव्यमानपादच्छायः, दिग्गज इवानवरतप्रवृत्तदानार्द्रीकृतकरः, कर्त्ता महाश्चर्य्याणाम्, आहर्त्ता क्रतूनाम्, आदर्शः सर्वशास्त्राणाम्, उत्पत्तिः कलानाम्, कुलभवनं गुणानाम्, आगमः काव्यामृतरसानाम्, उदयशैलो मित्रमण्डलस्य, उत्पातकेतुरहितजनस्य, प्रवर्त्तयिता गोष्ठीबन्धानाम्, आश्रयो रसिकानाम्, प्रत्यादेशो धनुष्मताम्, धौरेयः साहसिकानाम्, अग्रणीर्विदग्धानाम्, वैनतेय इव विनतानन्दजननः, वैन्य इव चापकोटिसमुत्सारितसकलारातिकुलाचलो राजा शूद्रको नाम।

हिन्दी अनुवाद – समस्त राजाओं के द्वारा शिरोधार्य किए जाते हुए आदेश वाला, दूसरे इन्द्र के समान चारों समुद्रों की काञ्चीवाली पृथ्वी का स्वामी, पराक्रम एवं प्रेम से समस्त सामन्तों को अवनत करने वाला, चक्रवर्ती के लक्षणों से युक्त, भगवान् विष्णु के समान करकमल में दिखाई देते हुए शङ्ख एवं चक्र के चिह्नों वाला (भगवान् विष्णु के हाथ में शङ्ख तथा चक्र विराजमान होते हैं राजा के हाथ में शङ्ख तथा चक्र चिह्न थे), शिव के समान जितेन्द्रिय (कामजित्) (भगवान् शिव ने काम को भस्म किया था राजा ने काम को जीत लिया था) कार्तिकेय के समान अप्रतिहत शक्ति वाला, कमलयोनि (ब्रह्मा) के समान भूपतियों के दर्प को नष्ट करने वाला (कमलयोनि ब्रह्मा जी ने राजहंस को अपना विमान बनाया था और राजा ने श्रेष्ठ राजाओं के मान का मर्दन किया था।) लक्ष्मी के उद्भव स्थान समुद्र के समान ऐश्वर्य एवं सौन्दर्य को उत्पन्न करने वाला, गङ्गा प्रवाह के समान भगीरथ (पितृगणों के उद्धार रूपी) मार्ग का अनुसरण करने वाला (गङ्गा के प्रवाह ने भगीरथ के मार्ग का अनुसरण किया था, राजा भी भगीरथ के समान

पितृगणों के उद्धाररूपी भगीरथ के मार्ग का अनुसरण करने वाला था), सूर्य के समान प्रतिदिन अभ्युदय (उन्नति) को प्राप्त करने वाला (सूर्य प्रतिदिन उदयाचल पर्वत में आरूढ़ होते हैं राजा प्रतिदिन उन्नति प्राप्त करता था), सुमेरु पर्वत के समान समस्त प्रजावर्ग द्वारा सेवित चरणाश्रय वाला (सुमेरु पर्वत के प्रत्यन्तपर्वत की छाया में समस्त देवता आश्रय लेते थे, राजा शूद्रक के चरणों का आश्रय सभी प्रजावर्ग लेता था); निरन्तर निकलते हुए मदजल से गीले हुए शुण्डादण्ड वाले दिग्गज के समान निरन्तर दान के कारण दक्षिणा एवं संकल्प जल से भीगे हुए हाथों वाला, (दिग्गजों के शुण्डादण्ड निरन्तर दानवारि से भींगे रहते थे) महान् आश्चर्यपूर्ण कार्यों को करने वाला, यज्ञों का अनुष्ठान करने वाला, समस्तशास्त्रों का दर्पण स्वरूप, कलाओं का उत्पत्ति स्थान, गुणों का कुलभवन (कुलपरम्परागत आश्रयस्थान), काव्यामृत रसों का उत्पत्तिस्थान, मित्रसमूह का उदयाचल (समुन्नति का स्थान) शत्रुओं के लिए धूमकेतु, वार्तागोष्ठियों का सञ्चालक, रसिकों का आश्रयस्थान, धनुर्धरों को पराङ्मुख करने वाला, साहसी पुरुषों में अग्रगण्य, पण्डितों में अग्रगण्य, विनता (अपनी माता) को आनन्द प्रदान करने वाले गरुड़ के समान, प्रणत पुरुषों को आनन्द देने वाला, (गरुड़ ने अपनी माता-विनता को आनन्दित किया था, राजा अपने आश्रित-विनत पुरुषों को आनन्दित करता था) धनुष के अग्रभाग से कुलपर्वतों के समान शत्रु समुदाय को नष्ट करने वाला, शूद्रक नाम का राजा था।

संस्कृतव्याख्या - अथ तत्रभवान् महाकविः बाणभट्टः कादम्बरीकथा-मारभते। तत्रादौ शूद्रकाख्यं राजानं वर्णयन्नाह यद् 'राजा शूद्रको नाम आसीत्'। 'सः राजा एवम् आसीत्' इति सम्प्रति कविस्तत्र राजानं विशिनष्टि-**अशेषनरपति-शिरःसमभ्यर्च्चितशासनः**=अशेषाः समस्ताः ये नरपतयः राजानः तेषां शिरोभिः उत्तमाङ्गैः समभ्यर्चितं सादरं स्वीकृतं शासनम् आदेशो यस्य सः तादृशः समस्ताः नृपतयः तस्य आज्ञां सादरं पालयन्ति स्म इत्याशयः; अतएव **अपरः**=अन्यः, **पाकशासनः**=पुरन्दरः, 'मघवा विडौजाः पाकशासनः' इत्यमरः, **इव**=उत्प्रेक्षायाम्, **चतुरुदधिमालमेखलायाः**=चत्वारश्च त उदधयश्च समुद्राश्चेति चतुरुदधयस् तेषाँ माला श्रेणी एव मेखला काञ्ची अवधिर्वा यस्याः तथाविधायाः, **भुवः**=वसुधायाः, **भर्ता**=स्वामी, **प्रतापानुरागावनतसमस्तसामन्तचक्रः**=प्रतापेन कोशदण्डतेजसा अनुरागेण प्रेम्णा च अवनतं नम्रीभूतं समस्तं सकलं सामन्तचक्रं सामन्तसमूहः यस्य स तादृशः, **चक्रवर्तिलक्षणोपेतः**=चक्रवर्ती सार्वभौमस्तस्य यानि लक्षणानि

सामुद्रिकशास्त्रवर्णितानि चिह्नानि तैः उपेतः युक्तः, पुनः कथम्भूतः सः **चक्रधरः**=विष्णुः, **इव**=यथा, **करकमलोपलक्ष्यमाणशङ्खचक्रलाञ्छनः**= करकमले पाणिपद्मदले उपलक्ष्यमाणम् अवलोक्यमानं, **शंखचक्रलाञ्छनं** =शंखचक्रचिंह्नं यस्य स तादृशः 'चिह्न' लक्ष्म च लक्षणम्' इत्यमरः **हर इव**=शिवो यथा इत्युपमा, **जितमन्मथः**=जितः वशीकृतः मन्मथः कामः येन सः, **हरपक्षे**–जितः पराजितः भस्मीकृतः कामदेवः येन सः, **गुह इव**=कार्तिकेयो यथा, **अप्रतिहतशक्तिः**=अप्रतिहता अकुण्ठिता शक्तिः प्रभावोत्साहमन्त्रजनितं सामर्थ्यं यस्य स तथोक्तः, **कमलयोनिः**= कमलं योनिः यस्य स कमलयोनिः विधाता, **इव**=यथा, **विमानीकृतराजहंस-मण्डलः**=विगतः पराजयेन विनष्टः मानोऽहङ्कारो यस्य तद्विमानं, विमानीकृतं राजहंसानां, नृपश्रेष्ठानां मंडलं समूहो येन स तादृशः, कमलयोनिपक्षे विमानीकृतं, देवयोनिकृतं राजहंसानां पक्षिविशेषाणां मण्डलं येन सः, **जलधिरिव** =समुद्र इव, जलानि धीयन्तेऽस्मिन्निति जलधिः, **लक्ष्मीप्रसूतिः**= लक्ष्म्याःपद्मायाः शोभायाः वा प्रसूतिरुत्पत्तिस्थानम् सागरमन्थनात् लक्ष्मीः समुत्पन्ना, राजापि शोभाशालित्वात् राजलक्ष्म्या आश्रयत्वात् च लक्ष्मीप्रसूतिः, **गङ्गाप्रवाह इव**=गङ्गायाः भगीरथ्याः प्रवाह ओघ इव, **भगीरथपथप्रवृत्तः**=भगीरथस्य एतदाख्यसूर्यवंशीयनृपतिविशेषस्य यः पन्थाः मार्गः तस्मिन् प्रवृत्तः=तत्परः, गङ्गाप्रवाहपक्षे–स्वपितृणामुद्धाराय कृतः यः स्वरथचक्रमार्गः तस्मिन् प्रवृत्तः, **रविरिव**=सूर्य इव, **प्रतिदिवसो-पजायमानोदयः**=प्रतिदिवसं प्रतिदिनम् उपजायमान उत्पद्यमान उदयः सम्पत्तेरुन्नतिः यस्य सः, **मेरुरिव**=सुमेरुगिरिरिव, **सकलोपजीव्यमानपादच्छायः**=सकलैः समस्तैरर्थद्दिवैर्लोकैश्च उपजीव्यमाना संसेव्यमाना पादयोः चरणयोः छाया कान्तिः यस्य सः, सुमेरुपक्षे=पादानां प्रत्यन्तपर्वतानां छाया आतपाभावोः यस्यः सः 'पादाः प्रत्यन्तपर्वताः', 'छाया सूर्यप्रिया कान्तिः प्रतिबिम्बमनातपः' इति चामरः, **दिग्गजइव**=दिङ्नागइव, 'ऐरावतः पुण्डरीको वामनः कुमुदोञ्जनः। पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः'। **इत्यमरः**, **अनवरतप्रवृत्तदानार्द्रीकृत-करः**=अनवरतं सततं प्रवृत्तं जातं यद्दानं मदजलं जलसहितं धनादिदानञ्च तेनार्द्रीकृतः क्लिन्नीकृतः करः शुण्डो हस्तश्च यस्य सः, 'मदो दानं प्रवृत्तिश्च' इत्यमरः, **महाश्चर्याणाम्**=अत्यन्तविस्मयोत्पादककार्याणाम्, **कर्ता**=कारकः **क्रतूनाम्**=यज्ञानाम् **आहर्ता**=अनुष्ठाता, **सर्वशास्त्राणाम्**=सकलवाङ् मयवेदादीनाम्, **आदर्शः**=दर्पणः 'दर्पणे मुकुरादशौ' इत्यमरः, यथा खलु मुकुरे संक्रान्ताः पदार्थाः समवलोक्यन्ते तथैव तस्मिन्नपि राजनि सर्वेषां शास्त्राणां छाया निरन्तराभ्यासवशाज्जनैः समवलोक्यन्ते,

कलानाम्=नृत्यगीतादिचतुष्षष्टिकलाविद्यानाम्, **उत्पत्तिः**=उत्पत्तिस्थानम् **गुणानाम्**=दयादाक्षिण्यादीनाम्, **कुलभवनं**=कुलक्रमागताश्रयस्थानम्, **काव्यामृतरसानाम्** =काव्यानां ये अमृरसाः सुधातुल्यरसास्तेषाम्, **आगमः**=उद्भवस्थानम्, **मित्रमण्डलस्य**=सखासमूहस्य **उदयशैलः**=समुन्नतेः स्थानाम् पक्षे मित्रमण्डलस्य सूर्यबिम्बस्य उदयशैलः, पूर्वाद्रिः, यथा दिवाकरः पूर्वाद्रौ उदयं प्राप्नोति तथा तस्य राज्ञो मित्रगणस्तदाश्रितोऽभ्युन्नतिं प्रापेति भावः, **अहितजनस्य**=शत्रुलोकस्य, **उत्पादकेतुः**= **धूमकेतुः**, **गोष्ठीबन्धानाम्**=साहित्यपरिषत्संयोजनानां, **प्रवर्त्तयिता**= प्रवर्त्तकः, **रसिकानाम्**=रसज्ञानाम्, **आश्रयः**=अवलम्बनस्थानम् **धनुष्मताम्**= धनुर्धारिणाम्, **प्रत्यादेशः**=प्रत्याख्यानकर्ता, **साहसिकानाम्**=हठविधायिनां मध्ये, **धौरेयः**=धुरन्धरः, **विदग्धानाम्**=पण्डितानां मध्ये, **अग्रणीः**=अग्रगण्यः, **वैनतेय इव**=गरुड इव, **विनतानन्दजननः**=विनतेभ्यः कृतप्रणामेभ्यः आनन्दस्य हर्षस्य जननः सम्पादकः, **गरुडपक्षे**=विनतायाः स्वजनन्याः आनन्दजननः आनन्दोत्पादकः, **वैन्य इव**=पृथुराज इव, **चापकोटिसमुत्सारितसकलारातिकुलाचलः**=चापः धनुः तस्य कोटिरग्रभागः तेन समुत्सारिताः विनाशिताः ये अरातयः शत्रवः एव कुलाचलाः कुलपर्वताः येन सः, कुलपर्वताश्च–महेन्द्रो मलयः सत्यः शुक्तिमानृक्षपर्वतः। विन्ध्यश्च पारियात्रश्च सप्तैते कुलपर्वताः॥ **वैन्यपक्षे**=चापकोट्या समुत्सारिता अरातय इव कुलाचलः येन सः। पुरा किल राजा पृथुः स्वधनुरग्रभागेन पर्वतान् उत्पाट्य पृथिवीं समीकृतवानिति पौराणिकी वार्तानुसन्धेया।

***टिप्पणी*–आसीत् राजा शूद्रको नाम**–'शूद्रक नाम का राजा था। मङ्गलाचरणादि के पश्चात् यहाँ से कादम्बरी 'कथामुख' प्रारम्भ होता है। यहाँ राजा शूद्रक के विशेषण दिये गये हैं। **समभ्यर्चितः**=सम्+अभि+अर्च्+क्त। **पाकशासन**=इन्द्र। पाकशासन इन्द्र को इसलिए कहते हैं क्योंकि उन्होने पाक नामक दैत्य का वध किया था। पाकं शासितवानिति पाकशासनः। 'शासनः पाकशासन' में शासन पद की आवृत्ति से **यमक** अलङ्कार है। **मेखला**=करधनी। **'चतुरुदधि..भर्ता'** यहाँ पृथ्वी तथा शूद्रक पर नायक और नायिका के व्यवहार का समारोप होने से **समासोक्ति** अलङ्कार है। **चक्रवर्तिलक्षणोपेतः**–राजा शूद्रक चक्रवर्ती के लक्षणों से युक्त था। चक्रवर्ती के लक्षणों के विषय में सामुद्रिकरहस्य में कहा गया है– **'**अतिरिक्तः करो यस्य ग्रथिताङ्गुलिको मृदुः। चापाङ्कु शाङ्कितः सोऽपि चक्रवर्ती भवेद ध्रुवम्॥'' **चक्रधरः**–विष्णु। हरः–शिव। हरति पापं यः सः हरः। यह कथा प्रसिद्ध है कि शिवजी ने अपने तीसरे नेत्र के द्वारा कामदेव को भस्म कर दिया था।

गुहः-कार्तिकेय। इन्हें देवताओं का सेनापति कहा गया है। **कमलयोनिः**-कमलं योनिर्यस्य सः जिसका उत्पत्ति स्थान कमल है अर्थात् ब्रह्मा। ब्रह्मा की उत्पत्ति भगवान् विष्णु की नाभि में स्थित कमल से मानी गयी है। **गङ्गाप्रवृत्तः**-इस प्रकार की पौराणिक कथा है कि राजा सगर ने अश्वमेध यज्ञ के लिए अश्व को छोड़ा था जिसको चुराकर देवराज इन्द्र ने पाताल में कपिल के आश्रम में बाँध दिया। उस अश्व का अन्वेषण करते हुए जब सगर के पुत्र पाताल पहुँचे तथा वहाँ अश्व को देखकर कपिल मुनि की भर्त्सना करने लगे तो कपिल मुनि ने उन्हें अपने क्रोध के द्वारा भस्म कर दिया। उनके प्रपौत्र भगीरथ ने उनके उद्धार के लिए गङ्गा को लाने के लिए तप किया। उनसे प्रसन्न होकर हिमालय से निकलकर पृथ्वी पर भगीरथ के रथचक्रविनिर्मित मार्ग पर चलती हुई गङ्गा ने पाताल में प्रवेश कर उनको तार दिया था। **उदयः**-(शूद्रक पक्ष में) उन्नति, (सूर्य पक्ष में) उगना। **पादः**-(राजा के पक्ष में) पैर, (सुमेरु के पक्ष में) प्रत्यन्तपर्वत, पहाड़ी। **छाया**-(राजा के पक्ष में) आश्रय, (सुमेरु के पक्ष में) धूप का अभाव। सुमेरु पर्वत के समीपस्थ पर्वतों की छाया में देव्रता विचरण करते हैं-ऐसी पौराणिक कथा है। साम्बपुराण में कहा भी गया है-'एकविंशत्यमी स्वर्गा निर्मिता मेरुमूर्धनि'। **दिग्गजः**-दिशाओं के रक्षक आठ हाथी माने जाते हैं जिनका उल्लेख संस्कृत टीका में किया गया है। **करः**-(राजा के पक्ष में) हाथ (दिग्गज के पक्ष में) सूंड। **दान**-(राजा के पक्ष में) धनादि दान (दिग्गज के पक्ष में) मद जल। **चक्रधर इव**-से लेकर **'दिग्गजकरः'** पर्यन्त **पूर्णोपमा** अलंकार है। **आहर्ता**-आ हृ+तृच्, अनुष्ठान करने वाला। **आगमः**-आ गम=घञ्, जन्मस्थान। **कर्ता...विदग्धानाम्** यहाँ एक राजा शूद्रक का विषयभेद से अनेक रूपों में उल्लेख किये जाने से उल्लेख अलंकार है। **मित्रमण्डलस्य**-में श्लेष अलंकार है। मित्र शब्द के दो अर्थ हैं (क) सुहृत् तथा (ख) सूर्य। **'उत्पातकेतुरहित-जनस्य'** में राजा पर उत्पातकेतु का आरोप होने से **रूपक अलंकार** है। उत्पातकेतु पुच्छल तारा को कहते हैं जिसके उदय होने पर अत्यधिक अनिष्ट की आशंका होती है। **प्रत्यादेश**-प्रति+आदिश्+घञ्। **धौरेयः**-धुरं वहति इति धुर+ढक्+एय। विशेष उत्तरदायित्व को संभालने वाला अग्रणी व्यक्ति 'धौरेय' कहलाता है। **वैनतेयः**-विनताया अपत्यं पुमान्विनता+ढक्-एय। विनता की पुरुष सन्तान अर्थात् गरुड़ पक्षी **विनतानन्दजननः**-(राजा के पक्ष में) विनम्र लोगों के लिए आनन्द उत्पन्न करने वाला, (गरुड़ के पक्ष में) विनता नामक अपनी माता को आनन्द देने वाला। **वैन्य.....कुलाचलः**-पौराणिक कथा है कि राजा पृथु ने पृथ्वी को समतल बनाने के लिए अपनी धनुष्कोटि से पर्वतों को उखाड़ डाला था। **'वैनतेय इव**

कुलाचलः' यहाँ **पूर्णोपमा** अलंकार है।

नाम्नैव यो निर्भिन्नारातिहृदयो विरचितनरसिंहरूपाडम्बरम्, एकविक्रमाक्रान्तसकलभुवनतलो विक्रमत्रयायासितं जहासेव वासुदेवम्। अतिचिरकाललग्नमतिक्रान्तकुनृपतिसहस्रसम्पर्ककलंकमिव क्षालयन्ती यस्य विमले कृपाणधाराजले चिरमुवास राजलक्ष्मीः।

हिन्दी अनुवाद–नाम मात्र से शत्रुओं का हृदय विदीर्ण करने वाला तथा अद्वितीय पराक्रम से समस्त पृथ्वी लोक को आक्रान्त करने वाला जो शूद्रक नृसिंहरूप का आडम्बर करने वाले तीन पाद विक्षेप से श्रान्त विष्णु भगवान् का मानो उपहास करता था। अत्यन्त चिरकाल से लगे हुए सहस्त्रों कुत्सित राजाओं के सम्पर्कजन्य कलंक को मानो प्रक्षालित करती हुई राजलक्ष्मी ने जिस शूद्रक की निर्मल कृपाणधारा रूपी जल में चिरकाल तक निवास किया।

संस्कृतव्याख्या - **यः**=शूद्रकः, **नाम्नैव**='शूद्रक' इति नामश्रवणमात्रेणैव **निर्भिन्नारातिहृदयः**=निर्भिन्नानि विदारितानि अरातीनां शत्रूणां हृदयानि वक्षांसि येन सः, **विरचितनरसिंहरूपाडम्बरम्**=विरचितः विनिर्मितः नरसिंहरूपस्य आडम्बर आटोपो येन सः, तम्, **एकविक्रमाक्रान्तसकलभुवनतलः**=एकेन अद्वितीयेन एव विक्रमेण पराक्रमेण आक्रान्तम् अधीनं कृतं सकलं समस्तं भुवनतलं विष्टपतलं येन सः तादृशः, **विक्रमत्रयायासितभुवनत्रयम्**–विक्रमः चरणन्यासः तस्य त्रयं त्रितयं तेन आयासितं खिन्नं कृतं भुवनत्रयं विष्टपं येन तं तथोक्तम्, **वासुदेवं**= विष्णुं, **जहासेव**=उपहसति स्मेव। 'विष्टपं भुवनत्रयम्' इत्यमरः। **अतिचिरकाललग्नम्**=अतिरिचकालो भूयान् समयः तेन लग्नं संयुक्तम्, **अतिक्रान्तकुनृपतिसहस्रसम्पर्ककलंकम्**=अतिक्रान्तं व्यतीतं यत् कुनृपतिसहस्रं–कुत्सितनृपतिसमूहः तस्य सम्पर्केण सम्बन्धेन यः कलंको दूषितलक्ष्म पापञ्च तं तथोक्तम् इवेत्युत्प्रेक्षायाम्, **क्षालयन्ती**=प्रक्षालयन्ती, **यस्य**=भूपतेः शूद्रकस्य, **विमले**=स्वच्छे, **कृपाणधाराजले**= खड्गधारारूपे जले, **चिरं**=बहुकालं यावत्, **राजलक्ष्मीः**=राजश्रीः, **उवास**=वसतिं चक्रे।

टिप्पणी - **नाम्नैव-वासुदेवम्**–आशय यह है कि राजा शूद्रक के नाम श्रवणमात्र से ही शत्रुओं के हृदय विदीर्ण हो जाते थे जबकि भगवान् विष्णु को भी अपने शत्रु हिरण्यकशिपु के वक्षःस्थल को विदीर्ण करने के लिए नृसिंह का रूप धारण करना पड़ा था। राजा शूद्रक ने अपने एक विक्रम (पराक्रम) से समस्त लोक को आक्रान्त कर दिया था परन्तु भगवान् विष्णु ने वामनावतार धारण करते हुए तीन विक्रम (पग) में भुवनों को नापा था अतएव मानो राजा शूद्रक विष्णु का

भी उपहास करता था। निर्भिन्न-निर्भिद्+क्त। **आक्रान्तम्**=आक्रम्+क्त। **जहास**=हस् धातु लिट् प्र० पु० ए० व०। यहाँ उपमानभूत वासुदेव से उपमेयभूत शूद्रक के उत्कर्ष के वर्णन के कारण **व्यतिरेक** अलंकार है तथा 'जहासेव वासुदेवम्' में **क्रियोत्प्रेक्षालंकार** है। दोनों का अङ्गाङ्गिभाव संकर। **अतिक्रान्त**=अतिक्रम्+क्त। **क्षालयन्ती**=क्षाल्+णिच्+शतृ+ङीप्। **उवास**-वस लिट् प्र० पु० ए० व०। **राजलक्ष्मीः**=राज्ञः लक्ष्मी=राजलक्ष्मीः (षष्ठी तत्पुरुष) लक्ष्मी-लक्ष्+ई, मुट् च=लक्ष्मीः, लक्ष्मी शब्द की व्युत्पत्ति इसप्रकार है-'लक्षयति पश्यति नीतिज्ञम् इति लक्ष्मीः'। यहाँ 'क्षालयन्तीव' में **क्रियोत्प्रेक्षालङ्कार**, कृपाणधाराजले में **रूपक**, दोनों का अङ्गाङ्गिभाव संकर।

यश्च मनसि धर्मेण, कोपे यमेन, प्रसादे धनदेन, प्रतापे वह्निना, भुजे भुवा, दृशि श्रिया, वाचि सरस्वत्या, मुखे शशिना, बले मरुता, प्रज्ञायां सुगुरुणा, रूपे मनसिजेन, तेजसि सवित्रा च वसता सर्वदेवमयस्य प्रकटितविश्वरूपाकृतेरनुकरोति स्म भगवतो नारायणस्य।

हिन्दी अनुवाद – जो राजा शूद्रक मन में (निवास-करते-हुए) धर्म से, क्रोध में (निवास करते हुए) यम से, प्रसन्नता में (निवास करते हुए) अग्नि से, बाहुदण्ड में (निवास करते हुए) पृथ्वी से, नेत्र में (निवास करते हुए) लक्ष्मी से, वाणी में (निवास करते हुए) सरस्वती से, मुख में (निवास करते हुए) चन्द्रमा से, पराक्रम में (निवास करते हुए) वायु से, बुद्धि में (निवास करते हुए) देवगुरु बृहस्पति से, सौन्दर्य में (निवास करते हुए) कामदेव से, तेज में (निवास करते हुए) सूर्य से, सर्वदेवात्मक, विश्वरूप प्रकट करने वाले भगवान् नारायण का अनुसरण करता था।

संस्कृतव्याख्या – **यः**=शूद्रकः, **च**=चकारोऽत्र किञ्चेत्यर्थे, **मनसि**=मानसे, **धर्मेण**=पुण्येन, **वसता**=निवासं कुर्वता, **कोपे**=क्रोधे, **यमेन**=धर्मराजेन, यम-राजवदपराधिनां दण्डदानात्, **प्रसादे**=अनुग्रहे, **धनदेन**=कुबेरेण, अनुग्रहे संजाते कुबेरवत् धनप्रदानात् **प्रतापे**=कोशदण्डजे तेजसि, **वह्निना**=अग्निना, समस्तारातिकुलसंतापकत्वात्, **भुजे**=बाहौ, **भुवा**=पृथिव्या, राजभारधारणसमर्थत्वात्, **दृशि**=लोचने, **श्रिया**=लक्ष्म्या विलोकनमात्रेण श्रियाः समुत्पत्तेः, **वाचि**=वचने **सरस्वत्या**=गीर्वाण्या, ''ब्राह्मी तु भारती भाषा गीर्वाग्वाणी सरस्वती'' इत्यमरः निरन्तरकाव्यनिर्माणात्, **मुखे**=आनने, **शशिना**=चन्द्रमसा, ''आननं लपनं मुखम्'' इत्यमरः चन्द्रवत्सकलजनानन्दकत्वात्, **बले**=शक्तौ, **मरुता**=वायुना अतिबलशालि-

त्वात्, **प्रज्ञायां**=मतौ, **सुरगुरुणा**=बृहस्पतिना, 'धी:प्रज्ञा शेमुषी मतिः', 'बृहस्पतिः सुराचार्यः' इत्यमरः, अनुपमबुद्धिशालित्वात्, **रूपे**=सौन्दर्य, **मनसिजेन**=कामदेवेन, मानिनीमानापहरणात्, **तेजसि**=प्रतापे, **सवित्रा**=सूर्येण, शत्रुभिर्दुर्निरीक्ष्यत्वात्, "तपनः सविता रविः" इत्यमरः, **एवं सर्वदेवमयस्य**=सर्वे च देवाश्च सर्वेदेवास्तत्स्वरूपः सर्वदेवमयस्तस्य तथोक्तस्य, अत्र 'प्राचुर्यविकारः प्राधान्यादिषु' इत्यनेनादिपदात्स्वरूपार्थेऽपि मयट् प्रत्ययो भवति, **च**=तथा, **प्रकटितविश्वरूपाकृतेः**=प्रकटिता प्रकाशिता विश्वरूपा त्रिजगत्स्वरूपा आकृतिः स्वरूपं येन सः तस्य, **भगवतो नारायणस्य**=महाविष्णोः, **अनुकरोति**=तत्समानतां भजते।

टिप्पणी-यश्च.....नारायणस्य' में 'यः' पद कर्ता है। तथा 'अनुकरोति' क्रिया है। 'धर्मेण आदि समस्त तृतीयान्त पदों का 'वसता' के साथ सम्बन्ध है। यहाँ शूद्रक को भगवान् विष्णु के समान बतलाया गया है। भगवान् विष्णु के समान विशेषताएँ हैं। अतएव उसे 'सर्वदेवमय' तथा 'विश्वरूपाकृति' विष्णु से उपमित किया गया है। **धनदेन**=धनं ददाति-धन+दा+क=धनदस्तेन। श्रिया-श्रयति हरि या सा श्रीः, तया; श्रि+क्विप् तथा दीर्घ। 'लक्ष्मीः सरस्वतीधात्रिवर्गसंपद्विभूतिशोभासु। उपकरणवेश-रचनाविधानेषु च श्रीरिति प्रथिता॥' **मनसिजेन**=मनसि जातः-मनसि+जन्+ड=मनसिजस्तेन। शशी-'शशी चन्द्रो हिमद्युतिः' इति शब्दार्णवः। '**सर्वदेवमय तथा विश्वरूपाकृति**' का प्रतिपादन गीता तथा श्रीमद्भागवत में किया गया है- "पश्यामि देवांस्तव देवे! देहे" तथा 'सरित्समुद्रांश्च हरेः शरीरं यत्किञ्चभूतं प्रणमेदन्यः'। **नारायणस्य**=नृणां समूहो नारं तस्य अयनं गतिः=नारायणस्तस्य, यहाँ 'कृञः प्रतियत्ने' सूत्र से कर्म में षष्ठी हुई है। 'नारायणस्तु केशवे' इति हैमः। **अनुकरोति**=अनु उपसर्ग पूर्वक कृ धातु लट् परस्मैपद प्र० पु० ए० व०। यहाँ अतीत के अर्थ में लट् लकार का प्रयोग हुआ है। यहाँ उपमावाचन पद के अभाव में आर्थी **उपमा** है।

यस्य च मदकलकरिकुम्भपीठपाटनमाचरता, लग्नस्थूलमुक्ताफलेन, दृढमुष्टिनिष्पीडननिष्ठ्यूतधाराजलविन्दुदन्तुरेणेव कृपाणेनाकृष्यमाणा, सुभटोःरकपाटविघटितकवचसहस्त्रान्धकारमध्यवर्तिनी करिकरटगलितमद जलासारदुर्दिनास्वाभिसारिकेव समरनिशासु समीपं सकृदाजगाम राजलक्ष्मीः।

हिन्दी अनुवाद-(राजा शूद्रक के पास राजलक्ष्मी अभिसारिका के समान एक बार ही आ गई) मद के कारण सुन्दर हाथियों के कुम्भस्थल को विदीर्ण करने वाले जिस राजा शूद्रक के समीप, लगे हुए बड़े-बड़े गजमौक्तिकों वाली,

सुदृढ़ मुष्टिका से निष्पीडन के कारण निकलती हुई धारारूपी जल से ऊँची नीची प्रतीत होने वाली तलवार से आकृष्ट की जाती हुई, तथा योद्धाओं के वक्षःस्थल रूपी कपाटों से भग्न किए गए सहस्रों कवच रूपी अन्धकार के मध्य निवास करने वाली (शत्रु की) राज्यलक्ष्मी हाथियों के गण्डस्थल से निकलने वाले मदजल की धारा रूप वर्षा के कारण उत्पन्न दुदिनों वाली युद्ध की रात्रियों में अभिसारिका के समान एक बार ही आ गई।

***संस्कृत-व्याख्या*-यस्य**=राज्ञः शूद्रकस्य, च इत्यस्य किञ्चेत्यर्थः, **समीपं**= अन्तिकम् **राजलक्ष्मीः, सकृत्**=एकवारम्, आजगाम इति वाक्यस्य सारांशः। **मदकलकरिकुम्भपीठपाटनमाचरता**=मदेन-मदजलेन कलानि मनोहराणि करिणां हस्तिनां यानि कुम्भपीटानि कुम्भप्रदेशाः तेषां पाटनं विदारणम् आचरता कुर्वता अतएव **लग्नस्थूलमुक्ताफलेन**=लग्नानि स्थूलानि विपुलानि मुक्ताफलानि गजमौक्तानि यस्मिन् तेन तथोक्तेन, **दृढमुष्टिनिष्पीडननिष्ठ्यूतधाराजलबिन्दुदन्तुरेण**=दृढमुष्टिना यन्निष्पीडनं धारणं तेन निष्ठ्यूताः निस्सारिताः याः धाराः निशितभागाः एव जलबिन्दवः जलकणपंक्तयः ताभिः दन्तुरेण विषमेण, **कृपाणेन**=खड्गेन, **आकृष्यमाणेव**=समन्तात् गृह्यमाणेव, **सुभटोरःकपाटविघटितकवचनहस्रान्धकारमध्यवर्तिनी**= सुभटाः योद्धारः तेषाम् उरांसि वक्षांसि एव कपाटानि तेभ्यो विघटितानि भग्नानि यानि कवचसहस्रसंख्यानि लौहकवचानि तानि एव श्यामवर्णतुल्यत्वात् अन्धकाराः तमांसि तेषां मध्यवर्तिनी अन्तः पातिनी राजलक्ष्मीः अरि-राजश्रीः, **करिकरटगलितमदजलसारदुर्दिनासु**=करिणां हस्तिनां करटानि गण्डस्थलानि तेभ्यो गलितं च्युतं यत् मदजलं दानवारि तस्य य आसारः तेन दुर्दिनम् मेघाच्छन्नेऽह्नि अन्धकारयुक्तं दिनं यासु तथोक्तासु, "मेघच्छन्नेऽह्नि दुर्दिनम्" इत्यमरः, **समरनिशासु**=समराः युद्धानि निशा रात्रयः इव तासु, **अभिसारिका**=गाढेऽन्धकारे दत्तसंकेता नायिका एव, समरनिशासु युद्धरात्रिषु, समीपं सकृद्, **राजलक्ष्मीः**=राजश्रीः, **आजगाम** =आगतवती।

***टिप्पणी* - 'यस्य समीपं सकृदाजगाम राजलक्ष्मीः'**=जिस शूद्रक के पास लक्ष्मी एक बार ही आ गयी थी, यह मुख्यवाक्य है। **करिकुम्भः**=करिणः कुम्भः(ष० त०)-हाथी का कुम्भस्थल। हाथी के सिर पर अवस्थित दो मांसपिण्ड कुम्भ कहलाते हैं। **पाटनम्**=पट्+ णिच्+ल्युट्। **निष्पीडन**=निस्+पीड्+ल्युट्=निचोड़ना। निष्ठ्यूतःनिष्ठिव्+क्त, ऊठ्=निकाला हुआ। **दन्तुरः**=दन्त+उरच्=ऊँचे दाँतो वाला। **अभिसारिका**-जो नायिका काम के वशीभूत हो नायक से अभिसार करने के

लिए जाए अथवा संकेत स्थान पर नायक को बुलाये उसे अभिसारिका नायिका कहते हैं। साहित्यदर्पण में-"अभिसारयते कान्तं या मन्मथवशंवदा। स्वयं वाऽभिसरत्येषा धीरैरुक्ताभिसारिका"॥"**आकृष्यमाणेव**" पद में **क्रियोत्प्रेक्षालंकार है।"उरः-कपाट,कवच-सहस्त्र"में रूपक** और **अभिसारिकेव में उपमालङ्कार** है। इन सभी का परस्पर अङ्गाङ्गिभाव सङ्कर है।

यस्य च हृदयस्थितानपि पतीन् दिधक्षु रिव प्रतापानलो वियोगिनीनामपि रिपुसुन्दरीणामन्तर्जनितदाहो दिवानिशं जज्वाल।

हिन्दी अनुवाद - (पति विनाश के कारण) विरहिणी शत्रु की स्त्रियों के अन्तःकरण दाह उत्पन्न करने वाली जिस शूद्रक की प्रतापाग्नि मानो हृदय में निवास करते हुए पतियों को भी भस्म करने की इच्छा से दिनरात जलती रहती है।

संस्कृतव्याख्या - **यस्य**=भूपतेः शूद्रकस्य, **प्रतापानलः**=प्रतापःकोषदण्डजं तेजः तदेव अनलो वह्निः, **वियोगिनीनामपि**=विरहणीनामपि, **रिपुसुन्दरीणाम्**=वैरिवनितानाम्, **अन्तर्जनितदाहः**=अन्तः=मनसि जनित उत्पादितः दाहो ज्वलनं येन सः तथोक्तः, **हृदयस्थितानपि**=अनवरतध्यानेन अन्तर्वर्तिनोऽपि, **पतीन्=भर्तॄन् दिधक्षुः**=दग्धुमिच्छुः, इव, **दिवानिशं**=रात्रिन्दिवम् **जज्वाल**=प्रदीप्तोऽभूत्।

टिप्पणी - यहाँ चकार "किञ्च" इस अर्थ में है। राजा शूद्रक ने युद्ध में शत्रुओं को समाप्त कर डाला था। जब मानो उसका प्रतापानल इसीलिए अत्यधिक प्रदीप्त हो रहा था कि वह शत्रु-स्त्रियों के हृदय में विद्यमान शत्रुओं को भी जला डाले। **दिधक्षुः**=दह+सन्+उ,-दग्धुमिक्षुः 'सनाशंसभिक्ष उः' से 'उ' प्रत्यय। **दाहः**-दह+घञ्। **जज्वाल**=ज्वल्+धातु लिट् प्र० पु० ए० व०।"**प्रतापानलः**" में केवल निरङ्ग रूपक अलङ्कार और "**दिधक्षुरिव**" में **क्रियोत्प्रेक्षालङ्कार** इन दोनों का परस्पर अङ्गाङ्गिभाव सङ्कर है।

यस्मिंश्च राजनि जितजगति परिपालयति महीं चित्रकर्मसु वर्णसङ्कराः, रतेषु केशग्रहाः, काव्येषु दृढबन्धाः, शास्त्रेषु चिन्ताः, स्वप्नेषु विप्रलम्भाः, छत्रेषु कनकदण्डाः, ध्वजेषु प्रकम्पाः, गीतेषु, रागविलसितानि, करिषु मदविकाराः, चापेषु गुणच्छेदाप्रे, गवाक्षेषु जालमार्गाः, शशिकृपाणकवचेषु कलङ्काः, रतिकलहेषु दूतप्रेषणानि, सार्यक्षेषु शून्यगृहा न प्रजानामासन्।

हिन्दी अनुवाद - विश्वजयी जिस नरेश (शूद्रक) के पृथ्वीपालन करते समय अर्थात् आलेखन क्रियाओं में (रक्तपीतादि) वर्णों का सम्मिश्रण होता था, कामक्रीडाओं में केश खींचा जाता था, काव्यों में दृढ़बन्ध अर्थात् क्लिष्ट पदरचनाएँ

होती थीं, सिद्धान्तों में चिन्तन होता था, स्वप्नदशाओं में वियोग होते थे, आतपत्रों (छत्रों) में सुवर्णघण्टियाँ होती थीं, पताकाओं में फरफराहट होती थी, गीतों में (वसन्त, धमाश्री प्रभृति शास्त्रीय एवं देशीय) रागों के प्रयोग होते थे, हाथियों में मदविकार होते थे, धनुषों में गुणच्छेद अर्थात् डोरियों का टूटना होता था, वातायनों में जालियाँ होती थीं, चन्द्रमा, कृपाण तथा कवचों में कलंक (दाग) होते थे, रतिक्रीडाघटित मनमुटावों में सन्देशहरों के गमन होते थे, खेलने के योग्य पाशों अर्थात् शतरंज प्रभृति द्यूतक्रीडाओं में निर्जन स्थान होते थे (किन्तु) प्रजाओं में ये सब नहीं थे।[१]

संस्कृतव्याख्या – अत्र कविः शूद्रकस्य आदर्शशासनं वर्णयति–यस्मिन् राजनि =महीपतौ शूद्रके, **जितजगति**=जितं जगत् येन तस्मिन् निर्जितसंसारे, **महीं**=भुवम्, **पालयति**=पालनं कुर्वति सति , अधोविन्यस्ताः विषयाः एतेषु स्थलेषु विद्यमाना अभूव न तु पुनः प्रजानामासन् इत्येतेन सर्वत्र सम्बन्धः। **चित्रकर्मसु**= आलेख्यनिर्माणेषु, **वर्णानां**=नीलपीतादीनं सङ्कराःपरस्परसम्मिश्रणम्, न तु प्रजानां सङ्कराः ब्राह्मणक्षत्रियादीनां वर्णसङ्कराः आसन्, **रतेषु**=मैथुनेषु **केशग्रहः**=कचाकर्षणानि न तु कलहेषु केशाकर्षणम् आसीत्, **काव्येषु**=कविकर्मसु, **दृढबन्धाः**=प्रगाढपद-रचनाः, न तु कारागारेषु रज्ज्वादिना दृढबवन्धा अपराधाभावात्। **शास्त्रेषु**= विविधविषयेषु, **चिन्ता**=चिन्तनम्, न तु सर्वसाधनानामभावात् प्रजासु कापि चिन्ता आसीत्। **स्वप्नेषु**=स्वप्नदशायाम्, **विप्रलम्भः**=दृष्टपदार्थानां झटिति तिरोधानात् वञ्चनाः, नु त अन्यकालेषु वियोगस्य अजायमानत्वात्, **छत्रेषु**=आतपत्रेषु, **कनकदंण्डाः**=सुवर्णनिर्मिताः दण्डाः तदा आसन्, न तु जनेषु अपराधाभावात्

---

१. प्रस्तुत अनुच्छेद में प्रत्येक वाक्य का एक-एक निषेधपक्ष भी है और प्रत्येक का सम्बन्ध प्रजा से है। क्रमशः उन्हें इस प्रकार समझना चाहिए-प्रजाओं में 'वर्णसङ्कर' अर्थात् प्रतिलोमविधि (जैसे ब्राह्मण की कन्या का वैश्य शूद्र या क्षत्रिय के साथ विवाह होना) से सन्तानोत्पति नहीं थीं, (प्रजाओं में) कलह आदि में केश नहीं खींचे जाते थे, (प्रजाओं में) चिन्ता विपत्ति नहीं थी, (प्रजाओं में) प्राणियों में असमय वियोग अर्थात् मृत्यु नहीं थी, (प्रजाओं में) दण्ड के रूप में स्वर्ण नहीं लिया जाता था, (प्रजाओं में) भयजनित कम्पन नहीं था, (प्रजाओं में) रागद्वेषादि का विस्तार नहीं था, (प्रजाओं में) गर्व की भावना नहीं थी, (प्रजाओं में) सद्गुणों का लोप नहीं था, (प्रजाओं में) षड्यन्त्र का भाव नहीं था, (प्रजाओं में) चारित्रिक पतन (कलङ्क) नहीं था, (प्रजाओं में) युद्धादि के निमित्त दूताचार नहीं था, (प्रजाओं में) निस्सन्ततिवश गृह शून्य नहीं थे।

दण्डरूपेण सुवर्णग्रहणम् आसीत् **ध्वजेरुषु**=पताकासु, **प्रकम्पाः**=प्रकर्षेणचाञ्चल्यानि, न तु जनचित्तेषु भयाभावात्, **गीतेषु**=गानेषु, **रागविलसितानि**=रागाः=वसन्तादिगरागाःशास्त्रीया धनाश्रीप्रभृतयोः देशीयाश्च तेषां विलसितानि व्यवहाराः, न तु जनेषु रागाः मात्सर्यादयः तेषां विलसितानि चेष्टितानि हननादिरूपाणि तादृक्-रागद्वेषाभावात्, 'रागः क्लेयशादिके रक्ते मात्सर्ये लोहितादिषु' इति त्रिकाण्डकोषः, **करिषु**=हस्तिषु, **मदविकाराः**=मदजलोत्पन्नाः विकृतयः, न तु जनेषु मदविकाराः अहंकारजन्याः विकृतयः दोषाः आसन् **चापेषु**=धनुषु, **गुणच्छेदाः**=गुणस्य मौर्वीरूपस्य रज्जोः कर्तनम् न तु जनेषु गुणानां दयादाक्षिण्यादीनां छेदाः विलोपाः, **गवाक्षेषु**=वातायनेषु, **जालमार्गाः**=वायो प्रवेशाय निर्मिताः जालिकाः, जलेषु जालमार्गः कूटकल्पनापद्धतयः न आसन् **शशिकृपाणकवचेषु**=शशी चन्द्रमाः कृपाणम् असिः कवचं लौहवर्म च एतेषा द्वन्द्वः शशि-कृपाण-कवचाः तेषु **कलङ्काः**=लाञ्छनानि आसन् शशिनः कलङ्को मृगलाञ्छनरूपः स्वाभाविकः, कृपाणकवचयोस्तु अधिकदिवसपर्यन्तं व्यवहारभावे मालिन्यरूपी कलङ्कः, जनेषु कुलमालिन्यादिहेतवो दुराचरणादिदूषितव्यवहाराः न, सदाचारशीलत्वात्, **रतिकलहेषु**= कामकेलिविनोदेषु, **दूतप्रेषणानि**=सन्देशहरसम्प्रेषणानि, न तु युद्धव्यापारेषु तदभावत् कुत्रचिदपि दूतप्रेषणस्य निष्प्रयोजनत्वात्, **सार्यक्षेषु**=सारयः खेलिन्यः अक्षाः, पाशकाः, तेषु गुटिकाक्षेत्रेष्वित्यर्थः **शून्यगृहाः**=गुटिकारहितकोष्ठकानि, न तु ग्रामेषु जनशून्याः गृहाः, सर्वविधोत्पीडनाभवात्।

टिप्पणी – **वर्णसङ्कराः**=वर्णानां सङ्करः, सम्+कृ+अप्=सङ्करः; (क) (चित्र निर्माण में) विभिन्न रंगों का सम्मिश्रण। (ख) ब्राह्मणक्षत्रिय आदि चार वर्णों में से किसी का अन्य के साथ सम्मिश्रण। **दृढबन्धः**=(क) समासयुक्त पदों की रचना (ख) दृढबन्ध (रस्सी आदि से)। **कनकदण्डाः**=(क) सोने का बेंत, (ख) दण्ड के रूप में सोना ग्रहण करना। **मदविकाराः**=(क) हाथी के पक्ष में-मदजल के कारण विकार आना। (ख) दूसरे पक्ष में अहंकार से उत्पन्न होने वाले विकार। **गुणच्छेदाः**=(क) धनुष पक्ष में प्रत्यंचा की डोरी कट जाना, (ख) दूसरे पक्ष में शौर्यादि गुणों का खंडन हो जाना। **सार्यच्छेषु**=सारि अर्थात् शतरञ्ज आदि में प्रयुक्त होने वाली गोट का स्थान। **शून्यगृहाः**=(क) गोट आदि के साथ रिक्त खाने, (ख) दूसरे पक्ष में-निर्जन भवन। यहाँ वर्णसङ्कराः से लेकर शून्यगृहाः तक **श्लेषानुप्राणित** आर्थीपरिसंख्या अलङ्कार है। दोनों के परस्पर निरपेक्ष होने से संसृष्टि हो जायेगी।

यस्य च परलोकाद्भयम्, अन्तः पुरिकाकुन्तलेषु भङ्गः, नूपरेषु मुखरता, विवाहेषु करग्रहणम्, अनवरतमखाग्निधूमेनाश्रुपातस्तुरंगेषु कशाभिघातो मकरध्वजे चापध्वनिरभूत्।

हिन्दी अनुवाद – जिस राजा शूद्रक को परलोक से भय था (अन्य कोई भय नहीं था), अन्तःपुर की स्त्रियों के केशों में घुँघरालापन था (स्वभाव में कुटिलता नहीं थी), नूपुरों में झङ्कार थी (लोक में वाचलता नहीं थी), विवाहों में पाणिग्रहण (संस्कार) होता था (कर-बलि या टैक्स नहीं लिया जाता था), निरन्तर यज्ञाग्नि के धूम से अश्रुपात होता था (शोकादि से अश्रुपात नहीं होता था), घोड़ों पर कोड़ों का प्रहार होता था (प्रजा में अपराध के कारण कोड़ों का प्रहार नहीं होता था-अपराध नहीं थे), कामदेव से सम्बन्धित धनुष की टङ्कार होती थी, (संग्राम के अभाव से सैनिकों में धनुष की टङ्कार नहीं होती थी)।

संस्कृतव्याख्या - **चकारोऽत्र**=किञ्चार्थे, **यस्य**=महीपतेः शूद्रकस्य, **परलोकात्**=जन्मान्तरादेव, **भयं**=भीतिः न तु शत्रुजनात् भयम्, अभूत्, **अन्तः-पुरिकाकुन्तलेषु**=अन्तःपुरे भवः अन्तःपुरिकाः तासाम् अन्तःपुरवासिनां कामिनीनां, **कुन्तलेषु**=अलकेषु, **भङ्गः**=कुटिलता, न तु युद्धेषु भङ्गः पराजयः, **नूपुरेषु**=हंसकेषु, **मुखरता**=शब्दायमानता, न तु लोकेषु मुखरता वाचालता, **विवाहेषु**=उपयमनेषु, **कर-ग्रहणं**=पाणिग्रहणं न तु प्रजानां करेण (टैक्सेन) दुःखदानम्, **अनवरतमखा-ग्निधूमेन**=अनवरतं निरन्तरं मखाग्निधूमेन कृतुवह्निधूमेन, अश्रुपातः नेत्रजलनिःसरणम् न तु शोकादिनाऽश्रुपातः, **तुरंगेषु**=अश्वेषु, **कशाभिघातः**=दण्डप्रहारः नान्यत्राऽपरा-धाभावात्, **मकरध्वजे**=कामदेवे, **चापध्वनिः**=चापस्य धनुषो ध्वनिःटंकारः, न तु सैनिकेषु संग्रामाभावात्।

टिप्पणी - "**परलोकाद् भयम्**" "भीत्रार्थानां भयहेतुः" से पञ्चमी। **कुन्तल**=बाल 'चिकुरःकुन्तलो बालः कचः केशः शिरोरुहः' इत्यमरः। **भङ्ग**=(क) बालों का घुँघरालापन **(ख)** दूसरे पक्ष में (स्वभाव की) कुटिलता। मुखरता-मुखं मुखव्यापारं कथनं राति, मुख=रा+क=मुखर, मुखर+तल्। **करग्रहणम्**=(क) विवाह में कर ग्रहण करना (ख) कर अर्थात् टैक्स लेना, यहाँ भी पहले की ही तरह आर्थी परिसंख्या अलंकार है। "मकरध्वजे चापध्वनिः" इस अंश में असम्बन्ध में सम्बन्ध रूप **अतिशयोक्ति** अलंकार है। दोनों के परस्पर निरपेक्ष होने से संसृष्टि हो जायेगी।

तस्य राज्ञः कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी त्रिभुवनप्रसव-

भूमिरिव विस्तीर्णा मज्जन्मालवविलासिनीकुचतटास्फालनजर्जरितोर्मिमालया जलावगाहनावतारितजयकुञ्जरकुम्भसिन्दूरसन्ध्यायमानसलिलयोन्मदकल-हंसकुलकोलाहलमुखरितकूलया वेत्रवत्या परिगता विदिशाभिधाना नगरी राजधान्यासीत्।

हिन्दी अनुवाद - कलिकाल के भय से पुञ्जीभूत कृतयुग का अनुकरण करने वाली, त्रिभुवन की उत्पत्तिस्थली सदृश विस्तीर्ण, स्नान करती हुई मालव प्रदेश की रमणियों के कुचतटों के आघात से छिन्न-भिन्न तरङ्गमालाओं वाली, जलविहार के लिए उतारे गए विजय-गजराजों के कुम्भ में लगे हुए सिन्दूर से सान्ध्यवेला के समान रक्तवर्ण जल वाली, तथा उन्मत्त राजहंस समूह के कोलाहल से शब्दायमान तट प्रदेश वाली वेत्रवती नदी से घिरी हुई विदिशा नाम की नगरी उस राजा शूद्रक की राजधानी थी।

संस्कृत-व्याख्या -**तस्य च**=महीपतेः शूद्रकस्य, **विदिशाभिधाना**=विदिशा अभिधानं नाम यस्याः सा विदिशाभिधाना राजधान्यासीदिति दूरपदेनान्वयः, तामेव विशेषयति-**कलिकालभयपुञ्जीभूतकृतयुगानुकारिणी**=कलिकालात् कलियुगात् यद्भयं भीतिः तस्मात् पुञ्जीभूतं राशिभूतं यत् कृतयुगं तद् अनुकर्तुंशीलं यस्याः सा तादृशी, **त्रिभुवनप्रसवभूमिः**=त्रयाणं भुवनानां समाहारः त्रिभुवनम्, तस्य प्रसवभूमिः जन्मस्थलम्, **इव**=उत्प्रेक्षायाम्, **विस्तीर्णा**=विस्तृता, **मज्जन्मालव-विलासिनीकुचतटास्फालनजर्जरितोर्मिमाला**=मज्जन्त्याःस्नानं कुर्वन्त्यः मालवविलासिन्यो मालवदेशीयसुन्दर्यः तासां कुचतटानि स्तनस्थलानि तेषाम् आस्फालनेन आघातेन जर्जरिताः चूर्णीकृता ऊर्मिमालाः तरंगपङ्क्तयो यस्याः सा तया, ''भङ्गस्तरङ्ग ऊर्मिर्वा स्त्रियां वीचिः'' इत्यमरः, ''माला तु पङ्क्तौ पुष्पादिदामनि'' इति हैमः, एतेन कचानाम् अतिकर्कशत्वं व्यंजयति। **जलावगाहनावतारितजय-कुञ्जरकुम्भसिन्दूरसन्ध्यायमानसलिलया**=जलं सलिलं तत्र अवगाहनाय अवलोडनाय अवतारिताः रक्षकैः प्रवेशिताः ये जयकुञ्जराः शत्रुदलनसमर्थगजाः तेषां कुम्भाः शिरः पिण्डाः तेषु शोभार्थमर्पितं यतं सिन्दूरं नागसम्भवं तेन सन्ध्यायमानं सन्ध्याकालवदाचरत् सलिलं जलं यस्याः तया, 'मतङ्गजो गजो नागः कुञ्जरो वारणः करी' इत्यमरः ''कुम्भौ तु पिण्डौ शिरसः'' ''सिन्दूरं नागसम्भवम्'' इति चामरः। ''सिन्दुरं तद्भेदे स्यात् सिन्दूरं रक्तचूर्णके'' इति मेदिनी। सन्ध्यायमानःम् इत्यत्र 'कर्तुःक्यङ्सलोपश्च' इत्यनेन 'क्यङ्प्रत्ययः'। **उन्मदकलहंसकुलकोलाहल-मुखरितकूलया**=उन्मदाः प्रमत्ताः ये कलहंसाः कादम्बाः तेषां यानि कुलानि तेषां

कोलाहलेन मुखरितं शब्दायमानीकृतं कूलं तटं यस्याः तया तथोक्तया, **वेत्रवत्या**=तदाख्यया नद्या, **परिगता**=परिवेष्टिता **विदिशाभिधाना नगरी**=राजधानी आसीत्।

टिप्पणी – **''तस्य च राज्ञः विदिशाभिधाना नगरी राजधान्यासीत्''** अर्थात् उस राजा की विदिशा नाम की नगरी राजधानी थी, यह प्रमुख वाक्य है। यहाँ प्रथमा एकवचनान्त स्त्रीलिङ्ग पद राजधानी के विशेषण हैं। मज्जन से लेकर कूलया तक ये तीनों पद तृतीयान्त स्त्रीलिङ्ग वेत्रवत्या के विशेषण हैं। **पूँजीभूत**= अभूततद्भाव में 'च्वि' प्रत्यय है। **त्रिभुवनम्**=त्रयाणां भुवनानां समाहारः (द्विगु समास)। **'कलिअनुकारिणी'**–इससे यह अत्यधिक पुण्य स्थान है यह व्यञ्जित होता है, **विलासिनी**=सुन्दर रमणी। **मुखरीकृतः**=गुञ्जायमान,। ध्वनियुक्त किया हुआ। **अभिधान**=नामवाली अभि+धा+ल्युट् अभिधानम्। 'आख्याह्वेऽभिधानं च नामधेयं च नाम च' इत्यमरः। 'पुञ्जीभूतत्वं' में **उत्प्रेक्षा** अलंकार है। आर्थी **उपमालङ्कार** है त्रिभुवन आदि के विशेषण में **द्रव्योत्प्रेक्षालङ्कार** है, कुचतट आस्फालन के द्वारा तरङ्गमाला का जर्जरितत्व के असम्बन्ध होने पर भी उसके सम्बन्ध के प्रतिपादन से **अतिशयोक्ति** अलंकार है और संन्ध्यायमान यहाँ **व्यंग्योपमा** अलंकार है। इन सभी की परस्पर निरपेक्षभाव से स्थिति होने के कारण तिलतण्डुल के समान संसृष्टि है।

स तस्याञ्च विजिताशेषभुवनमण्डलतया विगतराज्यचिन्ताभारनिर्वृत्तः, द्वीपान्तरागतानेकभूमिपालमौलिमालालालितचरणयुगलो वलयमिव लीलया भुजेन भुवनभारमुद्वहन्, अमरगुरुमपि प्रज्ञयोपहसद्भिरनेकुलक्रमागतैरस-कृदालोचितनीतिशास्त्रनिर्मलमनोभिरलुब्धैः स्निग्धैः प्रबुद्धैश्चामात्यैः परिवृतः, समानवयोविद्यालङ्कारैरनेकमूर्धाभिषिक्तपार्थिवकुलोदगतैरखिलक लाकलापा-लोचनकठोरमतिभिरतिप्रगल्भैः-कालविद्भिःप्रेमानुरक्तहृदयैरग्राम्यपरिहास-कुशलैरिङ्गिताकारवेदिभिः काव्यनाटकाख्यानकाख्यायिकालेख्य-व्याख्यानादिक्रियानिपुणैरतिकठिनपीवरस्कन्धोरुबाहुभिरसकृदवदलित-समदरिपुगजघटापीठबन्धैः, केसरिकिशोरकैरिव विक्रमैकरसैरपि विनय-व्यवहारिभिरात्मनः प्रतिबिम्बैरिव राजपुत्रैः सह रममाणः प्रथमे वयसि सुखमतिचिरमुवास।

हिन्दी अनुवाद – (वह राजा शूद्रक) उस विदिशा नगरी में, समस्त भूमण्डल को अधीन करने के कारण राज्य के चिन्ताभार से रहित होने से निश्चिन्त, दूसरे

द्वीपों से आए हुए अनेक राजाओं के शिर की मालाओं से संस्पृष्ट चरणयुगल वाला, अल्पप्रयास से ही कङ्कण के समान पृथ्वी के भार को अपनी भुजा से वहन करता हुआ, बुद्धि से देवगुरु बृहस्पति का भी उपहार करने वाले, कुलपरम्परा से आए हुए, बारम्बार नीतिशास्त्र का अनुशीलन करने के कारण निर्मल मन वाले, लोभरहित प्रेमी, एवं विद्वान् मन्त्रियों से घिरा हुआ, समान आयु, विद्या एवं आभूषणों वाले, अनेक अभिषिक्त राजाओं के वंश से उत्पन्न, सम्पूर्ण कला समूह के विमर्श के कारण परिपक्व बुद्धिवाले, अत्यन्त प्रतिभाशाली, समय को जानने वाले, प्रेम के कारण (राजा शूद्रक में) आसक्त हृदय वाले, शिष्ट परिहास में कुशल, सङ्केत तथा आकृति को जानने वाले, काव्यनाटक-आख्यान, आख्यायिका चित्रकाल, तथा व्याख्यान आदि कार्यों में निपुण, अत्यन्त कठोर एवं पुष्ट, स्कन्ध, जङ्घा और भुजाओं वाले, शत्रुओं के मतवाले हाथियों के आसनों को अनेकबार मर्दित करने वाले, सिंह के शावकों के समान पराक्रम में अद्वितीय आनन्द से मुक्त होने पर भी विनयपूर्वक व्यवहार करने वाले, अपने प्रतिबिम्ब के समान राजकुमारों के साथ क्रीड़ा करता हुआ वह राजा शूद्रक युवावस्था में बहुत दिनों तक सुखपूर्वक रहा।

संस्कृत व्याख्या - **सः राजा शूद्रकः तस्यां**=विदिशानगर्यां **सुखम् अतिचिरम् उवास इति** दूरपदेनान्वयः। **विजिताशेषभुवनमण्डलतया**=विजितानि स्वाधीनीकृतानि अशेषाणि सकलानि भुवनमण्डलानि चतुर्दशभुवनानि येन तस्य भावः तत्ता तया, **विगतराज्यचिन्ताभारः तेन निर्वृतः**=सुनिश्चितः, **द्वीपान्तरागता-नेकभूमिपालमौलिमालालालितचरणयुगलः**=अन्ये द्वीपाः द्वीपान्तराः, तेभ्य आगताः समायाताः ये अनेके भूमिपालाः राजानः तेषां मौलयो मुकुटानि शिरांसि वा तेषां मालाः स्रजः श्रेणयो वा ताभिर्लालितं सादरं संस्पृष्टं चरणयुगलं पादयुग्मं यस्य सः, **वलयमिव**=कटकमिव। **लीलया**=अनायासेन। **भुजेन**=बाहुना, **भुवनभारं**=भुवनस्य जगतः भारं विविधं, **उद्वहन्**=धारयन् **प्रज्ञया**=धिया, **अमरगुरुमपि**=बृहस्पतिमपि, **उपहसद्भिः**=उपहासं कुर्वद्भिः, **अनेककुलक्रमागतैः**=अनेकैः कुलपरम्परया प्राप्तैः, **असकृदालोचितनीतिशास्त्रनिर्मलमनोभिः**=असकृद् अनेकवारम् आलोचितैः अनुशीलितैः नीतिशास्त्रैः नृपोचिताचारबोधकैः ग्रन्थैः निर्मलानि स्वच्छीकृतानि मनांसि येषां तैः अलुब्धैः लोभरहितैः, **स्निग्धैः**=वत्सलैः, 'स्निग्धस्तु वत्सलः' इत्यमरः, **प्रबुद्धैः**=विद्वद्भिः, **अमात्यैः**=मन्त्रिभिः अमा सह समीपे "अमा सह समीपे च" इत्यमरः वर्तन्ते इति अमात्याः तैः। **समानवयोविद्या-लंकारैः**=समानानि सदृशानि वयोऽवस्थाविशेषः विद्याः चतुर्दशविद्याः अलंकाराः

आभूषणानि च येषां तैः, **अनेकमूर्धाभिषिक्तपार्थिवकुलोद्गतैः**=अनेके बहवो ये मूर्धाभिषिक्ताः कृतराज्याभिषेकाः पार्थिवाः राजानः तेषां कुलेभ्यः वंशेभ्यः उद्गतैः समुत्पन्नैः, **अखिलकलाकलापालोचनकठोरमतिभिः**=अखिलानां समग्राणां कलानां नृत्यगीतादीनां कलापस्य समुदायस्य आलोचनेन विमर्शेन कठोराः परिपक्वाः मतयो धियो येषां तैः, **अतिप्रगल्भैः**=अतिप्रतिभान्वितैः, ''प्रगल्भः प्रतिभान्वितः'' इत्यमरः , **कालविद्भिः**=अवसरज्ञैः, **प्रेमानुरक्तहृदयैः**=प्रेम्णा अनुरक्तम् आसक्तं हृदयं येषाँ तैः, **अग्राम्यपरिहासकुशलैः**=अग्राम्यो नागरिको यः परिहासो नर्मवचोविलासः तस्मिन् कुशलैः चतुरैः। **इंगिताकारवेदिभिः**=इंगितं चेष्टितम् आकारोऽवयवसंस्थानं तौ विदन्ति जानन्ति इत्येवं शीलास्तैः, **काव्यनाटकाख्यानकाख्यायिकालेख्यव्याख्यानादिक्रियानिपुणैः**=काव्यं रसात्मकं वाक्यं नाटकं रूपकविशेषः अवस्थानुकृतिरिति यावत्, आख्यानकानि चूर्णकानि आख्यायिका गद्यकाव्यविशेषः, आलेख्यानि चित्रनिर्माणानि, व्याख्यानानि भाषणानि इत्यादिका याः क्रियाः कार्याणि तासु निपुणैः निष्णातैः, ''निष्णातो निपुणो दक्षः'' इत्यमरः। **अतिकठिनपीवरस्कन्धोरुबाहुभिः**=अतिकठिनाः अतिकठोराः पीवराः पुष्टाश्च स्कन्धा अंसाः उरव जानुपरिभागाः बाहवश्च येषां तथाविधैः **असकृदवदलितसमदरिपुगजघटापीठबन्धैः**=असकृद् मुहुर्मुहुः अवदलिताः विमर्दिताः समदाः मदयुक्ताः याः रिपुगजघटाः शत्रुकरिसमूहाः ता एव पीठबन्धाः पृष्ठबद्धानि आसनानि यैः तैः। **केसरिकिशोरकैः**=केसरिणां किशोरकैः शिशुभिः, **इव**=उपमायाम्, **विक्रमैकरसैरपि**=विक्रमे पराक्रमे एकःअनन्यः रसः येषां तैः, तथाविधैरपि, **विनयव्यहारिभिः**=विनयेन सारल्येन व्यवहारो वृत्तिरस्ति, येषां तैः एतेन सामर्थ्ये सत्यपि विनयशीलता सूचिता। **आत्मनः**=स्वस्य, **प्रतिबिम्बैरिव**=प्रतिकृतिभिरिव, **राजपुत्रैः**=राजकुमारैः, **सह**= साकम्,**रममाणः**=रमणं कुर्वाणः, प्रथमे **वयसि**=यौवनारम्भे, **सुखमतिचरमुवास**= सानन्दं बहुकालपर्य्यन्तं वासमकरोत्।

टिप्पणी - **'स तस्यां सुखमतिचिरमुवास'** अर्थात् वह राजा उस नगरी में बहुत दिनों तक सुखपूर्वक निवास करता रहा। यह मुख्य वाक्य है। **द्वीप**=द्वीप सात हैं - जम्बु, प्लक्ष, शाल्मली, कुश, क्रौञ्च, शाक, पुष्कर। ये सातों द्वीप लवण, इक्ष, सुर, सर्पि, दधि, दुग्ध एवं जल इन सात समुद्रों से व्याप्त हैं। **मौलि**-(क)शिर (ख) मुकुट। माला-(क) रत्नमालाएँ, (ख) पंक्तियाँ। वलय=कंगन। **उद्वहद्**=उद्वह् +शतृ=धारणा करता हुआ। **उपहसद्भिः**=उप+हस+शतृ, तृ.न.व.। अमात्य= देशकाल-प्रतिज्ञाता ह्यामात्य इति कथ्यते''। अर्थात् देश और काल के ज्ञाता को

अमात्य कहते हैं। **काव्यं-कवेर्भावः**=काव्यम्,कवि+ष्यञ्। ''वाक्यं रसात्मकं काव्यम्''-साहित्यदर्पण चूर्णक-''अनाविद्धललितं पदं चूर्णकम्'' आचार्य वामानः। स्निग्धैः-स्निह+क्त, तृ० ब० व०। **आलेख्यम्**-आ+लिख्+ण्यत्, पदरचना। **पीवरः**-मोटा, पुष्ट। **अवदलित**-अव+दल्+क्त, मर्दित। **राजपुत्रैः सह**-'सहयुक्तेऽप्रधाने' से तृतीया। **रममाणः**-रम्+शानच्, रमण करता हुआ। **उवास-वस्** धातु लिट् प्र० पु० ए० व।' वलयमिव में **उपमालंकार**। **'अमरगुरुमपि प्रज्ञयोपहसद्भिः'** में **आर्थी उपमा। ''रिपुगजघटापीठबन्धैः'' में रूपक 'केसरिकिशौरकैः'** तथा **प्रतिबिम्बं मे में वाच्योपमालंकार**। इनकी निरपेक्ष स्थिति होने से संसृष्टि है।

तस्य चातिविजिगीषुतया महासत्त्वतया च तृणमिव लघुवृत्ति स्त्रैणमाकलयतः प्रथमे वयसि वर्तमानस्यापि रूपवतोऽपि सन्तानार्थिभिरमात्यैरपेक्षितस्यापि सुरतसुखस्योपरि द्वेष इवासीत्।

हिन्दी अनुवाद - अत्यधिक विजय की इच्छा से तथा शौर्याधिक्य के कारण युवावस्था में विद्यमान होने पर भी, रूपवान् होने पर भी, सन्तान चाहने वाले मन्त्रियों के द्वारा वाञ्छित होने पर भी तुच्छ प्रकृति वाली स्त्री समूह को तृण के समान गिनने वाले उस राजा शूद्रक को सूरत सुख में मानों द्वेषभाव था।

संस्कृतव्याख्या - **तस्य च**=राज्ञः शूद्रकस्य, **अतिविजिगीषुतया**=अतिशयेन विजेतुमिच्छुः विजिगीषुः तस्य भावस्तत्ता तया अत्यधिकं विजयेच्छुकतया। **महासत्त्वतया**=महत्सत्त्वमतिशायिधैर्यं यस्य यः तस्य भावस्तत्ता तया च। **तृणमिव**=घासमिव, **लघुवृत्ति**=लध्वी निःसारा वृत्तिः व्यवहारो यस्य तत्, **स्त्रैणं**=स्त्रीसमूहम्, **आकलयतः**=गणयतः, **प्रथमे वयसि**=युवावस्थायाम्, **वर्त्तमानस्यापि**=स्थितस्यापि, **रूपवतोऽपि**=परमसौन्दर्यवतोऽपि सन्तानार्थिभिः=सन्तानमपत्यं तदेवार्थः प्रयोजनमस्ति येषां तैः, **अमात्यैः**=मन्त्रिभिः, **अपेक्षितस्यापि**=वाञ्छितस्यापि, **सुरतसुखस्य**=रति-क्रियानन्दस्य, उपरि द्वेषः=मत्सरः, **इवासीत्**।

टिप्पणी - **विजिगीषुः**-विजेतुमिच्छुः-विजि+सन्+उ, विजय की इच्छा रखने वाला। 'सनाशंसभिक्ष उः' से 'उ' प्रत्यय। **स्त्रैणम्**=स्त्रीणां समूहः-स्त्री+नञ् स्त्रियों का समूह। ''स्त्रीपुंसाभ्यां नञ्स्नञौभवनात्'' से 'नञ्' प्रत्यय। **आकलयतः**-आकल् (गतौ संख्याने च) णिच्+शतृ, गिनते हुए, मानते हुए। राजा शूद्रक ने स्त्रीसमूह को तिनके के समान माना। कहा भी गया है-''**आसमाप्तजिगीषस्य स्त्रीचिन्ता का मनस्विनः। अनाक्रम्य जगत्कृत्स्नं नो संध्यां भजते रविः।**'' यहाँ सुरतसुख के प्रति द्वेष के हेतु न होने पर भी उसकी उत्पत्ति से क्या यहाँ **विभावना**

नामक अलङ्कार है। अथवा तारुण्य, कामिनी आदि सुरत के कारणों के रहते हुए भी सुरताऽभाव होने से क्या विशेषोक्ति नामक अलङ्कार है? इस प्रकार इन दोनों का **सन्देहसङ्कर** है। 'सोऽयं तृणमिव' में **उपमालङ्कार** है।

सत्यपि रूपविलासोपहसितरतिविभ्रमे लावण्यवति विनयवत्यन्वयवति हृदयहारिणि चावरोधजने, स कदाचिदनवरतदोलायमानरत्नवलयो घर्घरिकास्फालनप्रकम्पझणझणायमानमणिकर्णपूरः, स्वयमारब्धमृदंगवाद्यसङ्गीतकप्रसंगेन कदाचिदविरलविमुक्तशरासारशून्यीकृतकाननो मृगयाव्यापारेण, कदाचिदाबद्धविदग्धमण्डलः काव्यप्रबन्धरचनेन, कदाचिच्छास्त्रालापेन, कदाचिदाख्यानकाख्यायिकेतिहासपुराणाकर्णनेन, कदाचिदालेख्यविनोदेन, कदाचिद्वीणया, कदाचिद्दर्शनागतमुनिजनचरणशुश्रूषया, कदाचिदक्षरच्युतकमात्राच्युतकबिन्दुमतीगूढचतुर्थपाद-प्रहेलिकाप्रदानादिभिः, वनितासम्भोगसुखपराङ् मुखः सुहृत्परिवृतो दिवसमनैषीत्। यथैव च दिवसमेवमारब्धविविधक्रीडा-परिहासचतुरैः सुहृद्भिरुपेतो निशामनैषीत्।

हिन्दी अनुवाद - रूप एवं भावभङ्गी से रति के विलासों का उपहास करने वाली, लावण्ययुक्त, विनम्र, कुलीन एवं हृदय को हरण करने वाली अतःपुरवर्तिनी रानियों के होने पर भी, वह राजा शूद्रक कभी अनवरत हिलाए जाते हुए रत्नजटित कङ्कण वाला, घर्घरिका वाद्यविशेष के बजाने से उत्पन्न शिर के कम्पन के कारण 'झन्-झन्' जैसी ध्वनि करने वाले मणिखचित कर्ण भूषण वाला, स्वयमेव मृदङ्गवादन का प्रारम्भ करके 'संगीतक' व्यापार से (दिन व्यतीत करता था), कभी निरन्तर छोड़े गए बाणों की वर्षा से वन को (हिंसक जंतुओं से) शून्य करके शिकार के व्यापार से (दिन व्यतीत करता था), कभी विद्वानों की गोष्ठी आयोजित करके काव्य प्रबन्ध के रचना व्यापार से (दिन व्यतीत करता था), कभी शास्त्रालाप से, कभी आख्यानक आख्यायिका, इतिहास एवं पुराणों के श्रवण के व्यापार से (दिन व्यतीत करता था), कभी चित्रकर्म के मनोविनोद से, कभी वीणावादन से, कभी दर्शन के लिए आए हुए मुनिजनों की चरण शुश्रूषा से, कभी अक्षरच्युतक, मात्राच्युतक बिन्दुमती, गूढचतुर्थपाद, एवं प्रहेलिका प्रदान के द्वारा, रमणियों के सम्भोग सुख से पराङ्मुख, मित्रों से घिरा हुआ दिन व्यतीत करता था। और जिस प्रकार दिन (व्यतीत करता था) उसी प्रकार वह विविध क्रीड़ाओं के परिहास में चतुर मित्रों से युक्त रात्रि व्यतीत करता था।

संस्कृतव्याख्या – सुरतसुखविद्वेषमुपपादायितुमन्यविधकार्यासक्तिमुपपादयति **रूपविलासोपहसितरतिविभ्रमे**=रूपं सौन्दर्यं, विलासः स्त्रीणां भावविशेषः ताभ्याम् उपहसितः उपहासेन तिरस्कृतः रतेः कामदेवपत्न्याः विभ्रमो विलासो येन सः तस्मिन्। **लावण्यवति**=सौन्दर्यशालिनि, **विनयवति**=विनययुक्ते, **अन्वयवति**= अन्वयः कुलमस्यास्तीति तस्मिन् कुलीने **हृदयहारिणि**=मनोहारिणि च, **अवरोधजहने**=अन्तःपुरयुवतिजने सत्यपि, 'स राजा शुद्रको निशामनैषीत्' इति दूरेणान्वयः। **स**=राजाशूद्रकः, **कदाचित्**=जातु, **अनवरतदोलायमानरत्नविलयः**= अनवरतं निरन्तरं दोलायमाने स्पन्दमाने रत्नमयकङ्कणद्वयं यस्य सः, **घर्घरिकास्फालनप्रकम्पझणझणायमानमणिकर्णपूरः**=घर्घरिकायाःवाद्यविशेषस्य आस्फालनेन वादनेन यः प्रकम्पःकम्पनं तेन झणझणायमानौ झणझणेति शब्दं कुर्वाणौ मणिकर्णपूरौ रत्नजटितकर्णभूषणे यस्य सः, **स्वयमारब्धमृदङ्गवाद्यः**=स्वयमात्मनैव आरब्धं कृतं मृदङ्गवद् वाद्यं वादित्रं येन सः, **सङ्गीतकप्रसङ्गेन**=सङ्गीतकं गीतनृत्यवाद्यत्रयं तस्य प्रसङ्गेन सम्बन्धेन, "गीतं नृत्यं च वाद्यं च त्रयं सङ्गीतमुच्यते"। इति सङ्गीतरत्नाकरे। **कदाचित् अविरलविमुक्तशरासारशून्यीकृतकाननः**=अविरलं सान्द्रं विमुक्ताः क्षिप्ताः ये शराः बाणाः तेषाम् आसारेण धारासम्पातेन शून्यीकृतं हिंस्रजन्तुरिक्तीकृतं काननं वनं येन सः, **मृगयाव्यापारेण**=आखेटक्रियया, **कदाचित्**= पुनः, **आबद्धविदग्धमण्डलः**=आबद्धम् अनुष्ठितं विदग्धानां पण्डितानां मण्डलं समूहो येन सः, **काव्यप्रबन्धरचनेन**=काव्यकथानिर्माणेन, **कदाचिच्छास्त्रालापेन**= शास्त्रसंलापेनः, 'आपृच्छालापसंलापः' इत्यमरः। **कदाचित् आख्यानकाख्यायिकेतिहासपुराणाकर्णनेन**=आख्यानकं स्फुटकथा, आख्यायिका गद्यकाव्यविशेषः, इतिहासः पुरावृत्तं, पुराणं पञ्चलक्षणात्मकं भागवतादिः तेषाम् आकर्णनेन श्रवणेन, **कदाचित् आलेख्यविनोदेन**=आलेख्यं चित्रनिर्माणं तस्य विनोदेन, तद्दर्शनानन्देन **कदाचित्वीणया**=वीणावदनेन श्रवणेन वा, **कदाचित् दर्शनागतमुनिजनचरणशुश्रूषया**=दर्शनार्थं विलोकनार्थम् आगता आयाता ये मुनिजनाः साधुलोकास्तेषां चरणशुश्रूषया पादसेवनया, **कदाचित् अक्षरच्युतकमात्राच्युतकविन्दुमतीगूढचतुर्थपादप्रहेलिकाप्रदानादिभिः**=अक्षरस्य अकारादिवर्णस्य च्युतिर्यत्र तदक्षरच्युतकम्, मात्राच्युतं बिन्दुमती चित्रकाव्यभेदविशेषः, गूढचतुर्थपादं गूढो गुह्यः चतुर्थः पादः चरणो यस्य तत् प्रहेलिका चित्रकाव्यभेदविशेषः 'पहेली' इति भाषायाम्, एतेषां प्रदानम् उत्तरप्राप्तये अन्येभ्यः समर्पणम् आदिपदात् प्रहेलिकादीनां स्वेन निर्माणैश्च, **वनितासम्भोगपराङ्मखः**=वनितानाँ नारीणां यः सम्भोग उपभोगः तज्जन्यं

यत्सुखं तस्मात् पराङ्मुखो विमुखः, **सुहृत्परिवृत**=सूहृद्भिः मित्रैः परिवृतः परिवेष्टितः, **दिवसं**=दिनम् **अनैषीत्**=निनाय **यथैव**=येन प्रकारेणैव, **दिवसं**=वासरम् अनैषीत्, **एवं**=तथैव, **आरब्धविविधक्रीडापरिहासचतुरैः**=आरब्धाः प्रवर्तिताः, विविधाः नानाप्रकाराः क्रीडापरिहासाः खेलोपहासाः तेषु चतुरैःकुशलैः, **सुहृद्भिः**=मित्रैः, **उपेतः**=संयुक्तः, **निशां**=रात्रिम्, **अनैषीत्**=अगमयत्।

टिप्पणी – **विलास** –स्त्रियों का हावभाव, जिसमें दृष्टि धीर, गति विचित्र तथा मुस्कान से युक्त वचन हों उसे विलास कहा जाता है। 'धीरा दृष्टिर्गतिश्चित्रा विलासे सस्मितं वचः' **अन्वयवित**-अन्वयः कुलमस्यास्तीति तस्मिन्-'अन्वय' शब्द से 'तदस्यास्त्यस्मिन्निति मतुप्' से मतुप् प्रत्यय। **अवरोधः**-अवरुध्+घञ्-रनिवास। 'स्त्र्यगारं भूभुजामन्तः पुरं स्यादवरोधनम्' इत्यमरः। **दोलायमान** – दुल् (उत्क्षेपे)+ णिच्+शानच्, हिलता हुआ। घर्घरिका-एक विशेष प्रकार का बाजा। **सङ्गीतक**-गीत, नृत्य एवं वाद्य ये तीनों, सम्मिलितरूप में सङ्गीतक कहलाते हैं- 'गीतं नृत्तं च वाद्यं च त्रयं सगीतमुच्यते'। **शरासारः** – बाणों की लगातार वर्षा। **विदग्ध**= पण्डितनज अथवा रसिक। काव्यम्-कवेर्भावः कर्म वा काव्यम्; 'वाक्यं रसात्मकं काव्यम्'-साहित्यदर्पण। **आलापः**- आलप्+घञ्: बातचीत। आख्यायिका -अलङ्कारशास्त्रियों ने गद्यकाव्य के दो भेद किए हैं-कथा तथा आख्यायिका आख्यायिका का लक्षण-''**आख्यायिका कथावत्स्यात्कवेर्वंशादिकीर्तनम्। अस्यामन्यकवीनां च वृत्तं पद्यं क्वचित् क्वचित्॥ कथांशानां व्यवच्छेद आश्वास इति कथ्यते। आर्यावक्त्रापवक्त्राणां छन्दसा येन केनचित्॥ अन्यापदेशेनो-श्वासमुखे भाव्यर्थसूचनम्। पुराण-पुराण की परिभाषा-'सर्गश्च प्रतिसर्गश्च वंशो मन्वन्तराणि च। वंशानुचरितं चैव पुराणं पञ्चलक्षणम्॥'' आलेख्यम्**-आलिख्+ण्यत्, चित्ररचना या चित्र। अक्षरच्युतकम्-इसमें पद्य से एक अक्षर निकाल देने पर अर्थ बदल जाता है। जैसे-''**कुर्वन् दिवाकराश्लेषं. दधच्चरणडम्बरम्। देव यौष्माकसेनायाः करेणुः प्रसरत्यसौ**॥ यहाँ 'करेणु' पद का अर्थ हाथी है, 'क' अक्षर के छोड़ देने पर 'रेणु' शेष रहेगा; जिसका अर्थ धूल हो जायगा। **मात्राच्युतकम्** –इसमें केवल मात्रा के निकाल देने पर दूसरा अर्थ निकल जाता है। जैसे-''**मूलस्थितिमधः कुर्वन् पात्रैर्जुष्टो गताक्षरैः। विटः सेव्यः कुलीनस्य तिष्ठतः पथिकस्य च॥**'' यहाँ 'विट' शब्द से इकार को निकाल देने से 'वट' शेष रहेगा और तब इसका अर्थ 'बरगद' हो जाएगा। '**बिन्दुमती** – इसमें अक्षरों के स्थान पर बिन्दु का प्रयोग होता है तथा मात्राओं का प्रयोग यथावत् होता

है जैसे-

०ि, ० ० ० ०ू ०ा०. ००ि. ००ि. ०ी:०. ०ु ०ु ०. ०ी०. ०ु:।
०००ु ० ० ०ि ०ु ०ृ ०ा०ु ० ० ००ी० ० ०ी० ०ं. ०ू:॥

यह श्लोक इस प्रकार पूर्ण होगा-

''त्रिनयनचूडारत्नं मित्रं सिन्धोः कुमुद्वतीबन्धुः।
अयमुदयति घुसृणारुणरमणीवदनोपमश्चन्द्रः॥''

गूढचतुर्थपाद - इसमें पद्य के चतुर्थ पाद के अक्षर तीन पादों में छिपे रहते है। जैसे **दयावान् प्रयतः शुद्धः प्रबुद्धकमलेक्षणः। पापापहस्त्रिभुवनं बुद्धः पायादपायतः॥ प्रहेलिका** - पहेली (बतौनिया) इसका लक्षण इस प्रकार है ''व्यक्तीकृत्य कमप्यर्थं स्वरूपार्थस्य गोपनात्। यत्र बाह्यान्तरावर्थौ कथ्येते सा प्रहेलिका॥'' जैसे - **तरुण्यालिंगितः कण्ठे नितम्बस्थलमाश्रितः। गुरूणां सन्निधानेऽपि कः कूजति मुहुर्मुहुः॥**

यहाँ 'जलपूर्ण घट' यह उत्तर होगा न कि प्रियतम। परिवृतः-परिवृ+क्त, घेरा हुआ। **अनैषीत्** -नीधातु लुङ् प्र० पु० ए० व०।

एकदा तु नातिदूरोदिते नवनलिनदलसम्पुटभिदि किञ्चिन्मुक्तपाटलिम्नि भवगति सहस्त्रमरीचिमालिनि, राजानमास्थानमण्डपगतमङ्गनाजनविरुद्धेन वामपार्श्वावलम्बिना कौक्षेयकेण, सन्निहितविषधरेव चन्दनलताभीषणरम-णीयाकृतिः, अविरलचन्दनानुलेपनधवलितस्तनतटा, उन्मज्जदैरावतकुम्भ-मण्डलेव मन्दाकिनी, चूडामणिसङ्क्रान्तप्रतिबिम्बच्छलेन राजाज्ञेव मूर्तिमती राजभिः शिरोभिरुह्यमाना, शरदिव कलहंसधवलाम्बरा, जामदग्न्यपरशुधारेव वशीकृतसकलराजमण्डला, विन्ध्यवनभूमिरिव वेत्रलतावती, राज्याधिदेवतेव विग्रहिणी, प्रतीहारी समुपसृत्य क्षितितलनिहितजानुकरकमला सविनयमब्रवीत्- ''देव! द्वारिस्थिता सुरलोकमारोहतस्त्रिशङ्कोरिव कुपितशतमखहुङ्कारनिपातिता राजलक्ष्मीर्दक्षिणापथादागता चाण्डालकन्यका पञ्जरस्थं शुकमादाय देवं विज्ञापयति-''सकलभुवनतलसर्वरत्नानाम् उदधिरिवैकभाजनं, विहङ्गमश्चाय-माश्चर्यभूतो निखिलभुवनतलरत्नमिति कृत्वा देवपादमूलमेनमादायागताह-मिच्छामि देवदर्शनसुखमनुभवितुम्'' इति एतदाकर्ण्य ''देवः प्रमाणम्'' इत्युक्त्वा विरराम।

हिन्दी अनुवाद - एक बार तो नवीन कमलपत्रों के सम्पुट को विकसित करने वाले, कुछ लालिमा का परित्याग करने वाले, भगवान् सहस्त्रकिरणमाली

सूर्य के कुछ समय पूर्व ही उदित होने पर, स्त्रीजन के प्रतिकूल वामपार्श्व में अवलम्बित कृपाण से लिपटे हुए सर्पों से युक्त चन्दनलता के समान भीषण एवं रमणीय आकृति वाली, सघन चन्दन के अनुलेप से धवल स्तन प्रदेश वाली (अतएव) स्नान करते हुए ऐरावत गज के कुम्भद्वय से युक्त गङ्गा जी के समान, (सभामण्डल में स्थित राजाओं के) शिरोरत्नों में व्याप्त प्रतिबिम्ब के व्याज से राजाओं के द्वारा शिरोधार्य की गई मूर्तिमती राजाज्ञा के समान, सुन्दर हंसों से उज्ज्वल गगनमण्डल वाली शरद् ऋतु के समान कलहंसों के समान श्वेत परिधान से युक्त (शरद् ऋतु में आकाश मण्डल कलहंसों से शुभ्र होता है प्रतीहारी कलहंस के समान शुभ वस्त्र धारण किए हुए थी), सभी क्षत्रिय राजाओं को अपने अधीन कर लेने वाली परशुराम की परशुधारा के समान समस्त राजमण्डल को वश में करने वाली (सौंदर्य से आकृष्ट करने वाली), वेत्रलताओं से युक्त विन्ध्यभूमि के समान वेत्रयष्टि से युक्त (विन्ध्यवन में वेत्र की लताएँ होती हैं, प्रतीहारी के हाथ में वेत्र की छड़ी हाथ में लिए थी), शरीर धारण किए हुए राज्याधिष्ठात्री देवी के समान प्रतीहारी ने सभा मण्डप में विराजमान राजा शूद्रक के पास पहुँचकर पृथ्वीतल में घुटनों एवं करकमलों को रखकर विनयपूर्वक कहा-"देव! क्रोधयुक्त इन्द्र के द्वारा हुङ्कार से नीचे गिराई गई स्वर्गारोहण करते हुए चाण्डाल कन्या, पिंजरे में स्थित शुक को लेकर महाराज से निवेदन करती है कि-'सम्पूर्ण पृथ्वीतल में विद्यमान समस्त रत्नों के उत्पत्ति स्थान सागर के समान, समस्त पृथ्वीमण्डल की सम्पूर्ण रत्नावलियों के एकमात्र आप महाराज हैं और यह आश्चर्यभूत विहङ्गम अशेष भुवन मण्डल का रत्न है, यह विचार कर महाराज के दर्शन के चरणों में इसे लेकर उपस्थित हुई मैं महाराज के दर्शन के सुख का अनुभव करना चाहती हूँ,' यह सुनकर महाराज की जैसी आज्ञा हो वह करूँ। यह कहकर प्रतीहारी चुप हो गई।

संस्कृतव्याख्या - **एकदा तु**=एकस्मिन् समये तु, **नवनलिनदलसम्पुट-भिदि**=नवानि नवीनानि यानी नलिनाानि कमलानि तेषां दलानि पर्णानि तेषां सम्पुटं मुकुलीभावं भिनत्ति दूरीकरोति इति सः तस्मिन्, **किञ्चिन्मुक्तपाटलिम्नि**=किञ्चिद् ईषद् मुक्तः परित्यक्तः पाटलिमा श्वेतरक्तत्वं येन सः तस्मिन्, **भगवति**=ऐश्वर्यशालिनि, **सहस्त्रमरीचिमालिनि**=सहस्त्राणां मरीचीनां माला यस्य स तस्मिन् अथवा सहस्त्रसंख्या ये मरीचयो रश्मयस्तैमलिते शोभते तान् धारयतीति वा यः स तस्मिन् सूर्ये सतीत्यर्थः, **नातिदूरोदिते**=नातिदूरम् अल्पकालीनम् उदितं यस्य सः तस्मिन्, **अङ्गनाजनविरु-द्धेन**=अङ्गनाजनः स्त्रीजनः तस्य विरुद्धेन व्यवहारप्रतिकूलेन, **वामपार्श्वव-**

लम्बिना=वामपार्श्वे सव्यभागोऽवलम्बते इत्येवंशीलेन, **कौक्षेयकेण**=असिना, **सन्निहित-विषधरा**=सन्निहितः समीपवर्ती विषधरः सर्पो यस्याः सा, चन्दनलता इव, **भीषणरमणीयाकृतिः**=भीषणा भयानका रमणीया मनोहरा च आकृतिः स्वरूपं यस्याः सः, यथा शीतला सुमनोहारा च चन्दनलता सर्पसंयुक्तत्वात् भीषणाकृतिर्भवति, तथैव रमणीया अपि प्रतिहारी पार्श्वविलम्बितखड्गेन भीषणाकृतिरासीत्। **अविरलचन्दनानुलेपनधवलितस्तनतटा**=अविरलं निबिडतरं यच्चन्दनस्य मलयजस्य अनुलेपनम् उद्वर्त्तनं तेन धवलितं श्वेतीकृतं स्तनतटं कुचप्रान्तं यस्याः सा, **उन्मज्जदैरावतकुम्भमण्डला**=उन्मज्जन् स्नानं कुर्वन् य ऐरावत इन्द्रहस्ती तस्य कुम्भमण्डलं कुम्भस्थलं यस्यां सा, **मन्दाकिनी**=आकाशगङ्गा, इवेत्युपमायाम्, **चूडामणिसंक्रान्तप्रतिबिम्बच्छलेन**=चूडामणिषु राजमस्तककिरीटरत्नेषु संक्रान्तं पतितं सत् प्रतिबिम्बं प्रतिच्छाया तस्य छलेन व्याजेन, **राजभिः**=नृपतिभिः, **शिरोभिः**=मस्तकैः, **उह्यमाना**=धार्यमाणा, **मूर्तिमती**=विग्रहवती, **राजाज्ञेव**=राज्ञःशूद्रकस्य आज्ञेव आदेश इव, इत्युत्प्रेक्षायाम्, **शरदिव**=शरदृतुरिव, **कलहंसधवलाम्बरा**=कलहंसः कादम्बः इव धवलं स्वच्छमम्बरं वस्त्रं यस्याः सा, शरत्पक्षे कलहंसा एव धवलमम्बरम् आकाशो यस्याः **सा, जामदग्न्यपरशुधारेव**=जमदग्नेर्गोत्रापत्यं पुमान् जामदग्न्यः परशुरामः तस्य परशुः कुठारः तस्य धारा निशितांश इव, **वशीकृतसकलराजमण्डला**=वशीकृतं स्वायत्तीकृतं सकलराजमण्डलं समस्त-नृपतिसमुदायो यया सा, परशुधारापक्षे वशीकृतं परशुबलेन स्वाधीनकृतं सकलराजमण्डलं यया सा, **विन्ध्यवनभूमिरिव**=विन्ध्यस्य वनं काननं तस्य भूमिः पृथिवीव, **वेत्रलतावती**=वेत्रस्य लता यष्टिः हस्ते यस्याः सा, विन्ध्यवनभूमिपक्षे-वेत्राणां वेतसानां लताः वल्लयो यस्याः सा, **राज्याधिदेवतेव**=राज्यस्य अधिदेवतेव अधिष्ठात्रीदेवतेव, **विग्रहिणी**=मूर्तिमती, **क्षितितलनिहितजानुकरकमला**=क्षितितले भूतले निहितौ स्थापितौ जानू नलकीलौ अथ च करौ पाणी तावेव पद्मे यया सा, प्रतीहारी=द्वारदेशे नियुक्ता सेविका, **आस्थानामण्डपगतं**=सभाभवनस्थितम्, **राजानं**=भूंपतिं शूद्रकम्, **उपसृत्य**=समीपमागत्य, **सविनयं**=विनयपूर्वकम् **अब्रवीत्**=अवोचत्, देव! हे स्वामिन् **द्वारिस्थिता**=द्वारे स्थिता, **सुरलोकं**=सुराणां देवानां लोकम्, **आरोहतः**=आरोहणं कुर्वतः, **त्रिशङ्कोः**=सूर्यवंशीयराजविशेस्य, **कुपितशतमुखहुङ्कारनिपातिता**=कुपितः क्रूद्धो यः शतमुखो देवराज इन्द्रः तस्य हुङ्कारेण निपातिता अधः पतिता, **राजलक्ष्मीः**=राजश्रीः इव, **दक्षिणपथात्**=दक्षिणभागात्, **आगता**=समायाता, **चाण्डालकन्यका**=मातङ्गकुमारी, **पञ्ज**-

रस्थं=पञ्जरे पक्षिणामाधारे तिष्ठतीति तम्, **शुक**=कीरम् **आदाय**=गृहीत्वा, **देवं**=राजानम्, **विज्ञापयति**=निवेदयति, **देव:**=स्वामी, **उदधिरिव**=समुद्रः इव, **सकलभुवनतलसर्वरत्नानाम्**=सकलभुवनतलेषु यानि सर्वाणि रत्नानि तेषाम्, **एकभाजनम्**=एकमेव पात्रम्, **अयं** एषः **विहङ्गमः**=पक्षी, **च आश्चर्यभूतः**=विस्मयकारकः, **निखिलभुवनतलरत्नं**=समस्तलोकरत्नम्, इत्थं विचार्य, **देवपादमूलं**= स्वामिचरणाश्रयम्, **एनं**=शुकम्, **आदाय**=गृहीत्वा, **आगता**= आयाता, **अहं**= चाण्डालकन्यका, **देवदर्शन-सुखम्** =महाराजावलोकनानन्दम्, **अनुभवितुं**=साक्षात्कर्तुम्, **इच्छामि**=अभिलषामि। **एतदाकर्ण्य**=एतच्छ्रुत्वा, **देव:प्रमाणं** =यो भवत आदेशः स एव मया कर्तव्यः, **इत्युक्त्वा**=एवं कथयित्वा, **विरराम**=मौनमाश्रितवती।

टिप्पणी - **'एकदा प्रतीहारी राजानं समुपसृत्य सविनयमब्रवीत्'**-यह मुख्य वाक्य है। **पाटलिमा**-पाटल+इमनिच्-पीलापन लिए हुए लालरङ्ग। अमरकोषकार ने कहा है-'श्वेतरक्तस्तु पाटलः'। **आस्थानमण्डपः**-सभामण्डप, 'समज्या परिषद्गोष्ठी सभासमितिसंसदः। आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः' इत्यमरः। **अङ्गना**-प्रशस्तानि अङ्गानि सन्ति यस्याः सा-अङ्ग+न+टाप् 'अङ्गात्कल्याणे' से न प्रत्यय। **कौक्षेयकः** - कुक्षौ बद्धोऽसिः, कुक्षि+ढकञ्-'कुलकुक्षिग्रीवाभ्यः श्वास्यलंङ्कारेषु' से ढकञ्। 'खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः। कौक्षेयकः मण्डलाग्रः करवालः कृपाणवत्' इत्यमरः। **'सन्निहित-आकृतिः'**-यहाँ **पूर्णोपमालङ्कार**। **'कुम्भमण्डलेव' में उपमालङ्कार**। **'राजाज्ञेव में उत्प्रेक्षालंकार**।' उन्मज्जत्+उतमज्ज्+शतृ-स्नान करता हुआ। **उह्यमाना**-वह+यत्+शानच्+टाप्-धारण की जाती हुई। **अम्बर** -(क) वस्त्र (ख) आकाश। **जामदग्न्यः**-जमदग्नि+यञ्-जमदग्नेरपत्यं पुमान्, परशुराम। 'शरदिव' से लेकर **'विन्ध्यभूमिरिव वेत्रलतावती'** तक **उपमालङ्कार** है। 'राज्याधिदेवतेव' में **द्रव्योत्प्रेक्षालङ्कार** है। त्रिशङ्कुः-त्रयः शङ्कवो (अपराधाः) यस्य सः त्रिशङ्कुः अर्थात् जिसके तीन अपराध हों उसे त्रिशङ्कु कहते हैं। जैसा कि रामायण में कहा गया है। **'पितुश्च परिरोषेण गुरोः दोग्ध्रीवधेन च। अपेक्षितोपयोगाच्च त्रिविधस्ते व्यतिक्रमः॥ एवं त्रीण्यस्य शङ्कूनि तानि दृष्ट्वा महातपाः। त्रिशंकुरिति हो - वाच त्रिशंकुरिति सः स्मृतः'**॥ अर्थात् पिता के क्रोध से, गुरु तथा गौ के वध से, अपवित्र वस्तुओं के उपयोग से तीन प्रकार के पाप होने के कारण तुम्हें लोग 'त्रिशङ्कु' कहेंगे। त्रिशङ्कु नामक कोई सूर्यवंशीय राजा था। वह अपने व्यक्तित्व को अधिक प्रेम

करता था। उसने इसी शरीर से स्वर्ग जाने की इच्छा की। अतः उसने वसिष्ठ से यज्ञ करने की प्रार्थना की। जब वसिष्ठ ने मना कर दिया तो उसने उसके १०० पुत्रों से प्रार्थना की, परन्तु उन्होंने भी इसे अस्वीकार कर दिया। त्रिशङ्कु ने उन सबको कायर तथा नपुंसक कहा और इसके बदले उन्होंने उसे 'चाण्डाल बनने' का शाप दे दिया। ऐसी स्थिति में वह विश्वामित्र के पास गया तथा यज्ञ कराने को कहा। विश्वामित्र ने उसे यज्ञ कराकर मंत्रबल से सदेह स्वर्ग भेजना प्रारम्भ किया, परन्तु इन्द्र ने उसे बीच में ही रोक दिया। इस प्रकार वह पृथ्वी और स्वर्ग के बीच लटका हुआ है। **शतमखः**-जिसने १०० यज्ञ किये हैं। देवराज इन्द्र। **उदधिः**-समुद्र, उदकानि धीयन्तेऽस्मिन्-यहाँ कृदन्त प्रत्यय कि तथा उदक को 'उदन्' आदेश, नकार का लोप आदि कार्य होते हैं। **विहङ्गमः**-विहायसा आकाशेन गच्छतीति-विहङ्गमः-विहायस गम्+खच्+मुम् तथा विहायस् को विहादेश होता है। रत्नम्-उत्कृष्ट, 'जातौ जातौ यदुत्कुष्टं तद्रत्नमभिधीयते'। आकर्ण्य-आङ्कर्ण+क्त्वा+ ल्यप्। **विरराम**-वि उपसर्ग पूर्वक रम् धातु लिट् प्र० पु० ए० व०। रम् धातु आत्मनेपदी है परन्तु 'व्याङ्परिभ्यो रमः' से परस्मैपदी हो जाती है। यहाँ **'त्रिशंकोरिव'** तथा **'उदधिरिव'** में **उपमालंकार** है।

उपजातकुतूहलस्तु राजा समीपवर्तिनां राज्ञामवलोक्य मुखानि "को दोषः प्रवेश्यताम्" इत्यादिदेश। अथ प्रतीहारी नरपतिवचनानन्तरमुत्थाय तां मातङ्गकुमारीं प्रावेशयत्।

हिन्दी अनुवाद - उत्पन्न आश्चर्य वाले राजा शूद्रक ने समीपवर्ती राजाओं के मुखों को देखकर, 'दोष क्या है' प्रवेश कराओं।' इस प्रकार आदेश दिया। इसके बाद राजा के आदेश के अनन्तर प्रतीहारी ने उठकर उस चाण्डाल कन्या को प्रविष्ट कराया।

संस्कृतव्याख्या - **राजा तु**=शूद्रकस्तु, **उपजातकुतूहलः**=उपजातम् उत्पन्नं कुतूहलं कौतुकं यस्य सः, **समीपवर्तिनाम्**=सन्निकटवर्तिनाम्, **राज्ञां**=भूपालानाम् **मुखानि**=आननानि, **आलोक्य**=दृष्ट्वा, **को दोषः**=न काप्यापत्तिः, **'प्रवेश्यताम्' इति आदिदेश**=आज्ञापितवान्। **अथ**=अनन्तरम्, **नरपतिवचनानन्तरम्**=भूपतिवाक्या-नन्तरम्, **उत्थाय**=उत्थानं कृत्वा, **प्रतीहारी**=द्वारपालिका, **तां मातंगकुमारीं**=चाण्डालकन्यकाम्, **प्रावेशयत्**=प्रवेशमकारयत्।

टिप्पणी -**'राज्ञां मुखानि अवलोक्य'** का आशय यह है कि चाण्डाल होने के कारण इसके अन्दर प्रविष्ट होने में किसी को कोई आपत्ति तो नहीं है। अतएव राजाओं के मुखों को देखकर 'को दोषः, प्रवेश्यताम्, इस प्रकार कहा।

अवलोक्य -अव+लोक्+क्त्वा-ल्यप्। दोष:-दुष्+घञ्। **आदिदेश**-आङ्दिश्+लिट् प्र० पु० ए० व०। प्रावेशयत्-प्रविश्+णिजन्त लङ् प्र० पु०ए०व०।

प्रविश्य च सा नरपतिसहस्त्रमध्यवर्तिनमशनिभयपुञ्जितकुलशैलमध्यगतमिव कनकशिखरिणम्, अनेकरत्नाभरणकिरणजालकान्तरितावयवमिन्द्रायुधसहस्त्रसंच्छादिताष्टदिग्विभागमिव जलधरदिवसम्, अवलम्बितस्थूलमुक्ताकलापस्य कनकश्रृंखलानियमितमणिदण्डिकाचतुष्टयस्य गगनसिन्धुफेनपटलपाण्डुरस्य नातिमहतो दुकूलवितानस्याधस्तादिन्दुकान्तमणिपर्यङ्किकानिषण्णम्, उद्धूयमानकनकदण्डचामरकलापम्, उन्मयूखमुखकान्तिनिचयपराभवप्रणते शशिनीव स्फटिकपादपीठे विन्यस्तवामपादम्, इन्द्रनीलमणिकुट्टिमप्रभासम्पर्कश्यामायमानैः प्रणतरिपुनिःश्वासमलिनीकृतैरिव चरणनखमयूखजालैरुपशोभमानम्, आसनोल्लसितपद्मरागकिरणपाटलीकृतेनाचिरमृदितमधुकैटभरुधिरारुणेन हरिमिवोरुयुगलेन विराजमानम्, अमृतफेनधवले गोरोचनालिखितहंसमिथुनसनाथपर्य्यन्ते चामरपवनप्रणर्तितान्तदेशे दुकूले वसानम्।

हिन्दी अनुवाद - और प्रवेश करके उस चाण्डाल कन्या ने वज्र के भय से एकत्रित कुलपर्वतों के मध्य विद्यमान स्वर्णगिरि सुमेरु पर्वत के समान सहस्त्रों राजाओं के मध्य सुशोभित, सहस्त्रों इन्द्रधनुषों से आच्छादित, आठों दिक् प्रदेशों वाले वर्षाकालीन दिवस के समान, अनेक मणिखचित आभूषणों के किरण समुदाय से आच्छादित अङ्गप्रत्यङ्गों वाले; लटकते हुए स्थूल मौक्तिक समूह से युक्त, स्वर्णश्रृङ्खला से बँधी हुई चार रत्नखचित यष्टियों से युक्त, आकाशगङ्गा के फेनसमूह के समान उज्ज्वल वर्ण, सामान्य प्रमाण वाले एक रेशमी चँदोवा के नीचे चन्द्रकान्तमणियों से निर्मित मञ्चिका में बैठे हुए, हिलाए जाते हुए स्वर्णदण्ड वाले चामर समूह वाले ऊर्ध्वगामिनी किरणों वाले, मुखमण्डल की कान्ति से तिरस्कृत होने के कारण चरणावनत चन्द्रमा के समान प्रतीत होने वाले स्फटिकमणिमय पादपीठ में रखे हुए बाँया पैर वाले; इन्द्रनीलमणियों से खचित फर्श की कान्ति के सम्पर्क से श्याम वर्ण, मानो, शरणागत शत्रुओं की निश्वास वायु से मलिन किए गए पैरों के मुखों के किरण समुदाय से सुशोभित; तत्काल मारे गए मधु, कैटभ राक्षसों के रक्त से अरुण वर्ण जङ्घाद्वय से सुशोभित हरि (नारायण) के समान आसनस्थली में देदीप्यमान पद्मरागमणियों की किरणों से रक्तवर्ण बनाए गए जङ्घाद्वय से शोभायमान, अमृतफेन के समान उज्ज्वल, गोरोचना से चित्रित हंसों की जोड़ी से

संयुक्त प्रान्त भाग वाले, चमर की वायु से आन्दोलित किनारे वाले रेशमी वस्त्र को धारण करने वाले (राजा को देखा)।

संस्कृत-व्याख्या - **प्रविश्य च**=प्रवेशं कृत्वा, **सा**=चण्डालकन्यका, राजानमद्राक्षीदिति दूरेणान्वयः। सम्प्रति राजानं विशिनष्टि-**नरपतिसहस्रमध्यवर्तिनम्**=नरपतीनां नृपाणां यत्सहस्रं तन्मध्यवर्तिनम् तदन्तः स्थितम्, अतएव **अशनिभय-पुञ्जितकुलशैलमध्यगतं**=अशनेरिन्द्रायुधाज्वत् यद्भयं भीतिः तेन पुञ्जिता एकत्रमिलिताः ये कुलशैलाः कुलपर्वताः तेषां मध्यगतं अन्तःस्थितम् **कनकशिखरिणमिव**=सुमेरुपर्वतमिव, **अनेकरत्नाभरणकिरणजालकान्तरितावयवम्**=अनेकानि नानाविधानि रत्नाभरणानि रत्नजटिताभूषणानि तेषां यानि किरणजालकानि रश्मिसमूहाः तैरन्तरिता आवृता अवयवा अङ्गानि यस्य तम्, **इन्द्रायुधसहस्रसञ्छादिताष्टदिग्विभागम्**=इन्द्रायुधसहस्रेण शक्रधनुःसमूहेन सञ्छादिता अन्तरिता अष्टौ दिग्विभागाः दिशां प्रदेशाः यस्मिन् तथाविधम्, **जलधरदिवसं**=मेघावृतदिनम्, **इव**=यथा, **अवलम्बितस्थूलमुक्ताकलापस्य**=अवलम्बिता आबद्धाः स्थूलानां स्थविष्ठानां मुक्तानां रसोद्भवानां कलापाः पङ्क्तयो यत्र तस्य, **कनकश्रृंखलानियमित-मणिदंडिका-चतुष्टयस्य**=कनकं सुवर्णं तस्य याः श्रृंखलाः बन्धनरज्जवः ताभिः नियमिताः बद्धा मणिदण्डिकारत्नखचिताः यष्टयः तासां चतुष्टयं यस्मिन् तस्य, **गगनसिन्धुफेनपटलपांडुरस्य**=गगनसिन्धोः मन्दाकिन्याः फेनपटलवत् अब्धिकफसमूहवत् 'डिण्डीरोऽब्धिकफः,' इत्यमरः, पाण्डुरं शुभवर्णं तस्य, **नातिमहतः**=नीतिविस्तृतस्य, **दुकूलवितानस्य**=क्षौमवस्त्रनिर्मितोल्लोचस्य, **अधस्ताद्**=निम्नप्रदेशे, **इन्दुकान्तमणिपर्यङ्किकानिषण्णम्**=इन्दुकान्तानां चन्द्रकान्तानां या पर्यङ्किका मिञ्चका तस्यां निषण्णम् उपविष्टम् **उद्धूयमानकनक-दण्डचामरकलापं**= उद्धूयमानः संवीज्यमानः कनक-दण्डः सुवर्णयष्टिः येषु तथाविधः चामरकलापः चामर-समूहो यस्य तम्, तादृशम्, **उन्मयूखमुखकान्तिनिचयपराभवप्रणते** =उत् ऊर्ध्वगताः मयूखाः किरणाःयस्य एतादृशस्य मुखस्य आननस्य या कान्तिः द्युतिः तस्याः निचयः समूहः तेन यः पराभवः तेन प्रणते नम्रीभूते, **शशिनि**=चन्द्रे, **इव**=उत्प्रेक्षायां, **स्फटिकपादपीठे**=स्फटिकमणिविरचितं यत् पादपीठम् चरणस्थापनलघुपीठकं तस्मिन् **विन्यस्तवामपादम्**=संस्थापितवामचरणम्, **इन्द्रनील-मणिकुट्टिममप्रभा-सम्पर्कश्यामायमानैः**=इन्द्रनीलमणीनां या कुट्टिमप्रभा वेदिकाकान्तिः तस्याः सम्पर्केण संतसर्गेण श्यामायमानैःश्यामवदाचरद्भिः **प्रणतरिपुनिःश्वासमलिनीकृतैरिव**=प्रणताः विनताः ये रिपवः शत्रवः तेपां ये निश्वासाः निःश्वासवायवः तैः मलिनीकृतैः

मालिन्यमुपगतैरिव, **चरणनखमयूखजालैः**= चरणयोः पादयोः नखानां मयूखजालैः किरण-समूहैः, **उपशोभमानम्**=विराजमानम्, **आसनोल्लसितपद्मरागकिरण-पाटलीकृते**=आसने विष्टरे उल्लसिताः प्रकाशमानाः ये पद्मरागकिरणाः लोहितमणिरश्मयः तैः पाटलीकृतेन, श्वेतरक्तीकृतेन, **अचिरमृदितमधुकैटभरुधिरा-रुणेन**=अचिरं मृदितयोः तत्कालमर्दितयोः मधुकैटमभ्योः तन्नामकयोरसुरविशेषयोः रुधिरेण रक्तेन अरुणं रक्तवर्णं तेन तथाविधेन, **उरुयुगलेन**=जङ्घाद्वयेन, **विराजमानम्**=शोभमानम्, **हरिं**=विष्णुमिव, **अमृतफेन-धवले**=अमृतस्य पीयूषस्य यः फेनः तद्वत्धवले श्वतेवर्णे, **गोरोचना-लिखित-हंसमिथुनसनापर्यन्तदेशे**= गोरोचनया गोपित्तनामकपदार्थेन लिखितैः चित्रितैः हंसमिथुनैः हंसयुगलैः सनाथाः संयुक्ताः पर्यन्ताः प्रान्तभागाः ययोः ते, **चामरपवन-प्रणर्तितान्तदेशे** चामराणां मनोहरबालव्यजननानां पवनेन वायुना प्रणर्तिताः आन्दोलिताः अन्तदेशाः प्रान्तभागाः ययोस्ते, **दुकूले**=क्षौमवस्त्रयुगलम्, **वसानं**=दधानम्।

टिप्पणी - **प्रविश्य**-प्रविश्=क्त्वा-ल्यप्। 'सा.....राजानम् अद्राक्षीत्' यह इस वाक्य का प्रमुख भाग है इसमें आये हुये द्वितीया एकवचनान्त समस्त पद राजानं के विशेषण हैं। **''पुञ्जित-कुलशैलमध्यगतमिव कनकशिखरिणम्'' उपमा** अलंकार है। **''अशनि.....शिखरिणम्''** इस सन्दर्भ में देवराज इन्द्र के द्वारा पर्वतों के पंख काटने की कथा का प्रसंग है। पुराणों में कहा गया है कि पहले पर्वतों के पंख होते थे और वे उन पंखों से एक देश से उड़कर दूसरे देश में जाकर गिरते थे। वे जहाँ पर भी गिरते थे वहाँ बड़ी हिंसा होती थी क्योंकि पर्वत जिस प्रदेश में गिर जायेंगे वहीं सब नाश हो जायेगा। इस प्रकार से पर्वतों के आतंक से त्रस्त होकर देवराज इन्द्र अपने वज्र के द्वारा उनके पंख काटने लगे। ऐसी स्थिति में पर्वत अपनी रक्षा के निमित्त विचारणा के लिये एकत्र मिले थे। **कनकशिखरी** - स्वर्ण के हैं शिखर जिसके अर्थात् सुमेरु पर्वत। **इन्द्रायुध** - इन्द्रधनुष अमरकोषकर ने लिखा है-**''इन्द्रायुधं शक्रधनुः''**। **जलधरदिवसमिव**-यहाँ भी उपमालंकार है **मुक्ताकलाप**=मोतियों का समूह। **नियमित**-बँधे हुए। **मणिदण्डिका**= रत्नजटितबाँस, जिसके सहारे वितान को ताना जाता है। गगनसिन्धु=आकाशगंगा। **''फेनपटलपाण्डुर''** इस अंश में लुप्तोपमालंकार है। **दुकूलवितानं**=रेशमी वस्त्र से निर्मित चँदोवा। **पर्यङ्किका**=छोटी चौकी। निषण्णं-निसत्+क्त प्रत्यय। उद्धूयमान-उत्धू+णिचृ+शानच्, डुलाये जाते हैं। **''शशिनीव स्फटिकपादपीठे''**-यहाँ द्रव्योत्प्रेक्षालंकार है। **कुट्टिम**=फर्श। श्यामायमानैः-''उपमानादाचारे'' इस सूत्र के

द्वारा क्यङ् प्रत्ययगत उपमालंकार है। मलिनीकृतैरिव-यहाँ क्रियोत्प्रेक्षालंकार है। मधुकैटभ-'मार्कण्डेय पुराण की कथा है कि मधु और कैटभ नामक दो राक्षस भगवान् विष्णु के कर्ण मल से उत्पन्न हुए। इन दोनों ने ब्रह्मा का वध करना चाहा। ऐसी स्थिति में आत्मरक्षा के लिये व्याकुल ब्रह्मा ने भगवती जगज्जननी की उपासना की। ब्रह्मा जी से प्रसन्न होकर जगज्जननी ने भगवान् विष्णु को उठा दिया और उठकर भगवान् विष्णु ने उन दोनों के साथ पाँच सहस्त्र वर्ष युद्ध किया। तदनन्तर अपनी माया से मोहित हो वे दोनों भगवान् विष्णु को वर देने के इच्छुक हो गये। भगवान् विष्णु ने उन दोनों के वध रूप वरदान माँगा। यह सुनकर जलमग्न पृथ्वी को देखकर उन दोनों ने भगवान् से कहा कि जहाँ पृथ्वी जल से रहित हो वहाँ हम दोनों का वध करो। ऐसा सुनकर भगवान् विष्णु ने पार्थिवांश संयुक्त अपने ऊरुओं पर बैठाकर उन दोनों के शिरों को चक्र से काट डाला था। **गोरोचना**-'यह एक सुगन्धित पदार्थ है'' इसकी उत्पत्ति गाय के पित्त से मानी जाती है। **हरिमिव**-यहाँ **उपमालंकार** है। **दुकूले** -रेशमी वस्त्रों को जोड़ा। **'अकृतफेनधवले'** में **लुप्तोपमालंकार** है।

अतिसुरभिचन्दनानुलेपनधवलितोरःस्थलम्, उपरिविन्यस्तकुङ्कमस्थासकम् अन्तरान्तरानिपतितबालातपच्छेदमिव कैलासशिखरिणम्, अपरशशिशङ्कया नक्षणमालयेव हारलतया कृतमुखपरिवेषम्, अतिचपलराजलक्ष्मीबन्धननिगडशङ्कामुपजनयतेन्द्रनीलकेयूरयुगलेनमलयजरसगन्धलुब्धेन भुजङ्गद्वयेनेव वेष्टितबाहुयुगम्, ईषदालम्बिकर्णोत्पलम्, उन्नतघोणम् उत्फुलपुण्डरीकलोचनम्, अमलकलधौतपट्टायतम्, अष्टमीचन्द्रशकलाकारम्, अशेषभुवनराज्याभिषेकसलिलपूतम्, ऊर्णासनाथं ललाटदेशमुद्वहन्तम्, आमोदितमालतीकुसुमशेखरम्, उषसि शिखरपर्यस्ततारकापुञ्जमिव, पश्चिमाचलम्, आभरणप्रभापिशङ्गिताङ्गतया लग्नहरहुताशमिव मकरध्वजम्, आसन्नवर्तिनीभिः सर्वतः सेवार्थमागताभिरिव दिग्वधूभिर्वारविलासिनीभिः परिवृतम् अमलमणिकुट्टिमसङ्क्रान्तसकलदेहप्रतिबिम्बतया पतिप्रेम्णा वसुन्धरया हृदयेनेवोह्यमानम्, अशेषजनभोगयतामुपनीतयाप्यसाधारणया राजलक्ष्म्या समालिङ्गितम्, अपरिमितपरिवारजनमप्यद्वितीयम्, अनन्तगजतुरगसाधनमपि खड्गमात्रसहायम्, एकदेशस्थितमपि व्याप्तभुवनमण्डलम्, आसने स्थितमपि धनुषि निषण्णम्, उत्सादिताशेषद्विषदिन्धनमपि ज्वलत्प्रतापानलम्, आयतलोचनमपि सूक्ष्मदर्शनम् महादोषमपि सकलगुणाधिष्ठानम्, कुपतिमपि

कलत्रवल्लभम्, अविरतप्रवृत्तदानमप्यमदम् अतिशुद्धस्वभावमपि कृष्णचरितम्, अकरमपि हस्तस्थितसकलभुवनतलं राजानमद्राक्षीत्।

हिन्दी अनुवाद - अत्यन्त सुगन्धित चन्दन से अङ्गराग से उज्ज्वल किए गए वक्षःस्थल वाले, (वक्षःस्थल के) ऊपर कुङ्कम से बने हुए हस्तबिम्बों वाले, अतएव बीच बीच में पड़ने वाले नूतन प्रकाश खण्डों से युक्त रजतगिरि कैसास के समान प्रतीत होने वाले, द्वितीय चन्द्रमा की भ्रान्तिवश नक्षत्रमण्डल के समान प्रतीत होने वाली मुक्तामयी हारलता से परिवेष्टित मुखमण्डल वाले, अत्यन्त चंचल साम्राज्यलक्ष्मी के नियमन के लिए श्रृङ्खला का भय उत्पन्न करने वाले तथा चन्दनरस की सुगन्धि में आसक्त भुजङ्गद्वय के समान प्रतीत होने वाले इन्द्रनीलमणिखचित केयूर युगल से समादृत दोनों भुजाओं वाले, कुछ लटकते हुए कर्णोत्पल वाले; उन्नत नासिका वाले, विकसित श्वेत कमल के समान नेत्र वाले, निष्कलङ्क स्वर्णफलक के समान विशाल, अष्टमी तिथि के चन्द्राँश के समान आकृति वाले, समस्तभुवनों के राज्याभिषेक के जल से पवित्र, दोनों भौहों की मध्यवर्तिनी रोमराजि से युक्त ललाट भाग को धारण करने वाले, परागयुक्त मालती पुष्पों के शिरोभूषण ये युक्त, प्रातःकाल शिखर में छिटके हुए नक्षत्र मण्डल वाले अस्ताचल के समान प्रतीत होने वाले, आभूषणों की कान्ति से रक्तपीत बनाए गए अङ्गों के कारण भगवान् शङ्कर की अग्नि से जलते हुए कामदेव के समान प्रतीत होने वाले, सेवा के लिए चतुर्दिक् से आई हुई दिवाङ्नाओं के समान प्रतीत होने वाली समीपस्थ वाराङ्गनाओं से घिरा हुआ, स्वच्छ मणियों से निर्मित फर्श में सम्पूर्ण शरीर का प्रतिबिम्ब पड़ने के कारण मानो प्रियतम के अनुराग से पृथ्वी द्वारा हृदय से धारण किए जाने वाले, सम्पूर्ण लोकों से उपभुक्त होने पर भी सर्वोत्कृष्ट साम्राज्य लक्ष्मी से समालिङ्गित शरीर वाले, असंख्य परिजन समूह वाला होने पर भी एकाकी (अद्वितीय अर्थात् सर्वोत्कृष्ट) अनन्त गजों तथा अश्वों रूपी सैन्य से युक्त होने पर भी एकमात्र खड्ग मात्र सहायक वाले (युद्ध में तलवार में पराक्रमी) एक स्थान में स्थित होने पर भी समस्त भुवनमण्डल में व्याप्त होने वाले (अर्थात् समस्त भूमण्डल में विख्यात), भद्रासन में स्थित होने पर भी धनुष में स्थित (अर्थात् धनुष से विजय प्राप्त करने वाला), समस्त शत्रुरूपी इन्धन को भस्म करने वाला होने पर भी प्रज्ज्वलित प्रतापाग्नि वाले (जिसके प्रताप की अग्नि प्रज्ज्वलित थी), विशाल नेत्रों वाला होने पर भी सूक्ष्म (छोटे) नेत्रों वाला अर्थात् अध्यात्मज्ञान से सम्पन्न), महान् दोषों वाला (विशाल भुजाओं वाला) होने पर भी

रमणियों का प्रिय, निरन्तर दान (मदजल) में प्रवृत्त होने पर भी मदविहीन (अर्थात् निरन्तर दान पुण्य करने पर भी गर्व से रहित), अत्यन्त पवित्र स्वभाव का होने पर भी कृष्ण-अपवित्र आचरण वाला (अर्थात् भगवान् कृष्ण के समान लोकोत्तर चरित्र वाला) कर (हाथ) से रहित होने पर भी, हाथ में स्थित समस्त भूमण्डल वाले (कर=दण्ड न लेने पर भी समस्त भूमण्डल में अधिकार करने वाले) राजा को देखा।

संस्कृतव्याख्या - **अतिसुरभिचन्दनानुलेपनधवलितोरःस्थलम्**=अतिसुरभिचन्दनानुलेपनेन अतिसुगन्धिचन्दनाङ्गरागेण धवलितं शुभ्रीकृतम् उरःस्थलं वक्षःस्थलं यस्य तम्, **उपरिविन्यस्तकुङ्कुमस्थासकं**=उपरिविन्यस्ताः विहिताः कुङ्कुमस्य केशरस्य स्थासकाः हस्तबिम्बाः यस्य तं, ''**स्थासकं हस्तबिम्बम्**'' इत्यमरः, **अन्तरानिपतितबालापच्छेदम्**=अन्तरा मध्ये मध्ये निपतिताः पर्यस्ताः बालातपच्छेदाः अभिनवोदितसूर्यकिरणखण्डाः यस्य तं, **कैलासशिखरिणं**=हिमाचलम्, **इव**=इत्युपमायाम्, **अपरशशिशंकया**=अपरः अन्यः यः शशी चन्द्रः तस्य शंकया भ्रान्त्या, **नक्षत्रमालया**=तारापङ्क्त्या, इव उत्प्रेक्षायाम्, **हारलतया**=मुक्तास्रजा, **कृतमुखपरिवेषम्**=कृतः विहितः मुखस्य आननस्य परिवेषः परिधिः यस्य सः तम्, **अतिचलराजलक्ष्मीबन्धननिगडशङ्का**=अतिचपला अत्यन्तचञ्चला या राजलक्ष्मीः राजश्रीः तस्याः बन्धनं तस्मै यः निगडः श्रृंखला तस्य शङ्कां भ्रान्तिम्, **उपजनयता**=कुर्वता, **इन्द्रनीलकेयूरयुगलेन**=इन्द्रनीलखचिताङ्गदयुगलेन, **मलयजरसगन्धलुब्धेन**=मलयजः चन्दनः तस्य रसः इव तस्य गन्धेन हरिमलेन लुब्ध आसक्तः तेन, **भुजंगद्वयेन**=सर्पयुगलेनइव, **वेष्टितबाहुयुगलं**=वेष्टितं परिक्षिप्तं बाहुयुगलं भुजद्वयं यस्य तम्, **ईषदालम्बिकर्णोत्पलं**=ईषद् किञ्चिद् आलम्बिनी लम्बमाने कर्णोत्पले कमलाकृतिकर्णाभूषणविशेषे यस्य तम्, **उन्नतघोणं**=उन्नता उच्चा घोणा नासिका यस्य तम्, **उत्फुल्लपुण्डरीकलोचनं**=उत्फुल्लं विकसितं पुण्डरीकं श्वेताम्भोजं तद्वत् लोचने नयने यस्य सः तम्, **अमलकलधौतपट्टायतं**=अमलं स्वच्छं यत् कलधौतं सुवर्णं तस्य यः पट्टः फलकं तद्वत् आयतं विस्तीर्णम्, **अष्टमीचन्द्रशकलाकारं**=अष्टमीचन्द्रस्य अष्टम्यां तिथौ उदितस्य चन्द्रमसः यत् शकलं खण्डः तद्वदाकारः आकृतिः यस्य तम्, **अशेषभुवनराज्याभिषेकसलिलपूतं**=अशेषाणि समस्तानि भुवनानि तेषां राज्यम् आधित्यं तस्य अभिषेकसलिलं मंगलस्नानजलं तेन पूतं पवित्रम्, **ऊर्णासनाथं**=ऊर्णया भ्रूयुग्ममध्यवर्तिना लोमावर्तेन सनाथं युक्तम्, **ललाटदेशं**=मस्तकप्रान्तं, **उद्वहन्तं**=धारयन्तम्, **आमोदितमालती-**

कुसुमशेखरं= आमोदितानि सुरभीणि यानि मालतीकुसुमानि जातीपुष्पाणि तान्येव शेखरः शिरोभूषणं यस्य सः तम्, अतएव **उषसि**=प्रातःकाले, **शिखरपर्यस्त-तारकापुञ्जं**=शिखरे श्रृंगे पर्यस्ताः समवेताः तारकाणां नक्षत्राणां पुञ्जाः राशयः यस्मिन् तम्, **पश्चिमाचलं**=अस्ताचलम्, **इव**=उत्प्रेक्षाया **आभरणप्रभापिशंगि-तांगतया**=आभरणप्रभया अलङ्कारदीप्त्या पिशङ्गितानि पिङ्गलवर्णीकृतानि अङ्गानि अवयवाः यस्य तस्य भावः तत्त तया, **लग्नहरहुताशम्**=संसक्तशंकरतृतीयनेत्रवह्निम्, **मकरध्वजं**=कामदेवम् इव, **आसन्नवर्तिनीभिः**=निकटस्थिताभिः सर्वतः, **सेवार्थं**=परिचर्यार्थम्, **आगताभिः**=प्राप्ताभिः, **दिग्वधूभिः**=दिशः एव वध्वः स्त्रियः ताभि इव, **वारविलासिनीभिः**=वेश्याभिः, **परिवृतम्**=परिवेष्टित, **अमलमणिकुट्टिम-संक्रान्तसकलदेहप्रतिबिम्बतया**=अमलाः अतिनिर्मलाः ये मणयः तैः कुट्टिमाः बद्धभूमयः तत्र संक्रान्तं सञ्चरितं यत् सकलदेहप्रतिबिम्बं समस्तशरीरप्रतिच्छायः तस्य भावः तत्त तया, **पतिप्रेम्णा**=स्वामिप्रीत्या, **वसुन्धरया**=पृथिव्या, **हृदयेन**=चेतसा, **उह्यमानं**=धार्यमाणम्, इव, **अशेषजनभोग्यतां** =सर्वसाधारणोपभोग्यत्वम्, **उपनीतया**=संप्राप्तया अतएव **सर्वसाधारणयाअपि**= सर्वसामान्यापि, **आसाधारणया** =असामान्यया वा, अत्र विरोधः, अन्यजनानां समीपे एतादृशी राजलक्ष्मीः न विद्यते अतः सर्वोत्कृष्टया इति तत्परिहारः, **राजलक्ष्म्या**= राज्यश्रिया, **समालिङ्गितं**=सम्यग् आलिंगितम्, **अपरिमितपरिवारजनमपि**= अपरिमिताः अगणिताः परिवारजनाः कुटुम्बिजनाः यस्य सः तम् अपि, **अद्वितीयं**= द्वितीयजन-रहितम् इति विरोधः सर्वोत्कृष्टमिति परिहारः, **अनन्तगजतुरगसाधनमपि**= अनन्तानि असंख्यानि गजाः करिणः तुरगाः अश्वाः तेषां साधनानि उपकरणानि यस्य सः तमपि, **खड्गमात्र-सहायं**=केवलं खड्गं खड्गमात्रं सहायः यस्य सः तम् अत्र विरोधः तस्य परिहारस्तु स्वखड्गबलेनैव विजयं प्राप्तवानिति, **एकदेशस्थितमपि** =एकस्मिन् जनपदे वर्तमानमपि, **व्याप्तभुवनमण्डलं**=व्याप्तं समाक्रान्तं भुवनमण्डलं समस्तभुवनं येन तम् इतिविरोधः व्याप्तं भुवनमण्डलं येन तम् इति तत्परिहारः, **आसने**=सिंहासने, **स्थितमपि**=अवस्थितमपि **धनिुष**=चापे, **निषण्णं**=स्थितमिति विरोधः, धनुषि विजयविश्वासनमिति परिहारः, **उत्सादिताशेषद्विषदिन्धनं**= उत्सादितानि विनाशितानि द्विषन्तः रिपवः एव इन्धनानि येन सः तम् अपि ज्वलत्प्रतापानलं ज्वलनं ज्वालां प्रकटयन् प्रतापः एव अनलः अग्निः यस्य तम्, अत्र इन्धननाशेऽपि ज्वलन इति विरोधः तत्परिहारस्तु ज्वलत इत्यस्य अर्थः देदीप्यमानः, **आयतलोचनमपि**=आयते विस्तीर्णे लोचने चक्षुषी यस्य त तथाविधमपि, **सूक्ष्मदर्शनं**

=सूक्ष्मे अविपुले दर्शने लोचने यस्य तमिति विरोधः सूक्ष्मे अध्यात्मविषय-दर्शनं ज्ञानं यस्येति परिहारः, **महादोषमपि**=महान् बहुः दोषोऽवगुणो यस्मिन् सः तादृशमपि, **सकलगुणाधिष्ठानं**=समस्तगुणाश्रयमितिविरोधःमहान्तौ दोषौ यस्य तमिति परिहारः, **कुपतिमपि**=कुत्सितस्वामिनमपि, **कलत्रवल्लभम्**=स्त्रीजनप्रियमिति विरोधः, कुः पृथ्वी यस्याः पतिः स्वामीति परिहारः, **अविरतप्रवृत्तदानमपि**=अविरतं निरन्तरं प्रवृत्तं दानं मदजलं यस्य तम् एवं भूतमपि **अमदं**=मदजलरहितमिति विरोधः, अविरतं सन्ततं दानं द्रव्यादिवितरणं यस्य तं तादृशमपि, अमदं गर्वशून्यमिति तत्परिहारः, **अतिशुद्धस्वभावमपि**=अत्यन्तशुद्धप्रकृतिमपि, **कृष्णचरितं**=कृष्णं मलिनं चरितम् आचारः यस्य तमिति विरोधः, कृष्णस्य वासुदेवस्य चरितमिव चरितं यस्य तमिति तत्परिहारः, **अकरमपि**=कररहितमपि, **हस्तस्थितसकलभुवन-तलं** =हस्ते करे स्थितं सकलं समग्रं भुवनतलं भूमण्डलं यस्य तमिति विरोधः परिहारस्तु न विद्यते करः राजग्राह्यद्रव्यसम्प्रदानं यस्य तं तथाविधम्। **राजानं**=नृपतिं शूद्रकम्, **अद्राक्षीत्**=विलोकयामास।

टिप्पणी - धवलित - धवल+इतच्। **स्थासक**-स्था+स+क, हथेली पर केसर आदि लगाकर लगाया गया छापा। कोषकार ने भी लिखा है ''स्थासकं हस्तबिम्बम्।'' **कैलासशिखरिणमिव**-यहाँ **उपमालंकार** है। **'शशिशंकया'**-शशिशङ्कया में **भ्रान्तिमान्** नक्षत्रमालया में **उत्प्रेक्षालंकार** है। इन दोनों में **अङ्गाङ्गिभाव संकर** है और इसके द्वारा मुख का चन्द्रसाम्य तथा हारलता का अत्यन्त नैर्मल्य ध्वनित होता है। इस प्रकार यहाँ अलंकार से वस्तुध्वनि है। **निगडः**=श्रृंखला जंजीर। **केयूरयुगल**=बाजूवन्द का जोड़ा। **वेष्टित**-वेष्ट+क्त। **'निगडशंकामुप-जनयता' में-भ्रान्तिमान्** तथा **भुजङ्गद्वयेनेव में उत्प्रेक्षालंकार** है। और इन दोनों का **अगांगिभाव संकर** है। **कर्णोत्पल**=कान का आभूषण विशेष, कर्णफूल। **घोणा**=नासिका। **उत्फुल्लपुण्डरीकलोचनं**, अमलकलधौतपट्टायतं, **अष्टमीचन्द्र-कलाकरं** यहाँ सर्वत्र **लुप्तोपमालंकार** है। **कलधौत**-सुवर्ण। **ऊर्णा**=दोनों भौंहो के मध्य में स्थित रोमनिर्मित आवर्त जोकि सामुद्रिक शास्त्र के अनुसार महापुरुषों के ही पाया जाता है। ''भ्रूद्वयमध्ये मृणालतन्तुसूक्ष्ममशुभ्रायतमेकं प्रशस्तावर्त्त महापुरुष-लक्षणम्।'' **पिशिङ्गित**-पीले किये गये। **मकरध्वज**-कामदेव। **शिखरपर्यस्त-तारकापुञ्जमिव-में उपमालंकार है। आभरण......मकरध्वजम्**-यहाँ भी **उपमालंकार** है। **सेवार्थमागताभिरवि-दिग्वधुभिरिव**-यहाँ **रूपक** एवं **उत्प्रेक्षा** आदि अलङ्कार है। **उह्यमानं**=वह्+यक्+ शानच्। **मणिकुट्टिम**-मणिजटितफर्श।

हृदयेनेव-यहाँ **उत्प्रेक्षालङ्कार** है। **अशोषजन.... ...भुवनतलम्** इस अंक में श्लिष्ट पदों के द्वारा **विरोधाभास अलंकार** की योजना है। जहाँ विरोध का आभास मात्र होता है, और वास्तविक विरोध नहीं होता है। वहाँ विरोधाभास अलङ्कार होता है, इस वाक्यांश में सर्वत्र विरोध का आभास होता है और श्लेष के द्वारा विरोध का परिहार हो जाता है। **व्याप्तम्**=(क) विरोधपक्ष में-व्यापक होकर स्थित होना, (ख) **परिहारपक्ष में**-प्रसिद्ध होना **निषण्णं**-निसद्+क्त-(क) विरोध पक्ष पक्ष में-बैठे हुए को (ख) परिहारपक्ष में-निश्चित होकर आश्रित रहने वाले को, **ज्वलत्**-(क) विरोधपक्ष में-जलती हुई (ख) परिहार में देदीप्यमान। **सूक्ष्म**-(क) विरोधपक्ष में अविपुल (ख) परिहारपक्ष में-अध्यात्म विषयक ज्ञान। **महादोष**-(क) विरोधपक्ष में-बहुत से दुर्गुणों वाले को। (ख) परिहारपक्ष में-बड़ी भुजाओं वाले को। **कुपति**-(क) विरोधपक्ष में-दुष्टपति (ख) परिहारपक्ष में पृथ्वीपति। **दान**-(क) विरोधपक्ष में-मदजल (ख) परिहारपक्ष में-धन आदि का देना। मद (क) विरोध में-मदवल (ख) परिहार में-**अहंकार**। **कृष्णचरित**-(क) विरोधपक्ष में बुरे चरित्रवाला (ख) परिहार पक्ष में श्रीकृष्ण जैसे आचरणवाला। **अकर**-(क) विरोधपक्ष में-बिना हाथवाला, (ख) परिहार पक्ष में-कर अर्थात् टैक्स न लेने वाला, **अद्राक्षीत्**-दृश् लुङ् प्र० पु० ए० व०।

आलोक्य च सा दूरस्थितैव प्रचलितरत्नवलयेन रक्तकुवलयदलकोमलेन पाणिना जर्जरितमुखभागां वेणुलतामादाय नरपतिप्रबोधनार्थं सकृत्सभा-कुट्टिममाजघान, येन सकलमेव तद्राजकम् एकपदे, वनकरियूथमिव ताल-शब्देन तेन वेणुलताध्वनिना युगपदावलितवदनमवनिपालमुखादाकृष्य चक्षुस्तदभिमुखमासीत्।

हिन्दी अनुवाद - (राजा शूद्रक को) देखकर उस चाण्डाल कन्या ने दूर खड़े होकर ही हिलते हुए मणिखचित कङ्कण वाले, अरुण कमलपत्र के समान कोमल हाथ से, जर्जरीभूत अग्रभाग वाली बाँस की दण्डी को लेकर महाराज को अपनी ओर आकृष्ट करने के लिए सभामण्डप के फर्श को एक बार पीटा जिससे समस्त राजमण्डल एक साथ मुख घुमाकर महाराज के मुख से आँखे हटाकर, ताल शब्द से बनैले हाथियों के दल के समान, तत्काल उस मातङ्गकन्या की ओर अभिमुख हो गए। जिस प्रकार तालध्वनि से वन के हाथी अपना मुख तत्काल उस ध्वनि की ओर कर लेते हैं उसी प्रकार दण्डे की ध्वनि से सभी राजा शूद्रक के मुख से दृष्टि हटाकर उस चाण्डाल कन्या की ओर देखने लगे।

संस्कृतव्याख्या - **आलोक्य**=भूपतिं दृष्ट्वा, **च सा**=चाण्डालकन्यका, **दूरस्थितैव**=दूरदेशे वर्तमाना एव, **प्रचलितरत्नवलयेन**=प्रकम्पितमणिखचितकङ्कणेन, **रक्तकुवलयदलकोमलेन**=रक्तं शोणितं यत्कुवलयं कमलं तद्वत् कोमलेन, मृदुलेन, **पाणिना**=करेण **जर्जरितमुखभागाम्**=जर्जरितः जीर्णः मुखभाग अग्रभागो यस्याः सा तां तथोक्ताम्, **वेणुलतां**=वंशयष्टिम्, **आदाय**=गृहीत्वा, **नरपतिप्रबोधनार्थं**=नरपतेः नृपतेः शूद्रकस्य प्रबोधनार्थं स्वाभिमुखीकरणार्थम्, **सकृत्**=एकवारं, **सभाकुट्टिमं** =सभाबद्धभूमिम्, **आजघान**=ताडयामास। **येन**=आघातेन, **सकलमेव**=समस्तमेव, **तद्राजकं**=नृपतिसमूहः, राज्ञां समूहः राजकम्, **एकपदे**=तत्कालमेव, 'तत्क्षणैकपदे तुल्य' इति हलायुधः; **तालशब्देन**=तालः कांस्यकरतालः तस्य शब्देन ध्वनिना, **वनकरियूथमिव**=वनकारिणां वन्यहस्तिनां यूथं समूह इव, **तेन**=पूर्वोक्तेन, **वेणुलता-ध्वनिना**=वेणुलता वंशयष्टिः तस्य ध्वनिना शब्देन, **युगपद्**=एककालम् **आवलितवदनं**=आवलितंपरावर्तितं वदनं मुखं येन एवम्भूतम्, **अवनिपाल-मुखात्**=नृपतिमुखात्, **आकृष्य**=आकर्षणं कृत्वा, **चक्षुः**=लोचनं, **तदभिमुखं**= चाण्डालकन्यायाः सम्मुखम् **आसीत्**=अभवत्।

टिप्पणी - **आलोक्य**-आ+लोक्+क्त्वा-ल्यप्। **प्रचलितरत्नवलयेन**-प्रचलितं **रत्नवलयं यस्य तेन**=यह हाथ का विशेषण है। अर्थात् जिस हाथ में रत्नजटित कङ्कण हिल रहा था। **रक्तकुवलयदलकोमलेन**-रक्तं यत्कुवलयं तस्य दलवत् कोमलेन, लाल कमल के दल के समान कोमल यह भी साथ का विशेषण है। यहाँ **लुप्तोपमालंकार** है। **आजघान**-आहन् लिट् प्र० पु० ए० व०। **राजकम्**-राज्ञां समूहः-राजन्+वुञ्-अक। आकृष्य-आ+कृष्+क्त्वा-ल्यप्। **वनकरियूथमिव-में उपमालंकार** है।

अवनिपतिस्तु 'दूरादालोकय' इत्यभिधाय प्रतीहार्य्या निर्दिश्यमानां तां वयःपरिणामशुभ्रशिरसा, रक्तराजीवेक्षणापाङ्गेनानवरतकृतव्यायामतया यौवनापगमेऽप्यशिथिलशरीरसन्धिना सत्यपि मातङ्गत्वे नातिनृशंसाकृतिनाऽनु-गृहीतार्यवेशेन शुभ्रवाससा पुरुषेणाधिष्ठितपुरोभागाम्।

हिन्दी अनुवाद - राजा ने तो (निर्निमेष नेत्रों से उस चाण्डाल कन्या को देखा-दूरवर्ती क्रिया से सम्बन्ध है) 'दूर से देखो' ऐसा कहकर प्रतीहारी द्वारा निर्दिष्ट की जाती हुई, वृद्धावस्था के कारण श्वेत शिर वाले, लाल कमल के समान नेत्र प्रान्त वाले, नित्य व्यायाम करने के कारण युवावस्था व्यतीत होने पर भी सुदृढ़शरीर के जोड़ो वाले, चाण्डालपना होने पर भी न अत्यधिक क्रूर आकृतिवाले

(अर्थात् उदार आकृतिवाले), शुभ्रवस्त्रों से सुसज्जित पुरुष के द्वारा अधिष्ठित अग्रभाग वाली (चाण्डालकन्या को देखा)।

संस्कृतव्याख्या - **अवनिपतिस्तु**=राजा शूद्रकस्तु, **अनिमिषलोचनः**= निमेषोन्मेषवर्जितनयनः, **तां**=चाण्डालकन्यकां **ददर्श**=विलोकयामासेति दूरेणान्वयः। **दूरादालोक्य**=हे चाण्डालकन्ये त्वं खलु दूरादेव शुकं दर्शय, यतोहि चाण्डाल-कन्यायाः नृपसमीपगमनं नोचितम्: **इत्यभिधायः**=एवमुक्त्वा, **प्रतीहार्या**= द्वारपालिकया **निर्दिश्यमानां**=ज्ञाप्यमानाम्, **ताम्**=चाण्डालकन्यकाम् **वयःपरिणामशुभ्रशिरसा**=वयसः अवस्थायाः परिणामेन वार्धक्येन शुभ्रं श्वेतं शिरो मूर्द्धा यस्य सः तेनः, **रक्तराजीवेक्षणापाङ्गेन**=रक्तं लोहितं राजीवं कमलं तद्वत् नेत्रापाङ्गौ लोचनप्रान्तौ यस्य सः तेन, **अनवरतकृतव्यायामतया**=अनवरतं सततं कृतो विहितो व्यायामः परिश्रमः येन यस्य भावस्तत्ता तया, **यौवनाप्पगमेऽपि**=यौवनं तारुण्यं तस्य अपगमेऽपि समाप्तावपि, **अशिथिलशरीरसन्धिना**=अशिथिलाः दृढाः शरीरसन्धयः देहबन्धाः यस्य सः तेन, मातङ्गत्वे चाण्डालत्वे, **सत्यपि नातिनृशंसा-कृतिना**=नातिनृशंसा नातिक्रूरा आकृतिः स्वरूपं यस्य तेन, **अनुगृहीतार्य-वेशेन**=अनुगृहीतः स्वीकृतः आर्यवेशः सभ्यनेपथ्यं येन स तेन, **शुभ्रवाससा**= धवलवस्त्रेण, **पुरुषेण**=मनुष्येण, **अधिष्ठितपुरोभागाम्**=अधिष्ठितः आश्रितः पुरोभागः अग्रभागः यस्याः सा, ताम्।

टिप्पणी - **अभिधाय**-अभिधा+क्त्वा-ल्यप्=कहकर। निर्दिश्यमानाम्-निर्‌दिश्+यक्+शानच्-निर्दिष्ट की जाती हुई चाण्डाल कन्या को। **वयः परिणामशुभ्रशिरसा**' से लेकर '**शुभ्रवाससा**' तक समस्त पद पुरुरेण के विशेषण हैं। '**रक्तराजीवनेत्रापाङ्गेन**' **में लुप्तोपमालङ्कार है। मातङ्गत्वे**-मातङ्गस्य भावः मातङ्ग+त्वल्=मातङ्गत्वं, तस्मिन् मातङ्गत्वे, चाण्डालप्ल मातङ्गदिवाकीर्तिजनङ्गमाः, इत्यमरः। **आर्य**-सज्जन, 'कर्तव्यमाचरन् काममकर्तव्यमनाचरन्। तिष्ठति साध्वाचारे यः स आर्य इति स्मृतः'॥ **अधिष्ठित**-अधिस्था+क्त, आश्रित।

आकुलाकुलकाकपक्षधारिणा कनकशलाकानिर्मितमप्यन्तर्गतशुक-सभाश्यामायमानं मरकतमयमिव पञ्जरमुद्वहता चाण्डालदारकेणानुगम्यमानाम्, असुरगृहीतामृतापहरणकृतकपटपटुविलासिनीवेशस्य श्यामतया भगवतो हरेरिवानुकुर्वतीम्, सञ्चारिणीमिवेन्द्रनीलमणिपुत्रिकाम्, आगुल्फावलम्बिना नीलकञ्चुकेनाच्छन्नशरीरम्, उपरिरक्तांशुकविरचितावगुण्ठना नीलोत्पलस्थ-लमिव निपतितसन्ध्यातपाम्।

हिन्दी अनुवाद - इधर-उधर विखरे हुए केकपक्ष (बालकों की शिखा) को धारण करने वाले, कनकशलाकों से निर्मित होने पर भी अन्दर स्थित शुक की कान्ति से श्याम वर्ण होने से मानो मरकतमणि से बने हुए पिंजरे को वहन करने वाले चाण्डाल पुत्र के द्वारा अनुसरण की जाती हुई, अपने शरीर की श्यामता के कारण ं त्यों द्वारा अधिकृत अमृत अपहरण के लिए कपटपूर्ण पटु (चातुर्ययुक्त) मोहिनी स्त्रीवेश को धारण करने वाले भगवान् विष्णु का मानो अनुकरण करने वाली, सञ्चरण करने वाली इन्द्रनीलमणि की पुत्तलिका के समान प्रतीत होने वाली, घुटने तक लकटने वाले नीले कञ्चुक से आच्छादित शरीर वाली, शिरोभाग में लाल वस्त्र से घूंघट डालने वाली, अतएव सन्ध्याकालीन धूप से युक्त नीलकमलों से पूर्ण पृथ्वी के समान प्रतीत होने वाली (चाण्डाल कन्या को देखा)।

संस्कृतव्याख्या - **आकुलाकुलकाकपक्षधारिणा**=आकुलाकुलः इतस्ततः संलग्र यः काकपक्षः शिखण्डकः तं धारयितुं शीलं यस्य तेन, 'काकपक्षः शिखण्डकः' इत्यमरः, **कनकशलाका-निर्मितमपि**=कनकशलाकाः सुवर्णशलाकाः ताभिः निर्मितमपि रचितमपि, **अन्तर्गतशुकप्रभाश्यामायमानम्**=अन्तर्गतस्य मध्यस्थितस्य शुकस्य कीरस्य प्रभा कान्तिस्तया श्यामायमानं श्यामवर्णवदाचरत्, श्यामवर्णमिव दृश्यमानमित्यर्थः, **मरकतमयमिव**=मरकतमणिजटितमिव, **पञ्जरं**=पक्षिरक्षणभवनम्, **उद्वहता**=धारयता, **चाण्डालदारकेण**=अन्त्यजसुतेन, **अनुगम्यमानां**=अनुगमनं क्रियमाणाम्, **असुरगृहीतामृतापहरणकृतकपटपटु-विलासिनीवेशस्य**=असुरैः राक्षसैः गृहीतम् अपहृतं यदमृतं सुधा तस्यापहरणे अपहृतौ कृतो विहितः कपटो व्याजपूर्णः पटुः चातुर्ययुक्तः विलासिनीवेशो मोहिनीस्त्रीस्वरूपं येन तस्य, **भगवतः हरेः**=विष्णोः, **श्यामतया**=तुल्यकृष्णवर्णतया, **अनुकुर्वतीमिव**=सादृश्यमनुभवन्तीमिव, **सञ्चरिणीम्**=सञ्चरणशीलाम्, **इन्द्रनीलमणि-पुत्रिका**=नीलकांतमणिनिर्मितपुत्तलिकाम्, **इव**=उत्प्रेक्षायाम्, **आगुल्फाव-लम्बिना**=घुटिकापर्यन्तपातिना, **नीलकञ्चुकेन**=नीलवर्णकार्पासकेन, **आच्छान्नशरीरां**=आवृतगात्राम्, **उपरि**=ऊर्ध्वप्रदेशे, **रक्तांशुकविरचितावगुण्ठनां**= रक्तांशुकेन लोहितवर्णवस्त्रेण विरचितं कृतम् अवगुण्ठनं मुखाच्छादनं यया सा ताम्, अतएव **निपतितसन्ध्यातपां**=निपतितः उपरि प्राप्तः सन्ध्यातपः सन्ध्याकालीनः सूर्यकिरणः यस्यां तां, **नीलोत्पलस्थलीमिव**=कुवलयकृत्रिमभूमिमिव।

टिप्पणी - **आकुलाकुल**-इधर उधर फैले हुए। **काकपक्ष**-विशेष प्रकार से सजाये गये बालकों के केश, 'सा बालानां काकपक्षः शिखण्डकशिखाण्डकौ' इति कोषः। **श्यामायमानम्**-अश्यामं श्यामं सम्पद्यत इति श्यामायमानम श्यामवर्ण

के होते हुए। श्याम+क्यङ्+शानच्। यहाँ '**श्यामायमानम्**' में क्यङ् गत **उपमा** है तथा '**मरकतमयमिव**' में क्रियोत्प्रेक्षा अलंकार है। अतएव **अङ्गाङ्गिभाव सङ्कर**। **उद्वहता**–उत्वह्+शतृ, तृ० ए० व०–धारण करते हुए के द्वारा। **अनुगम्यमानाम्**– अनुगम्+यक्+शानच्+टाप् द्वि० ए०–अनुगमन की जाती हुई को। '**असुरगृहीत ......**'श्रीमद्भागवत महापुराण की कथा है कि देवताओं तथा असुरों ने मिलकर समुद्र का मन्थन किया। समुद्र–मन्थन से निकले हुए अमृत को दैत्यों ने देवताओं को न देकर स्वयं ले लिया। ऐसा देखकर भगवान् विष्णु ने मोहनी रूप धारण कर राक्षसों को धोखा देकर उस अमृत को देवताओं को दिया। **भगवान्**–भग+मतुप्, भगवान का लक्षण–''उत्पत्तिं च स्थितिं चैव लोकानामगतिं गतिम्। वेत्ति विद्यामविद्यां च स ज्ञेयोभगवानिति॥'' '**अनुकुर्वतीमिव**'–में **क्रियोत्प्रेक्षालंकार**। **सञ्चारिणी-मिव**–समचर्+णिनि+ङीप्, द्वि० ए० व०–गमनशील, यहाँ **उत्प्रेक्षालंकार** है। **पुत्रिका**–पुतली। **गुल्फ**–पैर की एड़ी के पास की गाँठ। **अवगुण्ठन**–घूँघट। '**नीलोत्पल-स्थलीमिव**' में **उपमालंकार** है।

एककर्णावसक्तदन्तपत्रप्रभाधवलितकपोलमण्डलाम्, उद्यदिन्दुकिरणच्छुरितमुखीमिव विभावरीम् आकपिलगोरोचनारचिततिलकतृतीय-लोचनाम्, ईशानुरचितकिरातवेशामिव भवानीम् उरःस्थलनिवाससङ्क्रान्त-नारायणदेहप्रभाश्यामलितामिव श्रियम्, कुपितहरहुताशनदह्यमानमदनधूम-मलिनीकृतामिव रतिम्, उन्मदहलिहलाकर्षणभयपलायितामिव कालिन्दीम्, अतिबहलपिण्डालक्तकरसरागपल्लवितपाद-पङ्कजाम्, अचिरमृदितमहिषा-सुररुधिररक्तचरणमिव कात्यायनीम्।

हिन्दी अनुवाद – एक कान में धारण किए गए कर्णाभरण की कान्ति से धवल किए गए कपोल मण्डल वाली, अतएव उदीयमान चन्द्रमा की किरणों से प्रकाशित मुख (प्रदोषारम्भ) वाली रात्रि के समान प्रतीत होने वाली, ईषद्कपिलवर्ण गोरोचना से विरचित तिलकरूपी तृतीय नेत्र वाली, अतएव शिव द्वारा किरात वेश के समान किरातिनी के वेषवाली पार्वती के समान प्रतीत होने वाली, वक्षःस्थल में निवास करने के कारण प्रतिबिम्बित होने वाली नारायण की श्याम देह प्रभावश श्यामता को प्राप्त लक्ष्मी जी के समान प्रतीत होने वाली, क्रोधाविष्ट शङ्कर की अग्नि से दग्ध कामदेव के धूम से मलिन बनाई गई रति के समान प्रतीत होने वाली, प्रचण्ड गर्व वाले बलभद्र के हलाकर्षण के भय से भागी हुई यमुना के समान प्रतीत होने वाली, अत्यधिक पिण्डीभूत महावर के रस की लालिमा के कारण

नवीन कोपल के समान चरणकमलों वाली अतएव तत्काल मारे गए महिषासुर के रुधिर से लाल चरणों वाली-कात्यायनी के समान प्रतीत होने वाली (चाण्डाल कन्या को देखा)।

संस्कृतव्याख्या - **एककर्णावसक्तदन्तपत्रप्रभाधवलितकपोलमण्डलम्**= एकस्मिन् कर्णे श्रवणेऽवसक्तं संलग्नं यत् दन्तपत्रं कर्णाभूषणविशेषस्तस्य प्रभया कान्त्या धवलितं श्वेतीकृतं कपोलमण्डलं गण्डबिम्बं यस्यास्ताम्, अत एव **उद्यदिन्दुकिरणच्छुरितमुखीम्**=उद्यद् उदयं प्राप्नुवन् य इन्दुः चन्द्रः तस्य किरणैः छुरितं रञ्जितं मुखमग्रभागं वदनञ्च यस्यास्ताम्, **विभावरीं**=रात्रिम्, **इव**=उत्प्रेक्षायाम्, **आकपिलगोरोचनारचिततिलकतृतीयलोचनां**=आ ईषत् कपिला पीतलोहितवर्णा या गोरोचना गोपित्तं तया रचितं निर्मितं यत् तिलकं पुण्ड्रंतदेव तृतीयं लोचनं नेत्रं यस्यास्ताम्, अत एव **ईशानुरचितकिरातवेशां**=ईशानुरचितः शिवानुरचितः किरातवेशः भिल्लनेपथ्यं यया सा एवम्भूताम्, **भवानीं**=पार्वतीम्, इव **उरःस्थलनिवाससङ्क्रान्त-नारायणदेहप्रभाश्यामलिताम्**=उरः स्थले वक्षसि निवासेन आवासेन सङ्क्रान्ता प्रतिबिम्बिता या नारायणस्य विष्णोः देहप्रभा शरीरकान्तिः तया श्यामलितां श्यामत्वं प्राप्तां, **श्रियं**=लक्ष्मीम् इव, **कुपितहरहुताशनदह्यमानमदनधूममलिनीकृताम्**= कुपितः क्रुद्धः यः हरः शिवः तस्य हुताशनेन तृतीयनेत्राग्निना दह्यमानः ज्वाल्यमानः यः मदनः कामदेवस्तस्य धूमेन दाहधूमेन मलिनीकृतां मालिन्यमुपगतां, **रतिं**= कामपत्नीम् **इव उन्मदहलिहलाकर्षणभयपलायितम्**=उन्मदस्य प्रबलाहङ्कारिणः हलिनः बलभद्रस्य हलेन लाङ्गलेन यद् आकर्षणम् आकृष्टिः तस्माद् येन त्रासेन पलायिताम् विलयं गतां **कालिन्दीं** यमुनाम् **इव**, **अतिबहलपिण्डालक्तकरसराग-पल्लवितपादपङ्कजाम्**=अतिबहलः अत्यधिकः यः पिण्डालक्तकरसः पिण्डी-भूतालक्तकद्रवस्तस्य रागेण लौहित्येन पल्लविते नवकिसलयवत् शोभिते पादपङ्कजे चरणकमले यस्याः सा तां तादृशीम्, **अचिरमृदितमहिषासुररुधिररक्तचरणाम्**= अचिरमृदितस्य तत्कालच्छिन्नकण्ठस्य महिषासुरस्य एतदाख्यस्य राक्षसस्य रुधिरेण शोणितेन रक्तौ रक्तवर्णौ पादौ यस्यास्तां **कात्यायनीं**=दुर्गाम् **इव**।

टिप्पणी -**'एककर्णावसक्त........विभावरीम्'** में **उपमालंकार**। **अवसक्त** अवसञ्ज्+क्त-धारण किया हुआ, लगा हुआ। **छुरित**=प्रकाशित। **आकपिल**-लाल तथा पीली। **'ईशानुरचित.....भवानीम्'**-महाभारत की कथा है कि श्रीकृष्ण के कथनानुसार अर्जुन पाशुपत अस्त्र की प्राप्ति के लिए तपस्या करने गये थे। उन अर्जुन के वध के लिए मूकदानव ने वराह का रूप धारण किया तो उस वराह

वेशधारी दानव के वध के लिए भगवान् शङ्कर ने किरात का वेश धारण किया तथा उसी वेश को धारण कर पार्वती जी भी उनके पीछे-पीछे चलीं। यहाँ भी **उपमालंकार** है। सङ्क्रान्त-सम्+क्रम्+क्त-प्रतिबिम्बित। **'उरःस्थल.....श्रियम्'** यहाँ लक्ष्मी तथा चाण्डालकन्या के साम्य से उपमा तथा लक्ष्मी जी से अपने गौरवर्ण के परित्याग से नारायण के श्यामवर्ण गुण के ग्रहण कर लेने से **तद्गुणालंकार है। अङ्गाङ्गिभाव संकर। दह्यमान** दह्+क्यप्+शानच्-जलते हुए। **कुपित....रतिम्**-शिवपुराण की कथा है कि तारकासुर से त्रस्त होकर देवता ब्रह्मा जी के पास गये तथा अपने दुःख की कथा सुनायी। ब्रह्मा जी ने देवताओं को बलताया कि शिव-पार्वती का पुत्र कार्तिकेय ही इसका वध कर सकता है। ऐसा सुनकर इस कार्य में सफलता किस प्रकार मिले?-ऐसा विचार करके कामदेव को नियुक्त किया। कामदेव ने अपने सम्मोहन अस्त्र से शिव के धैर्य को लुप्त करना चाहा परन्तु शिव ने अपने तृतीय नेत्र से उसे भस्म कर डाला। **उन्मद.....कालिन्दीम्**-श्रीमद्भागवत की कथा है कि एक बार मद्यपान से गर्वित बलराम ने जलक्रीडा के लिए यमुना को बुलाया। जब यमुना जी नहीं आयीं तो वह उन्हें हल से खींचने लगे। ऐसा किये जाने पर यमुना जी अन्तर्धान हो गयीं। **अलक्तक**-महावर। **'अतिबहल.....कात्यायनीम्'** यहाँ रुधिर तथा रक्त पद से **पुनरुक्तवदाभास** तथा **उपमा** अलङ्कार-इन दोनों का **एकाश्रयानुप्रवेश रूप सङ्कर** है। मार्कण्डेय पुराण की कथा है कि ब्रह्मा से वर प्राप्त कर महिषासुर संसार को पीड़ित करने लगा था। ऐसी दशा में भगवती दुर्गा ने स्वयं प्रकट होकर उसका वध किया।

आलोहिताङ्गुलिप्रभापाटलितनखमयूखाम् अतिकठिनमणिकुट्टिम-स्पर्शमसहमानां क्षितितले पल्लवभङ्गानिव निधाय सञ्चरन्तीम् आपिञ्जरेणोत्सर्पिणा नूपुरमणीनां प्रभाजालेन रञ्जितशरीरतया पावकेनेव भगवता रूप एव पक्षपातिना प्रजापतिमप्रमाणीकुर्वता जातिसंशोधनार्थमालिङ्गितदेहाम्, अनङ्गवारणशिरोनक्षत्रमालायमानेन रोमराजिलतालवालकेन मेखलादाम्ना परिगतजघनस्थलाम्, अतिस्थूलमुक्ताफलघटितेन शुचिना हारेण गङ्गास्त्रोतेसेव कालिन्दीशङ्कया कृतकण्ठग्रहाम्।

हिन्दी अनुवाद - अत्यधिक लाल उंगलियों की कान्ति से श्वेतरक्त बनाई गई नाखूनों के किरण वाली, अत्यन्त कठोर मणिनिर्मित फर्श के स्पर्श को सहन न करने वाली अतएव मानो पृथ्वीतल पर किसलयखण्डों को रखकर चलने वाली, कुछ कुछ रक्तपीत एवं प्रसरणशील नूपुर मणियों के प्रभाजाल से रञ्जित शरीर

होने के कारण मानो सौन्दर्य के पक्षपाती प्रजापति ब्रह्मा को अप्रमाणित करने वाले भगवान् अग्निदेव के द्वारा, जाति संशोधन के लिए आलिङ्गित शरीर वाली, कामदेव रूपी गजराज के शिर की नक्षत्रमाला के समान प्रतीत होने वाली, तथा रोमावली रूप लता का आलवाल (थरहा) स्वरूप काञ्ची से घिरे हुए जघन स्थलवाली, अत्यन्त स्थूल मुक्ताफल से निर्मित (मोतियों की गुरियों से निर्मित) श्वेतवर्ण हार से मानो यमुना की शंका से गङ्गाप्रवाह के द्वारा गले में आलिङ्गन की गई (मातङ्गकुमारी को देखा)।

संस्कृतव्याख्या - **आलोहिताङ्गुलिप्रभापाटलितनखमयूखाम्**=आलोहिताः अत्यधिकरक्तवर्णाः याः अङ्गुलयः करशाखाः तासां प्रभाभिः कान्तिभिः पाटलिताः श्वेतरक्तीकृताः नखमयूखाः नखरश्मयः यस्यास्ताम्, **अतिकठिनमणिकुट्टिमस्पर्शम-सहमानां**=अतिकठिनस्य अत्यधिककठोरस्य मणिकुट्टिमस्य मणिमयबद्धभुवः स्पर्शः संश्लेषम् असहमानाम् अक्षममाणाम् अतएव **क्षितितले**=भूतले, **पल्लवभङ्गान्**=किसलयखण्डान्, **इव**=उत्प्रेक्षायाम्, **निधाय**=स्थापयित्वा, **सञ्चरन्तीं**=गच्छन्तीम्, **आपिञ्जरेण**=ईषत्पीतलोहितेन, **उत्सर्पिणा**=ऊर्ध्वगामिना, **नूपुरमणीनां**=हंसकरत्नानां, **प्रभाजालेन**=कान्तिसमूहेन, **रञ्जितशरीरतया**= शोभितदेहतया अतएव **प्रजापतिं**=ब्रह्माणम्, **अप्रमाणीकुर्वता**=प्रमाणत्वेन निराकुर्वता, **रूपे**=सौन्दर्य एव **पक्षपातिना**=आदरकारकेण, **भगवता पावकेन**=अग्निदेवेन, **जातिसंशोधनार्थम्**=चाण्डालजाति-संशोधनार्थम्, **आलिङ्गितदेहां**=आश्लेषितशरीराम्, **अनङ्गवारणशिरोनक्षत्रमालाय-मानेन**=अनङ्गः कामदेवस्तस्य यो वारणो हस्ती तस्य शिरसि मूर्ध्नि या नक्षत्र माला सप्तविंशतिसंख्यकमुक्ताग्रथितमाला तद्वदाचरता, **रोमराजिलतालवालकेन**=रोमराजिः लोमपंक्ति एव लता वल्ली तस्या आलवालम् आवापस्तत्स्वरूपेण, **मेखलादाम्ना**=रसनादाम्ना, **परिगतजघनस्थलाम्**=परिगतं **जघनस्थलाम्**=परिगतं समन्ताद् व्याप्तं जघनस्थलं कटिपुरोभागो यस्याः सा तां तादृशीम्, **अतिस्थूलमुक्ताफलघटितेन**=अतिस्थूलानि अतिबृहन्ति यानि मुक्ताफलानि मौक्तिकानि तैः घटितेन रचितेन, **शुचिना**=श्वतेवर्णेन, **हारेण**=चतुःषष्टिललेन, **गङ्गास्रोतसा**=गङ्गाप्रवाहेण, **इव कालिन्दीशङ्कया**=यमुना-भ्रान्त्या, **कृतकण्ठग्रहाम्**=कृतो विहितः कण्ठग्रहो गलसंश्लेषो यस्याः तां तादृशीम्।

टिप्पणी -**'आलोहित..........संचरन्तीम्'** यहाँ रक्तवर्ण की नखकिरणों को रक्तवर्ण किसलयखण्ड के रूप में सम्भावना किए जाने से **उत्प्रेक्षालङ्कार** है। **निधाय-नि**=धा+क्त्वा-ल्यप्। असहमाना-सह+शानच्+टाप्। न **सहमाना**=

असहमाना। **आपिञ्जरेण......देहाम्**-यहाँ 'आपिञ्जरेण, तथा उत्सर्पिणा ये दोनों 'प्रभाजालेन तथा 'पावकेन के विशेषण है। अपवित्र वस्तु अग्नि के द्वारा पवित्र हो जाती है। धर्मशास्त्र 'सर्वमग्नौ प्रतप्तं शुध्यते।' **उपमा** तथा **उत्प्रेक्षा का अङ्गाङ्गिभाव सङ्कर** है। **नक्षत्रमालायमानेन**-नक्षत्रमालावदाचरमाणः नक्षत्रमालायमानः तेन नक्षत्रमालायमानेन-नक्षत्र माला+क्यङ्+शानचृ तृ० ए० व०, नक्षत्रमाला-मुक्तामणियों से गूँथी गयी माला विशेष। अमरकोश 'सैव नक्षत्रमाला स्यात् सप्तविंशतिमौक्तिकैः। आलवालकः-थलहा, वृक्ष आदि के सीचने के लिए उसके चारों ओर बनाया गया गढ़ा। '**स्यादालवालमावालमावापः**'' इत्यमरः। **अनङ्ग....स्थलीम्**' यहाँ नक्षत्र-मालायमानेन' में क्यङ्गत **उपमा** तथा उससे सङ्कीर्ण रोमराजि में लतात्व का आरोप, मेखलादाम में आलवालत्व का आरोप होने से परम्परित **रूपक अलङ्कार** हैं। '**अतिस्थूल....कृतकण्ठग्रहाम्**'-यहाँ चाण्डाल कन्या में श्यामता के कारण कालिन्दी के भ्रम होने से **भ्रान्तिमान् अलङ्कार** है तथा हार में गङ्गाप्रवाह की सम्भावना से '**उत्प्रेक्षालङ्कार**। दोनों का **अङ्गाङ्गिभाव संकर**।'

शरदमिव विकसितपुण्डरीकलोचनाम्, प्रावृषमिव घनकेशजालाम्, मलयमेखलामिव चन्दनपल्लवावतंसाम्, नक्षत्रमालामिव चित्रश्रवणाभरण-भूषिताम्, श्रियमिव हस्तस्थितकमलशोभाम्, मूर्च्छामिव मनोहारिणीम्, अरण्यभूमिमिव अक्षतरूपसम्पन्नाम्, दिव्ययोषितमिवाकुलीनाम्, निद्रामिव लोचनग्राहिणीम् अरण्यकमलिनीमिव मातङ्गकुलदूषिताम्, अमूर्त्तामिव स्पर्शवर्जिताम्, आलेख्यगतामिव दर्शनमात्रफलाम्, मधुमासकुसुमृद्धिमिव अजातिम्, अनङ्गकुसुमचाप लेखामिव मुष्टिग्राह्यमध्याम्, यक्षाधिपलक्ष्मीमिवा-लकोद्भासिनीम्, अचिरोपारूढयौवनाम्, अतिशयरूपाकृतिम्, अनिमिषलोचनो ददर्श।

हिन्दी अनुवाद - शरद् ऋतु के समान विकसित श्वेतकमल के समान नेत्रों वाली (शरद्ऋतु के पक्ष में-प्रफुल्लित श्वेतकमल रूपी नेत्रों वाली), वर्षाऋतु के समान घने केशसमूह वाली (वर्षा ऋतु में मेघण्डल रूपी केशपाश है), मलयपर्वत की मेखला (मध्यभाग) के समान चन्दन पल्लवों के कर्णाभूषणों से युक्त (मलय पर्वत की मेखला में चन्दनलता के नूतन किसलय ही आभूषण हैं), नक्षत्रमाला के समान विचित्र कर्णभूषण से विभूषित (नक्षत्रमाला में चित्र तथा श्रवण नक्षत्र रूपी आभूषण होते हैं) लक्ष्मी के समान हाथों में विद्यमान कमल के समान शोभावाली (लक्ष्मी के हाथ में कमल होने से सुशोभित होती है) मूर्च्छा के समान मन को

हरण करने वाली (मूर्च्छा में मन अर्थात् चित्तवृत्ति नष्ट हो जाती है), अरण्य भूमि के समान अक्षुण्ण रूप सौन्दर्य से युक्त (अरण्यभूमि में अक्ष नामक वृक्ष सुशोभित होते हैं) दिव्य कन्या के समान अकुलीन अर्थात् निम्न वंश में उत्पन्न (दिव्य कन्या (देवाङ्गना कु-पृथ्वी में नहीं रहती है), निद्रा के समान नेत्रों को आकृष्ट करने वाली (निद्रा में व्यापार निरुद्ध हो जाते हैं), वनकमलिनी के समान चाण्डाल कुल में उत्पन्न होने से मालिन्य युक्त (वनकमलिनी मातङ्गकुल-गजसमूह से दूषित-मर्दित होती है), अमूर्त (मूर्तहीन) के समान स्पर्श न करने योग्य (चाण्डाल वंश में उत्पन्न होने से मातङ्गकुमारी स्पर्श वर्जित थी, अमूर्त वस्तु दिखाई न देने से स्पर्शरहित होती है), चित्रलिखित के समान दर्शनमात्र प्रयोजन वाली (चित्र का केवल दर्शन किया जा सकता है, मातङ्ग कुमारी केवल देखने योग्य थी स्पर्श के योग्य नही) वसन्तकालीन पुष्पसमृद्धि के समान जाति विहीन (अन्त्यज)(वसन्त में जाति-मालती के पुष्प नहीं होते हैं), कामदेव के चापदण्ड के समान मुट्ठी में पकड़ने योग्य मध्यभाग मुट्ठी से पकड़ा जाता है), कुबेर की लक्ष्मी के समान घुँघराले केशों से शोभायमान (कुबेर की राज्यलक्ष्मी अलकापुरी से सुशोभित थी), अभी हाल में ही युवावस्था को प्राप्त करने वाली एवं अतिशय सौन्दर्य से सम्पन्न आकृति वाली उस मातङ्गकुमारी को निर्निमेष नेत्रों से देखा।

संस्कृतव्याख्या - **शरदमिव**=घनात्ययमिव, **विकसितपुण्डरीकलोचनाम्**= विकसते विस्फारिते पुण्डरीके सिताम्भोजे तद्वत् लोचने नयने यस्यास्ताम्, शरत्पक्षे-विकसितानि पुण्डरीकाणि श्वेतकमलानि एव लोचनानि यस्याः, ताम्। **प्रावृषमिव**=वर्षाकालमिव, **घनकेशजालाम्**=घनाः सान्द्राः ये केशाः शिरोरुहास्तेषां जालानि समूहाः यस्यास्ताम्, प्रावृट्पक्षे-घनाः मेघाः एव केशजालानि यस्यास्ताम्, **मयलयमेखलामिव**=मलयस्य एतदाख्यस्य पर्वतस्य मेखलां मध्यभागमिव, **चन्दनपल्लवावतंसाम्**=चन्दनस्य पल्लवाः किसलयानि तेषामवतंसाः भूषणानि यस्याः ताम्; मलयमेखलापक्षे चन्दनपल्लवास्त एवावतंसाः शेखरो यस्यास्ताम्, **नक्षत्रमाला-मिव**=तारकापङ्क्तिमिव, **चित्रश्रवणाभरणभूषिताम्**=चित्रैः विचित्रैः श्रवणाभरणैः कर्णभूषणैः भूपितां शोभिताम् नक्षत्रमालापक्षे-चित्रश्रवणाभरणीयसंज्ञकैः नक्षत्रविशेषैः भूषिताम्, **श्रियमिव**=लक्ष्मीमिव, **हस्तस्थितकमलशोभाम्**=हस्ते करे स्थिता विद्यमाना कमलस्य पद्मस्य शोभा श्री यस्याः सा ताम्, श्रीपक्षे-हस्ते स्थितं यत्कमलं तेन शोभा यस्याः सा ताम्, **मूर्च्छामिव**=मोहमिव, **मनोहारिणीम्**= सौन्दर्याधिक्येन चित्ताकर्पिणीम्, मूर्च्छापक्षे-चेतनालोपकरणेन मनोवृत्तिभ्रंशिनीम्, अरण्यभूमिमिव

काननभुवमिदव, **अक्षतरूपसम्पन्नाम्**=अक्षतं केनाऽप्यसम्भुक्तं यद् रूपं लावण्यं तेन सम्पन्नाम्, अरण्यभूमिपक्षे-अक्षतरुभि:रुद्राक्षवृक्षै:उपसम्पन्नां संयुक्ताम्, **दिव्ययोषितमिव**=देवाङ्गनामिव, **अकुलीनां**=नीचकुलोत्पन्नाम् पक्षे तु कु: पृथिवी तस्यां लीना स्थिता या भवति सा कुलीना एवं रूपा या न भवति सा अकुलीना ताम्, देवयोनीनां पृथ्वीतले स्पर्शो न भवतीति पौराणिका:, **निद्रामिव**= प्रमीलामिव, **लोचनग्राहिणीम्**=सौन्दर्यातिशयेन कामुकानां नेत्राकर्षिणीम्, निद्रापक्षे-नेत्रनिमीलन-कारिणीम्, **अरण्यकमलिनीमिव**=काननपद्मिनीमिव, **मातङ्गकुलदूषिताम्**= मातङ्गकुलेन चाण्डालान्वयेन दूषितां निन्दिताम्, पक्षे मातङ्गकुलेन हस्तिसमूहेन दूषितां विमथिताम् **अमूर्त्तामिव**=अशरीरिणीमिव, **स्पर्शवर्जिताम्**=शरीरस्पर्शरहिताम् पक्षे आकार-रहिता न स्पृश्यते, **आलेख्यगतामिव** =चित्रस्थितामिव, **दर्शनमात्रफलाम्**=दर्शनमात्रं चाण्डालत्वेन सम्भोगाभावात् अवलोकनमेव फलं प्रयोजनं यस्यास्ताम् पक्षे आलेख्यगताया अपि दर्शनमात्रमेव फलं भवति। **मधुमासकुसुमसमृद्धिमिव**=माधुमासस्य वसन्तसमयस्य **कुसुमसमृद्धिमिव**= पुष्पसम्पत्तिमिव, **अजातिं**=न विद्यते जाति: मन्वादिपरिगणितब्राह्मणत्वादि:यस्या सा ताम् पक्षे तु जातिपुष्परहिताम्, 'न स्याज्जाति: वसन्ते।' अनङ्गकुसुमं=अनङ्गस्य कामदेवस्य कुसुमचापस्य पुष्पधनुष: या लेखा लता तामिव, **मुष्टिग्राह्यमध्याम्**=मुष्टिना सम्पीडिताङ्गुलिना ग्राह्य: ग्रहीतुं शक्य: मध्य: कटिदेशो मध्यप्रदेश: यस्या सा ताम्। अनेन कटिदेशस्यात्यन्तकार्श्यं प्रत्याभ्यते। **यक्षाधिपलक्ष्मीमिव**=यक्षाधिपस्य कुबेरस्य लक्ष्मीं सम्पत् तामिव, **अलकोद्भासिनीम्**=अलकैश्चर्णूकुन्तलै उद्भासते शोभते इत्येवंशीला या सा ताम् पक्षे=अलकायां तन्नामिकायां पुर्याम् उद्भासते या सा ताम्। **अचिरोपारूढयौवनाम्**=अचिरं शीघ्रम् उपारूढम् उपगतं यौवनं तारुण्यं यस्या: सा ताम्, **अतिशयरूपाकृतिम्**=अतिशयरूपं लावण्यं यस्या: सा एवम्भूता आकृति: स्वरूपं यस्या: सा ताम्। शेषांशस्तु व्याख्यात:।

टिप्पणी - '**शरदमिव यक्षाधिपलक्ष्मीमिव**' यहाँ सर्वत्र श्लेष से युक्त **पूर्णोपमालंकार** है। **पुण्डरीक**-सफेद कमल, 'पुण्डरीकं सिताम्भोजमित्यमर:।' **मेखला**=मध्यभाग। '**नक्षत्रमालीमिव.....भूषिताम्**' यहाँ 'चित्र' 'चित्रा' तथा 'आभरण' भरणी में 'श्लेषे स्वरो न गण्यते' की विधि से लिङ्गव्यत्यय का औचित्य सिद्ध हो जाता है। **श्रियम्**-श्रयति हरिं या सा श्री: लक्ष्मी: ताम्, 'कमला श्रीर्हरिप्रिया' इत्यमर:। **अक्षतरूपसम्पन्नाम्**-यहाँ प्रकरण के अनुसार पद अलग कर लेने से चाण्डालकन्या के पक्ष में 'अक्षतरूपसम्पन्नाम्' तथा अरण्यभूमि के पक्ष में 'अक्षतरु

उपसम्पन्नाम्' ये अर्थ होंगे। **मातङ्ग**-(क) चाण्डालकन्या के पक्ष में-चाण्डाल, (ख) अरण्यकमलिनी के पक्ष में-हाथी। 'मातङ्गः श्वपचे गजे' इति मेदिनी। **स्पर्शवर्जिताम्**-चाण्डालकुल में जन्म होने के कारण स्पर्श वर्जिता थी- ''दिवाकीर्त्तिमुदक्याञ्च पतितां सूतिकां तथा। शवं तत्स्पृष्टिनञ्चैव स्पृष्ट्वा स्नानेन शुद्ध्यति।'' मनु। **अजातिं**-न विद्यते जातिः यस्या सा ताम्। चाण्डाल जातिहीन होते है जैसा कि मनु ने कहा है-ब्राह्मणः क्षत्रियो वैश्यस्त्रयो वर्णाः द्विजातयः। चतुर्थ एकजातिस्तु शूद्रो नास्ति तु पञ्चमः''॥ चाण्डालकन्या के पक्ष में जाति से रहित तथा मधुमास-कुसुसमृद्धि के पक्ष में जाति अर्थात् मालतीकुसुम से रहिता क्योंकि वसन्त में मालती पुष्प का वर्णन अप्रसिद्ध है। जैसा कि साहित्यदर्पण में कहा गया है-'न स्याज्जाती वसन्ते'।'जातिश्छन्दसि सामान्ये मालत्यां गोत्रजन्मनोः' इति मेदिनी। **अनङ्गमुष्टिग्राह्यमध्याम्**-इससे उसकी कमर का अत्यन्त पतला होना ध्वनित होता है।''सम्पीडिताङ्गुलिर्मुष्टिः'' इति हलायुधः। **अलकोद्भासिनीम्**-(क) चाण्डाल कन्या के पक्ष में-केशों से सुशोभित होने वाली। (ख) कुबेर की लक्ष्मी के पक्ष में -अलका में शोभायमान। **उपारूढ**-उप+आ+रुह्+क्त। **ददर्श**-दृश् लिट् प्र० पु० ए० व०।

दृष्ट्वा च तां समुपजातविस्मयस्याभून्मनसि महीपतेः-''अहो! विधातुरस्थाने रूपनिष्पादनप्रयत्नः। तथाहि यदि नामेयमात्मरूपोपहसिताशेष-रूपसम्पदुत्पादिता, किमर्थमपगतस्पर्शसंभोगसुखे कृतं कुले जन्म। मन्ये च 'मातङ्गजातिस्पर्शदोषभयादस्पृशतेमुत्पादिता प्रजापतिना, अन्यथा कथमिय-मक्लिष्टता लावण्यस्य। न हि करतलस्पर्शक्लेशितानामवयवानामीदृशी भवति कान्तिः। सर्वथा धिग्धिग्विधातारमसदृशसंयोगकारिणम्, अतिमनोहराकृतिरपि क्रूरजातितया येनेयमसुरश्रीरिव सततनिन्दितसुरता रमणीयाप्युद्वेजयति' इत्येवमादि चिन्तयन्तमेव राजानमीषदवगलितकर्णपल्लवावतंसा प्रगल्भवनितेव कन्यका प्रणनाम। //

हिन्दी अनुवाद - उस चाण्डाल कन्या को देखकर उत्पन्न आश्चर्य वाले राजा के मन में (विचार) हुआ-'आश्चर्य है! ब्रह्मा ने प्रतिकूल स्थान में सौन्दर्य निष्पादन का प्रयत्न किया है, क्योंकि अपने सौन्दर्य समृद्धि का उपहास करने वाली यह चण्डाल कन्या यदि इस प्रकार की बनाई गई है तो फिर स्पर्श एवं सम्भोग सुख से रहित (चाण्डाल) वंश में क्यों उत्पन्न की गई। और मैं मानता हूँ कि चाण्डाल जाति के स्पर्श जनित दोष के भय से प्रजापति ब्रह्मा ने स्पर्श न करते हुए ही इसका

निर्माण किया है अन्यथा ऐसी लावण्य की कोमलता कैसे सम्भव थी? करतल के स्पर्श से पीडित अङ्गों की ऐसी सुकुमारता निश्चय ही नहीं होती है। असमान संयोग करने वाले ब्रह्मा को सब प्रकार से धिक्कार है।, अत्यन्त मनोहर आकृति होने पर भी तथा रमणीय होने पर भी क्रूर जाति से सम्बन्ध होने के कारण निरन्तर देवताओं की निन्दा करने वाली असुर लक्ष्मी के समान यह चाण्डाल कन्या अत्यधिक सौन्दर्य से युक्त होने पर भी तथा रमणीय होने पर चाण्डाल जाति में उत्पन्न होने के कारण निरन्तर निन्दित सुरत (मैथुन) वाली होने के उद्वेग को उत्पन्न करती है, इत्यादि पूर्वोक्त प्रकार से चिन्ता करते हुए राजा को, कुछ कुछ नीचे झुके हुए कर्णस्थित पत्राभूषण वाली चाण्डाल कन्या ने प्रौढा नायिका से समान प्रणाम किया।

संस्कृतव्याख्या – **तां**=चाण्डालकन्याम्, दृष्ट्वा=विलोक्य, **समुपजातविस्मयस्य**=समुपजात उत्पन्नोविस्मय आश्चर्य यस्य एवम्भूतस्य, **महीपतेः**=राजा शूद्रकस्य, **मनसि**=चित्ते, **अभूत्**=आसीत्। **अहो**=वितर्के, **विधातुः**=ब्रह्मणः **अस्थाने**=अनुचित-स्थानेः, **रूपनिष्पादनप्रयत्नः**=रूपस्य सौन्दर्यस्य निष्पादने निर्माणे प्रयत्न आयामः। **तथापि**=स्पष्टीकरणार्थे, यदि **नाम**=कोमलामन्त्रणे **आत्मरूपोहसिताशेषरूपसम्पद्**=आत्मरूपेण स्वीयसौन्दर्येण उपहसिताः तिरस्कृताः अशेषाः समग्राः रूपसम्पत् सौन्दर्य-समृद्धिः यया सा तादृशी **इयं**=चाण्डालकन्यका, **उत्पादिता**=विनिर्मिता तदा, **किमर्थं**=किन्निमित्तम्, **अपगतस्पर्शसंभोगसुखे**=अपगते दूरीगते स्पर्शसम्भोगसुखे संश्लेषसुरतसुखे यस्मात् एव विधे, **कुले**=चाण्डालवंशे, **जन्म**=उत्पत्तिः, **कृतं**=विहितम् मन्ये **च**=जाने च **मातङ्गजातिस्पर्शदोषभयात्**=मातङ्गजातेः चाण्डालगोत्रस्य स्पर्शेन संश्लेषेण जनितः यः दोषः अपवित्रता तस्माद् यद्भयं त्रासः तस्मात्, **अस्पृशता**=अस्याः स्पर्शमकुर्वता, **प्रजापतिना**=ब्रह्मणा, **इयं**=चाण्डालकन्यका, **उत्पादिता**=निष्पादिता। **अन्यथा**=उक्तवैपरीत्ये सति, **इयं**=एषा, **लावण्यस्य**=सौन्दर्यस्य **अक्लिष्टता**=अक्षतता कथं स्यात्? न कथमपि स्यादित्याशयः। **करतलस्पर्शक्लेशितानां**=पाणितलसंश्लेषमर्दितानाम्, **अवयवानाम्**=अङ्गानाम्, **ईदृशी**=एवंविधा, **कान्तिः** शोभा, न हि भवति। **असदृशसंयोगकारिणं**=असमानसंयोगनिर्मातारम्, **विधातारं**=ब्राह्मणम्, **सर्वथा**= सर्वविधिना, **धिग्धिक्**=अतिशयेन धिक्कारः **येन**=असदृशसंयोगेन, **अतिमनोहराकृतिरपि**=अतिरमणीयाकारवती अपि, **इयं**=एषा चाण्डालकन्या, **असुरश्रीरिव**=दैत्यलक्ष्मीरिव **सततनिन्दितसुरता**=सततं निरन्तरं निन्दितं जुगुप्सितं सुरतः सुरतसम्भोगः यस्यां

सा, **असुरश्रीपक्षे**–सततम् अजस्त्रं निन्दिता तिरस्कृता सुरता देवभावो यया एवम्भूता, **रमणीयापि**=सुरतयोग्यापि, **क्रूरजातितया**= नृशंसजातितया, **उद्वेजयति**=उद्वेगम् उत्पादयति। **इत्येवमादि**=पूर्वोक्तप्रकारेण, **चिन्तयन्तमेव**=विचारयन्तेमव, **राजानं**=भूपतिं शूद्रकम्, **ईषदवगलितकर्ण-पल्लवावतंसा**=ईषद् अल्पम् अवनमितौ अध:प्रसूतौ कर्णयो: श्रोत्रयो: पल्लवावतंसौ किसलयभूषणे यस्या: सा, **कन्यका**=चाण्डालकुमारी, **प्रगल्भवनितेव**=प्रौढा नायिका इव, **प्रणनाम्**= प्रणाममकरोत्।

टिप्पणी – **समुपजात**–सम्+उप+जन्+क्त–समुत्पन्न। अहो–वितर्क के अर्थ में, 'आहो उताहो किमुत' इत्यमर:। **निष्पादन**–निस्+पद्+णिच्+ल्युट्+अन–उत्पादन। **अस्पृशता**–नञ्+स्पृश्+शतृ तृ० ए० व०–न स्पर्श करते हुए। **'धिग्धिग्विधातारम्'**– धिक् के योग में द्वितीया विभक्ति का **'अतिमनोहराकृति...रपि उद्वेजयति'** में **पूर्णोपमालङ्कार है। चिन्तयन्तम्**–चिन्त्+णिच्+शतृ, द्वि० ए० व०। **प्रगल्भवनिता**– प्रगल्भा नायिका के छ: भेद है–"**स्मरान्धा गाढतारुण्या समस्तरतकोविदा। भावोन्नता दरव्रीडा प्रगल्भाक्रान्तनायका॥**" **प्रणनाम**–नम्+लिट् प्र०पु०ए०व०।

कृतप्रणामायाञ्च तस्यां मणिकुट्टिमोपविष्टायां सपुरुषस्तं विहङ्गममादाय पञ्जरगतमेव किञ्चिदुपसृत्य राज्ञे न्यवेदयदवीच्च देव! विदितसकलशास्त्रार्थ:, राजनीतिप्रयोगकुशल:, पुराणेतिहासकथालापनिपुण:, वेदिता गीतश्रुतीनाम्, काव्यनाटकाख्यायिकाख्यानकप्रभृतीनामपरिमितानां सुभाषितानामध्येता स्वयञ्च कर्त्ता, परिहासालापपेशल:, वीणावेणुमुरजप्रभृतीनां वाद्यविशेषाणामसम: श्रोता, नृत्तप्रयोगदर्शननिपुण:, चित्रकर्मणि प्रवीण:, द्यूतव्यापारे प्रगल्भ:, प्रणयकलहकुपितकामिनीप्रसादनोपायचतुर:, गजतुरगपुरुषस्त्रीलक्षणाभिज्ञ:, सकलभूतलरत्नभूतोऽयं वैशम्पायनो नाम शुक:। सर्वरत्नानाञ्च उदधिरिव देवो भाजनमिति कृत्वैनमादायास्मत्स्वामिदुहिता देवपादमूलमायता, तदयमात्मीय: क्रियतामित्युक्त्वा नरपते: पुरो निधाय पञ्जरमसावपससार।

हिन्दी अनुवाद – प्रणाम कर लेने वाली उस चाण्डाल कन्या के रत्नमयी भूमि में बैठ जाने पर वह पुरुष पिंजरे में ही स्थित उस पक्षी (शुक) को लेकर कुछ समीप पहुँचकर राजा से निवेदन किया तथा बोला–'महाराज! समस्त शास्त्रों के अभिधेय (प्रतिपाद्य) को जानने वाला, राजनीति के प्रयोग में निपुण, पुराण, इतिहास की वार्ताओं में निपुण, गीत की (२२) श्रुतियों का ज्ञाता, काव्य, नाटक,

आख्यायिका तथा आख्यान आदि असंख्य सदुक्तियों का पाठक तथा स्वयं रचयिता, परिहास युक्त वार्तालाप मे कुशल, वीणा, वंशी, मृदङ्ग आदि वाद्य विशेषों का अप्रतिम श्रोता, नृत्त के प्रयोग तथा दर्शन में निपुण, चित्रकर्म में प्रवीण, द्यूतक्रीडा में चतुर, प्रणय कलह से कुपित कामिनियों को प्रसन्न करने के उपायों में चतुर, हाथी घोड़ा, पुरुष एवं स्त्री के लक्षणों को जानने वाला, समस्त पृथ्वी का रत्नभूत (अपनी जाति में उत्कृष्ट) यह वैशम्पायन नाम का शुक है।

समस्त रत्नों के उत्पत्ति स्थान समुद्र के समान महाराज भी समस्त उत्कृष्ट रत्नों के पात्र हैं, ऐसा समझकर हमारे स्वामी की पुत्री इस शुक को लेकर आपके चरणतल में उपस्थित हुई है अतः इस शुक को आप अपना बना लीजिए। ऐसा कहकर महाराज के समक्ष पिंजरा को रखकर वह (पुरुष) हट गया।

संस्कृतव्याख्या - **कृतप्रणामायां**=कृतः विहितः प्रणामः नमस्कारः यया सा तथा तस्याम्, **मणिकुट्टिमोपविष्टायाम्**=मणिखचितबद्धभूमौ स्थितायाम्, **च तस्यां**=चाण्डालकन्यायाम्, **सः**=पूर्वोक्तः चाण्डालकन्यया सहागतः पुरुषः, **तं**=पूर्वोक्तम्, **पञ्जरगतं**=पञ्जरस्थितं, **विहङ्गमं**=पक्षिणं शुकम्, **आदाय**=गृहीत्वा, **किञ्चिदुपसृत्य**=समीपमागत्य, **राज्ञे**-शूद्रकाय, **न्यवेदयत्**=उपहृतवान्, **अब्रवीच्च**= अगादीच्च, **देव**=हे राजन्!, **विदितसकलशास्त्रार्थः**=विदितः ज्ञातः सकलशास्त्राणां समस्तशास्त्राणाम् अर्थः अभिधेयः येन सः, **राजनीतिप्रयोगकुशलः**=राजनीतिप्रयोगे कुशलः निपुणः, **पुराणेतिहासकथालापनिपुणः**=पुराणं पञ्चलक्षणम् इतिहासः पुरावृत्तं, तयोः कथायां वार्तायाँ य आलाप आभाषणं तत्र निपुणः प्रवीणः, **गीतश्रुतीनां**=गीतं गानं श्रुतयः शब्द-विशेषाः तासां, **वेदिता**=बोद्धा, **काव्यनाटकाख्यायिकाख्यानकप्रभृतीनाम्**=काव्यं रसात्मकं वाक्यं, नाटकम् अभिनयः, इत्यादीनाम्, **अपरिमितानां**=असंख्यानाम्, **सुभाषितानां**=सूक्तरूपपद्यानाम्, **अध्येता**= पाठकः च **स्वयं**=स्वयमेव, **कर्ता**=निर्माता,। **परिहासालापपेशलः**= परिहासयुक्तवार्त्तालापकुशलः, **वीणावेणुमुरजप्रभृतीनां**=वीणावाद्यविशेषः, वेणःसुषिरं, मुरजम् आनद्धम् प्रभृतीनाम् इत्यादीनां वाद्यविशेषणाम्, **असमः**=अप्रतिमः, **श्रोता**= आकर्णयिता, **नृत्तप्रयोगदर्शननिपुणः**=नृत्तं ताललयाश्रितं तस्य प्रयोगदर्शने प्रयुज्यमानस्य नृत्तस्य अवलोकने निपुणः कुशलः, **चित्रकर्मणि**=आलेख्यव्यापारे, **प्रवीणः**=निपुणः **द्यूतव्यापारे**=दुरोदरव्यापारे, **प्रगल्भः**=कुशलः, **प्रणयकलहकुपितकामिनीप्रसादनोपायचतुरः**=प्रणयकलहेन स्नेहविषयकविवादेन कुपितानां क्रोधप्राप्तानां कामिनीनां प्रमदानां प्रसादनोपायेषु अनुकूलीकरणविधिषु चतुरः पण्डितः,

गजतुरगपुरुषस्त्रीलक्षणाभिज्ञः=गजाः भद्रजातीयाः तुरगाः अश्वाः पुरुषाः धीरोदात्तादयः स्त्रियः पद्मिन्यादयः तासां लक्षणेषु समुद्रिकोक्तषु लक्षणेषु अभिज्ञः निपुणः, **सकलभूतलरत्नभूतः**=सकलं समग्रं यत् भूतलं भूमण्डलं तत्र रत्नभूतः शिरोमणिः, **अयं**=एषः **वैशम्पायनो नाम**=वैशम्पायनाभिधानः **शुकः**=कीरः। **देवः**=स्वामी शूद्रकः **सर्वरत्नानाम्**=समस्तश्रेष्ठवस्तूनाम् **उदधिरिव**=सागर इव, **भाजनं**=पात्रम्, इति **कृत्वा**=इति हेतोः, **एनं**=शुकम्, **आदाय**=गृहीत्वा, **अस्मत्स्वामिदुहिता**=अस्मत् स्वामिनः दुहिता पुत्री, **देवपादमूलम्**=देवस्य स्वामिनः पादमूलं चरणमूलम्, **आयाता**=आगता। **तत्**=तस्मात् **अयं**=शुकः, **आत्मीयःक्रियतां** =स्वीयो विधीयताम्, **इत्युक्त्वा**=एवं कथयित्वा, **पञ्जरं**=पक्षिरक्षणस्थानम्, **नरपतेः**= भूपतेः,**पुरः**=अग्रे **निधाय**=स्थापयित्वा, **असौ**=**पूर्वोक्तः** पुरुषः, **अपससार**= अपसृतवान्।

टिप्पणी - **कृतप्रणामायाम्**-कृतः प्रणामो यया सा तथा तस्याम्- **उपविष्टायाम्**=उपविश्+क्त+टाप्.स०ए० व०। **विहङ्गमम्**=विहायसा गच्छतीति विहङ्गमः-विहायस्+गम्+खच्, मुम् का आगम तथा 'विहायस्' को 'विह' आदेश, द्वि० ए० व०। **उपसृत्य**-उपसृ+क्त्वाल्यप्, तुक् का आगम। देव-दिव्+अच्, हे राजन्, 'राजा भट्टाराको देवः' इत्यमरः। **नाटकम्**-नट्+ण्वुल्=नाटक+अच्=नाटकम्। 'नाटकं ख्यातवृत्तं स्यात्पञ्चसन्धिसमन्वितम्।' श्रुति-श्रु+क्तिन्, सङ्गीत में श्रुति के २२ प्रकार कहे गए है-'सप्त स्वरास्त्रयो ग्रामा मूर्च्छाश्चैकोनविंशतिः। ताना एकोनपञ्चाशद् द्वयधिका विशति श्रुतिः'॥ अन्यत्र भी-नान्दी चालनिका रसा च सुमुखी चित्रा विचित्रा घना, मातङ्गी, सरसमृता मधुकरी मैत्री शिवा माधवी। बाला शार्ङ्गरवी कला कलरवा माला विशाला जया, मात्रेति श्रुतयः पुराणकविभिर्द्वविंशतिः कीर्त्तिताः॥' **पेशल**-कुशला **अपससार**-अपसृ+लिट् प्र० पु० ए० व०।

अपसृते च तस्मिन् स विहङ्गराजो राजाभिमुखो भूत्वा समुन्नमय्य दक्षिणचरणमतिस्पष्टवर्णस्वरसंस्कारया गिरा कृतजयशब्दो रजानमुद्दिश्या-र्यामिमां पपाठ-

''स्तनयुगमश्रुस्नातं समीपतरवर्ति हृदयशोकाग्रेः।
चरति विमुक्ताहारं व्रतमिव भवतो रिपुस्त्रीणाम्॥''

हिन्दी अनुवाद - उस पुरुष के दूर हटने पर उस पक्षिराज ने राजा की ओर अभिमुख होकर दाहिना पैर ऊपर उठाकर अत्यन्त स्पष्ट अक्षरों एवं स्वरों के परिपाक के युक्त वाणी से जय शब्द का उच्चारण करके महाराज को लक्ष्य करके

यह आर्या (छन्द) पढ़ा-'महाराज! आपकी शत्रुओं की स्त्रियों के दोनों स्तन अश्रु-जल से स्नान किए गए हुए, हृदय में स्थित शोकाग्नि के समीप स्थित मुक्ताहार से रहित (योगी के पक्ष में आहार का परित्याग कर मानो व्रत का आचरण करते हैं। (जिस प्रकार कोई योगी निरन्तर स्नान किए हुए रहता है तथा अग्नि तापता है, आहार का परित्याग कर देता है, उसी प्रकार आपकी शत्रु स्त्रियों के दोनों स्तन अश्रुजल से स्नान किए हुए रहते हैं, मुक्ताहार का परित्याग कर दिया है तथा हृदय में स्थित शोकाग्नि के समीप निवास करते हैं इससे प्रतीत होता है मानों वे व्रत का आचरण कर रहे हैं)

संस्कृतव्याख्या - **तस्मिन्**=पूर्वोक्ते वृद्धपुरुषे, **अपसृते**=दूरीभूते सति, स विहङ्गराजः=पक्षिणां राजा, **राजाभिमुखः**=राज्ञः शूद्रकनृपतेः अभिमुखः सम्मुखः, **भूत्वा दक्षिणं**=सव्येतरम्, **चरणम्**=पादम्, **समुन्नमय्य**=उत्तोल्य, **अतिस्पष्टवर्णस्वरसंस्कारया**=अतिस्पष्टाः सुव्यक्ताः वर्णाःअक्षराणि, स्वरा उदात्तादयः तेषां संस्कारः परिपाकः यस्यां सा तथा तया, **गिरा**=वाण्या, **कृतजयशब्दः**=विहितजयध्वनिः, **राजानं**=भूपतिम्, **उद्दिश्य**=लक्ष्यीकृत्य, इमाम् अधोविन्यस्ताम्, **आर्य**=आर्यासंज्ञकछन्दोबद्धवाक्यम्, **पपाठ**=पठितवान् स्तनयुगेति। **'भवतः रिपुस्त्रीणाम् अश्रुस्नातं हृदयशोकाग्नेः समीपतरवर्ति विमुक्ताहारं स्तनयुगं व्रतम् इव चरति। इत्यन्वयः।' भवतः**=राज्ञः शूद्रकस्य, **रिपुस्त्रीणां**=शत्रुनारीणां, **अश्रुस्नानं**=अश्रुभिः लोचनजलैः स्नानं **कृतस्नानम् हृदयशोकाग्निः**=हृदये मनसि स्वपतिवियोगजनितः शोकः संताप एव अग्निः वह्निः तस्य, **समीपतरवर्ति**=निकट-स्थितं, **विमुक्ताहारं**=विगतःपतिविनाशात् दूरं गतः मुक्ताहारः मौक्तिकहारः यस्मात् तत् (स्तनयुगम्) पक्षे विमुक्तः परित्यक्त आहारः **भोजनं येन, स्तनयुगं**=कुचयुगलं, **व्रतं**=नियमम्, **इव चरति**=आचरति।

टिप्पणी - **पपाठ**-पठ् लिट् प्र० पु० ए० व०। **'स्तनयुगं......रिपुस्त्रीणम्'** यह आर्या जाति है। आर्या का लक्षण यस्याः पादे प्रथमे द्वादश मात्रास्तथा **तृतीयेऽपि। अष्टादश द्वितीये चतुर्थके पञ्चदश साऽऽर्या**। यहाँ कवि ने श्लिष्ट पदावली के द्वारा स्तनयुगल तथा व्रतधारी पुरुष में समानता दिखलायी है। शोकयुक्त होने से अतएव रोने से शत्रुस्त्रियों के स्तनयुगल अश्रुस्नातन हैं तथा व्रतधारण करने वाला भी स्नान करता है। हृदय शोकाग्नि के समीप में विद्यमान है तथा व्रतधारण करने वाला यज्ञाग्नि का सेवन करता है। शोकाभिभूत शत्रुनारियाँ हार को धारण नहीं करती हैं अतः स्तनयुगल 'विमुक्ताहार' है तथा व्रत धारण करने वाला आहार

करना छोड़कर 'विमुक्ताहार' है। यहाँ **विमुक्ताहारम् में सभङ्गश्लेष है। निरङ्ग केवल रूपक तथा वाच्याभिमानिनी क्रियोत्प्रेक्षा की संसृष्टि है।**

राजा तु तामार्यां श्रुत्वा सञ्जातविस्मयः सहर्षमासन्नवर्तिनम् अतिमहार्घ-हेमासनोपविष्टम् अमरगुरुमिवाशेषनीतिशास्त्रपारगम् अतिवयसमग्रजन्माऽ-नमखिलमन्त्रिमण्डलप्रधानमसमात्यं कुमारपालितनामानमब्रवीत्-

श्रुता भवद्भिरस्य विहङ्गमस्य स्पष्टता वर्णोच्चारणे, स्वैर च मधुरता! प्रथमे तावदिदमेव महदाश्चर्यम्, यदयमसङ्कीर्णवर्णप्रविभागामव्यक्त-मात्रानुस्वरासंस्कारयोगां विशेषसंयुक्ताम् अतिपरिस्फुटाक्षरां गिरमुदीरयति।

हिन्दी अनुवाद - राजा ने तो उस आर्य (छन्द) को सुनकर, आश्चर्यचकित होकर प्रसन्नतापूर्वक, समीप में स्थित, अत्यन्त मूल्यवान् स्वर्णासन में बैठे हुए, देवगुरु बृहस्पति के समान सम्पूर्ण नीतिशास्त्र में पारङ्गत, अत्यधिक अवस्थावाले, ब्राह्मण (वंशोत्पन्न), सम्पूर्ण मन्त्रिमण्डल में प्रधान, कुमारपालित नामक मन्त्री से कहा-आप लोगों के द्वारा इस पक्षी की वर्णोच्चारण में स्पष्टता तथा स्वर में मधुरता सुनी गई। प्रथम तो यही महान् आश्चर्य है कि यह शुक परस्पर वैलक्षण्य सहित अक्षरों की भिन्नता वाली, मात्रा, अनुसार एवं व्याकरण की शुद्धि से प्रकट सम्बन्ध वाली, विशेष लक्षणों से युक्त तथा अत्यन्त परिस्फुट अक्षरों वाली वाणी बोलता है।

संस्कृतव्याख्या - **राजा तु**-शुद्रकस्तु, **तां**=शुकगीताम् **आर्यां**=गाथाम्, **श्रुत्वा**=निशम्य, **सञ्जातविस्मयः**=सञ्जातः समुत्पन्नःविस्मयः आश्चर्यः यस्य सः, **सहर्षं**=सानन्दं यथा स्यात्तया, **आसन्नवर्तिनम्**=समीपवर्तिनम्, **अतिमहार्घहेमासनो-पविष्टम्**=अतिमहार्घम् अतिबहुमूल्यं यत् हेमासनं सुवर्णपीठकं तत्र उपविष्टं वर्त्तिनम्, **अमरगुरुमिव**=बृहस्पतिमिव, **अशेषनीतिशास्त्रपारगम्**=अशेषाणि समस्तानि यानि नीतिशास्त्राणि तेषां पारगः पारङ्गतः तम् **अतिवयसम्**=अति अत्यधिकं वयः अवस्था यस्य तम्, **अग्रजन्मानं**=ब्राह्मणम्, **अखिलमन्त्रिमण्डल-प्रधानं**=अखिलमन्त्रिमण्डले, समस्तसचिवसमुदाये प्रधानं मुख्यं कुमारपालितनामानम् **अमात्यं**=मन्त्रिणम्, **अब्रवीत्**=अवोचत्। **भवद्भिः**=युष्माभिः, अस्य **विहङ्गस्य**= अस्य पक्षिणः शुकस्य, **वर्णोच्चारणे**=वर्णानां भाषणे, **स्पष्टता**=स्फुटत्वम् **स्वरे**=स्वरसंयोगे, **मधुरता**=माधुर्यं, **श्रुता**=आकर्णिता। **प्रथमं**=आदौ, तावद् **इदमेव**=प्रत्यक्षगतमेव, **महदाश्चर्यं**=अतिकौतूहलं, **यत् अयं**=शुकः, **असङ्कीर्ण-वर्णप्रविभागं**=असङ्कीर्णः अमिश्रितः वर्णप्रविभागः अक्षरपार्थक्यं यस्यां सा ताम्, **अभिव्यक्तमात्रानुस्वारस्वरसंस्कारयोगां**=अभिव्यक्त :, स्फुटमवगम्यमानः, मात्रा

ह्रस्वदीर्घप्लुतरूपा:, अनुस्वारा: अनुनासिका: संस्कार: व्याकरणशुद्धि: एतेषां योग: सम्बन्ध: यस्या सा ताम्, **विशेषसंयुक्तां**=असामान्याम्, **अतिपरिस्फुटाक्षरां**= अतिपरिफुटानि अत्यन्तस्पष्टानि अक्षराणि वर्णा: यस्यां ताम्, **गिरं**=वाणीम्, **उदीरयति** =उच्चारयति।

टिप्पणी - **अग्रजन्मानं**-ब्राह्मण को ब्राह्मण क्षत्रिय, वैश्य एवं शूद्र इन चारों वर्णों में सबसे पहले जन्म लेने के कारण अग्रजन्मा कहा जाता है। **श्रुत्वा**- श्रु+क्त+टाप्। **मधुरता**-मधुर+तल्+टाप्। **'अमरगुरुमिव'**-में **उपमालङ्कार** है। **'विशेषसंयुक्ताम्'**-विशेष अर्थात् श्लेष आदि अलङ्कारों से संयुक्त।

तत्र पुनरपरम् अभिमतविषये तिरश्चोऽपि मनुजस्येव संस्कारवतो बुद्धिपूर्वा प्रवृत्ति:। तथा हि अनेन समुत्क्षिप्तदक्षिणचरणेनोच्चार्य जयशब्दमियमार्या मामुद्दिश्यातिस्फुटाक्षरं-गीता। प्रायेण हि पक्षिण: पशवश्च भयाहारमैथुननिद्रा-संज्ञामात्रवेदिनो भवन्ति। इदन्तु महच्चित्रम्।

हिन्दी अनुवाद - पुन: द्वितीय(आश्चर्य) यह है कि पक्षी होते हुए भी संस्कार युक्त मनुष्य के समान अभीष्ट विषय में बुद्धपूर्वक प्रवृत्ति! क्योंकि इसने दाहिना पैर उठाकर 'जय' शब्द का उच्चारण कर, मुझको लक्ष्य करके स्पष्ट अक्षरों वाली यह आर्या पढी है। प्राय: पक्षी एवं पशुगण भय, आहार, मैथुन, निद्रा एवं संज्ञा मात्र को जानने वाले होते हैं (इससे अधिक नहीं) यह तो महान् आश्चर्य है।

संस्कृतव्याख्या - **तत्र**=उच्चारणविषये, **पुन: अपरं**=अन्यदाश्चर्यम्, **अभिमत-विषये**=उपादेयेऽर्थे, **तिरश्चोऽपि**=पक्षिणोऽपि, **मनुजस्येव**=मानवस्येव, **संस्कारवती**= संस्कारयुक्ता, **बुद्धिपूर्वा**=धीपूर्विका, **प्रवृत्ति:**=कथनप्रवर्त्तनम्। अत्र किमाश्चर्यमिति प्रदर्शयति तथाहीति। **समुत्क्षिप्तदक्षिणचरणेन**=समुत्क्षिप्त: उत्थापित: दक्षिणचरण: सव्यन्तरपाद: येन स तेन, **अनेन**=शुकेन, **जयशब्दं**= जयपदम्, **उच्चार्य**=अभिधाय, **इयं**=एषा, **आर्या**=जाति:, **मामुद्दिश्य**=मामभिलक्ष्य, **अतिस्फुटाक्षरं**=अतिस्फुटानि परिस्फुटानि अक्षराणि वर्णा: यत्र तद्यथा स्यात्तथा, **गीता**=पठिता। **प्रायेण**=बाहुल्येन, **हि पक्षिण:**=खगा: **पशवश्च**=मृगाद्या: पशवश्च, **भयाहारमैथूननिद्रासंज्ञा-मात्रवेदिन:**=भयं भीति: आहार: भोजनं, मैथुनं स्त्रीसंभोग:, निद्रा बाह्येन्द्रियशम: संज्ञा लोकव्यवहारजनकसङ्केत: नाम वा एतन्मात्रवेदिन: भवन्ति। केवलमेतदेव जानन्ति नातिरिक्तम्। **इदन्तु**=विलक्षणज्ञातृत्वं तु, **महच्चित्रं**=अत्याश्चर्यम्।

टिप्पणी - **संस्कारवत:**-संस्कार+मतुप्, ष० ए० व०। **प्रवृत्ति:**-प्र+वृत्+क्तिन्।

गीता–गै+क्त+टाप्। '**भयाहारमैथुननिद्रा**'–पशु, पक्षी भय, आहार आदि को समझने वाले होते हैं। कहा भी गया है–'आहारनिद्राभयमैथुनञ्च सामान्यमेतत् पशुभिर्नराणाम्।' संज्ञा–संकेत अथवा नाम।

इत्युक्तवति भूभुजि कुमारपालितः किञ्चित् स्मितवदनो नृपमवादीत्– "देव! किमत्र चित्रम। एते हि शुकसारिकाप्रभृतयो विहङ्गविशेषा यथाश्रुतां वाचमुच्चारयन्तीत्यधिगतमेव देवेन। तथाप्यन्यजन्मोपात्तसंस्कारानुबन्धेन वा पुरुषप्रयत्नेन वा संस्कारातिशय जायत इति नातिचत्रम्। अन्यच्च, एतेषामपि पुरा पुरुषाणामिवातिपरिस्फुटाक्षरा वागासीत्, अग्निशापात्त्वस्फुटालापता शुकानामुपजाता, करिणाञ्च जिह्वापरिवृत्तिः' इत्येवमुच्चारयत्येव तस्मिन्नशिशिर-किरणमम्बरतलस्य मध्यमारूढमावेदयन् नाडिकाच्छेदपटुपटहनादानुसारी मध्याह्नशंखध्वनिरुदतिष्ठत्। तमाःकर्ण्य च समासन्नस्नानसमयो विसर्जितराज-लोकः क्षितिपतिरास्थानमण्डपादुत्तस्थौ।

हिन्दी अनुवाद – महाराज शूद्रक के इस प्रकार कहने पर कुमारपालित ने कुछ मुस्कराकर कहा – 'महाराज! इसमें आश्चर्य क्या है! क्योंकि यह तो महाराज को ज्ञात ही है कि ये शुक एवं सारिका आदि विशिष्ट पक्षी जैसी सुनी गई वैसी वाणी का उच्चारण करते हैं, उस पर भी पूर्वजन्म के संस्कार के अनुबन्ध से अथवा पुरुषों के प्रयत्न से संस्कार में दृढ़ता उत्पन्न हो जाती है, इसलिए अधिक आश्चर्य की बात नहीं है। और भी प्राचीन काल में पुरुषों के समान इन पक्षियों की भी वाणी अत्यन्त स्पष्ट अक्षरों वाली थी, अग्नि के शाप से शुकों में अस्पष्टभाषिता, तथा हाथियों में जिह्वापरिवर्तन हो गया।' इस प्रकार कुमारपालित के कहने पर ही, उष्णकिरण भगवान् सूर्य को आकाश के मध्यभाग में आने की सूचना देने वाली, घटी की समाप्ति पर ताडित किए गए नगाड़े के महान् नाद का अनुसरण करने वाली माध्यन्दिन शङ्खध्वनि उत्पन्न हुई। उस ध्वनि को सुनकर, स्नान का समय समीप समझ कर, राजाओं के समूह को विदाकर राजा सभामण्डप से उठा।

संस्कृतव्याख्या – **भूभुजि**=नृपे शूद्रके, **इत्युक्तवति**=एवं कथितवति, **किञ्चि-त्स्मितवदनः**=किञ्चित् ईषत् स्मितेन हास्येन युक्तं वदनं लपनं यस्य सः, **कुमारपालितः**=एतदाख्यः पूर्वोक्तसचिवः, **नृपं**=राजानाम्, **अवादीत्**=अब्रवीत्– देव! **किमत्रेति**। **देव**! **अत्र**=अस्मिन् विषये, किं **चित्रं**=किमाश्चर्यम्? **हि**=यतः , **एते शुकसारिकाप्रभृतयः**=कीरसारिकाद्याः, **विहङ्गविशेषाः**=पक्षिविशेषाः, **यथाश्रुतां**=अर्थप्रतीतिरहितां श्रवणमात्रानुसारिणीं, **वाचं**=वाणीम्, **उच्चारयन्ति**=

उद्गिरन्ति, **इति देवेन**=स्वामिना, **अधिगतमेव**=ज्ञातमेव। **तत्रापि**=पूर्ववक्तव्यतायाम्, **अन्यजन्मोपात्तसंस्कारानुबन्धेन**=अन्यजन्मनि जन्मान्तरे उपात्तस्य गृहीतस्य संस्कारस्य वासनायाः अनुबन्धेन, **वा**=अथवा, **पुरुषप्रयत्नेन**=परिपालक-जनपाठनाद्युद्योगेन, **वा**=अथवा, **संस्काराशियः**=संस्कारे वासनायाम् अतिशयः आधिक्यं **जायते**=उत्पद्यते। **इति**=हेतोः **नातिचित्रं**=नातीवाश्चर्यम्। **अन्यच्च**=अपरमपि, कारणमस्ति। **एतेषां**=शुकादीनां, **पुरा**=पूर्वं, **पुरुषाणामिव**=मनुष्याणामिव, **अतिपरिस्फुटाक्षरा**=अतिपरिस्फुटानि अत्यन्तस्पष्टानि अक्षराणि वर्णाः यस्यामेवम्भूता, **वाक्**=वाणी **आसीत्**=अभूत्। **अग्निशापात्**= वह्निशापात् तु, **शुकानां**=**कीराणाम्** **अस्फुटालापता**=अस्पष्टभाषिता, **उपजाता**=समुत्पन्ना, **च करिणां**=हस्तिनां, **जिह्वापरिवृत्तिः**=जिह्वायाः रसनायाः परिवृत्तिः परिवर्त्तनं संजातम्। **तस्मिन्**=अमात्ये, **एवं**=इत्थम्, **उच्चारयति**=कथयति एव, **अशिशिरकिरणं**=सूर्यम्, **अम्बरतलस्य**=गगनमण्डलस्य, **मध्यं**=मध्यभागम्, **आरूढं**=प्राप्तम्, **आवेदयन्**=सूचयन्, **नाडिकाच्छेदप्रहतपटुपटहनादानुसारी**= नाडिका घटिका तस्याः छेदे समाप्तौ प्रहतः ताडितः यः पटुः महान् पटहः दुन्दुभिः तस्य नादः शब्दः तमनुसर्त्तुं शीलमस्येति सः, **मध्याह्नशंखध्वनिः**=मध्याह्नसूचक-जलजशब्दः, **उदतिष्ठत**= उत्पन्नोऽभूत्। **तं**=ध्वनिम्, **आकर्ण्य**=श्रुत्वा, **च समासन्नस्नानसमयः**=समासन्नः समीपवर्ती स्नानसमयः स्नानकालः यस्य सः, **विसर्जितराजलोकः**=विसर्जितः निवर्त्तितः राजलोकः परिजनजनः येन सः, **क्षितिपतिः**=शूद्रकः **आस्थानमण्डपात्**=सभामण्डपात्, **उत्तस्थौ**=उत्थितवान्।

टिप्पणी - **भूभुजि**-भुवं भुनक्तीति भूभुक्, तस्मिन्-पृथ्वी का भोग करने वाला भूपति। **अवादीत्**-वद् लुङ् प्र० पु० ए० व०। **अग्निशापात्.......परिवृत्तिः**- महाभारत की कथा है कि प्राचीनकाल में तारकासुर से पीडित होकर देवता ब्रह्मा जी के पास गये। ब्रह्मा जी ने देवताओं को बतलाया कि अग्नि का पुत्र कार्तिकेय ही उस दैत्य का वध कर सकेगा। अतः अग्नि को खोजकर उनके पुत्र को माँगें। अग्नि को खोजते हुए जब देवताओं ने कहीं भी नहीं पाया तो एक बड़े हाथी को देखकर पूछा कि अग्नि कहाँ है? उस गज ने देवताओं को बताया कि अग्नि अश्वत्थ वृक्ष में छिपे हुए हैं। ऐसा सुनकर क्रुद्ध अग्नि ने प्रकट होकर हाथी को जीभ उलट जाने का शाप दे दिया तथा स्वयं शमी वृक्ष में प्रविष्ट हो गया। पुनश्च तोते से पूछे जाने पर तोते ने देवताओं को बतला दिया कि अग्नि शमी वृक्ष में हैं तब अग्नि ने प्रकट होकर तोते को अस्पष्ट वाणी हो जाने का शाप दे दिया। **अशिशिरकिरणं**-

अशिशिराणि उष्णानि किरणानि रश्मयो यस्य तं–सूर्यमित्यर्थः। **उत्तस्थौ**–उत् उपसर्ग पूर्वक 'स्था' धातु लिट् लकार प्र० पु० ए० व०।

अथ चलति महीपतावन्योन्यमतिरभससञ्चलनचालिताङ्गदपत्रभङ्ग-मकरकोटि-पाटितांशुकपटानाम्, आक्षेपदोलायमानकण्ठदाग्नाम् अंसस्थलो-ल्लसितकुङ्कमपट-वासधूलिपिंजरितदिशाम्, आलोलमालतीकुसुमशेखरोत्पत -दलिकदम्बकानाम्, अर्द्धावलम्बिभिः कर्णोत्पलैश्चुम्ब्यमानगण्डस्थलानाम्, गमनप्रणामलालसानाम्, अहमहमिकया वक्षःस्थलप्रेङ्खोलितहारलतानाम्, उत्तिष्ठतामासीदतिमहान् सम्भ्रमो महीपतीनाम्।

हिन्दी अनुवाद – इसके पश्चात् महाराज शूद्रक के चलने पर, (उठते हुए राजाओं की महान् भीड़ हो गई) परस्पर अत्यन्त वेगपूर्वक चलने के कारण आन्दोलित भुजबलों के टूटने से मकराकार नोकों से फाड़े गए रेशमी वस्त्रों वाले, शरीर के कम्पन से हिलते हुए कण्ठहारों वाले, स्कन्ध प्रदेश से उड़ते हुए कुंकुम एवं गुलाल के चूर्ण से दिशाओं को रक्तपीत बनाने वाले, हिलते हुए मालती पुष्प रचित शिरोभूषणों में उड़ते हुए भ्रमर समूह वाले, अर्धावनत कर्णोत्पलों के द्वारा चूमे जाते हुए कपोल भागों वाले, गमन समय प्रणाम के लिए लालायित, मैं पहले, मैं पहले(प्रणाम करूँ इस स्पर्धा की भावना से) के कारण वक्षःस्थल में हिलते हुए हारलताओं वाले, उठते हुए राजाओं की महान् भीड़ हो गई।

संस्कृतव्याख्या – **अथ**=अनन्तरं, **महीपतौ**=शूद्रके, **चलति**=सति, **अन्योन्यं**=परस्परम्, **अतिरभससञ्चलनचालितांगदपत्रभंगमकरकोटिपाटितांशु-कपटानाम्**=अतिरभसेन अतिवेगेन यत् सञ्चलनं गमनं तेन चालितानि यानि अङ्गदानि केयूराणि तेषां पत्रभङ्गेषु पत्ररचनासु ये मकराः उत्कीर्णजलजन्तुविशेषाः तेषां कोटिभिरग्रभागैः पाटिताः छिन्नाः अंशुकपटाः उत्तरीयवस्त्राणि येषां तेषाम्, **आक्षेपदोलायमानकण्ठदाम्नाम्**=आक्षेपेण शरीरसञ्चलनेन दोलायमानानि चञ्चलानि कण्ठदामानि कण्ठहारा येषां तेषाम्, **अंसस्थलोल्लसितकुङ्कुमपट-वासधूलिपिञ्जरितदिशाम्**=अंसस्थलेभ्यः स्कन्धप्रदेशेभ्यः उल्लसितानि उत्थितानि यानि कुंकुमानि केसराणि पटवासः सुगन्धचूर्णविशेषः तयोः धूलिपटलं रेणुसमुदायः तेन पिञ्जरीकृता पीतरक्तीकृता दिश आशा यैस्तेषाम्, **आलोलमालतीकुसुमशेख-रोत्पतदलिकदम्बकानाम्**=आलोलाः चञ्चलाः ये मालतीकुमुमशेखराः मालतीपुष्पशिरो-भूषणानि तदुपरि उत्पतन्तः उड्डीयमानाःअलिकदम्बका भ्रमरयूथाः येषां तेषाम् **अर्धावलम्बिभिः**=अर्धप्रलम्बमानैः, **कर्णोत्पलैः**=कर्णकमलैः, **चुम्ब्यमा-**

नगण्डस्थलानाम्=चुम्ब्यमानानि स्पृश्यमानानि गण्डस्थलानि कपोलप्रान्ताः येषां तेषाम्, **गमनप्रणामलालसानाम्**=गमने राज्ञां प्रस्थानसमये प्रणामाय नमस्काराय लालसानाम् अतिस्पृहाणाम्, **अहमहमिकया**=अहं पूर्वमहं पूर्वम् इत्यहमहमिका तया, **वक्षःस्थल-प्रेंखोलितहारलतानाम्**=वक्षःस्थले भुजान्तरं प्रेंखोलिताः आन्दोलिताः हारलताः मुक्ताफलमालाः येषां तेषाम् **उत्तिष्ठतां**=उत्थानं कुर्वतां **महीपतीनां**=राज्ञाम्, **अतिमहान् सम्भ्रमः**=सममर्दः, **आसीत्**=अभूत्।

टिप्पणी - '**अथ महीपतौ चलति उत्तिष्ठतां महीपतीनाम् अतिमहान् सम्भ्रमः आसीत्**' यह मुख्य वाक्य है। **अंगद**=बाजूबन्द। **पत्रभंग**=जडाई। **पटवास**=सौन्दर्य के लिए शरीर पर लगाया जाने वाला सुगन्धित चूर्ण विशेष। **अहमहकिया**=अहं पूर्वमहंपूर्वमिति अहमहमिका तया। 'अहमहमिका तु सा स्यात् परस्परं यो भवत्यहङ्कार' इत्यमरः। **प्रेंखोलित**=हिलायी हुयी **सम्भ्रमः**=हडबड़ाहट। सम्+भ्रम्+घञ्।

इतश्चेतश्च निष्पतन्तीनां स्कन्धावसक्तचामराणां चामरग्राहिणीनां कमलमधुपानमत्तजरत्कलहंसनादजर्जरेण पदे-पदे रणितमणीनां नूपुरमणीनां निनादेन, वारविलासिनीजनस्य संचरतो जघनस्थलास्फालनरसितरत्नमालिकानां मेखलानां मनोहारिणी झङ्कारेण, नूपुररवाकृष्टानां धवलितास्थानमण्डपसोपानफलकानां भवनदीर्घिकाकलहंसकानां कोलाहलेन, रसनारसितोत्सुकितानां च तारतरविराविणामुल्लिख्यमानकांस्यकेङ्कारदीर्घेण गृहसारसानां कूजितेन, सरभसप्रचलितसामन्तशतचरणतलाभिहतस्य चास्थानमण्डपस्य निर्घोषगम्भीरेण कम्पयतेव वसुमतीं ध्वनिना।

हिन्दी अनुवाद -(ध्वनियों से सभामण्डप क्षुब्ध हो गया) इधर उधर से निकलती हुई, कन्धों में चमर रखे हुए चामरधारिणी स्त्रियों के कमल का मधुपान से मत्त वृद्ध कलहंस के शब्दों से मिश्रित पदपद पर शब्दायमान मणियों वाले मणिनूपुरों के निनाद से, सञ्चरण करती हई वाराङ्गनाओं के जघन स्थल में ताडित होने से झङ्कार करती हुई रत्नमालाओं की करधानियों की मनोहर झङ्कार से, नूपुरों के शब्द से आकृष्ट, सभामण्डप की सीढ़ियों को शुभ्र करने वाले, राजभवन की बावलियों के कलहंसों के कोलाहल से, करधनी की ध्वनि से उत्कण्ठित किए गए तथा उच्च स्वर से बोलने वाले गृहसारसों के, घर्षण किए जाते हुए काँसे के देर तक गूँजने वाली 'केङ्कार' ध्वनि से, सम्भ्रम के साथ चलायमान सैकड़ों सामन्तों के चरणतल से ताडित सभामण्डप के वज्रघोषसदृश गम्भीर अतएव

मानों पृथ्वी को कम्पित करती हुई ध्वनि से (सभामण्डप क्षुब्ध हो गया)।

संस्कृतव्याख्या - तद् आस्थानभवनं सर्वतः क्षुभितमिवाभवदित्यन्वयः। **इतश्चेतश्च**=संभ्रमवशादितस्ततः, **निष्पतन्तीनां**=स्खलतीनाम्, **स्कन्धावसक्तचामराणां**=स्कन्धेषु अंशप्रदेशेषु अवसक्तानि विन्यस्तानि चामराणि बालव्यजनानि यासां तासाम्, **चामरग्राहिणीनां**=चमरग्रहणे नियुक्तानां योषिताम्, **कमलमधुपानमत्तजरत्कलहंसनादजर्जरेण**=कमलमधुपानेन पद्मरसास्वादनेन मत्ताः क्षीबाः ये जरन्तः वृद्धाः कलहंसाः कादम्बाः तेषां नादः कण्ठध्वनिस्तद्वत् जर्जरेण सम्भिन्नेन, **पदे-पदे**=प्रतिपदं, **रणितमणीनां**=शब्दायमानमणीनां, **मणिनूपुराणां**=मणिजटिलपादकटकानां, **निनादेन**=शब्देन, **सञ्चरतः**=गच्छतः, **वारविलासिनीजनस्य**=गणिकाजनस्य, **जघनस्थलास्फालनरसितरत्नमालिकानाम्**=जघनस्थालानां कटिपुरोभागानाम् आस्फालनेन नितान्तसञ्चालनेन रसिता शब्दिता रत्नमालिका मणिमाला यासामेवंविधानां, **मेखलानां**=काञ्चीनां, **मनोहारिणा**=चित्ताकर्षणेन, **झङ्कारेण**=झनझनेति ध्वनिना, **नूपुररवाकृष्टानां**=नूपरध्वनिभिः आकर्षितानां, **धवलितास्थानमण्डपसोपानफलकानाम्**=धवलितानि श्वेतवर्णीकृतानि आस्थानमण्डपस्य सभाभवनस्य सोपानफलकानि आरोहणपटलानि यैः तेषाम्, **भवनदीर्घिकाकलहंसकान्**=गृहवापीस्थकादम्बानां, **कोलाहलेन**=अस्पष्टशब्देन, **रसनारसितोत्सुकितानां**=रसनानां कटिमेखलानां रसितैः शब्दितैः उत्सुकानाम् उत्कण्ठितानाम्, अतएव **तारतरविराविणाम्**=उच्चैस्तरशब्दकारकाणाम्, **गृहसारसानां**=भवनस्थसारसपक्षिणाम्, **उल्लिख्यमानकांस्यकेङ्कारदीर्घेण**=उल्लिख्यमानमस्य घर्षणं प्राप्तस्य कांस्यस्य विद्युत्प्रियस्य केङ्कार 'के' के' इत्यस्फुटध्वनिस्तद्वत् दीर्घेण विस्तृतेन, **कूजितेन**=कूजनध्वनिनाः, **सरभसप्रचलितसामन्तशतचरणतलाभिहतस्य**=सरभसं सवेगं प्रचिलताः गन्तुमुद्यताः ये सामन्ताः अधिकृतराजानः तेषां शतं तस्य चरणतलैः अभिहतस्य ताडितस्य, **च आस्थानमंडपस्य**=सभाभवनस्य, **निर्घोषगम्भीरेण**=निर्घोषः अव्यक्तशब्दः तद्वत् गम्भीरेण, **वसुमती**=पृथ्वी, **कम्पयता**=क्षोभं जनयता, **एव ध्वनिना**=शब्देन।

टिप्पणी - **सञ्चरतः**=सम्+चर्+शतृ, ष० ए० व०। **वारविलासिनी**=वेश्या, 'वारशास्त्री गणिका वेश्या' इत्यमरः। **दीर्घिका**=बावड़ी। **विराव**=शब्द। **कूजितः**=अस्पष्ट शब्द (पक्षियों की बोली के लिए) 'कूजितं स्याद्विहङ्गानाम्' इत्यमरः। **'केङ्कादीर्घेण'** में **लुप्तोपमा अलङ्कार। निर्घोष....कम्पयतेव ध्वनिना में लुप्तोपमा** तथा **क्रियोत्प्रेक्षा का अङ्गाङ्गीभाव संकर है।**

प्रतीहारिणाञ्च पुरः ससम्भ्रमं समुत्सारितजनानां दण्डिनां समारब्धहेलमुच्चैरुच्चारयतामालोकयतालोकयतेति तारतरदीर्घेण भवनप्रासादकुञ्जेषूच्चरितप्रतिशब्दतया दीर्घतरतामुपगतेनालोकशब्देन, राज्ञां च ससम्भ्रमावर्जितमौलिलोलचूडामणीनां प्रणमतामलमणिशलाकादन्तुराभिः किरीटकोटिभिरुल्लिख्यमानस्य मणिकुट्टिमस्य निःस्वनेन, प्रणामपर्यन्तानामतिकठिनमणिकुट्टिमनिपतनरणरणायितानाञ्च मणिकर्णपूराणां निनादेन, मङ्गलपाठकानाञ्च पुरोयायिनां जयजीवेति मधुरवचनानुयातेन पठतां दिगन्तव्यापिना कलकलेन, प्रचलितजनचरणशतसक्षोभभयादपहाय कुसुमप्रकरमुत्पतताञ्च मधुलिहां हुङ्कृतेन, संक्षोभादतित्वरितपदप्रवृत्तैरवनिपतिभिः केयूरकोटिताडितानां क्वणितमुखररत्नदाम्नाञ्च मणिस्तम्भानां रणितेन सर्वतः क्षुभितमिव तदास्थानभवनमभवत्।

हिन्दी अनुवाद – और शीघ्रतापूर्वक जनसमुदाय को सामने से हटाने वाले दण्डधारी द्वारपालों के लीलापूर्वक 'देखिए देखिए' इस प्रकार उच्चस्वर में घोषित किए जाते हुए अत्यन्त ऊँचे तथा देर तक गूँजने वाले, भवन, प्रासाद के कुञ्जों में घोषित शब्द की प्रतिध्वनि के कारण और अधिक दीर्घता को प्राप्त होने वाले 'आलोक' शब्द से (जयकार ध्वनि से), अचानक झुके हुए मस्तकों में स्थित चञ्चल चूडामणियों वाले तथा प्रणाम करते हुए राजाओं की निर्मल मणि शलाकाओं के कारण विषमीभूत मुकुट के अग्रभागों से घर्षण की गई मणिकुट्टिम की ध्वनि से, प्रणाम काल में गिरते हुए-अत्यन्त कठोर मणि निर्मित फर्श में गिरने से 'रण रण' सदृश शब्द करने वाले मणिकर्णपूरों के निनाद से, आगे चलने वाले 'महाराज की जय हो, चिरजीवी हो' इस प्रकार मधुर वचनों से अनुसरण किए गए यशोगायक मङ्गलपाठकों के दिगन्तव्यापी कलकल से, चलते हुए मनुष्यों के सैकड़ों चरणों से उत्पन्न क्षोभ के भय से पुष्प समुदाय को छोड़कर उड़ते हुए भ्रमरों के हुङ्कार के शब्द से, क्षोभ के कारण अत्यन्त शीघ्रतापूर्वक चरणों से आगे बढ़ने वाले राजाओं के भुजबन्दों के अग्रभाग से ताडित तथा शब्दायमान होने से झनझनाहट से युक्त रत्ननिर्मित जञ्जीरों वाले मणिस्तम्भों के निनाद से वह सभामण्डप चारो और से मानो क्षुब्ध हो गया।

संस्कृतव्याख्या – **पुरः**=अग्रे, **ससम्भ्रमं**=ससत्वरं, **समुत्सारितजनानां**=दूरीकृतलोकानां, **दण्डिनां**=यष्टिग्राहिणाम्, **समारब्धहेलम्**=समारब्धा हेलाक्रीडा यस्मिन् कर्मणि तद् यथा स्यात्तथा, **आलोकयतालोकयत**=पृथ्वीपतिरयं गच्छति

पश्यत पश्यत इति, **उच्चैः**=उच्चस्वरेण अभिभाषमाणानां, **प्रतीहारिणां**=द्वारपालकानाञ्च, **तारतरदीर्घेण**=तारतरः शिरः समुत्पन्नध्वनिस्तेन दीर्घेण अतिविस्तृतेन, **भवनप्रासादकुञ्जेषु**=भवनस्य साधारणगृहस्य प्रसादानां देवसद्मनां राजसद्मनाञ्च कुञ्जेषु लताद्यन्तरितस्थानेषु, **उच्चरितप्रतिशब्दतया**=उच्चरित उत्थितः प्रतिशब्दो यस्य तस्यभावस्तया, **दीर्घतरताम्**=अत्यधिकविस्तृतत्वम्, **उपगतेन**=सम्प्रासेन, **आलोकशब्देन**=जयकारनादेन, **ससम्भ्रमावर्जितमौलिलोलचूडामणीनां**=ससम्भ्रमं ससत्वरम् आवर्जितेषु अवनमितेषु मौलिषु मस्तकेषु लोलाः चञ्चलाः चूडामणयः शिरोरत्नानि येषां तेषाम्, **प्रणमतां**=नमस्कारं कुर्वतां, **राज्ञां**=नृपाणाञ्च,**अमलमणिशलाकादन्तुराभिः**=अमलाः निर्मलाः याः मणिशलाकाः ताभिः दन्तुराः विषमास्ताभिः **किरीटकोटिभिः**=मुकुटाग्रभागैः, **उल्लिख्यमानस्य**=घर्षणं कुर्वतः **मणिकुट्टिमस्य**=रत्नमयबद्धभूमेः, **निःस्वनेन**=ध्वनिना, **प्रणामपर्यस्तानाम्**=प्रणामे प्रणामकाले पर्यस्तानाम् अधःपतितानाम्, **अतिकठिनमणिकुट्टिमनिपतनरणरणायितानां**=अतिकठिने अतिकर्कशे मणिकुट्टिमे रत्नमयबद्धभूमौ निपतनेन पातेन रणरणायितानां रणरणेति शब्दं विदधतां, **च मणिकर्णपूराणां**=रत्नजटितकर्णभूषणानां, **निनादेन**=शब्देन, **पुरोयायिनां**=अग्रेगामिनां, **पठतां**=यशोगानमुच्चारयतां, **मङ्गलपाठकानां**=वन्दिनाञ्च, **जयजीवेति**=इत्येवंरूपेण, **मधुरवचनानुयातेन**=मधुरवाक्यानुकरणकारिणा, **दिगन्तव्यापिना**=सर्वतः प्रसारिणा, **कलकलेन**=कोलाहलेन, **प्रचलितजनचरणशतसंक्षोभभयाद्**=प्रचलितानां गन्तुं प्रवृत्तानां जनानां मानवानां चरणशतस्य पादशतस्य संक्षोभभयात् प्रहारभीतेः **कुसुमप्रकरं**=पुष्पसमूहम्, **अपहाय**=त्यक्त्वा, **उत्पततां**=उड्डीयमानानां, **मधुलिहां**=भ्रमराणाञ्च, **हुङ्कृतेन**=हुङ्कारेण, **संक्षोभात्**=मनोवेगवशात्, **अतित्वरितपदप्रवृत्तैः**=अतित्वरितपदेषु, **अत्यन्तशीघ्रचरणनिक्षेपेषु**, प्रवृत्तैः प्रचलितैः **अवनिपतिभिः**=भूपतिभि, **केयूरकोटिताडितां**=केयूराणाम् अङ्गंदानां कोटयः अग्रभागास्तैः ताडितानाम् आहतानाम्, **क्वणितमुखररत्नदाम्नां**=क्वोणतेन मुखराणि वाचालानि रत्नदामानि मणिरचितवेष्टन श्रृङ्खला येषु तेषां, **मणिस्तम्भानां**=रत्नमयस्थूणानां, **रणितेन**=क्वणितेन च, **तत्**=पूर्वोक्तम्, **आस्थानभवनं**=सभामण्डपं, **क्षुभितमिव**=क्षोभमुपगतमिव, **अभवत्**=अभूत्।

टिप्पणी - **दंडिनः**-दण्डोऽस्त्येषां दण्डिनः-दण्ड+इनि, दण्ड धारण करने वाले। **हेला**=खेला। **तारतर**=अत्यधिक ऊँचा। **दन्तुर**=दन्त+उरच्-निम्नोन्नत। **पर्यस्त**-गिरे हुए। **रणरणायितानां**- 'रणरण' इस प्रकार की ध्वनि करते हुए। **पुरोयायिनां**=

पुरः अग्रे यान्ति गच्छन्ति इति पुरोयायिनस्तेषाम्-आगे चलने वालों का। **प्रकरः**= समूह। **क्वणित**=खनकना। **दाम**=माला। **आस्थानभवनं**=सभामण्डप। **अभवत्**=भू धातु, लङ् प्र० प० ए० व०। अनुप्रास तथा उत्प्रेक्षा अलङ्कार है।

अथ विसर्जितराजलोको 'विश्राम्यताम्' इति स्वयमेवाभिधाय तां चाण्डालकन्यकाम्, 'वैशम्पायनः प्रवेश्यतामभ्यन्तरम्' इति ताम्बूलकरङ्कवाहिनीमादिश्य कतिपयाप्तराजपुत्रपरिवृतो नरपतिरभ्यन्तरं प्राविशत्। अपनीताशेषाभरणश्च दिवसकर इव विगलितकिरणजालः चन्द्रतारकाशून्य इव गगनाभोगः समुपाहृतसमुचितव्यायामोपकरणां व्यायामभूमिमयासीत्।

हिन्दी अनुवाद – इसके बाद राजसमुदाय को विर्सजित करके 'विश्राम करो' इस प्रकार चाण्डाल कन्या से स्वयं ही कहकर, 'वैशम्पायन को अन्दर प्रवेश कराओ' इस प्रकार ताम्बूल पात्र वहन करने वाली दासी को आदेश देकर कुछ विश्वासपात्र राजकुमारों से घिरे हुआ राजा ने अन्दर प्रवेश किया। और समस्त आभूषणों को उतार कर, विच्युत किरण वाले सूर्य के समान चन्द्र तारकों के शून्य आकाश विस्तार के समान, एकत्र किए गए समुचित व्यायाम की सामग्री से युक्त व्यायाम भूमि में गया।

संस्कृतव्याख्या – **अथ**=अनन्तरं, **विसर्जितराजलोकः**=विसर्जिताः विसृष्टाः राजलोकाः नृपतयो येन सः राजा शूद्रकः, **स्वयमेव**=आत्मनैव, **तां**=पूर्वोक्तां, **चाण्डालकन्यकां**=मातङ्गकुमारीं, **'विश्राम्यतां'**=विश्रामं क्रियताम्, **इत्यभिधाय**= एतं कथयित्वा, **वैशम्पायनः**=एतदाख्यः शुकः, **अभ्यन्तरं**=राजभवनमध्ये, **प्रवेश्यतां**=नीयतामिति, **ताम्बूलकरङ्कवाहिनीं**=पर्णवीटिकाधारिर्णीं स्त्रियम्, **आदिश्य**=आज्ञाप्य, **कतिपयाप्तराजपुत्रपरिवृतः**=कतिपयैः कियद्भिः आप्तैः विश्वस्तैः राजपुत्रैः परिवृतः परिवेष्टितः, **नरपतिः**=भूपतिः शूद्रकः, **अभ्यन्तरं**=गृहमध्यं, **प्राविशत्** =प्रवेशमकरोत्। **अपनीताशेषाभरणश्च**=परित्यक्ताशेषभूषणश्च, **विगलित-किरणजालः**=विगलितानि विच्युतानि किरणजालानि रश्मिसमूहाः यस्य सः, **दिवसकरः**=सूर्यः, **इव चन्द्रतारकाशून्य**=चन्द्रतारकाणां समूहेन शून्यः रहितः, **गगनाभोगः**=गगनस्य आकाशस्य आभोगः विस्तारः, इव, स राजा शूद्रकः, **समुपाहृतसमुचितव्यायामोपकरणाम्**=समुपाहृतानि एकत्रीकृतानि समुचितानि योग्यानि व्यायामे परिश्रमे उपकरणानि साधनानि यस्यां तथाविधां, **व्यायामभूमिं**= परिश्रमविधानयोग्यपृथ्वीम्, **अयासीत्**=अगच्छत्।

टिप्पणी – **अथ**=अनन्तर, 'अथाथो संशये स्यातामधिकारे च मङ्गले।

विकल्पानन्तप्रश्नकात्स्न्यारम्भसमुच्चये' इति मेदिनी। 'मङ्गलानन्तरारम्भप्रश्न-कात्स्न्र्येष्वथो अथ' इति चामरः। **अभिधाय**=अभिधा+क्त्वा-ल्यप्। **आदिश्य**=आ+दिश्+क्त्वा-ल्यप्। **आप्त**=आप्+क्त=विश्वास के योग्य। **परिवृतः**=परिवृ+क्त। **समुपाहृत**=सम्+उप+ आहृ+ क्त=लाये गये। '**दिवसकर इव**'तथा '**गगनाभोग इव**' में उपमालंकार। दोनों की नैरपेक्ष्य होने से संसृष्टि है।

स तस्याञ्च समानवयोभिः सह राजपुत्रैः कृतमधुरव्यायामःश्रमवशादुन्मिषन्तीभिः कपोलयोरीषदवदलितसिन्धुवारकुसुममञ्जरीविभ्रमाभिः, उरसि निर्दयश्रमच्छन्नहारविगलितमुक्ताफलप्रकारानुफलप्रकारानुकारिणीभिः ललाटपट्टकेऽष्टमीचन्द्रशकलतलोल्लसदमृतबिन्दुविडम्बिनीभिः, स्वेदजलकणिकासन्ततिभिरलङ्क्रियमाणमूर्त्तिः इतस्ततः स्नानोपकरणसम्पादनसत्वरेण पुरः प्रधावता परिजनेन तत्कालं विरलजनेऽपि राजकुले समुत्सारणाधिकारमुचितमाचरद्भिः दण्डिभिरुपदिश्यमानमार्गः, विततसितवितानाम्, अनेकचारणगणनिबध्यमानमण्डलाम्, गन्धोदकपूर्णकनकमय-द्रोणीसनाथमध्याम्, उपस्थापितस्फाटिकस्नानपीठाम्, एकान्तनिहितैरतिसुरभिगन्धसलिलपूर्णैः परिमलावकृष्टमधुकरकुलान्धकारितमुखैरातपभयान्नीलकर्पटावगुण्ठितमुखैरिव स्नानकलशैरुपशोभितां स्नानभूमिमगच्छत्।

हिन्दी अनुवाद - और उस व्यायाम भूमि में समान आयु वाले राजपुत्रों के साथ साधारण व्यायाम करके, परिश्रम के कारण निकलने वाली, दोनों कपोलों पर कुछ कुछ मर्दित की गई सिन्धुवार पुष्प की मञ्जरी का भ्रम उत्पन्न करने वाली, वक्षःस्थल में कठिन परिश्रम से टूटे हुए हारे से च्युत मोती की गुरियों के समूह का अनुकरण करने वाली, मस्तक में अष्टमी चन्द्रखण्ड के ऊपर सुशोभित अमृतबिन्दुओं का अनुकरण करने वाली, पसीने की जलबिन्दु समूह से विभूषित किए जाते हुए शरीर वाला, इधर उधर स्नान के उपकरण सम्पादन में शीघ्रता करते हुए सामने दौड़ने वाले परिजन के द्वारा तथा उस समय विरल (थोड़े) जनों से युक्त राजभवन में भी हटाने के अधिकार को समुचित प्रकार से पालन करने वाले, दण्डधारियों द्वारा बताये जाते हुए मार्गवाला, वह राजा शूद्रक तने हुए श्वेतवितान वाली, असंख्य बन्दी जनों के द्वारा बनाई गई मण्डलवाली, सुगन्धित जल से पूर्ण, स्वर्णमय जलकुण्डिका से सुशोभित मध्यभाग वाली, रखी गई स्फटिक मणिनिर्मित स्नान की चौकी वाली, एकान्त में स्थापित अत्यन्त सुगन्धित जल से पूर्ण, सुगन्ध से आकृष्ट भ्रमर समूह से अन्धकार युक्त किए गए मुख वाले, अतएव मानो धूप के

भय से कृष्ण वस्त्र से आच्छादित मुखों वाले स्नान कलशों से सुशोभित स्नानभूमि गया।

संस्कृतव्याख्या - **सः**=राजा शूद्रकः, **च तस्यां**=व्यायामशालायां, **समानवयोभिः**=तुल्यावस्थैः, **राजपुत्रैः**=राजकुमारैः, **सह**=साकं, **कृतमधुरव्यायामः**= कृतः विहितः मधुरः स्वल्पायासजनकव्यायामः परिश्रमः येन सः, **श्रमवशात्**= परिश्रमवशात्, **कपोलयोः**=गण्डयोः, **उन्मिषन्तीभिः**=स्फुन्तीभिः, **ईषदवदलित-सिन्धुवारकुसुममञ्जरीविभ्रमाभिः**=ईषत् किञ्चित् अवदलितं मर्दितं यत् सिन्धुवारस्य निर्गुण्ड्याः कुसुमं पुष्पं तस्य मञ्जरी वल्लरी तस्याः इव विभ्रमः विलासः यासां ताभिः, **उरसि**=वक्षःस्थले, **निर्दयश्रमच्छिन्नहारविगलितमुक्ताफल-प्रकरानुकारिणीभिः**=निर्दयश्रमेण क्लिष्टपरिश्रमेण छिन्नः छेदमुपगतः यः हारः मुक्तामाला तस्माद् विगलितानां विच्युतानां मुक्ताफलानां मौक्तिकानां प्रकरं समुदायमनुकर्तुंशीलं यासां ताभिः, **ललाटपटके**=भालप्रान्ते, **अष्टमीचन्द्रशकलत-लोल्लसदमृतबिन्दुविडम्बिनीभिः**=अष्टमीचन्द्रः अष्टमीतिथिसमुदितः सुधांशुरेव शकलं खण्डं तस्य तले उल्लसन्तः द्योतमानाः ये अमृतबिन्दवः पीयूषकणाः तान् विडम्बयितुमनुकर्तुंशीलं यासां ताभिः, **स्वेदजलकणिकासंततिभिः**=स्वेदजलबिन्दु-श्रेणिभिः, **अलंक्रियमाणमूर्तिः**=सुशोभितशरीरः, **इतस्ततः**=समन्तात्, **स्नानोपकरण-सम्पादनसत्वरेण**=स्नानम् आप्लवस्तस्य उपकरणानां साधनानां सम्पादने निष्पादने सत्वरेण त्वरायुतेन अतएव **पुरःप्रधानता**=अग्रतः शीघ्रं व्रजता, **परिजनेन**= सेवक-जनेन, **तत्कालं**=तस्मिन् समये, **विरलजनेऽपि**=स्वल्पलोकेऽपि, **राजकुले**=राजगृहे, **उचितं**=योग्यं, **समुत्सारणाधिकारं**=जनसम्मर्दनिवारणाधिकारम्, **आचरद्भिः**=पालनं, कुर्वद्भिः, **दण्डिभिः**=यष्टिधारिपुरुषैः, **उपदिश्यमानमार्गः**= उपश्यिमानः प्रदर्श्यमानः मार्गः अध्वा यस्य स तादृशः, **विततसितवितानां**=विततम् ऊर्ध्वं विस्तीर्णं सितं शुभ्रं वितानम् उल्लोचः यस्यां ताम्, **अनेकचारणगणनिबध्यमानमंडलाम्**=अनेके ये चारणाः स्तुतिपाठकाः तैः निबध्यमानं निर्मीयमाणं मण्डलं यस्यां तां तादृशीम्, **गन्धोदकपूर्णकनमयद्रोणीसनाथमध्याम्**=गन्धोदकैः सुरभिसलिलैः पूर्णा भृता या कनकमयी सुवर्णरचिता द्रोणी जलकण्डिका तया सनाथः युक्तः मध्यः मध्यभागः यस्याः ताम्, **उपस्थापितस्फाटिकस्नानपीठां**=उपस्थापितं विन्यस्तं स्फाटिकं स्फटिकमणिविरचितं स्नानपीठं आप्लवनचतुष्किका यस्यां सा तां तादृशीम्, **एकान्तनिहितैः**=एकान्ते एकस्मिन् भागे निहितैः स्थापितैः, **अतिसुरभिगन्ध-सलिलपूर्णैः**=अति अतिशयेन सुरभिः घ्राणतर्पणः येषां तादृशः सलिलैः जलैः

पूर्णाः भृतास्तैस्तथोक्तैः, अतएव **परिमलावकृष्टमधुकरकुलान्धकारितमुखैः**=परिमलेन सुगन्धेन अवकृष्टाः आकृष्टाः ये मधुकराः मधुपाः तेषां कुलानि समूहाः तैः अन्धकारितानि अन्धकारीकृतानि मुखानि वदनानि येषां तैः अतएव **आतपभयात्**=धर्मत्रासात्, **नीलकर्पटावगुण्ठितमुखैरिव**=नीलकर्पटैः श्यामवर्णवस्त्रखण्डैः अवगुण्ठितानि आच्छादितानि मुखानि आननानि येषां तैः तथोक्तैरिव, **स्नानकलशैः**=आप्लवकुम्भैः, **उपशोभितां**=विराजितां, **स्नानभूमिं**=आप्लवस्थानम्, **अगच्छत्**=अयासीत्।

टिप्पणी – **'राजपुत्रैः सह'** 'सहयुक्तेऽप्रधाने' से सह के योग में तृतीया। **'कपोलयोः.......विभ्रमाभिः'**–व्यायाम करने के कारण राजा के कपोलों पर पसीने की बूंदें झलक आयी थीं जो कि चमकती हुई ऐसी प्रतीत हो रही थीं की मानो सिन्धुवार के श्वेतवर्ण पुष्पों की अधखिली कलियाँ हों। यहाँ **लुप्तोपमालङ्कार है। प्रकर**–समुदाय। **शकल**–खण्ड। **'मुक्ताफलप्रकरानुकारिणीभिः'** तथा **'अमृतबिन्दुविडम्बिनीभिः' में आर्थी उपमा है। उल्लसन्ती**=उत्+लस्+शतृ+ङीप्। **विडम्बिनी**–तिरस्कृत कर देने वाली अथवा अनुकरण करने वाली। **सन्ततिः**–परम्परा, लड़ी। **उपदिश्यमान**–उपदिश्+यक्+शानच्–निर्देश किया जाता हुआ। **जलद्रोणी**–पानी से भरी हुई कुण्डिका। **कर्पट**–कपड़ा। **अवगुण्ठित**–ढके हुए। **नीलकर्पटावगुण्ठितमुखैरिव में भावाभिमानिनी वाच्या क्रियोत्प्रेक्षा है। अगच्छत्**–गम् धातु, लङ् प्र० पु० ए० व०।

अवतीर्णस्य च जलद्रोणीं वारविलासिनीकरमृदितसुगन्धामलकालिप्तशिरसोराज्ञः समन्तात् समुत्तस्थुरंशुकनिबद्धस्तनपरिकराः, दूरसमुत्सारितवलयबाहुलताः, समुत्क्षिप्तकर्णाभरणाः, कर्णोत्सङ्गोत्सारितालकाः, गृहीतजलकलसाः, स्नानार्थ-मभिषेकदेवता एव वारयोषितः। ताभिश्च समुन्नतकुचकुम्भमण्डलाभिर्वारिमध्यप्रविष्टः करिणीभिरिव वनकरी परिवृतस्तत्क्षणं रराज राजा।

हिन्दी अनुवाद – जलद्रोणी (स्नान के हौज) में अवतीर्ण, वाराङ्गनाओं के हाथों से पीसे गए सुगन्धित आँवले से लिप्त शिर वाले राजा के चारों ओर वस्त्र से दृढ़तापूर्वक बाँधे गए स्तन मण्डल वाली, ऊपर चढ़ा दिए गए कङ्कणों से युक्त बाहुलता वाली, ऊपर उठाए हुए कर्णाभूषण वाली, श्रवण समीप से दूर किए गए चूर्णकुन्तलों वाली, ग्रहण किए गए जल के कलशों वाली, वाराङ्गनाएँ राजा को स्नान कराने के लिए अभिषेक की अधिष्ठात्री देवियों के समान उपस्थित हुईं।

समुन्नत स्तन रूपी कुम्भमण्डली वाली उन वाराङ्गनाओं से घिरा हुआ तथा जल के भीतर प्रविष्ट राजा (समुन्नत पयोधर सदृश कुम्भमण्डली वाली) हथिनियों से घिरे हुए (तथा जल में प्रविष्ट) अरण्यचारी हाथी के समान सुशोभित हुआ।

संस्कृतव्याख्या - **जलद्रोणीं**=जलकुण्डिकाम्, **अवतीर्णस्य**=तन्मध्ये प्रविष्टस्य, **वारविलासिनीकरमृदितसुगन्धामलकालिप्तशिरसः**=वारविलासिनीभिः-वेश्याभिः करैः हस्तैः मृदितेन मृष्टेन सुगन्धेन सुरभिणा आमलकेन चावोफलेन लिप्तं शिरः मस्तकं यस्य तस्य, **राज्ञः**=शूद्रकस्य, **समन्तात्**=परितः, **अशुकनिबिडनिबद्धस्तनपरिकराः**=अंशुकैः वस्त्रैः निबिड दृ[illegible] तथा स्यात्तथा निबद्धाः संयताः स्तनपरिकराः कुचाभोगाः याभिस्तास्तथोक्ताः, **दूरसमुत्सारितवलयबाहुलता**=दूरे ऊर्ध्वभागे समुत्सारितानि उत्तोलितानि वलयानि कङ्कणानि यासु ताः तथोक्ताः बाहुलताः भुजलताः यासां ताः तथोक्ताः, **समुत्क्षिप्तकर्णाभरणाः**=समुत्क्षिप्तानि नेत्रकपोलयोरुपरिपतननिवारणाय कर्णयोः उपरि विन्यस्तानि कर्णभरणानि श्रवणाभूषणानि याभिस्ताः तथोक्ताः, **कर्णोत्सङ्गोत्सारितालकाः**=कर्णोत्सङ्गात् श्रवणान्तिकात् उत्सारिताः निवारिताः अलकाः चूर्णकुन्तला याभिस्ताः, **गृहीतजलकलसाः**=गृहीताः आत्ताः जलकलसाः सलिलपूर्णघटाः याभिस्ताः, **अभिषेकदेवताः**=स्नानाधिष्ठात्र्यः, इव, **स्नानार्थं**=राज्ञः स्नानविधिसम्पादनाय, **वारयोषितः**=गणिकाः समुत्तस्थुः। **समुन्नतकुचकुम्भमंडलानि**=समुन्नतं अत्यन्तोच्च कुचकुम्भमण्डलं स्तनकलससमूहः यासां ताभिः, **ताभिः**=वारयोषिद्भिः, **परिवृतः**=परिवेष्टितः, **वारिमध्यप्रविष्टः**=वारिमध्यं जलमध्ये प्रविष्टः कृतपवशः, **राजा**=शूद्रकः, **करिणीभिः**=हस्तिनीभिः, परिवृतः, **वनकरी**=वन्यगजः, **इव रराज**=शुशुभे।

टिप्पणी - **वारविलासिनी**-वेश्या। **समुत्तस्थुः**-सम्+उत्+स्था लिट् प्र० पु० ब० व०। **अंशुक**-रेशमीवस्त्र। **निबिड**-दृढ़तापूर्वक। **स्तनपरिकर**-स्तनों का विस्तार। **समुत्क्षिप्त**-सम्+ उत्क्षिप्+क्त-ऊपर फेंके हुए। **अलकाः**-बालों की लटें। **अभिषेकदेवताः**-अभिषेक-अभि+सिच्+घञ्। देवता-देव+तल्। **'अभिषेकदेवता इव वारयोषितः'** में **जात्युत्प्रेक्षा** तथा **स्वभावोक्ति** का **अङ्गाङ्गिभाव संकर है 'ताभि....राजा'** यहाँ रूपक है। **परिवृतः**-परि+वृ+क्त, घिरा हुआ। **रराज** -राज्+लिट् लकार प्र० पु० ए० व०। **'करिणीभिरिव वनकरी'** में **उपमालङ्कार** है।

द्रोणीसलिलादुत्थाय च स्नानपीडममलस्फटिकधवलं वरुण इव राजहंसमारुरोह। ततस्ताः काश्चिन्मरकतकलसप्रभाश्यामायमाना नलिन्य इव मूर्तिमत्यः पत्रपुटैः, काश्चिद्रजतकलसहस्ता रजन्य इव पूर्णचन्द्रमण्डलविनिर्गतेन

ज्योत्स्नाप्रवाहेण, काश्चित्कलसोत्क्षेपश्रमस्वेदार्द्रशरीरा जलदेवता इव स्फाटिकैः कलसैस्तीर्थजलेन, काश्चिन्मलयसरित इव चन्दनरसमिश्रेण सलिलेन, काश्चिदुत्क्षिप्तकलसपार्श्वविन्यस्तहस्तपल्लवाः प्रकीर्यमाणनखमयूखजालकाः प्रत्यङ्गुलिविवरविनिर्गतजलधाराः सलिलयन्त्रदेवता इव, काश्चिज्जाड्यमपनेतुमाक्षिप्तबालातपेनेव दिवसश्रिय इव कनककलसहस्ताः कुङ्कुमजलेन वाराङ्गनाः क्रमेण राजानमभिषिषिचुः।

हिन्दी अनुवाद - द्रोणी के जल से निकल कर (राजा) स्वच्छ स्फटिक के समान शुभ्रवर्ण स्नानपीठ पर (निर्मल स्फटिक के समान शुभ्रवर्ण) राजहंस में वरुणदेव के समान आरूढ़ हुआ। तदनन्तर मरकत मणि से निर्मित कलश की कान्ति से श्यामरंग की गई अतएव सशरीर पद्मिनियों के समान प्रतीत होने वाली कोई तो पत्रनिर्मित दोनों से, कुछ रजतमय कलशों को हाथ में लिए हुए (चन्द्रिका धवल) रात्रियों के समान प्रतीत होने वाली (वैश्याओं ने) पूर्ण चन्द्रबिम्ब से निकले हुए ज्योत्स्ना के समान जलधारा से, कुछ कलश वहन करने के परिश्रम से उत्पन्न स्वेद से गीले शरीर वाली जलदेवियों के समान प्रतीत होने वाली स्फटिक मणिनिर्मित कलशों से तीर्थ जल के समान जल से, मलय पर्वत से निकलने वाली नदियों के समान प्रतीत होने वाली कुछ (वैश्याओं) ने चन्दन रस से मिश्रित जल से ऊपर उठाये गए कलशों के पार्श्वभाग में पल्लव सदृश हाथों को रखने वाली, नखकिरण जाल को फैलाने वाली तथा प्रत्येक अङ्गुलि के विवर से निकलते हुए जल धारा वाली कुछ (वैश्याओं) ने जलयन्त्र की अधिष्ठात्री देवियों के समान, स्वर्णकलशों से युक्त हाथों वाली अतएव दिवसलक्ष्मी के समान प्रतीत होने वाली कुछ (वैश्याओं) ने शीतलता को दूर करने के लिए आकृष्ट किए गए नवोदित सूर्य के प्रकाश के समान कुङ्कुम मिश्रित जल से महाराज को स्नान कराया।

संस्कृतव्याख्या - ततः स राजा, **द्रोणीसलिलात्**=कुण्डिकाजलात्, **उत्थाय**=उत्थानं कृत्वा, च **अमलस्फटिकधवलं**=अमलः मलरहितः यः स्फटिकस्तदाख्यो मणिविशेषः तद्वत् धवलं स्वच्छं, **स्नानपीठम्**=आप्लवनचतुष्किकां, **वरुणः**=प्रचेताः, **राजहंसमिव**=कलहंसमिव, **आरुरोह**=आरूढवान्। 'ततस्ता.....वाराङ्गना राजानमभिषिषिचुः' इत्यन्वयः। **ततः**=आरोहणानन्तरं, काश्चित् **ताः**=काश्चन वाराङ्गनाः, **मरकतकलशप्रभाश्यामायमाना**=मरकतकलशस्य मणिनिर्मितघटस्य प्रभया दीप्त्या श्यामायमानाः अश्यामाः अपि श्यामवदाचरन्त्यः **अत एव, पत्रपुटैः**=पर्णसम्पुटैः, **मूर्तिमत्यः**=श्यामात्वसाम्यात्तत्स्वरूपधारिण्यः,

नलिन्यः=पद्मिन्य इव राजानमभिषिषिचुरिति सर्वत्रान्वयः। **काश्चित्**=काश्चन **रजतकलशहस्ताः**=रजतकलशः रूप्यनिर्मित्तघटः हस्ते पाणौ यासां ताः तथोक्ताः, **रजन्यः**=निशाः, **पूर्णचन्द्रमण्डलविनिर्गतेन**=पूर्णश्चासौ चन्द्रश्चेति पूर्णचन्द्रः, पूर्णचन्द्रस्य मण्डलं तस्मात् समस्तशशिबिम्बात् विनिर्गतेन निःसृतेन, **ज्योत्स्नान-प्रवाहेण**= चन्द्रिकारयेण इव, **काश्चित्**=काश्चन **कलशोत्क्षेपश्रमस्वेद्रार्द-शरीराः**=कलशस्य उत्क्षेपात् ऊर्ध्वमुत्थापनात् यः श्रमः आयासः तेन ये स्वेदाः घर्मसलिलानि तैरार्द्राणि स्विन्नानि शरीराणि वपूंषि यासां ताः, **स्फाटिककैः**= स्फटिकमणिनिमितैः, **कलशैः**=घटैः, **तीर्थजलेन**=पुण्यदेशपयसा, अतएव **जलदेवताः**=जलाधिष्ठात्यः, **इव काश्चित्**=काश्चन वाराङ्गनाः, **मलयसरितः**= मलयनद्यः इव, **चन्दनरसमिश्रेण**=मल-यजद्रवसंयुक्तेन, **सलिलेन**=जलेन, **काश्चित्**=अन्याः काश्चन, **उत्क्षिप्तकलशपार्श्वविन्यस्तहस्तपल्लवाः**=उत्क्षिप्ताः उत्तोल्य कक्षं नीताः ये कलशाः कुम्भाः तेषां पार्श्वेषु वामदक्षिणेषु विन्यस्ताः स्थापिताः हस्तपल्लवाः करकिसलयानि याभिस्ताः, **प्रकीर्यमा-णनखमयूखजालकाः**= प्रकीर्यमाणानि विपर्यमाणानि विपर्यस्तानि नखानां पुनर्भवानां मयूखजालकानि किरणचयाः यासां ताः, प्रत्यङ्गुलिविवरनिर्गतजलधाराः=प्रत्यङ्गुलि प्रतिहस्तशाखं यानि विवराणि अन्तरालप्रदेशाः तेभ्यो विनिर्गताः निस्सृताः जलधाराः सलिलसम्पाताः यासां ताः, अतएव **सलिलयन्त्रदेवताः**=जलयन्त्रा-धिष्ठातृदेवाः, इव काश्चित=काश्चन अन्याः, **कनककलशहस्ताः**=कनककलशाः सुवर्णघटाः हस्तेषु पाणिषुयासां ताः, **वाराङ्गनाः**=वेश्याः, **दिवसश्रियइव**=दिनलक्ष्म्य इव, **जाड्यं**=जलीयशैत्यम् **अपनेतुं**=अपकर्तुं **आक्षिप्त-बालातपेनेव**=आक्षिप्तः आकर्षितः बालातपः नवोदितसूर्यरश्मिः यस्मिन् तेन, इव **कुङ्कुमजलेन**=केसर-मिश्रितसलिलेन, **क्रमेण राजानं**=भूपतिम् **अभिषिषिचुः**=स्नानं कारयामासुः।

टिप्पणी - **वरुण इव राजहंसम् में उत्प्रेक्षालंकार है। उत्थाय**-उत्+स्था+क्त्वा -ल्यप्। **आरुरोह**-आङ्रुह+लिट् प्र० पु० ए० व०। **श्यामायमानाः**-श्याम+क्यङ्+ शानच्-जो श्याम नहीं थीं वे श्याम के समान आचरण करती थीं। यहाँ **क्यङ्गत उपमा** है। **ज्योत्स्ना**-ज्योतिः अस्ति अस्यामिति, ज्योतिष् शब्द से 'ज्योत्स्ना-तमिस्रा'- इत्यादि सूत्र से उपधा का लोप और न प्रत्यय। ''चन्द्रिका कौमुदी ज्योत्स्ना'' इत्यमरः। **उत्क्षेप**-**उत्**+क्षिप्+घञ्-ऊपर उठाना। **स्फटिकैः**-स्फटिकस्य इदं स्फटिक+ अण्। **कलशोत्क्षेप.....तीर्थजलेन में जाति उत्प्रेक्षा अलंकार है। विन्यस्त**- वि+नि-अस्+क्त रखा हुआ। **जाड्यं**-जड+ष्यञ्-ठिठुरन। **आक्षिप्त**-आ+क्षिप्+क्त-

आकर्षित। **वाराङ्गना**-वेश्या "वारस्त्री गणिका वेश्या" इत्यमरः। **अभिषिषिचुः**- अभि+सिच्+लिट् प्र० पु० ब० व०। **कलशोत्क्षेप से अभिषिषिचुः** तक जहाँ-जहाँ इव शब्द आया है वहाँ सर्वत्र जाति **उत्प्रेक्षालङ्कार** है।

अनन्तरमुदपादि च स्फोटयन्निव श्रुतिपथमनेकप्रहतपटुपटहझल्लरी-मृदङ्गवेणुवीणागीतनिनादानुगम्यमानो वन्दिवृन्दकोलाहलाकुलो भुवनविवरव्यापी स्नानशङ्खानामापूर्यमाणानामतिमुखरो ध्वनिः।

हिन्दी अनुवाद - इसके अनन्तर (अभिषेक के बाद) कर्णकुहरों को मानो विदीर्ण करती हुई, ध्वनित किए गए अनेक नगाड़ों, झल्लरियों, मृदङ्गों, वंशियों, वीणाओं के गीतों की ध्वनि से अनुसृत, वैतालिक समूह के कोलाहल से मिश्रित, भुवन के अन्तराल तक व्याप्त होने वाली बजाये जाते हुए स्नान काल के शङ्खों की अत्यन्त उच्चतर ध्वनि उत्पन्न हुई।

संस्कृतव्याख्या - **अनन्तरं**=राज्ञः स्नानानन्तरम्, **अनेकप्रहतपटुपटहझल्लरीमृदङ्गवेणुवीणानिनादानुगम्यमानः**=अनेकपुरुषैः प्रहताः वादिताः पटवः वाद्यविधाने समर्थाः पटहाः दुन्दुभयः झल्लर्यः वाद्य-विशेषाः मृदङ्गा मुरजा वेणवः वंश्यः वीणाः वल्लक्यः तासां गीतानां गानानाञ्च निनादैः ध्वनिभिः, **अनुगम्यमानः**=अनुगमनं क्रियमाणः, **वन्दिवृन्दकोलाहलाकुलः**=वन्दिवृन्दस्य वैतालिकसमूहस्य, **कोलाहलेन**=कलकलेन, **आकुलः**=कर्णकुहरं, **स्फोटयन्निव**=द्विधाकुर्वन्निव, **आपूर्यमाणानां**=वाद्यमानानां, **स्नानशङ्खानां**=स्नानकालवादनीयशङ्खानाम्, **अतिमुखरः**=अतिशयेन तारतरम्, **ध्वनि**=शब्दः, **उदपादि**=उत्पन्नोऽभूत्।

टिप्पणी -"**अनन्तरं....श्रुतिपथं स्फोटयन्निव आपूर्यमाणानां स्नानशङ्खानाम् अतिमुखरो ध्वनिः उदपादि**"- यह समस्त वाक्य का अन्वयांश है। **स्फोटयन्**-स्फुट्+णिच्+शतृ। **प्रहत**-प्रहन्+क्त-जोर से पीटे गये। झल्लरी-झाल। **अनुगम्यमान**-अनु+गम्+यक्+शानच्। **आपूर्यमाणानां**-आ+पूर्+यक्+शानच्, बजाते हुए। **उदपादि**-उत्+पद् लुङ् प्र० पु० ए० व०। 'अनन्तरम्.......ध्वनिः-यहाँ भुवनविवरव्यापन सम्बन्ध के न होने से भी उसके सम्बन्ध के कथन से **अतिशयोक्ति अलङ्कार** है तथा **स्फोटयन्निव**' में **उत्प्रेक्षालङ्कार** है। इन दोनों की निरपेक्ष स्थिति होने से संसृष्टि है।

एवञ्च क्रमेण निवर्त्तिताभिषेको विषधरनिर्मोकपरिलघुनी धवले परिधाय धौते वाससी शरदम्बरैकदेश इव जलक्षालननिर्मलतनुः, अतिधवलजलधरच्छेदशुचिना दुकूलपटपल्लवेन, तुहिनगिरिरिव गगनसरित्स्रोतसा कृतशिरोवेष्टनः

सम्पादितपितृजलक्रियो मन्त्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य देवगृहमगमत्।

हिन्दी अनुवाद - इस प्रकार क्रम से अभिषेक करके, सर्पकञ्चुक के समान अत्यन्त सूक्ष्म (महीन-हल्के) तथा उज्ज्वल दो वस्त्रों को धारण करके, शरत् कालीन आकाश के एक खण्ड के समान स्नान, जल के प्रक्षालन से निर्मल शरीर वाला, (शरत्कालीन आकाश खण्ड वृष्टि के समाप्त होने पर मानो जल से धोकर निर्मल कर दिया गया हो राजा भी उसी प्रकार स्नान के जल के प्रक्षालन से निर्मल शरीर वाला था) अत्यन्त उज्ज्वल मेघखण्ड के समान निर्मल आकाशगङ्गा के प्रवाह के द्वारा हिमालय के समान अत्यन्त उज्ज्वल मेघखण्ड के समान स्वच्छ रेशमी वस्त्र से विरचित शिरोवेष्टन (पगड़ी) वाला राजा शूद्रक पितृतर्पण का कार्य सम्पन्न करके मन्त्रों से पवित्र जलाञ्जलि से भगवान् भास्कर को प्रणाम करके देवमन्दिर गया। जिस प्रकार उज्ज्वल मेघखण्ड के समान आकाश गङ्गा हिमालय को आच्छादित करती हैं उसी प्रकार राजा भी स्वच्छ मेघखण्ड के समान रेशमी वस्त्र से शिर को आच्छादित किए हुए था अर्थात् स्वच्छ रेशमी वस्त्र से पगड़ी बाँधे हुए था। यहाँ रेशमी वस्त्र की तुलना आकाश गङ्गा से तथा राजा के शिर की तुलना हिमालय से की गई है।

***संस्कृतव्याख्या* - एवं च क्रमेण**=पूर्वोक्तविधिना, **निवर्तिताभिषेकः**=निवर्त्तितः कुतः अभिषेकः स्नानं येन सः तादृशः स राजा शूद्रकः, **विषधरनिर्मोकपरिलघुनी**=विषधराः सर्पाः तेषां निर्मोकः कञ्चुकः तद्वत् परिलघुनी अत्यन्तसूक्ष्मे, **धवले**=स्वच्छे च, **धौतवाससी**=प्रक्षालितवसने, **परिधाय**=धारणं कृत्वा, **शरदम्बरैकदेशे**=शरदि वर्षात्यये अम्बरैकदेशे आकशैकभागे इव, **जलक्षालननिर्मलः**=जलक्षालनेन अतिभषेचनीयसलिलद्वारा प्रक्षालनेन च निर्मला मलरहिता तनुः शरीरं यस्य स तादृशः **अतिधवलजलधरच्छेदशुचिना**=अतिधवलः अतीव स्वच्छः यः जलधरच्छेदः तेघखण्डः तद्वत् शुचिना शुभ्रेण, **दुकूलपटपल्लवेन**=दुकूलपटस्य क्षौमवसनस्य पल्लवेन विस्तरेण, **तुहिनगिरिरिव**=हिमाचलो यथा, **गगनसरित्स्रोतस**=गगनसरित आकाशगङ्गा तस्याः स्रोतसा प्रवाहेण इव, **कृतशिरोवेष्टनः**=कृतः विहितः शिरोवेष्टनम् उष्णीषो येन स तादृशः, **सम्पादितपितृजलक्रियः**=सम्पादिता निष्पादिता पितृजलक्रिया पितृतर्पणादिर्येन स तादृशः, **मन्त्रपूतेन**=वेदमन्त्रपवित्रेण, **तोयाञ्जलिना**=सलिलाञ्जलिना, **दिवसकरं**=सूर्यम्, **अभिप्रणम्य**=प्रणामं कृत्वा, **देवगृहं**=देवमन्दिरम्, **अगमत्**=अगच्छत्।

टिप्पणी - **'एवं च क्रमेण निवर्त्तिताभिषेकः (स राजा) देवगृहमगमत्** 'यह मुख्य वाक्य है। **विषधरनिर्मोक**=साँप की केंचुली। **परिलघुनी**-अत्यन्त सूक्ष्म। **परिधाय**-परिधा+क्त्वा-ल्यप्। धौतवाससी-यहाँ दो वस्त्र पहने जाने का विधान परिलक्षित हो रहा है। देवपूजा के लिए दो वस्त्रों को धारण करना आवश्यक है जैसा कि आह्निक-सूत्रावली में कहा गया है-''होमदेवार्च्चनाद्यासु क्रियासु पठने तथा। नैकवस्त्रः प्रवर्त्तेत यत्नतः सर्वथा बुधः॥'' **सम्पादितपितृजलक्रियः**-स्नान करने के उपरान्त पितृजलक्रिया का विधान है-'स्नात्वा सन्तर्पयेद् देवान् पितृंश्च मानवांस्तथा'।**'मन्त्रपूतेन तोयाञ्जलिना दिवसकरमभिप्रणम्य**-मंत्रों से अभिमन्त्रित सलिलाञ्जलि के द्वारा सूर्य को प्रणाम कर। अर्थात् प्रथम अर्घ्यदान तत्पश्चात् प्रणाम। कहा भी गया है -'अर्घ्यं दद्यात्तु प्रथमं भास्कराय महात्मने। ततो विष्णुं शिवं शान्तः, सूर्यं चैव प्रपूजयेत्॥' **'विषधरनिर्मोक** यहाँ **लुप्तोपमालंकार, 'शरदम्बरैकदेश इव'** में **पूर्णोपमालंकार, अतिधवलजलधर** में **लुप्तोपमा** तथा **तुहिनगिरिरिव में उपमालंकार है।**

उपरचितपशुपतिपूजनश्च निष्क्रम्य देवगृहान्निवर्तिताग्निकार्यो विलेपनभूमौ झाङ्कारिभिरलिकदम्बकैरनुबध्यमानपरिमलेन मृगमदकर्पूरकुङ्कुमवाससुरभिणा चन्दनेनानुलिप्तसर्वाङ्गो विरचितामोदिमालतीकुसुमशेखरः कृतवस्त्रपरिवर्त्तः। रत्नकर्णपूरमात्राभरणः समुचितभोजनैः सह भूपतिभिराहारमभिमतरसास्वादजातप्रीतिरवनिपो निर्वर्त्तयामास।

हिन्दी अनुवाद - शंकर जी की पूजा करके, देवालय से निकलकर अग्निकार्य (होमादि) से निवृत्त होकर विलेपनभूमि में गुञ्जार करते हुए भ्रमर समूह के द्वारा अनुकरण किए जाते हुए सुगन्ध वाले, कस्तुरी, कपूर तथा केसर की सुगन्ध से सुगन्धित चन्दन से लेपन किए गए सम्पूर्ण अङ्गों वाले, सुगन्धित मालती के पुष्पों का शिरोभूषण बनाए हुए, वस्त्रपरिवर्तन करके, रत्नमय कर्णाभरण मात्र आभूषण वाले राजा शूद्रक ने, समुचित (एक साथ) भोजन करने योग्य राजाओं के साथ उत्कृष्ट रसों के आस्वदन से संतुष्ट होकर भोजनकार्य पूर्ण किया।

संस्कृतव्याख्या - **उपरचितपशुपतिपूजनः**=उपरचितं निष्पादितं पशुपतेः शिवस्य पूजनमभ्यर्च्चनं येन सः, च **देवगृहात्**=सुरमन्दिरात्, **निष्क्रम्य**=बहिरागत्य, **निवर्त्तिताग्निकार्यः**=निवर्तितं निष्पादितम् अग्निकार्यम् अग्निहोमादिर्येन सः **विलेपनभूमौ**=अङ्गरागसम्पादनस्थाने, **झङ्कारिभिः**=झमिति शब्दं **कुर्वद्भिः अलिकदम्बकैः**=भ्रमरसमूहैः, **अनुबध्यमानपरिमलेन**=अनुबध्यमानः सेव्यमानः

परिमलः सौरभं यस्य स तेन, **मृगमदकर्पूरकुंकुमवाससुरभिणा**=मृगमदस्य कस्तूर्याः कर्पूरकुङ्कुमयोः हिमबालुककेसरयोश्च वासेन परिमलेन सुरभिणा घ्राणतर्पणेन, **चन्दनेन**=मलयजेन, **अनुलिप्तसर्वांगः**=लेपितसकलशरीरावयवः, **विरचितामोदिमालतीकुसुमशेखरः**=विरचितः विनिर्मितः आमोदिभिः परिमलवद्भिः मालतीकुसुमैः जातीपुष्पैः शेखरः शिरोभूषणं येन स तादृशः **कृतवस्त्रपरिवर्त्तः**=कृतः विहितः वस्त्रयोः पूर्वपरिहितवसनयोः परिवर्तःपरिवर्त्तनं येन सः, **रत्नकर्णपूरमात्राभरणः**=रत्नकर्णपूरमात्रं रत्नखचितं कुण्डलमेव आभरणं तत्समयालङ्कारो यस्य सः, **अभिमतरसास्वादजातप्रीतिः**=अभिमता अभिलषिता ये रसाः मधुरादयस्तेषाम् आस्वादेन ग्रहणेन जाता उत्पन्ना प्रीतिः सन्तुष्टिः यस्य सः, **अवनिपः**=पृथ्वीपतिः राजा शूद्रकः, **समुचितभोजनैः**=समुचितं योग्यं भोजनम् एकपङ्क्तावशनं येषां तैः यथोक्तैः, **भूपतिभिः**=अन्यैः नृपैः, **सह**=सार्धं, **आहारं**=भोजनं, **निर्वर्त्तयामास**= सम्पादयामास।

टिप्पणी – 'अवनिप आहारं निर्वर्त्तयामास' यह वाक्य का मुख्यांश है। **'उपरचितपशुपतिपूजनश्च'**–पशुपति=शिव, 'शम्भुरीशः पशुपतिः शिवः शूली महेश्वरः' इत्यमरः। शिवपूजन के विषय में कहा गया है–'असम्पूज्य शिवं मोहाद्ये नरा भुञ्जतेऽन्वहम्। सौख्यं नैवाप्नुवन्तीह भग्नाशाः पर्यटन्ति ते॥' **निष्क्रम्य**-निस्‌क्रम्+क्त्वा ल्यप्। **विलेपनभूमिं**–प्रसाधन कक्ष। **अनुबध्यमान**–अनु+बध्+यक्+शानच्। **अलिकदम्बक**–भ्रमर समूह। **परिमल**–सुगन्ध। **मृगमद**–कस्तरी। प्रीति–प्री+क्तिन्।

परिपीतधूमवर्त्तिरुपस्पृश्य च गृहीतताम्बूलस्तस्मात्प्रमृष्टमणिकुट्टिमप्रदेशादुत्थाय नातिदूरवर्तिन्या ससम्भ्रमप्रधावितया प्रतीहार्या प्रसारितं बाहुम् अवलम्ब्यानवरतवेत्रलताग्रहणप्रसङ्गादतिजरठकिसलयानुकारिकरतलं करेण अभ्यन्तरसञ्चारसमुचितेन परिजनेनानुगम्यमानः, धवलांशुकपरिगतपर्य्यन्ततया स्फटिकमणिमयभित्तिबद्धमिवोपलक्ष्यमाणम् अतिसुरभिमृगनाभिपरिगतेनामोदिना चन्दनवारिणा सिक्तशिशिरमणिभूमिम्, अविरलविप्रकीर्णेन विमलमणिकुट्टिमगगनतलतारागणेनेव कुसुमोपहारेण निरन्तरनिचितम्, उत्कीर्णशालभञ्जिकानिवहेन सन्निहितगृहदेवतेनेव गन्धसलिलक्षालनेन कलधौतमयेन स्तम्भसञ्चयेन विराजमानम् अतिबहलागुरुधूपपरिमलम्, अखिलविगलितजलनिवहधवलजलशकलानुकारिणा कुसुमामोदवासितप्रच्छदपटेन पार्श्वस्थरत्नपादपीठेन तुहिनगिरिशिलातलसदृशेन शयनेन सनाथीकृतवेदिकं भुक्त्वास्थानमण्डपमयासीत्।

हिन्दी अनुवाद - भोजन करके धूम्रवर्तिका पीकर, आचमन कर तथा पान लेकर, उस अच्छी तरह पष्क्रित किए गए मणिफर्श से उठकर कुछ दूर पर स्थित सहसा दौड़कर आई हुई प्रतीहारी के द्वारा फैलाई गई निरन्तर वेत की छड़ी ग्रहण करने से कठोर तथा किसलय का अनुकरण करने वाली भुजा को हाथ से आश्रय लेकर अन्तःपुर आने जाने योग्य परिजनों से अनुसरण किया जाता हुआ, राजा शूद्रक, उज्ज्वल रेशमी वस्त्रों से घिर हुए किनारों के कारण स्फटिक मणिमय दीवारों से निर्मित के समान प्रतीत होने वाले, अत्यन्त सुगन्धित कस्तुरी सुगन्धि युक्त चन्दन जल से सिक्त होने से मणिमयी भूमि वाले, निर्मलमणि कुट्टिम में, निर्मल आकाश में फैले हुए तारागणों के समान सघन रूप से फैले हुए पुष्पसमूह से निरन्तर व्याप्त, उत्कीर्ण पुत्तलिकाओं के समूह वाले अतएव विद्यमान गृहदेवियों के समान, सुगन्धित जल से प्रक्षालित, स्वर्णमय स्तम्भ समूहों से विराजमान, अत्यन्त प्रचुर कालागुरु एवं धूप की सुगन्धि से युक्त एवं सम्पूर्ण निकले हुए जल समूह के कारण शुभ्र मेघखण्ड का अनुकरण करने वाली, पुष्पों की सुगन्धि से सुवासित चादरवाली, रेशमी उच्छीर्षक (तकिए) से सुशोभित शिरोभाग (सिरहना) वाली, मणिमय प्रतिपादुकाओं पर स्थापित पादों वाली (जिसके पाये मणिमय ठीहाँ पर स्थापित थे) समीपवर्ती रत्नमय पादपीठ वाली एवं हिमालय के शिलातल के समान शय्या से अलङ्कृत वेदिका वाले सभामण्डप में गया।

संस्कृतव्याख्या - (स राजा) भुक्त्वा उपस्पृश्य परिपीतधूमवर्तिः सभामण्डपमयासीत्। **उपस्पृश्य**=आचम्य च, **परिपीतधूमवर्तिः**=परिपीता मुखसुवासार्थं धृतं ताम्बूलं नागवल्लीदलं येन स तथोक्तः, **तस्मात्**=पूर्वोल्लिखितात्, **प्रमृंष्टमणिकुट्टिमप्रदेशात्**=प्रमृष्टः संस्कृतः यः मणिकुट्टिमप्रदेशः रत्नमयबद्धस्थलं तस्मात्, **उत्थाय**=उत्थानं कृत्वा, **नातिदूरवर्तिन्या**=नातिदूरं वर्तते या सा तया, **ससम्भ्रमप्रधावितया**=ससम्भ्रमं सत्रासं प्रधावितया शीघ्रं व्रजन्त्या, **प्रतीहार्या**=द्वारपालिन्या **प्रसारितं**=विस्तारितम्, **अनवरतवेत्रलताग्रहणप्रसङ्गात्**= अनवरतं निरन्तरं वेत्रस्य वेतसः या लता मृदुयष्टिः तस्याः ग्रहणं धारणं तस्य प्रसङ्गात् अभ्यासात्, **अतिजरठकिसलयानुकारिकरतलं**=अतिजरठम् अतिकठिनं यत् किसलयं पल्लवं तदनुकर्तुं शीलं यस्य तत्तयोक्तं करतलं पाणितलं यस्य तत्तयोक्तं, **बाहुः**=भुजं, **अवलम्ब्य**=आश्रित्य, **अभ्यन्तरसञ्चारसमुचितेन**=अभ्यन्तरे अभ्यन्तरभागे यः सञ्चारः सञ्चरणं तत्र समुचितेन योग्येन **परिजनेन**= सेवकलोकेन, **अनुगम्यमानः**=अनुव्रज्यमानः, **धवलांशुकपरिगतपर्य्यन्ततया**= धवलानि निर्मलानि

यानि अंशुकानि सूक्ष्मवस्त्राणि तैः परिगताः परिवेष्टिताः पर्य्यन्ताः प्रान्तभागाः यस्य तस्य भावस्तत्ता तया, **स्फटिकमणिमयभित्तिबद्धमिव**=स्फटिक-मणिमयी या भित्तिः कुड्यं तया बद्धं रचितमिव, **उपलक्ष्यमाणं**=अवलोक्यमानम् **अतिसुरभि-मृगनाभिपरिगतेन**=अतिसुरभिणा अत्यन्तघ्राणतर्पणेन मृगनाभिपरिगतेन कस्तूरीपरिवेष्टितेन, **आमोदिना**=परमसुगन्धिना, **चन्दनवारिणा**=मलयजजलेन, **सिक्तशिशिरमणिभूमिम्**=सिक्ता अतएव शिशिरा शीतला मणिभूमिः रत्नबद्धाभूर्यत्र तं तथोक्तम्, **अविरलविप्रकीर्णेन**=अविरलं सान्द्रं यथा स्यात्तथा विप्रकीर्णेन प्रक्षिप्तेन, **विमलमणिकुट्टिमगगनतलतारागणेनेव**=विमलं निर्मलं मणिकुट्टिमंरत्नबद्धभूमिः गगनतलतारागणेनेव=आकाशस्थितनक्षत्रमण्डलेनेव, **कुसुमोपहारेण**=पुष्पसमूहेन, **निरन्तरनिचितं**=निरन्तरम् अनवरतं निचितं व्याप्तम्, **उत्कीर्णशालभञ्जिकानिवहेन**=उत्कीर्णः विहितः शालभञ्जिकानिवहः पुत्तलिकापुञ्जः यस्मिन् तथोक्ते, अतएव **सन्निहितगृहदेवतेन**=सन्निहिताः सन्निकटाः गृहदेवता भवनाधिष्ठात्र्यो-देव्यो यस्मिन् तथोक्तेन इव, **गन्धसलिलक्षालितेन**=सुगन्धजलधौतेन, **कलधौतमयेन**=सुवर्णमयेन, **स्तम्भनिचयेन**=स्तम्भसमूहेन, **विराजमानम्**=शोभमानम्, **अतिबहलागुरुधूपपरि-मलं**=अतिबहलः अत्यन्तप्रचुरो योऽगुरुः कृष्णगुरुः तस्य धूपस्य परिमलः सौरभं यस्मिंस्तत् तथोक्तम्, **अखिलविगलितजलनिवहधवलजलशकलानुकारिणा**=अखिलः समस्तः विगलितः निर्गतः जलनिवहः सलिलसमूहः-यस्मात् सः, अतएव धवलो यो जलधरो मेघस्तस्य शकलं खण्डमनुकर्तुं शीलं यस्य तेन, **कुसुमामोदवा-सितप्रच्छदपटेन**=कुसुमानां पुष्पाणाम् आमोदेन सौगन्ध्येन वासितः सुगन्धीकृतः प्रच्छदपटः आस्तरणवस्त्रं यस्य सः तेन, **पट्टोपधानाध्यासितशिरोभागेन**=पट्टस्य क्षौमवसनस्य यदुपधानम् उच्छीर्षकं तेन अध्यासितः आश्रितः शिरोभागःयस्य तेन, **मणिमयप्रतिपादुकाप्रतिष्ठितपादेन**=मणिमयीषु रत्नचितासु प्रतिपादुकासु आधारपीठेषु प्रतिष्ठिताः स्थिताः पादाः पल्यङ्कपादाः यस्य स तेन, **पार्श्वस्थरत्नपाद-पीठेन**=निकटस्थं रत्नपादपीठं मणिपादासनं यस्य स **तेन तुहिनगिरि-शिलातल-सदृशेन**=तुहिनगिरेः हिमालयपर्वतस्य यत् शिलातलं तत्सदृशेन, **शयनेन**= शय्यया, **सनाथीकृतवेदिकं**=सनाथीकृता अलंकृता वेदिका यस्य तम्, **आस्थानमण्डपं**=सभाभवनं(प्रति), **भुक्त्वा**=भोजनं कृत्वा, **अयासीत्**=अगच्छत्।

टिप्पणी - इस वाक्य का मुख्यांश-**स राजा भुक्त्वा उपस्पृश्य आस्थानमण्डपमयासीत्।** **धूमवर्ति**-धूमशलाक। **उपस्पृश्य**-आचमन करके, 'उपस्पर्शस्त्वाचमनम्' इत्यमरः, भोजन के पश्चात् आचमन करना अत्यावश्यक है

जैसा कि नारद ने कहा है–'सुप्त्वा क्षुत्वा च भुक्त्वा च निष्ठीव्योक्त्वप-मृतं वचः। पीत्वाऽपोऽध्येष्यमाणश्च आचामेत् प्रयतोऽपिसन्॥' उप+स्पृश्+क्त्वा+ल्यप्=उपस्पृश्य। **धवलांशुक.......बद्धमिवोपलक्ष्यमाणम्**–में क्रियोत्प्रेक्षा अलङ्कार है। **मृगनाभि**–कस्तूरी। **परिमल**–गन्ध, 'विमर्दोत्थे परिमलो गन्धे जनमनोहरे' इत्यमरः। **आमोदि**–सुगन्धित। '**अविरल.....निरन्तरनिचितम्**' में **उपमा** तथा **लुप्तोपमा** का **अङ्गाङ्गिभाव सङ्कर है। शालभञ्जिका**–पुतलियाँ। '**सन्निहितगृहदेवतेनेव**' में **क्रियोत्प्रेक्षालंकार है। कलधौत**–सुवर्ण। **प्रच्छदपटः**–पलङ्गपोश। **पट्टोपधान**–रेशमी कपड़े का बना हुआ तकिया। **शिरोभाग**–सिरहाना। **पादपीठम्**–पायदान। **शिशिरकरमणि**–चद्रकान्तमणि। ''**धवलजलधरशकलानुकारिणा**'' तथा '**तुहिनगिरिशिलातल-सदृशेन**' में आर्थी उपमा है।

तत्र च शयने निषण्णः क्षितितलोपविष्टया शनैः शनैरुत्संगनिहितासिलतया खंगवाहिन्या नवनलिनदलकोमलेन करसम्पुटेन संवाह्यमानचरणस्तत्कालोचितदर्शनैरवनिपतिभिरमात्यैर्मित्रैश्च सह तास्ताः कथाः कुर्वन् मुहूर्तमिवासाञ्चक्रे। ततो नातिदूरवर्तिनीम् ''अन्तःपुराद्वैशम्पायनमादायागच्छेति'' समुपजाततद्वृत्तान्तप्रश्नकुतूहलो राजा प्रतीहारीमादिदेश। सा क्षितितलनिहितजानुकरतला 'यथाज्ञापयति देवः' इति शिरसि कृत्वाज्ञां यथादिष्टमकरोत्।

हिन्दी अनुवाद – वहाँ शय्या में बैठे हुए, भूमि में बैठी हुई गोद में लता सदृश तलवार लिए हुए खड्गवाहिनी दासी के द्वारा नवीन कमलपत्र के समान दोनों हाथों से धीरे-धीरे दबाए जाते हुए चरणों वाले (राजा शूद्रक) उस समय दर्शन करने योग्य भूपतियों, मन्त्रियों तथा मित्रों के साथ तथाविध (प्रसङ्गानुकूल) वार्तालाप करते हुए, स्वल्पकाल तक स्थित रहे।

तदनन्तर शुक के वृत्तान्त प्रश्न में कुतूहल युक्त राजा ने कुछ दूर पर स्थित प्रतीहारी को आदेश दिया–'अन्तःपुर से वैशम्पायन को लेकर आओ।'

उस प्रतीहारी ने पृथ्वी पर घुटनों एवं हथेलियों को रखकर 'जैसी महाराज की आज्ञा' इस प्रकार आज्ञा को शिरोधार्य करके आदेश के अनुसार किया।

संस्कृतव्याख्या – **तत्र**=तस्मिन् सभामण्डपे **शयने**=आस्तरणे, **निषण्णः**=उपविष्टः राजा शूद्रकः, **क्षितितलोपविष्टया**=क्षितितले भूतले उपविष्टया निषण्णया तथा **उत्सङ्गनिहितासिलतया**=उत्सङ्गे क्रोडे निहिता संस्थापिता असिलता लतावत् लम्बमानः खड्गः यया सा तया, **खड्गवाहिन्या**=कृपाणधारिण्या, **नवनलिनदल**–

कोमलेन=नवं नवीनं यन्नलिनं कमलं तस्य दलानि पत्राणि तद्वत् कोमलेन मृदुलेन, **करसम्पुटेन**=हस्तयुगलेन, **शनैः शनैः**=मन्दं मन्दं, **संवाह्यमानचरणः**=संवाह्यमानौ सञ्चाल्यमानौ चरणौ पादयुगलं यस्य सः, **तत्कालोचितदर्शनैः**=तत्काले विश्रामसमये उचितं योग्यं दर्शनं साक्षात्कारः येषां तैः, **अवनिपतिभः**=भूपतिभिः **अमात्यैः**= मंत्रिभिः, **मित्रैः**=सुहृद्भिश्च, **सह**=सार्धं, **तास्ताः**=तथाविधाः, **कथाः**=वार्ताः **कुर्वन्**= विदधत्, **मुहूर्त्तं**=स्वल्पकालमिव, **आसाञ्चक्रे**=अवतस्थे। **ततः**=तदनन्तरं, **समुपजाततद्वृत्तान्तप्रश्नकुतूहलः**= समुपजातं समुत्पन्नं तस्य शुकस्य वृत्तान्तप्रश्ने प्रवृत्तिपृच्छायां कुतूहलं कौतुकं यस्य स तादृशः, राजा शूद्रकः, **नातिदूरवर्तिनीं**=न अतिदूरे समीप एव वर्तते या सा तां तादृशीं, **प्रतीहारीं**=द्वाररक्षिकाम्, **अन्तःपुरात्**= अवरोधात्, **वैशम्पायनं**=पूर्वोक्तं शुकम्, **आदाय**=गृहीत्वा, **आगच्छ**=आव्रज **इति**=इत्येवंरूपेण, **आदिदेश**=आज्ञापयामास, **सा**=प्रतीहारी, **क्षितितलनिहित-जानुकरतला**=क्षितितले भूतले निहितौ स्थापितौ जानू ऊरुपर्वणी करतले पाणितले च यया सा तथोक्ता, **यथा**=येन प्रकारेण, **देवः**=स्वामी, **आज्ञापयति**=आदिशति, **इति**=एवं कथयित्वा, **आज्ञां**=आदेशं, **शिरसि कृत्वा**=मस्तके निधाय, **यथादिष्टं**=यथादेशः, **तथा अकरोत्**= चकार।

टिप्पणी - **निषण्णं**=नि+सद्+क्त-बैठा हुआ। **उत्सङ्ग**-गोद। **आसाञ्चक्रे**-आस्(उपवेशने) प्र० पु० ए० व०-बैठा। "**नवनलिनम्**" में **लुप्तोपमालङ्कार है।** **आदाय**-आ+दा+क्त्वा-ल्यप्। आदिदेश-आङ्+दिश्+लिट् प्र० पु० ए० व०।

अथ मुहूर्त्तादेव वैशम्पायनः प्रतीहार्या गृहीतपञ्जरः कनकवेत्र लतावलम्बिना किञ्चिदवनतपूर्वकायेन सितकञ्चुकाच्छन्नवपुषा जराधवलितमौलिना गद्गदस्वरेण मन्दमन्दसञ्चारिणा विहङ्गजातिप्रीत्या जरत्कलहंसेनेव कञ्चुकिनानुगम्यमानो राजान्तिकमाजगाम।

हिन्दी अनुवाद - इसके बाद क्षणभर में ही प्रतीहारी के द्वारा पकड़े गए पिंजरे वाला, स्वर्णिम नेत्र लता का आश्रय लेने वाले, कुछ झुके हुए शरीर के अग्रभाग वाले, श्वेत कञ्चुक के आच्छादित शरीर वाले वृद्धावस्था के कारण श्वेत शिर वाले, गद्गद स्वर वाले,(अस्पष्ट स्वर वाले) मन्द-मन्द चलने वाले, विहङ्ग जाति से प्रेम होने के कारण वृद्ध राजहंस के समान, कञ्चुकी के द्वारा अनुसरण किया जाता हुआ वैशम्पायन राजा के समीप आया।

संस्कृतव्याख्या - **अथ**=अन्तःपुरप्रवेशानन्तरं, **मुहूर्त्तादेव**=घटिकाद्वयमेव, **वैशम्पायनः**=शुकः, **प्रतीहार्या**=द्वारपालिकया, **गृहीतपञ्जरः**=गृहीतं धृतं पञ्जरं

लौहशलाकानिर्मितपक्षिनिलयं यस्य स तथोक्तः **कनकवेत्रलतावलम्बिना**=कनकेन सुवर्णेन खचिता या वेत्रलता वेतसयष्टिः तामवलम्बते धारणं करोतीत्येवं शीलो यः सः तेन तथोक्तेन, **किञ्चिदवनतपूर्वकायेन**=किञ्चिद् ईषद् अवनतः वार्धक्यवशान्नतः पूर्वकायः नाभेरूर्ध्वभागः यस्य तेन तादृशेन, **सितकञ्चुकाच्छन्नवपुषा**=सितकञ्चुकेन शुभ्रकूर्पासकेन आच्छन्नं आच्छादितंवपुर्देहो यस्य सः तेन तादृशेन, **जराधवलितमौलिना**=जरया वार्द्धक्येन धवलितः स्वच्छकृतः मौलिः केशसमूहः यस्य तेन तादृशेन, **गद्गदस्वरेण**=गद्गदः अस्फुटः स्वरः कण्ठध्वनिर्यस्य सः तेन तादृशेन, **मन्दमन्दसञ्चारिणा**=मन्दं मन्दं शनैः शनैः सञ्चरितुं शीलं यस्य सः तेन तादृशेन, **विहङ्गजातिप्रीत्या**=पक्षिजातिप्रेम्णा, **जरत्कलहंसेनेव**=वृद्धहंसेनेव, **कञ्चुकिना**=सौविदल्लकेन, **अनुगम्यमानः**=अनुव्रज्यमानः **वैशम्पायनः**=पूर्वोक्तः शुकः, **राजान्तिकं**=नृपसमीपम्, **आजगाम**=आययौ।

टिप्पणी – इस वाक्य का अन्वय इस प्रकार है–'**अथ वैशम्पायनः राजान्तिकमाजगाम।** **कञ्चुकी**–रनिवास में रहने वाला वृद्ध विद्वान् ब्राह्मण सेवक–'अन्तः पुरचरो वृद्धो विप्रो गुणगणान्वितः। सर्वकार्यार्थकुशलः कञ्चुकीत्यभिधीयते।' **अनुगम्यमान**–अनु+गम्+यक्+शानच्। '**राजान्तिकमाजगाम**'–यहाँ गत्यर्थक 'आङ्+गम्, धातु के योग में 'अन्तिकम्' में द्वितीया विभक्ति हुई। **आजगाम**=आङ्+गम्+लिट् प्र० पु० ए० व०। **जरत्कलहंसेनेव** में **उपमालंकार** है।

क्षितितलनिहितकरतलस्तु कञ्चुकी राजानं व्यज्ञापयत्–'देव देव्यो विज्ञापयन्ति, देवादेशादेष वैशम्पायनः स्नातः कृताहारश्च देवपादमूलं प्रतीहार्या नीतः' इत्यभिधायापगते च तस्मिन् राजा वैशम्पायनमपृच्छत्–"कच्चिदभिमतमास्वादितमभ्यन्तरे भवता किञ्चिदशनजातम्?" इति।

हिन्दी अनुवाद – पृथ्वीतल पर हाथ रख कर कञ्चुकी ने महाराज से निवेदन किया–'महाराज! महारानियाँ सूचित करती हैं–कि आपके आदेश से यह वैशम्पायन स्नान करा दिया गया है, तथा भोजन कराकर प्रतीहारी के द्वारा आपके चरणों में प्रस्तुत किया गया है' ऐसा कह कर उसके (कञ्चुकी के) चले जाने पर राजा ने वैशम्पायन से पूछा–'क्या आपने अन्तःपुर में कुछ रुचि के अनुकूल भोज्यपदार्थ आस्वादित किया?'

संस्कृतव्याख्या – **क्षितितलनिहितकरतलः**=क्षितितले धरणीतले निहित स्थापितं करतलं हस्ततलं येन सः तु, **कञ्चुकी**=अन्तःपुरनियुक्तः वृद्धः गुणान्वितो विप्रः, **राजानं**=नृपं शूद्रकं, **व्यज्ञापयत्**=न्यवेदयत्–**देव!**=हे स्वामिन्, **देव्यः**=महिष्यः,

विज्ञापयन्ति=सूचयन्ति, यत् **देवादेशात्**=भवतो नियोगात् एष **वैशम्पायनः**=शुकः, **स्नातः**=पूर्वं कृतस्नानः पश्चात्, **कृताहारः**=विहितभोजनश्च, **देवपादमूलं**=देवस्य भवतः पादमूलं सन्निधिं, **प्रतीहार्या**=द्वारपालिन्या, **नीतः**=प्रापितः, **इत्यभिधाय**=इत्युक्त्वा, **तस्मिन्**=कञ्चुकिनि, **गते**=सति, **राजा**=भूपतिः, **वैशम्पायनं**=शुकम्, **अपृच्छत्**=पृष्टवान्, **अभ्यन्तरे**=अन्तःपुरे, **भवता**=त्वया, **अभिमतं**=इष्टं, **किञ्चदशनजातं**=भोजनसामग्रीसमूहः, **आस्वादितं किञ्चित्**=भुक्तं न वेति।

टिप्पणी - **व्यज्ञापत्**-वि+ज्ञा+णिच्+लङ् प्र० पु० ए० व०। अभिधाय-अभि+धा+क्त्वा-ल्यप्। **अशनजातम्**-भोजन सामग्री का समूह। **कच्चित् .....अशनजातम्?** यहाँ काकु है। लक्षण-'भिन्नकण्ठध्वनिर्धीरैः काकुरित्य-भिधीयते'।

स प्रत्युवाच-'देव ! किं वा नास्वादितम्? आमत्तकोकिललोचनच्छवि-र्नीलपाटलः कषायमधुरः प्रकाममापीतो जम्बूफलरसः, हरिनखरभिन्नमत्तमा-तङ्गकुम्भमुक्तरक्तार्द्रमुक्ताफलत्वींषि खण्डितानि दाडिमवीजानि, नलिनीद-लहरिन्ति द्राक्षाफलस्वादूनि च दलितानि स्वेच्छया प्राचीनामलकीफलानि। किं वा प्रलपितेन बहुना सर्वमेव देवीभिः स्वयं करतलोपनीयमानममृतायते' इति।

हिन्दी अनुवाद - उस (शुक) ने उत्तर दिया-क्या आस्वादन नहीं किया गया? (अर्थात् सभी कुछ आस्वादन किया गया है।) मत्त कोकिल की नेत्रकान्ति के समान लाल नीले तथा कषायमधुर जामुनफलों का रस पर्याप्त मात्रा में पिया है, वन केसरी के नखों से विदीर्ण मतवाले हाथियों के कुम्भस्थलों से अलग किए गए रक्त से आर्द मुक्तफलों की कान्ति के समान प्रभावशाली अनार के दानों को खाया है, कमलिनीपत्र सदृश हरित वर्ण द्राक्षाफल के सदृश स्वादिष्ट पुराने आंवलों के फलों को इच्छानुसार दलित किया है। अधिक कहने से क्या लाभ? महारानियों द्वारा स्वयम् ही अपने हाथों से प्रदान किए जाते हुए सभी कुछ कुछ अमृत के समान प्रतीत होता था।

संस्कृतव्याख्या - **सः**=वैशम्पायनः, **प्रत्युवाच**=प्रतिवचनं ददौ, **देव!**=हे नाथ!, **वा**=अथवा, **किं**=कीदृशं भोजनं, **न आस्वादितं**= न भक्षितमिति काकुः? अयम्भावो यद् मद्भक्ष्ययोग्यं सर्वमेव भक्षितम्। **आमत्तकोकिललोचनच्छविः**=आमत्तः मधुपानेनोन्मत्तः यः कोकिलः पिकः तस्य लोचनच्छविः नयनकान्तिः सैव छविर्यस्य स तादृशः, **नीलपाटलः**=नीलश्चासौ पाटलः श्वेतरक्तश्चेति नीलपाटलः,।

कषायमधुरः=कषायोऽम्लश्चासौ मधुरो मिष्टरसश्चेति कषायमधुरः, **जम्बूफलरसः**=जम्बूफलद्रवः, **प्रकामं**=पर्याप्तम्, **आपीतः**=पानविषयीकृतः, **हरिनखरभिन्नमत्तमातङ्गकुम्भमुक्तरक्तार्द्रमुक्ताफलत्वींषि**=हरेः सिंहस्य नखरैः भिन्नाः विदारिताः-ये मत्तमातङ्गानाम् उन्मत्तगजानां कुम्भाः शिरःस्था मांसपिण्डाः तेभ्यो मुक्तानि अपगतानियानि रक्तार्द्राणि शोणितस्विन्नानि मुक्ताफलानि मौक्तिकानि तेषां त्विष इव त्विषः कान्तयो येषां तानि तथोक्तानि, **दाडिमबीजानि**=दाडिमफलबीजानि, **खण्डितानि**=शकलीकृतानि, **नलिनीदलहरिन्ति**=नलिनी कमलिनी तस्याः दलानि पत्राणि तद्वत् हरिन्ति हरिद्वर्णनि, **द्राक्षाफलस्वादूनि**=द्राक्षाफलतुल्यस्वादिष्टानि च **प्राचीनामलकीफलानि**=क्षीरधात्रीसस्यानि, **स्वेच्छया**=स्वाधीनतया, **दलितानि**=चञ्चुपुटेन मर्दयित्वा खादितानि, **वा**=अथवा, **बहुना**=अधिकेन, **प्रभाषिपतेन**=वृथा जल्पनेन, **किं**=को लाभः, **देवीभिः**=राज्ञः शूद्रकस्य महिषीभिः, **स्वयं**=आत्मना, **करतलोपनीयमानं**=निजैः हस्ततलैः दीयमानं, **सर्वमेव**=निखिलमपि भोज्यम्, **अमृतायते**=अमृतवदाचरति।

टिप्पणी - देव किं वा नास्वादितम्?-यहाँ काकु है। **पाटलः**=गुलाबी सफेद, लालरंग, 'श्वेतरक्तस्तु पाटलः' इत्यमरः। **'कोकिललोचनच्छविः'** में **लुप्तोपमालङ्कार** है। **हरिनखर**-सिंह के नाखून। **त्वींषि**-कान्तियाँ। **हरिन्ति** हरे। **प्राचीनामलकीफलानि**-पुराने आँवलों के फल। **अमृताये**-अमृतवदाचरति-अमृत +क्यङ्अमृत के समान मधुर लगता है। 'नलिनीदलहरिन्ति' तथा 'द्राक्षाफलस्वादूनि' में लुप्तोपमालङ्कार है। दोनों की निरपेक्ष स्थिति से संसृष्टि है।

एवंवादिनो वचनमाक्षिप्य नरपतिरब्रवीत्-"आस्तां तावत्सर्वमेवेदम्, अपनयतु नः कुतूहलम्, आवेदयतु भवानादितः प्रभृति कात्स्र्न्येनात्मनः जन्म, कस्मिन्देशे? भवान् कथं जातः? केन वा नाम कृतम् ? का ते माता? कस्ते पिता? कथं वेदानामागमः? कथं शास्त्राणां परिचयः? कुतः कलाः समासादिताः? किं जन्मान्तरानुस्मरणम्? उत वरप्रदानम्, अथवा विहङ्गवेषधारी कश्चिच्छन्नो निवससि? क्व पूर्वमुषितम्? कियद्वा वयः? कथं पञ्जरबन्धः? कथं चाण्डालहस्तगमनम्? इह वा कथमागमनम्?" वैशम्पायनस्तु स्वयमुपजातकुतूहलेन सबहुमानमवनिपतिना पृष्टो मुहूर्त्तमिव ध्यात्वा सादरमब्रवीत्-देव! महतीयं कथा। यदि कौतुकमाकर्ण्यताम् -

हिन्दी अनुवाद - इस प्रकार कहने वाले वैशम्पायन के वचन को रोककर महाराज शूद्रक ने कहा-अच्छा, यह सब रहने दो, हमारा कुतूहल दूर करो। आदि

से लेकर अपना सम्पूर्ण वृत्तान्त बताओ-किस देश (जनपद) में जन्म हुआ? किस प्रकार उत्पन्न हुए? किसके द्वारा नामकरण किया गया? तुम्हारी माता कौन है? तुम्हारे पिता कौन हैं? वेद की प्राप्ति कैसे हुई? शास्त्रों का (न्यायमीमांसादि) परिचय (ज्ञान) कैसे हुआ? कलाओं का अभ्यास कहाँ से किया है? पूर्वजन्म का स्मरण क्यों है? यह वर प्रदान है अथवा कोई पक्षीवेष धारण किए हुए गुप्तरूप से निवास कर रहे हों? पहले कहाँ रहे? अवस्था कितनी है? पिंजरे में बन्धन कैसे हुआ? चाण्डाल के हाथ में कैसे आ पड़े? इस राज दरबार में कैसे आगमन हुआ? अपने आप उत्पन्न उत्कण्ठा वाले राजा के द्वारा आदरपूर्वक पूछा गया वैशम्पायन भी क्षणभर ध्यान कर आदर के साथ बोला-'महाराज! यह कथा महती है फिर भी यदि उत्कण्ठा है तो सुनिये-'

संस्कृतव्याख्या - **एवंवादिनः**=पूर्वोक्ताप्रकारेण कथयतः, **तस्य**= वैशम्पायनस्य, **वचनं**=कथनम्, **आक्षिप्य**=अनादृत्य, **नरपति**=भूपतिः शूद्रकः, **अब्रवीत्**=अवदत्, **सर्वं**=निखिलं, **तावद्**=आदौ, **इदं**=पूर्वोक्तमेव, **आस्ताम्**=तिष्ठतु, **नः**=अस्माकं, **कुतूहलं**=कौतुकम्, **अपनयतु**=दूरीकरोतु। **भवानादितः प्रभृति**= उत्पत्तिकालादारभ्य, **कात्स्न्येंन**=समग्ररूपेण, **आत्मनः**=स्वकीयं (वृत्तान्तं), **आवेदयतु**=निवेदयतु। यथा हि भवतः, **कस्मिन् देशे**=कुत्र जनपदे, **जन्म**=उत्पत्तिः? **कथं**=केन प्रकारेण भवान्, **जातः**=उत्पन्नः? **केन वा नाम कृतं**=केन जनेन वा वैशम्पायनेति नाम विहितम्? **ते का माता**=तव का जननी? **ते का पिता**=तव कः जनकः? **कथं वेदानामागमः**=कथं वेदानामुपलब्धिः? **कथं शास्त्राणां परिचय**=कथं न्यायशास्त्रादीनां विशेषबोधः। **कला कुतः समासादिताः**=नृत्यगीतादिविद्याः कुतः प्राप्ताः? **किं जन्मान्तरानुसरणं**=किन्निमित्तकं पूर्वजन्मोदन्तस्मृतिः? **उत किं वरप्रदानं** =वरदानप्राप्तिः, **अथवा**=सिद्ध एव किंवा, **कश्चित्**=कश्चन, **विहङ्गवेषधारी**=पक्षिरूप-धारी, **छन्नः**=गुप्तः, **सन् निवससि**=वासं विदधासि? **क्व पूर्वमुषितं**=कुत्र वा पूर्वमवस्थितम्? **वा कियद्वयः**=अथवा वार्षिकावस्था का? **कथं पञ्जरबन्धः**=केन प्रकारेण पञ्जरमध्येऽवस्थानम्? **कथं चाण्डालहस्तगमनं**=अन्त्यजहस्तप्राप्तिः कथम्? **इह वा कथमागमनं**=अस्मिन् प्रदेशे वा कथमुपस्थितिः? **तु**=पुनः, **वैशम्पायनः**=शुकः, **सबहुमानं**=सादरम्, **उपजातकुतूहलेन**=समुत्पन्नकौतूहलेन, **स्वयं**=आत्मना, **अवनिपतिना**=भूपतिना, **पृष्टः**=कृतप्रश्नः, **मुहूर्त्तमिव**=क्षण-मिव, **ध्यात्वा**=चिन्तयित्वा, **सादरं**=सबहुमानम्, **अब्रवीत्**=उवाच, **देव**= हे नाथ! **इयं**=एषा कथा, **महती**=अतिविस्तृता कथा। **यदि**=चेत्, **कौतुकं**=कौतूहलं तर्हि,

आकर्ण्यतां=श्रूयताम्।

टिप्पणी - **कुतूहलं**- कौतुक, 'कौतूहलं कौतुकं च कुतुकं च कुतूहलम्' इत्यमरः। **अपनयतु**-दूर करें-अपनी+लोट् प्र० पु० ए० व०। **उत**-क्या, 'आहो उताहो किमुत विकल्पे किं किंमूत च' इत्यमरः। **कात्स्न्र्येन**- कृत्स्न+ष्यञ्=कात्स्न्र्य। **छन्नः**=छद्+क्त, छिपा हुआ। **उषितम्**-वस्+क्त निवास स्थान।

अस्ति पूर्वापरजलनिधिवेलावलग्ना, मध्यदेशालङ्कारभूता मेखलेव भुवः, वनकरिकुलमदजलसेकसंवर्धितैरतिविकचधवलकुसुमनिकरमत्युच्चतया तारागणमिव शिखरदेशलग्नमुद्वहद्भिः पादपैरुपशोभिता, मदकलकुररकुल-दश्यमानमरिचपल्लवा, करिकलभकरमृदिततमालकिसलयामोदिनी, मधुमदो-परक्तकेरलीकपोलकोमलच्छविना सञ्चरद्वनदेवताचरणालक्तकरसरञ्जितेनेव पल्लवचयेन संच्छादिता, शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैरतिचपल-कपिकुलकम्पितकक्कोलच्युतपल्लवफलशबलैः अनवरतनिपतितकुसुमरेणुपां-शुलैः पथिकजनरचितलवङ्गपल्लवसंस्तरैः अतिकठोरनारिकेलकेतकीकरीरबकु-लपरिगतप्रान्तैः ताम्बूलीलतावनद्धपूगषण्डमण्डितैर्वनलक्ष्मीवासभवनैरिव विराजिता लतामण्डपैः, उन्मदमातङ्गकपोलस्थलगलितसलिलसिक्तेनेव निरन्तरमेलालतावनेन मदगन्धिनान्धकारिता, नखमुखलग्नेभकुम्भमुक्ताफल-लुब्धैः शबरसेनापतिभिरभिहन्यमानकेसरिशता।

हिन्दी अनुवाद - एक प्रसिद्ध विन्ध्याटवी (विन्ध्यारण्य) है जो पूर्वी और पश्चिमी समुद्रों के तटों के वनों से लगी हुयी अर्थात् पूर्वसमुद्रतट से पश्चिम समुद्र तट तक फैली है, (मध्य भाग का भूषण होने के कारण) जो कि पृथ्वी की करधनी के समान मध्यप्रदेश की आभूषण समान है, यह विन्याटवी, उन वृक्षों से सुशोभित (थी जो कि) वन्यगजों के मद जल के सिञ्चन से बढ़ाये गये (तथा) अत्यधिक ऊँचे होने के कारण मानों अपने ऊपरी भाग पर लगे हुए अत्यधिक खिले हुए उज्ज्वल पुष्पसमूह को तारागण के समान धारण किये हुए (थे) (यह विन्ध्याटवी) मद वश मधुर अव्यक्त ध्वनि करने वाला कुरर नामक पक्षियों द्वारा कुतरे गये कालीमिर्च के पल्लवों वाली (थी) अर्थात् विन्ध्याटवी के कालीमिर्च के पत्तों के कुरर नामक पक्षियों ने कुतर डाला था। (यह विन्ध्याटवी) गजशावकों को सूड़ों से मसले गये तमाल वृक्षों के पत्तों की सुगन्धि से सुगन्धित (थी) (तथा यह) मदिरा पान की मस्तता से कुछ कुछ गुलाबी रंग के केरल प्रदेश की सुन्दरियों के कपोलों जैसे कोमल कान्ति वाले (और) इधर-उधर चलती फिरती वनदेवियों

के चरणों में लगे महावर के रंग से रक्तीकृत जैसे पल्लव समूह से आच्छादित थी। शुकसमूह के द्वारा कुतरे गये अनार के फलों के रस से गीले किये गये अधो-भागों वाले, अत्यन्त चंचल प्रकृति वाले वानर समूह के द्वारा हिलायेगये, कङ्कोल वृक्षों से गिरे हुए पल्लव और फलों के टुकड़ों वाले, लगातार गिरे हुए पुष्पपराग से धूसरित, राहगीरों द्वारा निर्मित लवङ्ग के पल्लवों के बिछौनो वाले, अत्यन्त कठोर नारियल, केवड़ा, करील तथा मौलश्री के वृक्षों से घिरे हुए किनारों वाले, नागवल्ली की लताओं से लिपटे हुए सुपारी के वनों से सुशोभित अतएव वनलक्ष्मी के निवाससगृहों जैसे प्रतीत होने वाले लतामण्डपों से सुशोभित (तथा) मदोन्मत्त गजों के गण्डस्थलों से गिरे हुए मदजल की गन्ध जैसी सुगन्धि वाले, सघनतापूर्वक, इलायची की लताओं के वन से श्यामीकृत (और) नखों के अग्रभाग में लगे हुए (सिंह विदारित) गजों के गण्डस्थलों के गजमुक्ताओं के लिए लालायित भीलों के सेनापतियों द्वारा जिसमें सैकड़ों सिंह मारे जा रहे हैं (ऐसी विन्ध्याटवी थी)।

संस्कृतव्याख्या - **'अस्तीति'** अस्य दूरस्थेन विन्ध्याटवी नामेति कर्तृपदेन सम्बन्धः। अथ सा विन्ध्याटवी कीदृशी वर्तते? सम्प्रति तामेव विशिनष्टि **पूर्वापरेति**। **पूर्वापरजलनिधिवेलावलग्ना**=पूर्वश्चापरश्चेति पूर्वापरौ प्राच्यप्रतीच्यदिग्वर्तिनौ यौ जलनिधी समुद्रौ तयौः वेलयोः तीरयोरवलग्ना संयुक्ता **मध्यदेशालङ्कारभूता**=मध्यदेशस्य मध्यवर्त्तिस्थानस्य अलङ्कारभूता भूषणस्वरूपा, **भुवः**=पृथिव्याः, **मेखलेव** रशनादामेव, **वनकरिकुलमदजलसेकसंवर्धितैः**=वने कानने ये करिणः हस्तिनः तेषां कुलानि यूथानि तेषां मदजलस्य दानवारिणः सेकेन सिञ्चनेन संवर्धितैः वृद्धिं सम्प्राप्तैः, **अतिविकचधवलकुसुमुनिकरं**=अतिविकचानाम् अतिविकसितानां धवलानां शुभ्राणां कुसुमानां पुष्पाणां निकरं समुदायम् अत्युच्चतया वृक्षाणाम् अत्यन्तम् उच्चतावशात्, **शिखरदेशलग्नं**=शिरोभागसंलग्नं, **तारागणं**=नक्षत्रमण्डलमिव, **उद्वहद्भिः**=धारयद्भिः, **पादपैः**=वृक्षैः, **उपशोभिता**=भूषिता, **मदकलकुररकुलदश्यमानमरिचपल्लवः**=मदकलैः मदोन्मत्तैः कुरराणां मत्स्यनाशनानां कुलानि समूहाः तैः दश्यमानाः चञ्चुपुटेन संदश्य आस्वाद्यमानाः मरिचानां कोलकानां पल्लवाः किसलयानि यस्यां सा, **करिकलभकरमृदिततमालकिसलयामोदिनी**=करिणां हस्तिनां कलभाः तेषां करैः शुण्डादण्डैः मृदितानि मर्दितानि यानि तमालकिसलयादिपिच्छपल्लवानि तेषाम् आमोदः सुगन्धिः विद्यते यस्यां सा तादृशी, **मधुमदोपरक्तकेरलीकपोलकोमलच्छविना**=मधु मद्यं तस्य यो मदः मदिरापानेन मत्तता तेन उपरक्ताः रक्तवर्णीभूताः ये केरलीकपोलाः केरलदेशोत्पन्नानां सुन्दरीणां कपोलाः गल्लप्रदेशाः

तेषामिव कोमला मृद्वी छविः कान्तिः यस्य तेन, **सञ्चरद्वनदेवताचरणालक्तकरस-रञ्जितेनेव**=सञ्चरन्तीनां व्रजन्तीनां वनदेवतानां काननाधिष्ठातृदेवीनां चरणालक्तकरसैः पादस्थितयावकद्रवैः रञ्जितेनेव रक्तीकृतेनेव, **पल्लवचयेन**=किसलयसमूहेन, **सञ्छादिता**=आच्छादिता, **शुककुलदलितदाडिमीफलद्रवार्द्रीकृततलैः**=शुक-कुलैः कीरसमूहैः दलितानि चञ्चुभिः विदारितानि यानि दाडिमीफलानि तेषां.द्रवैः रसैः आर्द्रीकृतानि आर्द्रत्वमुपनीतानि तलानि अधोवर्त्तिस्थानानि येषां तैः, **अतिचपल-कपिकुलकम्पितकक्कोलच्युतपल्लवफलशबलैः**=अतिचपलैः अत्यन्तचञ्चलैः कपिकुलैः वानरसमूहैः कम्पितेभ्यः आन्दोलितेभ्यः कक्कोलेभ्यः तरुविशेषेभ्यः च्युतानि पतितानि यानि पल्लववफलानि तैः शवलैश्चित्रैः, अनवरतनि-पतितकुसुमरेकपांशुलैः=अनवरतनिपतितानां निरन्तरप्रच्युतानां कुसुमानां पुष्पाणां रेणुभिः परागधूलिभिः पांशुलैः सरजस्कैः, **पथिकजनरचितलवङ्गपल्लव-संस्तरैः**=पक्षिकजनैः पान्थपुरुषैः रचिताः निर्मिताः, **लवङ्गपल्लवानां**= लवङ्गवृक्षविशेष -किसलयानां संस्तरा आसनानि येषु तैः तथोक्तै।, **अतिकठोरनारिकेलकेतकी-करीरकुलपरिगतप्रान्तैः**= अतिकठोरा अत्यन्तकठिनाः परिपक्वा इत्यर्थः, ये नारिकेलाः लाङ्गलिवृक्षाः, केतक्यः क्रकचपर्णाः करीरा पत्रविहीनाः कण्टकसहिताः वृक्षविशेषाः, बकुलाश्च तैः परिगताः परितो व्याप्ताः प्रान्ताः पर्यन्तप्रदेशाः येषां तै तथोक्तैः, **ताम्बूलीलतावनद्धपूगषण्डमण्डितैः**=ताम्बूलीलताभिः नागवल्लीव्रत-तीभिः अवनद्धं संबद्धं यत् पूगषण्डं क्रमुकवनं तेन मण्डितैः अलंकृतैः, अत एव **वनलक्ष्मीवासभवनैरिव**=वनलक्ष्म्याः विपिनश्रियः वासभवनैरिव वसतिगृहैरिव, **लतामण्डपैः**=वल्लीगृहैः, **विराजिता**=सुशोभिता, **उन्मदमातङ्गकपोलस्थलगलित-सलिलसिक्तेनैव**=उन्मदानां मदोन्मत्तानां मातङ्गानां गजानां कपोलस्थलेभ्यः गण्डप्रदेशेभ्यः गलितैः च्युतैः सलिलैः मदजलैः सिक्तेनेव सिञ्चितेनेव अतएव **मदगन्धिना**=मदगन्धयुक्तेन, **निरन्तरं**=सघनं यथा स्यात्तथा, **एलालतावनेन**= एलाचन्द्रवालावल्लीनां वनेन विपिनेन **अन्धकारिता**=अन्धकारयुक्ता, **नखमुखलग्नेभ -कुम्भमुक्ताफललुब्धैः**=नखानां नखराणां मुखेषु अग्रभागेषु लग्नानि संसक्तानि यानि इभकुम्भमुक्ताफलानि सिंहविदारितगजमस्तकमांसपिण्डोद्भवानि मौक्तिकानि तेषु लुब्धैः लोलुपैः, **शबरसेनापतिभिः**=भिल्लसेनानायकैः, **अभिहन्यमानकेसरिशता** =अभिहन्यमानं व्यापाद्यमानं केशरिशतं मृगेन्द्रमण्डलं यस्यां सा तथोक्ता।

टिप्पणी - यहाँ वाक्य से प्रारम्भ में आई हुई 'अस्ति' क्रिया का सम्बन्ध वाक्य के अन्त में स्थित '**विन्ध्याटवी नाम**' से है। **वेला**-समुद्र का किनारा।

मध्यप्रदेश–'हिमवद्विन्ध्ययोर्मध्य' यत्प्राग्विनशनादपि। प्रत्यगेव प्रयागाच्च मध्यदेशः प्रकीर्तितः।।' मनु–'**मेखला**–करधनी, 'स्त्रीकट्यां मेखला काञ्ची सप्तकी रशना तथा' इत्यमरः। **उद्वहद्भिः**–उत् वह्+शतृ तृ० ब० व०। **'शिखरदेशलग्नं तारागणमिव'** में **जात्युत्प्रेक्षालंकार** है। **कुरर**–क्रौञ्चपक्षी ॥ **दश्यमान**–कुतरे जाते हुए। **कलभ**=हाथी का बच्चा, 'कलभः करिशावकः' इत्यमरः। **मृदित**–मृद्+क्त–मसला हुआ। **केरली**–केरल देश की स्त्री। **अलक्तक**–महावर। **चयः**–राशि का समूह। 'कपोल–कोमलच्छविना' में **लुप्तोपमा** तथा **'रंजितेनेव' में क्रियोत्प्रेक्षा** है। दोनों के **अङ्गाङ्गिभाव से सङ्कर** । **दाडिमीफल**–अनार का फल। **कक्कोल**–शीतल चीनी का वृक्ष। **शबलैः**–चितकबरे। **संस्तरः**–सम्+स्तृ+अप्, बिछौना, विछावन। **बकुलः**–मौलसिरी। **शुककुलदलितदाडिमीफल**...यहाँ दाडिमीफल के रस से मध्य भाग के आर्द्र किये जाने रूप सम्बन्ध के न होने पर भी उसके सम्बन्ध के प्रतिपादन के द्वारा **अतिशयोक्ति अलंकार** है तथा **'वनलक्ष्मीवासभवनैरिव'** में **जात्युत्प्रेक्षालङ्कार** है। दोनों की निरपेक्ष स्थिति होने से संसृष्टि है। **एलालता**–इलायची की बेल। **इभ**–हाथी। **अभिहन्यमान**–अभि+हन्+यक्+शानच्। **सलिल–सिक्तेनेव में क्रियोत्प्रेक्षालंकार है।**

प्रेताधिपनगरीव सदासन्निहितमृत्युभीषण महिषाधिष्ठिता च समरोद्यतपताकिनीव बाणासनारोपितशिलीमुखा विमुक्तसिंहनादा च, कात्यायनीव प्रचलितखड्गभीषणा रक्तचन्दनालङ्कृता च, कर्णीसुतकथेव सन्निहितविपुलाचला शशोपगता च, कल्पान्तप्रदोषसन्ध्येव प्रनृत्यन्नीलकण्ठा पल्लवारुणा च अमृतमथनवेलेव श्रीद्रुमोपशोभिता वारुणीपरिगता च, प्रावृडिव घनश्यामला अनेकशतह्रदालङ्कृता च।

हिन्दी अनुवाद –सदा समीपवर्ती यमराज के कारण भयानक तथा (यमराजवाहन) महिष से युक्त यमराजपुरी के समान (विन्ध्याटवी) सदा निकटवर्ती मृत्युस्वरूप (सिंह व्याघ्रादि हिंसक जन्तुओं) के कारण भयदायिनी एवं वन्य भैषों से अधिष्ठित (थी) धनुषों (बाणासन) पर समारोपित किये गये बाणों वाली और सैनिकों द्वारा (विमुक्त) सिंहनादों वाली, युद्ध के लिए प्रस्तुत सेना (पताकिनी) के समान विन्ध्याटवी बाण एवं असन नामक वृक्षों पर स्थित भ्रमरों वाली तथा सिंहों द्वारा की गयी गर्जनाओं से युक्त (थी)। चलती हुयी तलवार के समान भयंकर और लाल चन्दन के (अनुलेप से) सुशोभित (थी)। समीपवर्ती विपुल और अचल नामक मित्रों वाली तथा शश नामक सचिव से युक्त, (चौर्यशास्त्र प्रवर्तक)

कर्णीसुतनामक क्षत्रिय विशेष की कथा के समान (विन्ध्याटवी) निकटवर्ती बड़े-बड़े पर्वतों वाली तथा खरगोश नामक वन्य जीवों अथवा लोध्र वृक्षों से युक्त और किसलयों के समान लालवर्ण, प्रलय की रजनीमुख (प्रदोष) कालीन संध्या के समान (विन्ध्याटवी) प्रमोद से नाचते हुए मयूरों (नीलकण्ठ) वाली तथा किसलयों से रक्तवर्णा (थी) लक्ष्मी (श्री) और कल्पवृक्ष (द्रुम) से सुशोभित तथा मदिरा (वारुणी) से समन्वित, अमृत प्राप्त किए गये समुद्र मन्थन की वेला (समय) के समान (विन्ध्याटवी) विल्व वृक्षों तक फैली हुयी (थी) मेघों से श्यामवर्ण अनेक बिजलियों से सुशोभित वर्षा ऋतु के समान (विन्ध्याटवी) (वृक्ष लतादि) से घनी (सघन पने से, श्याम वर्ण तथा सैकड़ों तालाबों (जलाशयों) से सुशोभित (थी)।

संस्कृतव्याख्या - **प्रेताधिपनगरीव**=प्रेताधिपस्य यमराजस्य नगरीव पत्तनमिव, **सदासन्निहितमृत्युभीषणा**-सदा सर्वदा सन्निहितः समीपवर्ती मृत्यु यमः तेन भीषणा भयदायिनी, **महिषाधिष्ठिता च**=महिषः यमस्य वाहनं तेन अधिष्ठिता सहिता च, पक्षे सदा सन्निहितेन सर्वदा निकटस्थितेन मृत्युना हिंस्रजन्तुभिराक्रमणसम्भवान्मरणेन भीषणा भयावहा तथा च महिषैः वन्यसैरिभैरधिष्ठिता व्याप्ता, **समरोद्यतपताकिनीव**=समरे युद्धे उद्यता प्रवृत्ता या पताकिनी सेना तद्वदिव, **बाणासनारोपितशिलीमुखाः**=बाणासनेषु चापेषु आरोपिताः शिलीमुखाः लोहखण्डाः यया सा तथोक्ता, **विमुक्तसिंहनादा च** विमुक्तः परित्यक्तः सुभटैर्विहित इत्यर्थः, सिंहनादः क्ष्वेडा इव नादो यया सा, पक्षे बाणासु नीलिझिण्टीषु असनेषु पीतशालेषु च तरुषु आरोपिताः संस्थापिताः शिलीमुखा भ्रमराः यया सा तथोक्ता, विमुक्ताः स्वच्छन्दरूपेण भूताः सिंहानां नादाः गर्जनानि यत्र तथाविधा, **कात्यायनीव**=दुर्गेव, **प्रचलितखड्गभीषणा**=प्रचलितेन चञ्चलीभूतेन खड्गेन असिना भीषणा भयानका, **रक्तचन्दनालङ्कृता च**=रक्तचन्दनानुलेपेन अलंकृता च=भूषिता च, प्रचलितैः सञ्चरद्भिः खड्गैः गण्डकैः भीषणा तथा रक्तचन्दनैः तत्संज्ञकतरुभिः अलंकृता। **कर्णीसुतकथेव**=कूर्णीसुतः चौर्यशास्त्रनिर्माता क्षत्रियविशेषः तस्य कथा वृत्तान्तः तद्वदिव, **सन्निहितविपुलाचला**=सन्निहितौ समीपवर्त्तिनौ विपुलाचलौ तत्संज्ञकौ सखायौ यस्यां सा तादृशी, **शशोपता च**=तथा शशसंज्ञकेन सचिवेन उपगता विशिष्टा, पक्षे सन्निहिताः सन्निकटवर्त्तिनः विपुलाः विस्तृता अचलाः पर्वताः यस्या सा तादृशी तथा शशैः मृदुलोमकैः लोघ्रवृक्षैर्वा उपगता सहिता, **कल्पान्तप्रदोषसन्ध्येव**=कल्पान्ते युगान्ते प्रदोषः रजनीमुखं तस्य या सन्ध्या सायंकालस्तद्वदिव, **प्रनृत्यन्नीलकण्ठा**=प्रनृत्यन् संसारसंहारप्रमोदेन नटन् नीलकण्ठः महेश्वरः यस्यां सा तथोक्ता, **पल्लवारुणा च**=

तथा पल्लवः किसलयस्तद्वदरुणा रक्ता, पक्षे प्रनृत्यन्तः नटन्तः नीलकण्ठाः मयूराः तस्यां सा तथा पल्लवैः किसलयैः अरुणा रक्तवर्णरूपा, **अमृतमथनवेलेव**=अमृताय पीयूषाय यन्मथनं क्षीरसागरस्य विलोडनं तस्य वेला समय इव, **श्रीद्रुमोपशोभिता**= श्रिया लक्ष्म्या द्रुमेण कल्पद्रुमेण उपशोभिता उपरञ्जिता, **वारुणीपरिगता च**=तथा वारुणीं सुरां परिगता सहिता, पक्षे श्रीदुमैः विल्ववृक्षैः उपशोभिता तथा पश्चिमां दिशं परिगता सामस्त्येन प्राप्ता, **प्रावृडिव**=वर्षाकाल इव, **घनश्यामला**=घनैः मेघैः श्यामला कृष्णवर्णा, **अनेकशतह्रदालङ्कृता च**=तथा अनेकाभिः शतह्रदाभिः तडिद्भिः अलङ्कृता मण्डिता, पक्षे घना वृक्षादिभिः सान्द्रा अत एव श्यामलवर्णा उपलक्ष्यमाणा तथा अनेकाः भिन्नाभिन्नस्वरूपाः शतह्रदाः जलवालिकाः ताभिः अलंकृता।

टिप्पणी – **प्रेताधिपः**–प्रेतानामधिपः–प्रेतों का स्वामी यमराज। **मृत्युभीषणा**– (क) प्रेताधिपनगरी के पक्ष में–यमराज से भीषण (क) विन्ध्याटवी के पक्ष में – व्याघ्रादिहिंसक जन्तुओं से भीषण। **महिषः**–भैंसा, 'लुलायो महिषो वाहद्विषत्कासरसैरिभाः' इत्यमरः। **अधिष्ठिताः**–स्था+क्त+टाप्–युक्त आश्रित। **बाणासन**–(क) सेना के पक्ष में–धनुष (ख) विन्ध्याटवी के पक्ष में बाण तथा असन नामक वृक्ष। **शिलीमुख**–(क) सेना के पक्ष में–बाण ,(ख) विन्ध्याटवी के पक्ष में भौंरे। **सिंहनाद**–(क) सेना के पक्ष में–सिंहों के समान गर्जन (ख) विन्ध्याटवी के पक्ष में–सिंहों की गर्जन। **खड्गः**–(क) कात्यायनी के पक्ष में तलवार (ख) विन्ध्यावटवी के पक्ष में–गैंडा। रक्तचन्दन (क) कात्यायनी के पक्ष में लाल चन्दन का लेप, (ख) विन्ध्याटवी के पक्ष में लाल चन्दन का पेड़। **कर्णीसुत**–चौर्यशास्त्र का प्रवर्तक क्षत्रियविशेष। बृहत्कथा के अनुसार विपुल तथा अचलनामक मित्र थे तथा उसके शश नामक मंत्री था–'कर्णीसुतः करकटः स्तेयशास्त्रप्रवर्तकः। तस्य ख्यातौ सखायौ द्वो विपुलाचलसंज्ञितौ। शशो मन्त्रिवरस्तस्य....। **विपुलाचल**–(क) कर्णीसुतकथा के पक्ष में–कर्णीसुत के विपुल तथा अचल नामक मित्र, (ख) विन्ध्याटवी के पक्ष में बड़े पर्वत। **शश**–(क) कर्णीसुतकथा के पक्ष में–शश नामक मन्त्री (ख) विन्ध्याटवी के पक्ष में–खरगोश। 'शशो लोघ्रे नृभेदे च पशौ' इत्यनेकार्थः। **नीलकण्ठ**–(क) कल्पान्तप्रदोषसन्ध्या के पक्ष में–शिव, (ख) विन्ध्याटवी के पक्ष में–मयूर। **पल्लवारुणा**–(क) सन्ध्या के पक्ष में–पल्लवों जैसी लाल। (ख) विन्ध्याटवी के पक्ष में–पल्लवों के कारण लाल। **'अमृत....परिगता'**–देवताओं तथा दैत्यों ने अमृत के लिए समुद्रमन्थन किया था। ऐसी पौराणिक कथा है। **श्रीद्रुमोपशोभिता**–(क) समुद्रमन्थन के

समय के पक्ष में-लक्ष्मी तथा कल्पद्रुम से सुशोभित (ख) विन्ध्याटवी के पक्ष में-बिल्ववृक्षों से सुशोभित। 'श्रीद्रुमोपशोभिता' यहाँ समुद्रमन्थन के पक्ष में 'श्री' शब्द का अर्थ 'लक्ष्मी' तथा 'द्रुम' शब्द का अर्थ 'कल्पद्रुम' है क्योंकि ऐसा विधान है- ''नामैकदेशग्रहणेन नामग्रहणं बोध्यम्'' अर्थात् नाम के एकभाग के ग्रहण से सम्पूर्ण नाम का ग्रहण समझना चाहिए। **वारुणी**-(क) अमृतमंथन वेला के पक्ष में-सुरा, (ख) विन्ध्याटवी के पक्ष में-वरुण देव की दिशा, पश्चिम दिशा। **प्रावृट्**-वर्षा ऋतु। **घनश्यामला**-(क) वर्षा ऋतु के पक्ष में-मेघों के कारण श्यामली, (ख) विन्ध्याटवी के पक्ष में-मेघों जैसी श्यामली। **शतह्रदालङ्कृता**-(क) वर्षा ऋतु के पक्ष में-बिजलियों से अलंकृत (ख) सैकड़ों सरोवरों से अलंकृत-(विन्ध्याटवी के पक्ष में)। **प्रेताधिपनगरीव... अनेकशतह्रदालंकृत च** पर्यन्त **पूर्णोपमालंकार** है।

चन्द्रमूर्तिरिव सततमृक्षसार्थानुगता हरिणाध्यासिता च, राज्यस्थितिरिव चमरमृगबालव्यजनोपशोभिता समदगजघटापरिपालिता च, गिरितनयेव स्थाणुसङ्गता मृगपतिसेविता च, जानकीव प्रसूतकुशलवा निशाचरपरिगृहीता च, कामिनीव चन्दनमृगमदपरिमलवाहिनी रुचिरागुरुतिलकभूषिता च, सोत्कण्ठेव विविधपल्लवानिलवीजिता समदना च, बालग्रीवेव व्याघ्रनखपङ्क्तिमण्डिता गण्डकाभरणा च, पानभूमिरिव प्रकटिमधुकोशशता प्रकीर्णविविधकुसमा च।

हिन्दी अनुवाद - लगातार नक्षत्र समूह से परिवेष्टित एवं मृगलाञ्छन से आश्रित चन्द्रमूर्ति के समान, (विन्ध्याटवी) निरन्तर भालुओं के समूह से परिवेष्टित एवं हरिणों से आश्रित थी। चमर मृगों के बालों अर्थात् चामर के पंखों से सुशोभित तथा मदयुक्त गज समूहों से परिरक्षित राजमर्यादा के समान, (विन्ध्याटवी) चमर मृगों के बाल रूपी पंखों से शोभायमान एवं मतवाले हाथियों के समूह से परिरक्षित थी। भगवान् शङ्कर (स्थाणु) से संगत सवं सिंह से (वाहन रूप में) सेवित हिमालय पुत्री पार्वती के समान, (विन्ध्याटवी) पत्रशाखारहित वृक्षों के ठूँठों (स्थाणु) से युक्त एवं सिंहों से सेवित थी। कुश लव नामक पुत्रों को उत्पन्न करने वाली एवं निशाचर (रात में घूमने वाले) उलूक आदि पक्षियों से युक्त थी। चन्दन और कस्तूरी की सुगन्धि को धारण करने वाली तथा सुन्दर अगरु के तिलक से सुशोभित, कामातुरा नायिका के समान (विन्ध्याटवी) चन्दन वृक्षों एवं कस्तूरी मृगों की सुगन्धि को धारण करने वाली तथा अगरु और तिलक के वृक्षों से शोभित

थी। अनेक प्रकार के किसलयों की हवाओं से पंखा झाली जाती हुयी और कामयुक्ता, रतिप्रिया नायिका के समान, (विन्ध्याटवी) अनेक पल्लवों की हवाओं से वीजित एवं मदनवृक्षों से युक्त थी। व्याघ्र के नखों की पंक्ति से सुशोभित तथा गण्डक (ताबीज) के आभूषणों वाली, स्तनधय शिशु की ग्रीवा के समान (विन्ध्याटवी) व्याघ्रों के नाखूनों की पंक्ति से शोभित एवं गैंडा नामक वन्य पशु रूपी अभूषणों वाली थी। जहाँ सैकड़ों मदिरा के पात्र दिखाई पड़ते हैं और जहाँ अनेक प्रकार के पुष्प बिखरे हुए हैं, ऐसी मधुशाल के समान (विन्ध्याटवी) सैकड़ोंमधुमक्खियों के छत्तों को प्रकट करने वाली तथा बिखरे हुए अनेक प्रकार के पुषों वाली थी।

संस्कृतव्याख्या - **चन्द्रमूर्तिरिव**=चन्द्रस्य हिमांशोः मूर्त्तिः, शरीरमिव, **सततमृक्षसार्थानुगता**=सततं निरन्तरम् ऋक्षाणि ताराः तेषां सार्थः समूहः तेन अनुगता परिवेष्टिता, **हरिणाध्यासिता च**=तथा हरिणेन हरिणचिह्नेन अध्यासिता आश्रिता, पक्षे सततम् ऋक्षाः भल्लुकाः तेषां सार्थः समुदायः तेन अनुगता व्याप्ता, हरिणैः मृगैः अध्यासिता, **राज्यस्थितिरिव**=राज्यमर्यादा इव, **चमरमृगबालव्यजनोपशोभितः**= चमरमृगाणां बालचामराणि व्यजनानि तालवृन्तानि च तैरुपशोभिता, **समदगजघटारपरिपालिता**=समदाभिः गजघटाभिः करिमण्डलैः परिपालिता परिक्षिता पक्षे चमरमृगाणां बालाः लोमान्येव व्यजनानि तैः तथोक्तैः, उपशोभित ता समदगजघटापरिपालिता, **गिरितनयेव**=हिमाचलसुतेव, **स्थाणुसङ्गता**=स्थाणुना रुण सङ्गता मिलिता, **मृगपतिसेविता च**=मृगपतिना सिंहेन सेविना वाहनेन शूश्रूषिता च पक्षे स्थाणुभिः शाखापत्रादिशून्यतरुभिः सङ्गता तथा मृगपतिभिः सिंहै सेविता आश्रिता जानकीव=सीतेव, प्रसूतकुशलवा=प्रसूतौ कुशलवौ तन्नामकसुतौ यया सा थोक्ता, **निशाचरपरिगृहीता च**=निशाचरेण रावणेन परिगृहीता पञ्चवटीतोऽपहता । पक्षे प्रसूताः जनिताः कुशानां बर्हिषां लवाः अंकुराः यस्यां सा तथोक्ता, निशाचरैः लूकादिपक्षिभिः परिगृहीता आश्रिता, **कामिनीव**=श्रृंगारनायिकेव, **चन्दनमृगमद-रिमलवाहिनी**=चन्दनमृगमदानुलेपनसुगन्धवाहिनी, **रुचिरागुरुतिलकभूषिता** च=तथा रुचिरागुरुणा सुन्दरकाकतुण्डसौगन्ध्येन तिलकेन पुण्ड्रकेण भूषिता अलंकृता, पक्षे चन्दनानां चन्दनवृक्षाणां मृगमदानां कस्तूरीणाञ्च सम्बन्धात् यत् परिमलं सौगन्ध्यं वहति धारयतीत्येवं शीला तथा रुचिराभ्यां मनोहराभ्यां अगुरुतिलकाभ्याम् आमोदितरुविशेषपुष्पतरुविशेषाभ्यां भूषिता शोभिता, **सोत्कण्ठेव**=कान्तप्राप्तिसमुत्सुका नायिकेव, **विविधपल्लवानिलवीजिता**=विविधानाम् अनेकविधानां पल्लवानां

किसलयानाम् अनिलैः पवनैः वीजिता सहचरीभिः कामपीडापनोपदाय स्पर्शिता, **समदना च**=तथा मदनैः कामदेवैः सह वर्तमाना युक्ता, पक्षे स्पष्टा च तथा मदनैः तदाख्यातरुविशेषैश्च सह वर्तमाना संयुक्ता, **बालग्रीवेव**=बालाः बालकाः तेषां ग्रीवाः गलदेशाः तद्वदिव, **व्याघ्रनखपङ्क्तिमण्डिता**=व्याघ्रनखपंक्तिभिः व्याघ्रनख-चिह्नश्रेणिभिः मण्डिता सुशोभिता, **गण्डकाभरणा च**=तथा गण्डकः **भूषणविशेषः** आभरणम् अलंकरणं यस्यां सा; पक्षे व्याघ्रनखपंक्तिभिः परिभ्रमणकालोत्पन्ननख-चिह्नाभिः मण्डिता, गण्डकाः वार्धीणसाः त एव आभरणानि भूषणानि यस्याः सा तथोक्ता, **पानभूमिरिव**=मद्यपानस्थलमिव, **प्रकटितमधुकोशशता**=प्रकटितं प्रकाशितं मधु मद्यं तस्य कोशानां पानपात्राणां शतं यस्यां सा, **प्रकीर्णविविधकुसुमा च**=तथा प्रकीर्णानि पर्यस्तानि विविधानि अनेकप्रकाराणि कुसुमानि पुष्पाणि यस्यां सा; पक्षे प्रकटितं प्रकाशितं मधूनां पुष्परसानां कोशानां तदाश्रयाञ्च शतं यस्यां सा, प्रकीर्णवि-विधकुसुमा च।

टिप्पणी - **ऋक्षसार्थ**-(क) चन्द्रमूर्ति के पक्ष में-तारों का समुदाय, (ख) विन्ध्याटवी के पक्ष में-रीछों का समूह। **हरिण**-(क)चन्द्रमूर्ति के पक्ष में-मृगचिह्न, (ख) विन्ध्याटवी के पक्ष में-मृग। **स्थाणु**-(क) गिरितनया के पक्ष में-शिव, (ख) विन्ध्याटवी के पक्ष में ठूँठ। **कुशलव**-(क) सीता के पक्ष में-कुश, लव नामक बालक, (ख) विन्ध्याटवी के पक्ष में-काँस का अङ्कुर। **निशाचर**-(क) सीता के पक्ष में-रावण, (ख) विन्ध्याटवी के पक्ष में-रात्रि में विचरण करने वाले (उल्लू आदि पक्षी।) **अगुरुतिलकभूषिता**-(क)कामिनी के पक्ष में-अगर तिलक से सुशोभित, (ख)विन्ध्याटवी के पक्ष में-अगर और तिलक नामक वृक्षों से सुशोभित। **सोत्कण्ठा**-उत्कण्ठा से युक्त नायिका। **वीजिता**-हवा की गई। **समदना** (क) उत्कण्ठा युक्त नायिका के पक्ष में-कामयुक्ता, (ख) विन्ध्याटवी के पक्ष में-मदन नामक वृक्षों से युक्त। **व्याघ्रनखपंक्ति**-(क) बालग्रीवा के पक्ष में-बघनखों की कतार, (ख) विन्ध्याटवी के पक्ष में-भूतल पर अंकित व्याघ्र के नाखून की श्रेणी। **गण्डक**-(क)बालग्रीवा के पक्ष में-गण्डा-ताबीज, (ख) विन्ध्याटवी के पक्ष में-गैंडा। **मधुकोश**-(क)पानभूमि के पक्ष में-मदिरा के प्याले, (ख) विन्ध्याटवी के पक्ष में-मधुमक्खी के छत्ते। यहाँ सर्वत्र श्लेष से युक्त पूर्णोपमालंकार है

क्वचित्प्रलयवेलेव महावराहदंष्ट्रासमुत्खातधरणीमण्डला, क्वचिद्दशमुख-नगरीव चटुलवानरवृन्दभज्यमानतुङ्गशालाकुला, क्वचिदचिरनिर्वृत्तविवा-हभूमिरिव हरितकुशसमित्कुसुमशमीपलाशशोभिता, क्वचिदुन्मत्तमृगपतिनाद-

भीतेव कण्टकिता, क्वचिन्मत्तेव कोकिलकुलकलप्रलापिनी, क्वचिदुन्मत्तेव वायुवेगकृततालशब्दा क्वचिद्विधवेव उन्मुक्ततालपत्रा, क्वचित् समरभूमिरिव शरशतनिचिता।

हिन्दी अनुवाद - बड़े-बड़े शूकरों के दाँतों से खोद डाले गये भूभाग वाली विन्ध्याटवी कहीं तो वराहावतार विष्णु के दांतों द्वारा जल के ऊपर ले आये गये पृथ्वी मण्डल वाली, प्रलयकालीन जलमय वेला के समान थी। चञ्चल वानर समूह द्वारा तोड़े गये ऊँचे शाल नामक वृक्षों से व्याप्त विन्ध्याटवी, कहीं पर चञ्चल वानर समूह द्वारा तोड़े जाते हुए ऊँचे भवनों से विक्षुब्ध लंकापुरी के समान थी। हरे कुशों, समिधा (हवन काष्ठ) पुष्प, शमी तथा पलाश पत्रों से सुशोभित, विन्ध्याटवी कहीं पर हरे कुशों, समिधा, पुष्प, शमी एवं पलाश पत्रों से शोभित, तत्काल समाप्त हुई विवाह वेदिका के समान थी। सिंह की गर्जना से भयभीत अतएव रोमाञ्चित स्त्री के समान कहीं विन्ध्याटवी, कोकिल समूह के समान अस्पष्ट मधुर (प्रलाप) निरर्थक बातें कहने वाली (मधुपान से) मतवाली स्त्री के समान थी। कहीं वायु के वेग से ताड़वृक्षों के (पत्तों का) शब्द करने वाली विन्ध्याटवी व्याधिभूत-बात के आधिक्य से ताली बजाने वाली पागल स्त्री के समान थी। कही ताडवृक्षों के पत्तों को गिराचुकने वाली विन्ध्याटवी, तालपत्र=ताटङ्क नामक कर्णाभूषण का(पति मरणवश) त्याग कर देने वाली विधवा स्त्री के समान थी। सैकड़ों शरपत्रों (सरकण्डे नामक पोधों) से भरी हुयी विन्ध्याटवी कहीं सैकड़ों बाणों से भरी हुयी युद्धभूमि के समान थी।

संस्कृतव्याख्या - **क्वचित्**=कस्मिंश्चित् प्रदेशे, **प्रलयवेलेव**=प्रलयस्य वेला समयस्तद्वदिव, **महावराहदंष्ट्रासमुत्खातधरणीमण्डला**=महावराहेण दंष्ट्रया दन्तेन समुत्खातं सम्यक् खनितं धरणीमण्डलं भूतलं यस्यां सा तथोक्ता, पक्षे महावराहैः पृथुलशूकरैः दंष्ट्राभिः दशनैः समुत्खातं धरणीमण्डलं भूप्रदेशो यस्याः सा, **क्वचित्**=कस्मिंश्चित् प्रदेशे, **दशमुखनगरीव**=लङ्केव, **चटुलवानरवृन्दभज्यमानतुङ्गशालाकुला**=चटुलाः ये वानराः कपयः तेषां वृन्देन समूहेन भज्यमाना तुङ्गाः उन्नताः याः शालाः भवनानि ताभिः आकुलाः व्याप्ताः, पक्षे चटुलवानरवृन्देन भज्यमानाः ये तुङ्गाः उच्चाः शालाः शालवृक्षाः तैः आकुलाः, **क्वचित्**=कस्मिंश्चित् प्रदेशे, **अचिरनिर्वृतविवाहभूमिरिव**=अचिरं तत्कालतेव निर्वृतः निष्पन्नः यः विवाहः पाणिग्रहणं तस्य भूमिरिव धरेव, **हरितकुशसमित्कुसुमशमीपलाशशोभिता**=हरिताः नीलवर्णाः ये कुशाः दर्भाः, समिधः यज्ञीयकाष्ठानि, कुसुमानि पुष्पाणि, शमीवृक्षाः

पलाशाः ब्रह्मवृक्षाः तैः शोभिताः भूषिताः, पक्षेऽपि एवमेव क्वचिद्, **उन्मत्तमृगपतिनादभीतेव**=उन्मत्तः मदमत्तः यो मृगपतिः सिंहः तस्य नादेन गर्जितेन त्रस्ता सुन्दरीव, **कण्टकिता**=कण्टकः रोमाञ्चः सञ्जातोऽस्या इति कण्टकिता पक्षे कण्टकयुक्ता, **क्वचित्, मत्तेव**=मधुपानेनोन्मत्ता नायिकेव, **कोकिलकुलकलप्रलापिनी**=कोकिलकुलकलप्रलपितुं वक्तुं शीलं यस्याः साः पक्षेः कोकिलकुलस्य पिकमण्डलस्य कलप्रलापोऽस्फुटमञ्जुला ध्वनिर्यस्या अस्तीति सा तादृशी, **क्वचित्, उन्मत्तेव**=उन्मत्ता उन्मादयुक्ता स्त्रीव, **वायुवेगकृततालशब्दा**=वायुवेगेन व्याधिरूपपवनबाहुल्येन कृताः विहिताः तालशब्दाः करतलध्वनयः यया सा पक्षे वायुवेगेन पवनाधिक्येन कृताः तालानां तालतरूणां शब्दाः यस्यां सा तादृशी, **क्वचित्, विधवेव**=नष्टः धवः पतिः यस्याः सा सुन्दरीव, **उन्मुक्ततालपत्रा**=उन्मुक्तं परित्यक्तं तालपत्रं ताटङ्ककर्णाभरणविशेषो यया सा तादृशी पक्षे उन्मत्तानि पवनाधिक्येन पतितानि तालानां तालतरूणां पत्राणि यस्यां सा तादृशी, **क्वचित् समरभूमिरिव**=युद्धस्थलमिव, **शरशतनिचिता**=शराणां बाणानां शतेन समुदायेन निचिता व्याप्ता; पक्षे शराणां मुञ्जादण्डानां शतेन समुदायेन निचिता।

टिप्पणी - **महावराह**-(क)प्रलयवेला के पक्ष में-वराह के रूप में विष्णु भगवान् का अवतारी, (ख) विन्ध्याटवी के पक्ष में-बड़े-बड़े सूअर। पौराणिक कथा है कि प्रलय काल में जल निमग्न पृथ्वी को वराहावतारी विष्णु ने ऊपर उठाया था। **समुत्खात**-सम्+उत्+खन्+क्त। **शालाकुल**-(क) लङ्का के पक्ष में-भवनों से व्याप्तः; (ख) विन्ध्याटवी के पक्ष में-शाल नामक वृक्षों से युक्त। **कण्टकिता**-(क) भयभीत स्त्री के पक्ष में-रोमांच से युक्त। (ख) विन्ध्याटवी के पक्ष में-काँटों से युक्त। **वायवेगकृततालशब्दा**-उन्माद रोग से युक्त स्त्री वाताधिक्य के कारण अकारण ही ताली बजाना आदि क्रियायें क़रने लगती हैं। विन्ध्याटवी में भी वाताधिक्य के कारण ताल के वृक्षों में शब्द उत्पन्न हो रहा था। **तालपत्र**-(क) विधवा स्त्री के पक्ष में ताटङ्क नामक कर्णाभूषण, (ख) विन्ध्याटवी से पक्ष में-ताड़ के पत्ते। **शर**-(क)सेना के पक्ष में बाण, (ख) विन्ध्याटवी के पक्ष में-सरकण्डे। यहाँ श्लेष ये युक्त **पूर्णोपमालङ्कार** है।

क्वचिदमरपतितनुरिव नेत्रसहस्त्रसङ्कुला, क्वचिन्नारायणमूर्तिरिव तमालनीला, क्वचित्पार्थरथपताकेव वानराक्रान्ता, क्वचिदवनिपतिद्वारभूमिरिव वेत्रलताशतदुष्प्रवेशा, क्वचिद्विराटनगरीव कीचकशतावृता, क्वचिदम्बरश्रीरिव व्याधानुगम्यमानतरलतारकमृगा, क्वचिद्गृहीतव्रतेव दर्भचीरजटावल्कल-

धारिणी, अपरिमितबहलपत्रसञ्चयापि सप्तपर्णभूषिता, क्रूसत्त्वापि मुनिजन-सेविता, पुष्पवत्यपि पवित्रा विन्ध्याटवी नाम।

हिन्दी अनुवाद - हजारों नेत्र नामक वृक्षों अथवा वृक्षों की जड़ों या जटाओं से व्याप्त विन्ध्याटवी, मानों सहस्र नेत्रों से व्याप्त देवराज इन्द्र के शरीर के समान थी। तमाल वृक्षों से नीलवर्णा विन्ध्याटवी, कहीं तमाल वृक्षवत् श्यामवर्णवाली श्री नारायण (भगवान् कृष्ण) की मूर्ति अर्थात् शरीर जैसी थी। वानरों से अधिष्ठित विन्ध्याटवी , कहीं हनुमान् की मूर्ति से चिह्नित अर्जुन के रथ के पताका के समान थी। सैकड़ों वेंत की लताओं के कारण दुर्गम प्रवेश वाली विन्ध्याटवी, कहीं पर, (द्वारपालों के हाथों की) सैकड़ों वेत्रयष्टियों के कारण दुष्प्रवेशा राजाओं के द्वार भूमि (ड्योढी) के समान थी, सैकड़ों कीचकों (छिद्रयुक्त बाँसों) से भरी हुयी विन्ध्याटवी, कहीं पर सैकड़ों कीचकों (राजश्यालक कीचक के अनुयायियों) से भरी हुयी विराट नगरी के समान थी। व्याध बहेलियों द्वारा अनुगम्यमान (अतएव भयवश) चञ्चल कनीनिकाओं वाले मृगों से युक्त विन्ध्याटवी कहीं, व्याधरूपधारी भगवान् शिव के द्वारा अनुगम्यमान अतएव तरल (चञ्चल) तारकमृग-मृगशिरा नामक नक्षत्र वाली आकाशलक्ष्मी के समान थी। कुश और चीर नामक घासों, वृक्षों की जटाओं तथा वृक्षों की छालों को धारण करने वाली विन्ध्याटवी कहीं पर, कुश जीर्ण वस्त्र या कौपीन जटायें तथा वल्कल को धारण करने वाली व्रतधारण करने वाली स्त्री के समान थी। असंख्य सघन पत्तों के समूह वाली होकर भी जो विन्ध्याटवी सात पत्तों से सुशोभित थी। (विरोधपरिहारार्थ-सप्तपर्ण से सप्तपर्ण नामक वृक्षों से आभूषित अर्थ लिया जायेगा) दुष्ट हृदयवाली होकर भी जो मुनिजनों द्वारा सेवित थी (यहाँ विरोध परिहारार्थ, क्रूरसत्त्वा का अर्थ सिंह व्याघ्रादि क्रूर जीवों वाली, लिया जायेगा। पुष्पवती अर्थात् रजोधर्मवती होकर भी जो विन्ध्याटवी पवित्र थी (यहाँ विरोध परिहारार्थ-पुष्पवती का अर्थ फूलों वाली लिया जायेगा।)

संस्कृतव्याख्या - **क्वचित् अमरपतितनुरवि**=अमरपतिः इन्द्रः तस्य तनुरिव शरीरमिव, **नेत्रसहस्त्रसङ्कुला**=नेत्राणां लोचनानां यत् सहस्रं तेन संकुला, पक्षे नेत्राणां तरुमूलानां जटानां वा यत् सहस्रं तेन सङ्कुला, **क्वचित् नारायणमूर्तिरिव**=नारायणस्य विष्णोः मूर्तिः शरीरमिव, **तमालनीला**=तमालं तापिच्छं तद्वन्नीला श्यामवर्णा, पक्षे तन्नामकवृक्षैः नीला, **क्वचित्पार्थरथपताकेव**=पार्थस्य अर्जुनस्य यः रथः तस्योपरि पताकेव वैजयन्तीव, **वानराक्रान्ता**=वानरेण हनूमता पक्षे वानरैः शाखामृगैः आक्रान्ता

अधिष्ठिता, **क्वचित् अवनिपतिद्वारभूमिरिव**=अवनिपतिः राजा तस्य द्वारभूमिरिव, **वेत्रलताशतदुष्प्रदेशा**=वेत्रलताशतेन द्वारपालहस्तस्थितवेत्रयष्टिसमूहेन दुष्प्रवेशा, दुःखेन प्रवेष्टुं योग्या, पक्षे वेत्राणि लताश्च तासां शतं समूहस्तेन दुष्प्रवेशा, **क्वचिद् विराटनगरीव**=विराटस्य तदाख्यनरपतेः नगरीव राजधानीव, **कीचकशतावृता**=कीचकशतेन स्वप्रियबान्धवकीचकसमूहेन आवृता, पक्षे कीचकाः सरन्ध्रवेणवस्तेषां शतैः समूहैः आवृता, **क्वचित् अम्बरश्रीरिव**=गगनलक्ष्मीरिव, **व्याधानुगम्यमान-तरलतारकमृगा**=व्याधेन व्याधरूपधारिणा शिवेन अनुगम्यमानं अनुव्रज्यमानम् अतएव तरलं त्रासेन चञ्चलं तारकमृगं मृगशिरो नक्षत्रं यस्यां सा तथोक्ता; पक्षे व्याधैः भिल्लैः अनुगम्यमानः अतएव तरलाः चञ्चलाः तारका लोचनकनीनिका येषां ते तथोक्ताः मृगाः हरिणाः यस्यां सा तादृशी, **क्वचिद्गृहीतव्रतेव**=गृहीतं स्वीकृतं व्रतं नियमः यया सा एवं विधा सुन्दरीव, **दर्भचीरजटावल्कलधारिणी**=दर्भाः कुशाः, चीराणि जीर्णवसनखण्डानि जटाः संहतकेशाः, वल्कलानि च धारयितुं शीलं यस्याः सा तथोक्ता, पक्षेऽपि एवमेव, **अपरिमितबहुलपत्रसञ्चयाऽपि**=अपरिमितानि असंख्यानि बहुलानि सघनानि पत्राणि दलानि तेषां सञ्चयः समूहः यस्यां सा तथोक्ताऽपि, **सप्तपर्णभूषिता**=सप्तभिः पर्णैः भूषितेति विरोधः, सप्तपर्णसंज्ञकतरुभिर्विराजितेति तत्परिहारः, **क्रूरसत्त्वापि**=क्रूरं दुष्टं सत्त्वं हृदयं यस्याः सा तथोक्तापि मुनिजनसेवितेति विरोधः, क्रूराः हिंस्रा सत्त्वाः व्याघ्रादयः यस्यां सा तादृशीति तत्परिहारः, **पुष्पवती**=रजोधर्मवत्यपि पवित्रेति विरोधः, पुष्पाणि कुसुमानि अस्याः सन्तीति तत्परिहारः, एवम्भूता विन्ध्याटवी नामासीत्।

टिप्पणी **-अमरपतिः**-अमरों अर्थात् देवताओं के पति देवराज, इन्द्र। 'अमरा निर्जरा देवाः' इत्यमरः। नेत्र-(क) इन्द्रशरीर के साथ-आँखे, (ख) विन्ध्याटवी के पक्ष में-जटा अथवा वृक्षों की जड़। **वेत्रलता**-(क) राजद्वारभूमि के पक्ष में-वेंत की छड़ी, (ख) विन्ध्याटवी के पक्ष में-बेंत की बेलें। **कीचक**-(क)विराटनगरी के पक्ष में-विराट देश के राजा का साला कीचक, (ख) विन्ध्याटवी के पक्ष में-छिद्रयुक्त बाँस जिनके छिद्रों में वायु भर कर शब्द करती है। 'वेणवः कीचकास्ते स्युर्ये स्वनन्त्यनिलोद्धताः' इत्यमरः। **'क्वचित्.....मृगा'** शिवपुराण की कथा के अनुसार प्राचीन काल में ब्रह्मा अपनी परमसुन्दरी कन्या सन्ध्या के पीछे काम से पीड़ित होकर दौड़ पड़े। संन्ध्या ने अपने धर्म की रक्षा के लिये हरिणी का रूप धारण कर लिया और रक्षा के लिये शिवजी के शरण में गयी। ब्रह्मा ने भी हरिण का रूप धारण कर उसका पीछा किया। ऐसा देख कर शङ्कर जी ने ब्रह्मा जी का

सिर काट डालने के लिये बाण छोड़ा। तब ब्रह्मा अत्यन्त लज्जित हुये तथा मृगशिरा नक्षत्र में प्रविष्ट हो गये। शिव के बाण ने भी आर्द्रा नक्षत्र के रूप में उनका पीछा किया। **तरलतारकमृगा**-(क) अम्बरश्री के पक्ष में-चञ्चल मृगशिरा नक्षत्रवाली, (ख) विन्ध्याटवी के पक्ष में-चञ्चल पुतलियों वाले हरिणों वाली। **'अमरपतितनुरिव'** में **दर्भचीरवल्कलधारिणी** पर्यन्त **पूर्णोपमालङ्कार** है। **'अपरिमित....पवित्रा'** में **विरोधाभास** अलंकार है। (क)**'अपरिमित....सप्तपर्ण-भूषिता'** यहाँ 'सप्तपर्ण' का अर्थ सात पत्ते कर लेने पर विरोध होता है तथा 'सप्तपर्ण' नामक वृक्ष अर्थ मान लेने पर विरोध का परिहार हो जाता है। (ख) **'क्रूरमुनिजनसेविता'** यहाँ कर का अर्थ निर्दय, सत्त्व का अर्थ मन करने पर विरोध होता है तथा 'सत्त्व' का अर्थ 'प्राणी' मान लेने पर परिहार हो जाता है। (ग) **'पुष्पवत्यपि पवित्रा'** यहाँ 'पुष्पवती' का अर्थ 'रजस्वला स्त्री' को मान लेने पर विरोध होता है, क्योंकि 'रजस्वला स्त्री' को शास्त्रों में अपवित्र बतलाया गया है। परन्तु 'पुष्पवती' का अर्थ 'फूलों वाली' मान लेने पर विरोध का परिहार हो जाता है।

तस्याञ्च दण्डकारण्यान्तःपाति, सकलभुवनविख्यातम्, उत्पत्तिक्षेत्रमिव भगवतो धर्मस्य सुरपतिप्रार्थनापीतसकलसागरसलिलस्य मेरुमत्सरादम्बर-तलप्रासारितशिरःसहस्रेण दिवसकररथगमनपथमपनेतुमभ्युद्यतेन अव-गणितसकलसुरवचसा विन्ध्यगिरिणाप्यनुल्लङ्घिताज्ञस्य, जठरानलजीर्णवाता-पिदानवस्य, सुरासुरमुकुटमकरपत्रकोटिचुम्बितचरणरजसो दक्षिणाशावधू-मुखविशेषकस्य, सुरलोकादेकहुङ्कारनिपातितनहुषप्रकटप्रभावस्य भगवतो महामुनेरगस्त्यस्य, भार्यया लोपामुद्रया स्वयमुपरचितालवालकैः करपुट-सलिलसेकसंवर्द्धितैः सुतनिर्विशेषैरुपशोभितपादपैः तत्पुत्रेण च गृहीतव्रतेना-षाढिना पवित्रभस्मविरचितत्रिपुंड्रकाभरणेन कुशचीवरवाससा मौञ्जमेखला-कलितमध्येन गृहीतहरितपर्णपुटेन प्रत्युटजमटता भिक्षां दृढदढस्युनाम्ना पवित्री-कृतम् अतिप्रभूतेध्माहरणाच्च अस्येध्मवाह इति पिता द्वितीयं नाम चकार, दिशिदिशि शुकहरितैश्च कदलीवनैः श्यामलीकृतपरिसरं सरिता च कलसयो-निपरिपीतसागरमार्गानुगतयेव बद्धवेणिकया गोदावर्या परिगतमाश्रमपदमासीत्।

हिन्दी अनुवाद - और उस विन्याटवी में दण्डक वन के मध्यवर्ती, सभी लोकों में प्रसिद्ध, भगवान् धर्म का जन्मस्थान था (भगवान् अगस्त्य महामुनि का आश्रम था) (जो कि महामुनि अगस्त्य) इन्द्र की प्रार्थना से सम्पूर्ण समुद्रों का जल

पी लेने वाले, स्वर्णगिरि सुमेरु की (अत्यधिक ऊँचाई) ईर्ष्या के कारण आकाश तल पर (अपनी) हजारों चोटियों को फैलाये हुए, सूर्य के रथ के गमन मार्ग को रोकने के लिए प्रवृत्त हुए, सभी देवताओं की बात को न मानते हुए, विन्ध्याचल के द्वारा भी अनतिक्रान्त आदेश वाले, (अपनी) उदराग्नि से वातापि नामक दानव को पचा लेने वाले, देवताओं और असुरों के मुकुटों की मत्स्याकार पंक्तियों के अग्रभागों से स्पर्श की गयी चरणधूलियों वाले, दक्षिण दिशारूपी वधू के मुख पर तिलक स्वरूप, देवलोक से एक हुंकार के द्वारा नहुष को गिराने से प्रकट प्रभाव वाले, भगवान् महामुनि अगस्त्य का (अगस्त्य मुनि का आश्रमस्थान) उनकी पत्नी लोपामुद्रा द्वारा स्वयं अञ्जलियों के जलसिञ्चन से बढ़ाये गये, पुत्र समान वृक्षों से शोभायमान और व्रतधारी तथा पलाश दण्डधारी, पवित्र भस्म से त्रिपुण्ड्रक रूपी आभरण रचने वाले, कुशों के चीर वस्त्र वाले, तथा मौञ्जी मेखला से सुशोभित कटिप्रदेश वाले हरे पत्तों के दोनों को लिए हुए, प्रत्येक झोपड़ी पर भिक्षा के लिए घूमते हुए दृढदस्यु नामक उनके पुत्र द्वारा पवित्र बनाया हुआ, अत्यधिक ईंधन लाने के कारण पिता ने उसका दूसरा नाम इध्मवाह रख दिया था तथा अगस्त्य मुनि का वह आश्रम स्थान, प्रत्येक दिशा में शुकों के समान हरे केले के वनों से श्यामल सीमाओं वाला एवं कुम्भज अगस्त्य मुनि द्वारा पिये गये समुद्र के मार्ग का अनुसरण करने वाली अतएव मानो बँधी हुई चोटी वाली गोदावरी नामक नदी से घिरा हुआ था।

संस्कृतव्याख्या - **तस्यां च**=पूर्ववर्णितायां विन्ध्याटव्याम् अगस्त्यस्य आश्रमपदमासीत् इति वक्ष्यमाणेन सम्बन्धः इह प्रथमान्तानि पदानि खलु आश्रमस्य विशेषणानि सन्ति। **दण्डकारण्यान्तःपाति**=दण्डकारण्यस्य-दण्डकाख्यस्य वनस्य अन्तःपाति तन्मध्यवर्ति, **सकलभुवनविख्यातं**=सकलानि समस्तानि भुवनानि तेषु विख्यातं प्रसिद्धम्, **भगवतःधर्मस्य**=माहात्म्यवतः सुकृतस्य, **उत्पत्तिक्षेत्रमिव**= जन्मभूमिरिव, इतः खलु मुनेरगस्त्यस्य विशेषणानि। सुरपतिप्रार्थना **पीतसकल-सागरसलिलस्य**=सुरपतिप्रार्थनया इन्द्रयाचनया पीतानि चलुकीकृतानि सकलसागराणां समस्तमुद्राणां जलानि सलिलानि येन यस्य, **मेरुमत्सरात्**=मेरोः सुवर्णाद्रेः मत्सरात् शुभद्वेषात्, **अम्बरतलप्रसारितशिरःसहस्रेण**=अम्बरतले गगनतले प्रसारितानि विस्तारितानि शिरांसि मस्तकानि तेषां सहस्रं समूहः येन स तेन, **दिवसकररथगमनपथं**=दिवसकरस्य सूर्यस्य रथगमनपथं स्यन्दनगमनमार्गम्, **अपनेतुं**=दूरीकर्तुम्, **अभ्युद्यतेन**=प्रवृत्तेन, **अवगणितसकलसुरवचसा**= अवगणि-

तानि अनादृतानि सकलानां समस्तानां सुराणां देवानां वचांसि वचनानि येन तेन, **विन्ध्यगिरिणापि**=विन्ध्याचलेनापि, **अनुल्लङ्घिताज्ञस्य**=अनुल्लङ्घिता अनतिक्रान्ता आज्ञा आदेशः यस्य तस्य तादृशस्य, **जठरानलजीर्णवातापिदानवस्य**=जठरानलेन उदराग्निना जीर्णः परिपाकं प्रापितः वातापिदानवः वातापिनामकासुरः येन, तादृशस्य, **सुरासुरमुकुटमकरपत्रकोटिचुम्बितचरणरजसः**=सुराः देवाः असुराः राक्षसाः तेषां मुकुटेषु किरीटेषु यानि मकरपत्राणि सुवर्णनिर्मिताः मकराकारपक्षाः तेषां कोटयः अग्रभागाः तैः चुम्बितानि स्पर्शितानि चरणरजांसि चरणरेणवः यस्य तस्य, **दक्षिणाशावधूमुखविशेषकस्य**=दक्षिणा अवाची आशा दिगेव वधूः स्त्री तस्याः मुखे लपने विशेषकस्य तिलकस्वरूपस्य, **सुरलोकात्**=देवलोकानत्, **एकहुङ्कार-निपातितनहुषप्रकटप्रभावस्य**=एकहुङ्कारेण हुङ्कृतिमात्रेण निपातिते प्रच्याविते नहुषे तदाख्ये नृपे प्रकटः प्रभावः माहात्म्यं यस्य तस्य तादृशस्य, **भगवतः**= माहात्म्य-शालिनः, **महामुनेः**=महर्षेः, **अगस्त्यस्य**=कुम्भजस्य, **भार्यया**=जायया, **लोपामुद्रया**= तन्नामिकया, **स्वयं**=आत्मना, **उपरचितालवालकैः**=उपरचितानि विनिर्मितानि आलवालकानि आवापाः येषां तैः, **करपुटसलिलसेकसंवर्द्धितैः**= करपुटेन, हस्तद्वयेन यः सलिलस्य जलस्य सेकः सिञ्चनं तेन सम्वर्द्धितैः वृद्धिं प्रापितैः, **सुतनिर्विशेषैः**=पुत्रतुल्यैः, **पादपैः**=वृक्षैः, **उपशोमितं**=भूषितम्, **तत्पुत्रेण च**=तस्य अगस्त्यस्य पुत्रेण सुतेन, **गृहीतव्रतेन**=गृहीतम् अङ्गकृतं व्रतं ब्रह्मचारिव्रतं तेन, **आषाढिना**=आषाढः पलाशदण्डः अस्यास्तीति तेन, **पवित्रभस्मविरचितत्रि-पुण्ड्रकाभरणेन**=पवित्रं पूतं यद्भस्म तेन विरचितं विहितं त्रिपुण्ड्रकं रेखात्रययुक्त-तिलकविशेष एव आभरणं भूषणं येन तेन, **कुशचीरवाससा**=कुशाः दर्भा एव चीरं चीवर वासः वसनं यस्य तेन, **मौञ्जमेखलाकलितमध्येन**=मौञ्ज्या मुञ्जरचितया मेखलया कलितः बद्धः मध्यः कटिप्रदेशः येन तेन, **गृहीतहरितपर्णपुटेन**=गृहीतम् आत्तं हरितं श्यामलं पर्णपुटं पत्ररचितपुटकं येन तेन, **प्रत्युटज**=उटजमुटजं प्रति, **भिक्षामटता**=भिक्षार्थं भ्रमणं कुर्वता, **दृढदस्युनाम्ना**=दृढ़स्युसञ्ज्ञकेन, **पवित्रीकृतं**=तत्र उषित्वा पूतीकृतम्, **अतिप्रभूतेध्माहरणाच्च**=अतिप्रभूतानि अतिप्रचुराणि यानि इध्मानि काष्ठानि तेषाम् आहरणात् आनयनात्, **पिता**=अगस्त्यः, **अस्य इध्मवाहः**=इध्मं वहतीति इध्मवाह इति, **द्वितीयं नाम**=अपरं नाम, **चकार**=विदधौ, **दिशिदिशि**=प्रत्येकं दिशि, **शुकहरितैः**=शुकवत् कीरवत् हरितैः नीलवर्णैः, **कदलीवनैः**=रम्भाविपिनैः। **श्यामलीकृतपरिसरं**=श्यामलीकृतः=कृष्णवर्णीकृतः परिसरः, प्रान्तभूमिः यस्य तत्, **कलसयोनिपरिपीतसागरमार्गानुगतया**=कलसयोनिना अगस्त्येन परिपीतस्य

चुलुकीकृतस्य सागरस्य समुद्रस्य मार्गमध्वानम् अनुगतया अनुव्रजितयेव, **बद्धवेणिकया**=बद्धा संयता वेणिका जलधारा यया तया, बद्धा संयता वेणिका केशरचनाविशेषः यया तया च, **गोदावर्या सरिता**=गोदावर्या नद्या, **परिगतं**=परिवेष्टितम्, **आश्रमपदमासीत्**।

टिप्पणी - **'तस्यां च......अगस्त्यस्य........आश्रमपदम् आसीत्'** यह मुख्य वाक्य है। **'सुरपति.....जलस्य'**-महाभारत की कथा है कि प्राचीन काल में कालेय नामक कुछ दैत्य थे जो कि दिन में समुद्र के जल में छिपे रहते थे तथा रात्रि में समुद्र से निकलकर लोगों को पीड़ा पहुँचाते थे। उनके उपद्रव से त्रस्त होकर देवराज इन्द्र महर्षि अगस्त्य की शरण में गये। इन्द्र की प्रार्थना सुनकर महर्षि अगस्त्य ने समुद्र के समस्त जल को पी डाला। **मरु......सहस्रेण**-स्कन्दपुराण की कथा है कि प्राचीन काल में पर्यटन करते हुए महर्षि नारद विन्ध्याचल पर्वत पर पहुँचे। विन्ध्याचल के आतिथ्य को स्वीकार कर देवर्षि नारद ने उससे कहा कि सूर्य प्रतिदिन सुमेरु पर्वत की परिक्रमा करता है परन्तु तुम्हारी नहीं। इसलिए मेरा मन खिन्न हो रहा है। अतः उसके लिए यत्न करो-ऐसा कहकर नारद चले गये। इसके पश्चात् विन्ध्याचल ने अपनी चोटियों को आकाश में अधिक ऊँचाई तक फैलाना प्रारम्भ कर दिया। इससे सूर्य का मार्ग रुक गया। ऐसी स्थिति में एक ओर तो प्रकाश तथा आतप का बाहुल्य हो गया तथा दूसरी ओर प्रगाढ़ अन्धकार। देवताओं ने विन्ध्याचल से ऐसा न करने का अनुरोध किया। परन्तु विन्ध्याचल ने देवताओं की भी बात नहीं मानी। तब देवताओं की प्रार्थना पर महर्षि अगस्त्य भार्या के सहित वहाँ पधारे। विन्ध्याचल उन्हें प्रणाम करने के लिए झुक गया। तब महर्षि अगस्त्य ने कहा कि प्रिय वत्स जब तक मैं पुनः न लौटूँ तब तक तुम इसी प्रकार रहना-यह आज्ञा देकर दक्षिण की ओर चले गये और फिर लौटे ही नहीं। विन्ध्याचल आज भी उनकी आज्ञानुसार उसी प्रकार झुका हुआ है। **'जठर.... दानवस्य'**-प्राचीन काल में इल्वल तथा वातापि नामक दो दैत्य थे। इल्वल ने ब्राह्मण का रूप धारण किया और वातापि ने भेड़ का। इल्वल ने मेषरूपधारी वातापि के मांस को ब्राह्मणों को खिला दिया और कहा-'वातापि बाहर निकल आओ।' वातापि वर के प्रभाव से ब्राह्मणों के पेट को फाड़कर, बाहर निकल आया। इस प्रकार ब्राह्मणों के संहार को देखकर देवताओं ने महर्षि अगस्त्य से प्रार्थना की। महर्षि अगस्त्य ने वातापि को खाकर अपनी प्रचण्ड जठराग्नि से इसे पचा डाला। यह महाभारत की कथा है। **'सुर......प्रभावस्य'**-महाभारत की कथा

है कि वृत्रासुर के वध के पश्चात् देवराज इन्द्र को ब्रह्महत्या का पाप-भागी होना पड़ा। ऐसी स्थिति में उनके स्थान पर नहुष को स्वर्ग का राजा बनाया गया। किसी के कहने पर उसने इन्द्राणी को प्राप्त करना चाहा तथा इन्द्राणी से प्रार्थना की। इन्द्राणी ने उसे सन्देश भिजवाया कि यदि तुम महर्षियों द्वारा उठायी गयी पालकी में सवार होकर मेरे पास आओ तो तुम्हें स्वीकार कर सकती हूँ। ऐश्वर्य के मद से मत्त नहुष ने भृगु आदि महर्षियों को पालकी में मचा दिया और इन्द्राणी के पास शीघ्र पहुँचने की इच्छा से 'सर्प सर्प' (चलो चलो) कहकर भृगु के सिर पर चरणप्रहार किया। इसी बीच भृगु की जटाओं में छिपे हुए महर्षि अगस्त्य ने क्रुद्धित होकर शाप दे दिया-तुम सर्प होकर पृथ्वी पर गिरो। इससे नहुष तुरन्त सर्प होकर पृथ्वी पर गिर पड़ा। **आलवालक**-थलहा, 'स्यादालवालमावाल-मावाप:' इत्यमरः। **आषाढिना**-पलाश दण्ड को धारण करने वाला ब्रह्मचारी। 'ब्राह्मणो वैल्वपालाशौ'-मत्०। **त्रिपुण्ड्रक**-तीन रेखाओं वाला तिलक विशेष। **मौञ्ज**-मुञ्ज+अण्-मूँज की बनी हुई। 'मौञ्जी त्रिवृत्समा श्लक्ष्णा कार्या विप्रस्य मेखला'-मनु०। **'प्रत्युटजं भिक्षामटता'**-अकथितं च' से 'भिक्षा' में द्वितीया। इध्म-ईंधन, समिधायें। **कलसयोनि**-उत्पत्ति स्थान है कलश जिनका, महर्षि अगस्त्य। **'उत्पत्ति....धर्मस्य'** में जात्युत्प्रेक्षालङ्कार है, **''दक्षिणाशा....विशेषकस्य''** अगस्त्य पर तिलकत्व का आरोप तथा दक्षिण पर वधूत्व का आरोप होने से परम्परित रूपकालङ्कार है। **'शुकहरितैः'** में लुप्तोपमालङ्कार। **'कलसयोनि....परिगतम्'**-यहाँ 'अनुगतयेव' में क्रियोत्प्रेक्षालङ्कार है तथा व्यञ्जना के द्वारा **समासोक्ति भी।**

यत्र च दशरथवचनमनुपालयन्नुत्सृष्टराज्यो दशवदनलक्ष्मीविभ्रमविरामो रामो महामुनिमगस्त्यमनुचरन् सह सीतया लक्ष्मणोपरिचितरुचिरपर्णशालः पञ्चवट्यां कञ्चित् कालं सुखमुवास। चिरशून्ये अद्यापि यत्र शाखानिलीननिभृतपाण्डुकपोतपङ्क्तयो लग्नतापसाग्निहोत्रधूमराजय इव लक्ष्यन्ते तरवः। बलिकर्मकुसुमान्युद्धरन्त्याः सीतायाः करतलादिव सङ्क्रातो यत्र रागः स्फुरति लताकिसलयेषु यत्र च पीतोद्गीर्णजलनिधिजलमिव मुनिना निखिलमाश्रमोपान्तवर्त्तिषु विभक्तं महाह्रदेषु। यत्र च दशरथसुतनिशितशरनिकरनिपातनिहतरजनीचरबलबहुलरुधिरसिक्तमूलमद्यापि तद्रागाबिद्धनिर्गतपलाशमिवाभाति नवकिसलयमरण्यम्।

हिन्दी अनुवाद - जिस (आश्रमपद) में (पिता) दशरथ की आज्ञा का पालन करते हुए, (अपने पैतृक अयोध्या) साम्राज्य का परित्याग कर देने वाले,

दशमुख (रावण) की साम्राज्यलक्ष्मी के विलासों का समापन कर देने वाले तथा (अपने रहने के लिए छोटे भाई) लक्ष्मण द्वारा बनाई गयी रमणीय पर्णशाला वाले श्री राम महामुनि अगस्त्य की परिचर्या (सेवा) करते हुए (प्रियतमा) वैदेही के साथ पञ्चवटी में कुछ समय तक सुखपूर्वक रहे। चिरकाल से (जन) शून्य जिस (आश्रम) में आज भी शाखाओं पर छिपे बैठे, निःशब्द धूसरवर्ण कपोतमण्डल वाले वृक्ष ऐसे दिखाई पड़ते हैं मानों तपस्वियों के (द्वारा सम्पादित) अग्निहोत्रों की धूम पंक्तियों से आच्छन्न हों। जिस (आश्रम) में लताओं के नूतन पर्णों में (विद्यमान) लालिमा ऐसी संस्फुरित होती है मानो (वनवास़काल) में पूजा कार्य के निमित्त फूल चुनती हुई देवी सीता के करतलों से (निकलकर फूलों में) संक्रान्त हो गई हो। और जहाँ महामुनि अगस्त्य द्वारा (सर्वप्रथम) पिया गया (और बाद मुं) उगल दिया गया सागर का सम्पूर्ण जल मानो आश्रम के छोरों पर विद्यमान विशाल सरोवरों में बाँट दिया गया है। जिस (आश्रम) में दशरथनन्दन राम के तीखे शरसमूहों के आघात से मारी गई राक्षससेना के अत्यधिक रक्त से सींचे गए (वृक्षों के) मूलवाला तथा नूतन (रक्तवर्ण) पर्णों से युक्त वन आज भी इस प्रकार सुशोभित होता है मानों (मृत राक्षसों के) सर रुधिर की अरुणाई के प्रभावश निकले हुए (अतएव लाल) पत्तों से युक्त हो।

संस्कृतव्याख्या - **यत्र च**=अगस्त्याश्रमपदे, **दशरथवचनमनुपालयन्**=दशरथस्य स्वपितुः वचनं वाक्यम् अनुपालयन् पालनं कुर्वन्, **उत्सृष्टराज्यः**=उत्सृष्टं परित्यक्तं राज्यं येन सः, **दशवदनलक्ष्मीविभ्रंविरामः**=दशवदनः दशाननस्तस्य या लक्ष्मीः राज्यश्रीः तस्याः विभ्रमस्य विलासस्य विरामोऽवसानं यस्मात् स तथोक्तः, **रामः=दशरथात्मजः, महामुनिं**=मुनिश्रेष्ठम्, **अगस्त्यं**=कलसयोनिम्, **अनुचरन्**=सेवमानः, **लक्ष्मणोपरचितरुचिरपर्णशालः**=लक्ष्मणेनरामानुजेन उपरचिता विनिर्मिता रुचिरा मनोज्ञा पर्णशाला उटजः यस्य सः, **कञ्चित्कालं पंचवट्यां**= जनस्थाने, **सीतया**=जनकनन्दिन्या, **सह, सुखं**=मुनि आनन्दपूर्वकं यथा स्यात्तथा, **उवास**=निवसतिस्म। **चिरशून्ये**=बहोः कालात् जनरहितं, **यत्र**=यस्मिन्नाश्रमपदे, **अद्यापि**=इदानीमपि, **शाखानिलीननिभृतपाण्डुकपोत-पङ्क्तयः**=शाखसु निलीनाः स्थिताः निभृताः निःशब्दाः पाण्डवः श्वेताः ये कपोताः पारावताः तेषां पङ्क्तयः राजयः येषु ते, अतएव **लग्नतापसाग्निहोत्रधूमराजयः**=लग्नाः संलग्नाः तापसानां तपस्विनां यदग्निहोत्रं दैनिकयज्ञविशेषः तस्य धूमानाम् अग्निशाखानां राजयः पङ्क्तयः येषु ते तथोक्ता इव **तरवः**=वृक्षाः, **लक्ष्यन्ते**=विलोक्यन्ते। **बलिकर्म**-

कुसुमानि=बलिकर्मण: देवपूजनकार्यस्य कुसुमानि पुष्पाणि, उद्धरन्त्या=सञ्चयं कुर्वत्या: **सीतायाः**=जानयाः, **करतलात्**=पाणितलात्, **लताकिसलयेषु**=व्रततिपल्लवेषु, **संक्रान्तः**=संलग्नं इव, **यत्र रागः**=लौहित्यं, **स्फुरति**=द्योतते। **यत्र च**=आश्रमपदे, **मुनिना**=अगस्त्येन, **पीतोद्गीर्णजलनिधिजलमिव**=पूर्वं पीतं पश्चादुद्गीर्णं वमनेन नि:सारितं निखिलं समग्रं जलनिधिजलं समुद्रसलिलम्, **आश्रमोपान्तवर्तिषु**=आश्रमसमीपस्थितेषु, **महाह्रदेषु**=महातडागेषु, **विभक्तं**=विभज्य कृतमपि प्रतीयते। **यत्र च**=आश्रमपदे, **दशरथसुतनिशितशरनिकरनिपातनिहतर-जनीचरबलबहुल-रुधिरसिक्तशूलम्**=दशरथसुतयो: रामलक्ष्मणयो: निशिता: तीक्ष्णा ये शरा: बाणा: तेषां य: निकर: समूह: तस्य निपातेन वर्षणेन निहतानि: घातितानि यानि रजनीचरवलानि असुरसैन्यानि तेषां बहुलरुधिरै: प्रचुरशोणितै: सिक्तानि मूलानि यस्य तत्, **नवकिसलयं**=नवानि नूतनानि किसलयानि पल्लवा: यस्मिन् तत् तादृशम्, **अरण्यं**=विपिनम्, **अद्यापि**=अधुनापि, **तद्रागाविद्धनिर्गतपलाशमिव**=तेषां रागेण रक्तिम्ना आविद्धानि युक्तानि निर्गतानि नि:सृतानि पलाशानि पत्राणि यत्र तत् तथोक्तमिव, **आभाति**=शोभते।

टिप्पणी -**दशरथः**-दशसु दिशासु अप्रतिहतो रथो यस्य सः दशरथ:-रामचन्द्र के पिता दशरथ। **उत्सृष्ट**-उत्+सृज्+क्त। **दशवदन....रामः**''रामो विरामो...' में यमक अलङ्कार है। **विभ्रम**-विलास। **विराम**-अवसान। **बलिकर्म.....सङ्क्रान्तः**-**में क्रियोत्प्रेक्षालङ्कार** है। यत्र च....महाह्रदेषु के 'विभक्तमिव' में **क्रियोत्प्रेक्षालंकार** है। अतएव तालाबों का अगाध जल से युक्त होना ध्वनित होता है। इस प्रकार यहाँ अलङ्कारके द्वारा वस्तुध्वनित है। **'पलाशमिव आभाति'** में **क्रियोत्प्रेक्षालंकार** है।

अधुनापि यत्र जलधरसमये गम्भीरमभिनवजलधरनिवहनिनादमाकर्ण्य भगवतो रामस्य त्रिभुवनविवरव्यापिनश्चापघोषस्य स्मरतो न गृह्णन्ति शष्पकवलमजस्रमश्रुजललुलितदीनदृष्टयो वीक्ष्य शून्या दशदिशो जराजर्जरित-विषाणकोटयो जानकीसंवर्द्धिता जीर्णमृगाः। यस्मिन्ननवरतमृगयानिहतशेषव-नहरिणप्रोत्साहित इव कृतसीताविप्रलम्भः कनकमृगो राघवमरिदूरं जहार। यत्र मैथिलीवियोगदु:खदु:खितौ दशवदनविनाशपिशुनौ चन्द्रसूर्याविव कबन्धग्रस्तौ समं रामलक्ष्मणौ त्रिभुवनमभयं महच्चक्रतुः। अत्यायतश्च यस्मिन् दशरथसुतशरनिपातितो योजनबाहोर्बाहुरगस्त्यप्रसादनागतनहुषाजगरकायश-ङ्कामकरोदृषिजनस्य। जनकतनया च भर्त्रा विरहविनोदनार्थमुटजाभ्यन्तरलि-खिता यत्र रामनिवासदर्शनोत्सुका पुनरिव धरणीतलादुल्लसन्ती वनचरैरद्याप्या-

लोक्यते।⁄⁄

हिन्दी अनुवाद - आज भी जहाँ पावसऋतु में नवीनमेघमण्डल की गम्भीर ध्वनि को सुनकर भगवान् श्रीराम के त्रिभुवन-अन्तराल को प्राप्त कर लेने वाली धनुष की टङ्कार का स्मरण करते हुए-निरन्तर गिरते हुए अश्रुजल से व्याकुलित एवं दीन दृष्टि वाले, वृद्धावस्था के कारण विशीर्ण श्रृङ्गाग्रभाग वाले तथा (देवी) सीता द्वारा संवर्धित बूढ़े हिरण दशों दिशाओं को (श्रीराम आदि से) शून्य देखकर (वियोगवश) हरी हरी घासों का कौर नहीं ग्रहण करते हैं।

जिस (दण्डकारण्य) में निरन्तर किये गये आखेट (शिकार) में मरने से बचे हुए जंगली हिरणों द्वारा मानो उकसाया गया (अतएव) (भगवान् राम से) सीता का विछोह करने वाला स्वर्णमृग रघुवंशी राम को बहुत दूर तक ले गया था। जहाँ जानकी के विरहजनित दुःख से दुःखी, कबन्ध अर्थात् राहु द्वारा एक साथ संग्रस्त चन्द्रमा और सूर्य की भाँति 'कबन्ध' अर्थात् दण्डकारण्यवासी राक्षसविशेष द्वारा एक साथ पकड़े गए तथा दशानन-रावण के विनाशसूचक राम और लक्ष्मण ने उत्कृष्ट लोकभय (आतङ्क) उत्पन्न कर दिया था।

जिस (आश्रमपद) में दशरथनन्दन श्रीराम के बाण से धराशायी बनाई गई योजनबाहु (राक्षस विशेष अथवा स्वयं कबन्ध) की अत्यन्त विशाल भुजा ने महामुनि अगस्त्य को प्रसन्न करने के लिए समागत (राजा) नहुष की अजगर रूपिणी काया की शङ्का ऋषिजनों में उत्पन्न कर दी थी। जहाँ (अपने) प्रियतम श्रीराम द्वारा वियोगव्यथा को भुलावा देने के लिए पर्णशाला के भीतर चित्रार्पित की गई जनकनन्दिनी सीता मानो श्रीराम का निवास स्थान देखने के लिए उत्कण्ठित होकर पुनः पृथ्वीतल से (ऊपर) उठती हुई आज भी वनचरकिरातों द्वारा देखी जाती हैं।

संस्कृतव्याख्या - **अधुनापि**=इदानीमपि, **यत्र**=आश्रमपदे, **जलधरसमये**= वर्षाकाले, **गम्भीरम्**=मन्द्रं मञ्जुलं वा, **अभिनवजलधरनिवहनिनादं** =अभिनवाः नूतनाः ये जलधराः जलदास्तेषां निवहस्य समूहस्य निनादं गर्जनम्, **आकर्ण्य**=श्रुत्वा, **भगवतः**=पूज्यस्य, **रामस्य**=दाशरथेः, **त्रिभुवनविवरव्यापिनः**= त्रिभुवनस्य विष्टपस्य विवराणि छिद्राणि तानि व्याप्नोति पूरयतीति सः तस्य, **चापघोषस्य**=धनुःशब्दस्य, **स्मरन्तः**=चिन्तयन्तः, **दशदिश**= दशाशाः, **शून्याः**=रामलक्ष्मणसीतारहिताः, **वीक्ष्य**=अवलोक्य, **अजस्रं**=निरन्तरम्, **अश्रुजललुलितदीनदृष्टयः**=अश्रुजलैः नयनसलिलैः लुलिताः व्याकुलीभूताः दीनाः कातराः दृष्टयः लोचनानि येषां ते

तथोक्ता:, तथा **जराजर्जरितविषाणकोटय:**=जरया वृद्धावस्थया जर्जरिता: विशीर्णा: विषाणानां श्रृङ्गाणां कोटयोऽग्रभागा: येषां ते तथोक्ता:, **जानकीसंवर्धिता:**=जानक्या: वैदेह्या: संवर्द्धिता: वृद्धिं प्रापिता: **जीर्णमृगा:**=वृद्धहरिणा:, **शष्पकवलं**=शष्पस्य बालतृणस्य कवलं ग्रासं, न **गृह्णन्ति**=न स्वीकुर्वन्ति। **यस्मिन्**=विपिने, **अनवरत-मृगयानिहतशेषवनहरिणप्रोत्साहित:**=अनवरतं निरन्तर मृगयया आखेटेन निहता: व्यापादिता: तेभ्यश्च शेषा अवशिष्टा: ये वनहारिणा: काननमृगा: तै: प्रोत्साहिता: उत्साहं प्रापित:, **इव कृतसीताविप्रलम्भ:**=कृत: विहित: सीताया: जानक्या: विप्रलम्भ: प्रवञ्चनं येन स:, **कनकमृग:**=सुवर्णहरिण: सुवर्णमयमृगरूपधारी मारीच:, **राघवं**=रामचन्द्रम्, **अतिदूरं**=अनतिसमीपं, **जहार**=हृतवान्। **यत्र**=पञ्चवट्यां, **मैथिलीवियोगदु:खदु:खितौ**=मैथिल्या: वियोग-दु:खेन विरहकष्टेन दु:खितौ दु:खं प्रापितौ, **दशवदनविनाशपिशुनौ**=दशवदनस्य रावणस्य विनाशपिशुनौ ध्वंसबोधकी, **रामलक्ष्मणौ**, **चन्द्रसूर्याविवि**=पुष्पवन्तादिव, **कबन्धग्रस्तौ**=कबन्ध: राहू राक्षसाधिपति: तेन दनुकबन्धेन च ग्रस्तौ कवलीकृतो गृहीतौ, **च समं**=एककालं, **महत्**=अत्यधिकं, **त्रिभुवनभयं**=त्रिभुवनस्य जगत्रयस्थितलोकस्य भयं भीति:, **चक्रतु:**=विदधतु:। **यस्मिन्**=आश्रमे, **च दशरथसुतशरनिपातित:**=दशरथसुत: राम: तस्य शरेण बाणेन निपातित: पातित: **अत्यायत:**=अतिविस्तृत: **योजनाबाहो:**=दनुकबन्धारपरनाम्न:, **बाहु:**=भुज: **अगस्त्यप्रसादनागतनहुषाजगर-कायशङ्कां**=अगस्त्यस्य तदाख्यस्य मुने: प्रसादनाय अनुनयाय आगत: प्राप्त: य: नहुषाजगर: तस्य कायशङ्कां देहभ्रान्तिम्, **ऋषिजनस्य**=मुनिमण्डलस्य, **चकार**=अकरोत्। **यत्र**=आश्रमपदे **जनकतनया**=वैदेही, **भर्त्रा**=स्वामिना रामेण, **विरहविनोदनार्थ**=वियोगपरिहारार्थम् **उटजाभ्यन्तरलिखिता**=उटजस्य पर्णशालाया: अभ्यन्तरे अन्त: प्रदेशे लिखिता चित्रिता, **रामनिवासदर्शनोत्सुका**=रामस्य य: निवासोऽवस्थानभूमि: तस्य दर्शनाय अवलोकनाय, **उत्सुका**=उत्कण्ठिता सती, **पुन:**=भूय:, **धरणीतलात्**=पातालात् **उल्लसन्तीव**=ऊर्ध्वम् आगच्छन्तीव, **वनचरै:**=किरातै:, **अद्यापि**=अधुनापि, **आलोक्यते**=दृश्यते।

टिप्पणी – **'अधुनापि.....जीर्णमृगा:'** यहाँ जीर्णमृगों के द्वारा गम्भीर मेघगर्जन कों सुनने से राम के धनुष के ध्वनि का स्मरण होने से **स्मरणालंकार** है। शष्पग्रासग्रहणरूप सम्बन्ध के होने पर भी उसके सम्बन्ध के वर्णित न होने से **अतिशयोक्ति** अलङ्कार है। **'चापघोषस्य स्मरन्त:'** में 'अधीगर्थदयेशां कर्मणि' से कर्म में षष्ठी। **शष्पं**-कोमल घास, 'शष्पं बालतृणं स्मृतम्' इत्यमर:। **लुलित**=

व्याकुल हुई। **विषाणकोटयः**=सींगों के अग्रभाग। **प्रोत्साहित इव**' में **क्रियोत्प्रेक्षाङ्कार** है। **विप्रलम्भ**–धोखा। **जहार**–हृ लिट् प्र० पु० ए० व०–अपहरण किया। '**चन्द्रसूर्याविव**' में **उपमालङ्कार** है। '**अत्यायतश्च ऋषिगणस्य**' यहाँ योजनबाहु की लम्बी भुजा में 'राजा नहुष का अजगर शरीर' होने की भ्रान्ति ऋषिजनों को हुई है, अतः '**भ्रान्तिमान्**' अलङ्कार है। **योजनबाहु**–एक राक्षस जिसकी भुजाएँ एक योजन लम्बी थी। '**जनकतनया.......आलोक्यते**–यहाँ '**उल्लसन्तीव**' में **क्रियोत्प्रेक्षालङ्कार** है। यहाँ 'पुनः' शब्द से ऐसा प्रतीत होता है कि पहले सीता जी का आविर्भाव मिथिला में यज्ञभूमि के जोतने के समय पाताल से हुआ, पुनश्च अग्नि से विशुद्ध परन्तु लोकापवाद के भय से राम के द्वारा वनवास तथा पुनः परीक्षा के समय में भूमितल में प्रवेश, ततश्च यहाँ प्रकट होकर उनकी अवस्थिति। **उल्लसन्ती**–उत्+लस्+शतृ, **पिशुन**–सूचक। वनचरैः–वन+चर्+ट=तृ० ब० व०।

// तस्य चैवंविधस्य सम्प्रत्यपि प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्यागस्त्याश्रमस्य नातिदूरे जलनिधिपानकुपितवरुणोत्साहितेन अगस्त्यमत्सरात्तदाश्रमसमीपवर्त्त्यपर इव वेधसा महाजलनिधिरुत्पादितः, प्रलयकालविघटिताष्टदिग्भागसन्धिबन्धं गगलतलमिव भुवि निपतितम् आदिवराहसमुद्धृतधरामण्डलस्थानमिव सलिलपूरितम्, अनवरतमज्जदुन्मदशबरकामिनीकुचकलसलुलितजलम्, उत्फुल्लकुमुदकुवलयकह्लारम्, उन्निद्रारविन्दमधुबिन्दुचन्द्रकम्, अलिकुलपटलान्धकारितसौगन्धिकम्, सारसितसमदसारसम्, अम्बुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलम्, अनेकजलचरपतङ्गशतसञ्चलनचलितवाचावीचिमालम्, अनिलोल्लसितकल्लोलशिशिरशीकरालब्धदुर्दिनम्, अशङ्कितावतीर्णाभिरम्भःक्रीडारागिणीभिः स्नानसमये वनदेवताभिः केशपाशाकुसुमैः सुरभीकृतम् एकदेशावतीर्णमुनिजनापूर्यमाणकमण्डलु कलशजलध्वनिमनोहरम् उन्मिषदुत्पलवनमध्यचारिभिः सवर्णतया रसितानुमेयैः कादम्बकदम्बकैरासेवितम्।

हिन्दी अनुवाद –आज भी स्पष्ट रूप से दिखाई पड़ते हुए पुरातन वृत्तान्तों वाले इस (पूर्वोक्त) प्रकार के उस अगस्त्याश्रम के निकट ही जलराशियों का भाण्डारभूत पम्पानामवाला (एक) सरोवर है–जोकि सागर (जल) को पी जाने के कारण प्रकुपित हुए वरुणदेवता से उकसाए गए ब्रह्मा द्वारा अगस्त्य मुनि के प्रति द्वेषभावना के कारण उत्पन्न किया गया उन्हीं के आश्रम के समीप विद्यमान दूसरे महासागर–सा प्रतीत होता था, जो कल्पान्तवेला में विनष्ट हुए आठों दिक्प्रदेशों के

सन्धिबन्धनों (परस्पर जुड़े रहने की मर्यादाओं) वाले अतएव भूतल पर गिरे हुए गगनमण्डल सा प्रतीत होता था, जो जल से परिपूर्ण आदिवराह (नारायण) द्वारा सम्यक् रूप से बाहर लाए गए भूमण्डल के स्थान (विस्तार या अवकाश) सा प्रतीत होता था, जो निरन्तर (आठों पहर) स्नान करती हुई यौवनगर्विता भीलसुन्दरियों के कुचकुम्भों द्वारा आलोडित जल वाला था, जो पूर्णतः खिले हुए कुमुदों, कुवलयों (नीलकमलों) एवं कह्लारों (लालकमलों) वाला था, जो प्रफुल्लित कमलों की मकरन्दबिन्दुओं (के टपकने) से निर्मित मयूरपंखी चन्द्रकों (रचनाविशेष) से युक्त था, जो शब्द उत्पन्न करते हुए मदोत्कट सारस पक्षियों से युक्त था, जो कमलों के मधुरस को पान करने के कारण मतवाली कलहंसिनियों द्वारा उत्पन्न कोलाहल ये युक्त था, जो अनेक जातियों के सैकड़ों (नक्रादि) जलचरों एवं पक्षियों के सञ्चरणवश क्षुब्ध (चंचल या अशान्त) बनाया गया अतएव वाचाल (मुखर) तरङ्गमालाओं वाला था, जो (तूफानी) हवाओं द्वारा उत्पन्न की गई महातरङ्गों की बर्फीली फुहारों से प्रारम्भ किये गए दुर्दिन मेघाच्छन्न दिन वाला था, जो स्नानवेला में निश्शङ्क भाव से जल के भीतर उतरी हुई तथा जलविहार में रुचि रखने वाली वनदेवियों द्वारा (अपने) केशपाशों में गुँथे पुष्पों से सुगन्धित कर दिया गया था, जो एक भाग में जलाभ्यन्तर-प्रविष्ट-मुनिजनों द्वारा भरे जाते हुए कमण्डलुओं की मधुर जलध्वनि के कारण हृदयावर्जक था, जो प्रस्फुटित होते हुए कमलों के वन में सञ्चरण करने वाले तथा समान (श्वेत) वर्ण वाला होने के कारण (अपनी) बोली भर से पहचाने जा सकने योग्य कलहंस मण्डलों से सुसेवित था।

संस्कृतव्याख्या - **तस्य चैवंविधस्य**=पूर्ववर्णितस्य अगस्त्याश्रमस्य, **सम्प्रत्यपि**=इदानीमपि, **प्रकटोपलक्ष्यमाणपूर्ववृत्तान्तस्य**=प्रकटं स्पष्टरूपेण उपलक्ष्यमाणः ज्ञायमानः पूर्ववृत्तान्तः पूर्वोदन्तः यस्य तस्य, **अगस्त्याश्रमस्य**=घटजाश्रमपदस्य, **नातिदूरे**=समीप एव, **पम्पाभिधानं**=पम्पासंज्ञकं, **पद्मसरः**=कमलयुक्तसरोवरः विद्यते इति वक्ष्यमाणेनान्वयः। अत्र खलु प्रथमान्तपदानि पद्मसरोविशेषणानि। **जलनिधिपानकुपितवरुणोत्साहितेन**=जलनिधिपानेन समुद्रपानेन कुपितः क्रुद्धः यः वरुणः प्रचेताः तेन उत्साहितेन, **वेधसा**=प्रजापतिना, **अगस्त्यमत्सरात्**=अगस्त्यशुभद्वेषात्, **तदाश्रमसमीपवर्ती**=तस्य अगस्त्यस्य आश्रम-समीपवर्ती मुनिजनस्थाननिकटवर्ती, **अपरः**=अन्यः, **उत्पादितः**=निर्मितः, **महाजलनिधिः**=सागरः **इव प्रलयकालविघटिताष्टदिग्भागसन्धिबन्धं**=प्रलयकाले कल्पान्ते विघटिताः

विस्खलिताः अष्टानाम् अष्टसंख्यकानां दिशां हरितां भागाः प्रदेशाः तेषां सन्धयः संयोजनानि तेषां बन्धाः बन्धनानि यत्र एवम्भूतम्, **भुवि**=पृथिव्यां, **निपतितं गगनतलमिव**=नभस्तलमिव, **आदिवराहसमुद्धृतधरामण्डलस्थानं**=आदिवराहेण समुद्धृतं उद्धृतं जलाद् बहिरानीतं धरामण्डलस्थानं पृथ्वीमण्डलस्थानं, **सलिलपूरितमिव**=जलपूरितमिव, **अनवरतमज्जदुन्मदशबरकामिनीकुचकलसलुलितजलम्**=अनवरतं निरन्तरं मज्जन्त्यः अवगाहमनाः या उन्मदाः यौवनगर्वयुक्ताः शबरकामिन्यः भिल्लनार्यः तासां कुचकलसैः स्तनघटैः लुलितानि आलोडितानि जलानि सलिलानि यस्य तत् तथोक्तम्, **उत्फुल्लकुमुदकुवलयकह्लारं**=उत्फुल्लानि प्रस्फुटितानि कुमुदानि श्वेतोत्पलानि कुवलयानि नीलोत्पलानि कह्लाराणि रक्तोत्पलानि च यत्र तत् तादृशम्, **उन्निद्रारविन्दमधुविन्दुबद्धचन्द्रकं**=उन्निद्राणि विकसितानि यानि अरविन्दानि पद्मानि तेषां मधुबिन्दुभिः मकरन्दकणिकाभिः बद्धाः विहिताः चन्द्रकाः मयूरबर्हचन्द्राकाराः यत्र तत् तादृशम्, **अलिकुलपटलान्धकारितसौगन्धिकं**=अलिकुलानां भ्रमरवृन्दानां पटलेन समूहेन अन्धकारितानि आवृतानि सौगन्धिकानि कह्लाराणि यत्र तत्, **सारसितसमदसारसं**=सारसितेन कूजनशब्देन सह स्थिताः समदाः मदयुक्ताः सारसाः लक्ष्मणप्रभृतयः यत्र तत्, **अम्बुरुहमधुपानमत्तकलहंसकामिनीकृतकोलाहलं**=अम्बुरुहाणि कमलानि तेषां यन्मधुमकरन्दः तस्य पानेनः मत्ताः मदोत्कटाः याः कलहंसकामिन्यः वरटाः ताभिः कृतः विहितः कोलाहलः कलकलः यत्र तत् तादृशम्, **अनेकजलचरपतंगशतसञ्चलनचलितवाचालवीचिमालं**=अनेके ये जलचराः जलजन्तवः तेषां पतङ्गानां पक्षिणाञ्च शतस्य मण्डलस्य सञ्चलनेन गमनागमनेन चलिताः क्षोभं प्राप्ताः वाचालाः मुखरायमाणाः च वीचिमालाः तरङ्गपङ्क्तयः यस्मिन् तत्, **अनिलोल्लासितकल्लोलशिशिरशीकराब्धुदुर्दिनं**=अनिलेन वायुना उल्लासिताः उत्थानं प्रापिताः ये कल्लोलाः महातरङ्गाः तेषां शिशिरशीकरैः शीतलाम्बुकणैः आरब्धं विहितं दुर्दिनं मेघाच्छन्नदिनं यत्र तत् तादृशम्, **अशङ्कितावतीर्णाभिः**=अशङ्कितं यथा स्यात्तथा, **अवतीर्णाभिः**=सरोवरे स्नानाय प्रविष्टाभिः, **अम्भक्रीडारागिणीभिः**=अम्भःक्रीडायां जलकेल्यां रागिणीभिः **अनुरक्ताभिः**, **वनदेवताभिः**=वनाधिष्ठातृदेवीभिः, **स्नानसमये**=मज्जनकाले, **केशपाशकुसुमैः**=केशपाशानां कचसमूहानां कुसुमैः सुमनोभिः, **सुरभीकृतं**=सुगन्धीकृतम्, **एकदेशावतीर्णमुनिजनापूर्यमाणकमण्डलुकलध्वनि-मनोहरं**=एकदेशे एकभागे अवतीर्णैः अन्तःप्रदेशं कृतवद्भिः मुनिजनैः तापसलोकैः आपूर्यमाणाः जलेन भ्रियमाणाः ये कमण्डलवः मुनिजनपात्रविशेषाः तेषां कलैः मधुरैः जलध्वनिभिः सलिलपूरणशब्दैः

मनोहरं मनोज्ञं चित्ताकर्षकं वा, **उन्मिषदुत्पलवनमध्यचारिभिः**=उन्मिषतः प्रस्फुटतः उत्पलवनस्य श्वेताम्भोजविपिनस्य मध्येऽन्तः चरन्तीति: तैः, **सवर्णतया**= समानवर्णतया, **रसितानुमेयैः**=रसितेन शब्देन अनुमेयैः अनुमातुं योग्यैः, **कादम्ब-कदम्बकैः**=कलहंससमूहैः, **आसेवितं**=समन्तात्पर्युपासितम्।

टिप्पणी - **'तस्य च अगस्त्याश्रमस्य नातिदूरे...पम्पाभिधानं सरः'**-यह वाक्य का मुख्यांश है। **महाजलनिधिरिव में द्रव्योत्प्रेक्षालङ्कार** है। 'गगनतलमिव' में द्रव्योत्प्रेक्षालङ्कार है। **'जलपूरितमिव'** में **क्रियोत्प्रेक्षालङ्कार** है। **मज्जत्**-नहाती हुई। **लुलित**-आलोडित। **'कुचकलस'** यहाँ कुचा एव कलसाः' ऐसा विग्रह करने से **रूपक** तथा 'कुचाः कलसा इव' इस प्रकार का विग्रह करने से **उपमा** है। अतएव दोनों का **सन्देहसंकर**। **कुमुद**-सफेद कमल, 'सिते कुमुदकैरवे' **कुवलय**-नीलकमल 'स्यादुत्पलं कुवलयमथ नीलाम्बुजन्म च' इत्यमरः। कह्लार-लाल रंग का कमल। **चन्द्रक**-चन्द्राकार मयूर पुच्छ। **सौगन्धिक**-कह्लार नामक कमल, 'सौगन्धिकं तु कह्लारम्' इत्यमरः। सारसित शब्दयुक्त। **कामिनीकुचक-लसलुलितजलम्' उत्फुल्लकुमुदकुवलयकह्लारम्' 'सारसितसमदसारसम्'** यहाँ अनुप्रास की अनुपम छटा छिटक रही है। **वाचाल**- शब्दयुक्त। **वीचि**=लहर। **शीकर**-जल की बूंद, 'शीकरोऽम्बुकणःस्मृतः'। **'अलिकुलपटल'**-यहाँ कुल तथा पटल दोनों शब्द पर्यायवाची हैं। ऐसी स्थिति में एक ही शब्द के कथन से उक्त अर्थ निकल आता है अतः दूसरे का ग्रहण करना निरर्थक है। **''कादम्बकदम्बकैः''**-कलहंसों के समूहों से, 'कादम्बः कलहंसः स्यात्', 'स्त्रियाँ तु संहतिर्वृन्दं निकुरम्बं कदम्बकम्' इत्यमरः। **'रसितानुमेयैः में मीलितालंकार'** ध्वनित हो रहा है। इस प्रकार यहाँ वस्तु से अलङ्कार ध्वनि है।

अभिषेकावतीर्णपुलिन्दराजसुन्दरीकुचचन्दनधूलिधवलिततरङ्गम्, उपान्तजातकेतकीरजःपटलबद्धकूलपुलिनम्, आसन्नाश्रमागततापसक्षालितार्द्र-वल्कलकषायपाटलतटजलम् उपतटविटपिपल्लवपुटानिलवीजितम्, अविरलतमालवीथिकान्धकारिताभिः बालिनिर्वासितेन सञ्चरता प्रतिदिनमृष्य-मूकवासिना सुग्रीवेणावलुप्तफललघुलताभिः उद्वासितापसानां देवार्च्चनोपयु-क्तकुसुमाभिः उत्पतज्जलचरपतङ्गपक्षपुटविगलितजलबिन्दुसेकसुकुमार-किसलयाभिः लतामण्डपतलशिखण्डिमण्डलारब्धताण्डवाभिः अनेककुसुम-परिमलवाहिनीभिर्वनदेवताभिः श्वासवासिताभिरिव वनराजिभिरुपरुद्धतीरम्, अपरसागरशङ्किभिः सलिलमादातुमवतीर्णैर्जलधरैरिव बहलपङ्कमलिनै-

र्वनकरिभिरनवरतमापीयमानसलिलम् अगाधमनन्तमप्रतिमम् अपां निधानं पम्पाभिधानं पद्मसरः। यत्र च विकचकुवलयप्रभाश्यामायमानपक्षपुटान्यद्यापि मूर्तिमद्रामशापग्रस्तानीव मध्यचारिणामालोक्यन्ते चक्रवाकनाम्नां मिथुनानि।

हिन्दी अनुवाद – जो अभिषेक (जलावगाहन) के निमित्त उतरी हुई भील चौधरियों की सुन्दरियों के उरोजों पर उपलिप्त चन्दन के चूर्ण से शुभ्रकृत तरङ्गों वाला था, जो तटभागों पर छहराई हुई केतकियों के परागपुञ्ज से संकुल निकटवर्ती आश्रमों से आए हुए तपस्वियों द्वारा प्रक्षालित अतएव गीले वल्कलों (के रस) के कारण कषाय (कसैला) तथा श्वेतरक्त तटीय जलवाला था, जो तट के समीपवर्ती वृक्षों के पल्लवसमूहों की वायु से वीजित (पंखा झला गया) था, जो सघन तमालवृक्षों की पंक्तियों से अँधियारी बनाई गई (बड़े भाई) बालि द्वारा निर्वासित (अतएव वहाँ) प्रतिदिन पर्यटन करने वाले ऋष्यमूक पर्वत पर निवास करने वाले (वनराज) सुग्रीव द्वारा भक्षित फलों के कारण हल्की (भारहीन) लताओं वाली-जल में निवास करने वाले तपोधनियों के देवार्चन में काम आने वाले पुष्पों वाली उड़ते हुए जलचारी विहङ्गों के पक्षद्वय से झरे हुए जलबिन्दुओं के सिञ्चनप्रभाववश सुकोमल कोयलों वाली-लताकुञ्जों के अधः प्रदेशों में मयूरमण्डल द्वारा प्रारम्भ किए गए नर्तन वाली-विविध जाति के पुष्पों की सुरभि को वहन करने वाली तथा वनेदवियों द्वारा (अपनी) निश्वासवायु से सुवासित की गई प्रतीत होने वाली वनपंक्तियों से परिव्याप्त तटों वाला था, जो दूसरे समुद्र की आशङ्का (भ्रान्ति) करने वाले अतएव जलग्रहण के लिए (नीचे) उतरे हुए बादलों से प्रतीत होने वाले सघन पङ्क से मलिनीभूत जङ्गली हाथियों द्वारा निरन्तर पिये जाते हउु जल वाला था, जो अथाह, अपरिमित एवं (अक्षय-जलत्वात्) अद्वितीय था।

जिस (पम्पासरोवर) में प्रफुल्लित नीलकमलों की कान्ति से श्यामलवर्णी पक्षद्वय वाले चक्रवाक नामक पक्षियों के जोड़े आज भी 'मध्यचारी' अर्थात् वन में भ्रमण करने वाले व्यक्ति द्वारा मानों (भगवान्) श्रीराम के मूर्तिमान् शाप द्वारा ग्रस्त हुए देखे जाते हैं।

संस्कृतव्याख्या – **अभिषेकावतीर्णपुलिन्दराजसुन्दरीकुचचन्दनधूलिधवलिततरंगम्**=अभिषेकाय मज्जनार्थम् अवतीर्णाः सलिलान्तः प्रविष्टाः याः पुलिन्दराजस्य शबराधिपतेः सुन्दर्यः कामिन्यः तासां ये कुचाः वक्षोजाः तेषां चन्दनधूलिभिः लिप्तशुष्कमलयजरजोभिः धवलिताः शुभ्रीकृताः तरङ्गा ऊर्मयो यस्य तत् तादृशम् **उपान्तजातकेतकीरजःपटलबद्धकूलपुलिनं**=उपान्ते पानीयनि-

कटे जातानाम् उत्पन्नानां केतकीनां मालतीपुष्पाणां रज:पटलैः धूलिसमूहैः बद्धं रचितं कूले तटसमीपे पुलिनं सैकतं यस्य तत्, **आसन्नाश्रमागततापसक्षालितार्द्रवल्कलकषायपाटलतटजलं**=आसन्नाः समीपवर्तिनः ये आश्रमाः तपस्विस्थानानि तेभ्यः आगतैः प्राप्तैः तापसैः मुनिजनैः क्षालितानां धौतानाम् आर्द्राणां जलाविलानां वल्कलानां वृक्षत्वचां कषायैः तुवरैः पाटलं श्वतेरक्तं तटजलं तीरान्तिकसलिलं यस्य तत् तादृशम्, **उपतटविटपिपल्लवपुटानिलवीजितं**=तटस्य समीपमुपतटं तत्र उपतटे ये विटपिनः पादपाः तेषां पल्लवाः किसयानि तैः यः अनिलः वायुः तेन वीजितं व्यजनेनेवाचरितम्, **अविरलतमालवीथिकान्धकारिताभिः**=अविरला सान्द्रा या तमालवीथिका तापिच्छपङ्क्तिः तया अन्धकारिताभिः कृतान्धकाराभिः, **बालिनिर्वासितेन**=बालिना निर्वासितेन निष्कासितेन, **प्रतिदिनं**=प्रत्यहं, **सञ्चरता**= तत्रागच्छता, **ऋष्यमूकवासिना**=ऋष्यमूकनिवसनशीलेन, **सुग्रीवेण**=बाल्यनुजेन, **अवलुप्तफललताभिः**=अवलुप्तानि दूरीकृतानि फलानि याभ्यः ताः, अतएव लघ्व्यः फलभाररहिताः लताः व्रतत्यो यासु ताभिः तादृशीभिः, **उदवासितापसानां**=उदके जले वसन्तीत्युदवासिनश्च ते तपासास्तपस्विनश्चेति तेषां तथोक्तानाम्, **देवार्च्चनोपयुक्तकुसुमाभिः**=देवार्चनेषु देवपूजासु उपयुक्तानि उचितानि कुसुमानि पुष्पाणि यासु ताभिः तथोक्ताभिः, **उत्पतज्जलचरपतङ्गपक्षपुटविगलितजलबिन्दुसेकसुकुमारकिसलयाभिः**=उत्पतन्त उड्डीय गच्छन्तो ये जलचरा नक्रादयः पतङ्गाः पक्षिणः तेषां पक्षपुटेभ्यः विगलिताः च्युताः ये जलबिन्दवः सलिलकणाः तैः सेकः तेन सुकुमाराणि मृदुलानि किसलयानि पल्लवानि यासां ताभिः तथोक्ताभिः, **लतामण्डपतलशिखण्डिमण्डलारब्धताण्डवाभिः**=लतामण्डपानां लताच्छादितप्रान्तानां तलेषु अधः प्रदेशेषु शिखण्डिमण्डलेन मयूरसमूहेन आरब्धं ताण्डवं नृत्यं यासु ताभिः तथोक्ताभिः, **अनेककुसुमपरिमलवाहिनीभिः**=अनेकेषां बहुप्रकाराणां कुसुमानां पुष्पाणां परिमलं गन्धं वहन्तीति ताः तादृशीभिः, **वनदेवताभिः**=काननाधिष्ठातृदेवीभिः, **श्वासवासिताभिरिव**=उपरुद्धानि व्याप्तानि तीराणि तटानि यस्य तत्, पम्पासरोविशेषणमिदम्। **अपरसागरशङ्किभिः**=अपरः भिन्नः सागरः समुद्रः इति शङ्कां जनयतीति तैः तथोक्तैः, **सलिलं**=जलम्, **आदातु**=गृहीतुम्, **अवतीर्णैः**=पम्पासरोवरेऽवतरितैः **जलधरैरिव**=मेघैरिव, **बहलपङ्कमलिनैः**= बहलपङ्कैः शरीरलग्नाधिकर्दमैः मलिनाः श्यामाः तैः तथोक्तैः, **वनकरिभिः**=आरण्यक-हस्तिभिः **अनवरतं**=निरन्तरम्, **आपीयमानसलिलं**=आपीयमानानि सलिलानि जलानि यस्य तत् तादृशम्, **अगाधं**= अप्राप्ततलम्, **अनन्तं**=अन्यरहितम्, **अप्रतिमं**=

अद्वितीयम्, **अपां**=जलानां, **निधानं**=निधिस्वरूपं, **पम्पाभिधानं**=पम्पासंज्ञकं, **पद्मसरः**=पद्मानां कमलानां सरः कासारः। **यत्र च**=यस्मिन् सरोवरे, **विकचकुवलयप्रभाश्यामायमानपक्षपुटानि**=विकचानि विकसितानि यानि कुवलयानि नीलोत्पलानि तेषां याः प्रभाः कान्तयः ताभिः श्यामायमानानि श्यामवदाचरन्ति पक्षपुटानि येषां तानि तथोक्तानि, **मध्यचारिणां** पम्पासरोवरमध्ये विचरणशीलानां, **चक्रवाकनाम्नां**=चक्रवाकसंज्ञकानां पक्षिणां, **मिथुनानि**=युगलानि, **अद्यापि**=अधुनापि, **मूर्तिमद्रामशापग्रस्तानीव**=मूर्तिमान् देदीप्यमानरूपो यो रामस्य दशरथनन्दनस्य शापः अभिसम्पातः तेन ग्रस्तानीव, **आलोक्यन्ते**=दृश्यन्ते।

टिप्पणी – **अभिषेक**–स्नान। **पुलिन्दराज**–भीलों का स्वामी। **'अभिषेकावतीर्ण...तरङ्गम्'** में अतिशयोक्ति अलङ्कार है। **पुलिनम्**–रेतीला तट। 'उपान्त... पुलिनम्' यहाँ भी अतिशयोक्ति अलङ्कार है। **कषाय**–कसैला, 'तुवरस्तु कषायोऽस्त्री'। **पाटल**–गुलाबी, **'श्वेतरक्तस्तु पाटलः'** इत्यमरः। **उदवासितापसानां**–जल में रहकर तपस्या करने वाले तपस्वियों की। **पतङ्ग**–पक्षी । 'लता.....ताण्डवाभिः' यहाँ अनुप्रास अलङ्कार है। **ताण्डव**–नृत्य, 'ताण्डवं नटनं नाट्यं लास्यं नृत्यं च नर्तनम्' इत्यमरः। 'अनेकवासिताभिरिव' में क्रियोत्प्रेक्षालङ्कार है। बहलपङ्क–अत्यधिक कीचड़।'अपर...सलिलम्' में जातिस्वरूपोत्प्रेक्षा है।'यत्र....मिथुनानि'–यहाँ अन्तर्कथा इस प्रकार है कि सीता के विरह से व्यथित राम का चक्रवाक पक्षियों ने उपहास किया। तब राम ने उन्हें शाप दे दिया कि तुम्हें भी मेरे ही समान दुःखी होकर रात्रि व्यतीत करनी पड़ेगी। इसी शाप के कारण चक्रवाक युगल रात्रि में एक दूसरे से अलग हो जाते हैं।'ग्रस्तानीव' में **क्रियोत्प्रेक्षालङ्कार** है।

तस्यैव पद्मसरसः पश्चिमे तीरे राघवशरप्रहारजर्जरितजीर्णतालतरुषण्डस्य-च समीपे दिग्गजकरदण्डानुकारिणा जरदजगरेण सततमवेष्टितमूलतया बद्धमहालवाल इव तुङ्गस्कन्धावलम्बिभिरनिलवेल्लितैरहिनिर्म्मोकैर्धृतोत्तरीय इव, दिक्चक्रवालपरिमाणमिव गृह्णता भुवनान्तरालविप्रकीर्णेन शाखासञ्चयेन प्रलयकालताण्डवप्रसारितभुजसहस्रमुडुपतिशेखरमिव विडम्बयितुमुद्यतः, पुराणतया पतनभयादिव गगनस्कन्धलग्नः, निखिलशरीव्यापिनीभिरतिदूरोन्नताभिर्जीर्णतया शिराभिरिव परिगतो व्रततिभिः, जरातिलकबिन्दुभिरिव कण्टकैराचिततनुः, इतस्ततः परिपीतसागरसलिलैर्गगनागतैः पत्ररथैरिव शाखान्तरेषु-निलीयमानैः क्षणमम्बुभारालसैरार्द्रीकृतपल्लवैर्जलधरपटलैरप्यदृष्ट-शिखरः तुङ्गतया नन्दनवनश्रियमिवावलोकयितुमभ्युद्यतः।

हिन्दी अनुवाद - उसी कमल-सरोवर के पश्चिमी तट पर, श्रीराम के बाण प्रहार से जर्जर हुए (छिन्न-भिन्न) तालवृक्षों के वन के समीप (एक) भारी भरकम, पुरातन (पुराना) सेमर का पेड़ था-जो दिग्गजों के शुण्डादण्डों (सूँड़) का अनुकरण करने वाले पुराने अजगर द्वारा निरन्तर मूलभाग को लपेटे रहने के कारण बँधे हुए विशाल थाल्हे से युक्त प्रतीत होता था, जो ऊँचे स्कन्धों (तनों) में लटकते हुए तथा पवन द्वारा आन्दोलित सर्पकञ्चुकों के कारण उत्तरीय से अलङ्कृत प्रतीत होता था, जो मानो दिङ्मण्डल का आयाम (विस्तार या क्षेत्रफल) नापते हुए संसार के अन्तराल (मध्यभाग) में फैले हुए (अपने) शाखासमूह से प्रलयकालीन ताण्डवनृत्य में फैलाई गई हजारों भुजाओं वाले चन्द्रशेखर भगवान् शिव का अनुकरण करने के लिए उद्यत प्रतीत होता था, जो जीर्ण-शीर्ण होने के कारण गिर जाने की आशंका वश आकाश के कन्धे पर आश्रित होता था, जो सम्पूर्ण शरीर में परिव्याप्त तथा वृद्धावस्था के कारण बड़ी दूर तक उभरी हुई शिराओं (अस्थिबन्धनों) से परिवेष्टित (वृद्ध-पुरुष) की भाँति सम्पूर्ण वृक्ष में विद्यमान तथा प्राचीन होने के कारण बड़ी दूर तक उठी हुई लताओं से परिवेष्टित कालों वृद्धावस्था में उत्पन्न तिलबिन्दुओं (काले तिलों) से व्याप्त शरीर की भाँति काँटों से भरे शरीर वाला था, जो इधर-उधर आकाश मण्डल से उतरे हुए सागर-जल पिए हुए-(पिये गए) जल के भार से अलसाये हुए-क्षणभर के लिए शाखाओं के अन्तराल में चुपचाप बैठे हुए तथा पल्लवों को गीला बना देने वाले विहंगों की भाँति इधर-उधर गगनमण्डल से आए-समुद्रजल पिये हुए (पिये गए) जलभारवश मन्द गति वाले क्षणभर के लिए शाखाओं के भीतर गुप्त रूप से बैठते हुए तथा (जल से) पलल्वों को भिगो देने वाले मेघमण्डल द्वारा भी अदृष्ट शिखरवाला था, जो (अपनी) ऊँचाई के कारण इन्द्रोपवन नन्दन का सौन्दर्य देखने के लिए समुद्यत प्रतीत होता था।

संस्कृतव्याख्या - **तस्यैव**=पम्पाभिधेयस्य, **पद्मसरसः**=पद्मसरोवरस्य, **पश्चिमे तीरे**=पश्चिमे तटे, **राघवशरप्रहारजर्जरितजीर्णतालतरुषण्डस्य**=राघवस्य रामचन्द्रस्य ये शराः बाणाः तेषां प्रहारेण जीर्णानां प्राचीनानां तालतरूणां तालवृक्षाणां षण्डस्य समुदायस्य च समीपे निकटे, **महान्**=विशालः, **जीर्णः**=पुरातनः, **शाल्मलीवृक्षः**=रोचनाख्यस्तरुरस्तीति दूरेणान्वयः। अत्र प्रथमान्तानि पदानि शाल्मलीवृक्षविशेषणानि। **दिग्गजकरदण्डानुकारिणा**=दिग्गज ऐरावतादिः तस्य यः करदण्डः शुण्डादण्डः तमनुकर्तुंशीलं यस्य तेन तथोक्तेन, **जरदजगरेण**=जरन्

जरां प्राप्नुवन् वृद्धो योऽजगरस्तन्नामकं: पृथुलसर्पः तेन तादृशेन, **सततं**=निरन्तरम्, **आवेष्टितमूलतया**=आवेष्टितं वलयितं मूल चरणभागः यस्य तस्य भावः तत्ता तया, **बद्धमहालवाल इव**=बद्धं निर्मितं महत् विशालम् आलवालम् आवापः यस्य स इव क्रियोत्प्रेक्षा। **तुङ्गस्कन्धावलम्बिभिः**=तुङ्गम् उन्नतं स्कन्धं प्रकाण्डभागं स्कन्धमागञ्च अवलम्बितुं शील येषां तैः तथोक्तैः, **अनलवेल्लितैः**=पवनचालितैः, **अहिनिर्म्मोकैः**=सर्पकञ्चुकैः, **धृतोत्तरीय इव**=गृहीतोपसंव्यानवस्त्र इव, **दिनचक्रवालपरिमाणमिव**=दिशां ककुभां चक्रवालं मण्डलं तस्य परिमाणमिव इयत्तापरिमितमिव, **गृह्णता**=धारयता, **भुवनान्तरालविप्रकीर्णेन**=भुवनान्तराले संसारमध्यभागे विप्रकीर्ण इतस्तो विस्तारितः तेन, **शाखासञ्चयेन**=लतासंदोहेन, **प्रलयकालताण्डवप्रसारितभुजसहस्त्रम्**=प्रलयकाले कल्पान्तसमये यत् ताण्डवम् उद्धतनृत्यं तत्र प्रसारितम् इतस्ततोविपर्यस्तं भुजसहस्त्रम् अनेकतरुबाहवो येन स तं तादृशम्, **उडुपतिशेखरं**=उडुपतिः तारापतिश्चन्द्रः शेखरो मस्तकालङ्कारो यस्य तं महादेवं, **विडम्बयितुं**=अनुकर्तुं, **उद्यत इव**=संनद्ध इव, **पुराणतया**, **पतनभयादिव**=स्खलनशङ्कयेव, **गगनस्कन्धलग्नः**=गगनस्य आकाशस्य स्कन्धे प्रकाण्डे लग्नः यस्य तादृशः, **निखिलशरीरव्यापिनीभिः**=निखिलं समस्तं यत् शरीरां वपुः तद् व्याप्तुं शीलं यासां तादृशीभिः, **अतिदूरोन्नताभिः**=अतिविप्रकृष्टमुत्थिताभिः, **जीर्णतया**=प्राचीनतया, **शिराभिरिव**=अस्थिबन्धनैरिव, **व्रततिभिः**=लताभिः **परिगतः**=परिवेष्टितः, **जरातिलकबिन्दुभिरिव**=जरायां वृद्धावस्थायां ये तिलकबिन्दवः कृष्णतिलसदृशाः चिह्नविशेषाः तैरिव, **कण्टकैः**=क्षुद्रशत्रुभिः, **आचिततनुः**=आचिता व्याप्ता तनुः देहः यस्य सः तथोक्तः, **इतस्ततः**=समन्तात्, **परिपीतसागरसलिलैः**= परिपीतानि सागराणां समुद्राणां सलिलानि पानीयानि यैस्तैः, **गगनागतैः**=गगनात् आकाशात् आगतैः उपस्थितैः, **पत्ररथैरिव**=पक्षिभिरिव, **शाखान्तरेषु**=शाखानां स्कन्धानाम्, अन्तरेषु मध्येषु, **क्षणं**=क्षणमात्रं, **निलीयमानैः**=गुप्ततया स्थितवद्भिः, **अम्बुभारालसैः**=अम्बुभारालसैः=अम्बुभारेण पीतसलिलभारेण, अलसैः मन्थरगामिभिः, **आर्द्रीकृतपल्लवैः**=आद्रीकृतानि वर्षणेन क्लिन्नानि पल्लवानि किसलयानि यैस्तानि तैः, **जलधरपटलैः**=मेघसमूहैरपि, **अदृष्टशिखरः**=न दृष्टम्, अत्युन्नततया नेक्षितं शिखरं प्रान्तप्रदेशो यस्य सः तथोक्तः, **तुङ्गतया**=उन्नततया, **नन्दनवनश्रियं**=नन्दनवनस्य इन्द्रोद्यानस्य या श्रीः शोभा ताम्, **अवलोकयितुमिव**= वीक्षितुमिव, **अभ्युद्यत इव**=संनद्ध इव।

टिप्पणी - **षण्ड**-समुदाय। जड वस्तु समुदाय के लिए 'षण्ड' शब्द का

प्रयोग होता है। **दिग्गज**-पौराणिक मान्यता है कि आठ दिशाओं को आठ हाथी सम्भाले हुए हैं। वैज्ञानिक लोग इन्हें वायुमण्डल की संज्ञा से अभिहित करने हैं। पूर्वादि दिशाओं के दिग्गज क्रमशः ये है-'ऐरावतः पुण्डरीको वामनः कुमदोऽञ्जनः।' पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः।' **आलवाल-थलहा**। 'दिग्गज.... आलवाला' यहाँ 'दिग्गज में' 'लुप्तोपमा' तथा 'आलवाला इव' में वाच्या तथा क्रियोत्प्रेक्षालंकार है। दोनों का अङ्गाङ्गिभाव सङ्कर। **चक्रवाल**-मण्डल। **अन्तराल**-मध्यभाग। 'धृतोत्तरीय इव' में क्रियोत्प्रेक्षा। प्रलयकाल....शेखरमिव' यहाँ 'गृह्णतेव' 'उद्यत इव' में वाच्या तथा क्रियोत्प्रेक्षा 'विडम्बयितुम्' में आर्थी उपमा। इन सबका अङ्गाङ्गिभाव सङ्कर। पौराणिक मान्यता के अनुसार भगवान् शंकर प्रलयकाल में रुद्र रूप को धारण करके सहस्त्रों भुजाओं को फैलाकर ताण्डव नृत्य किया करते हैं। विडम्बयितुम् अनुकरण करने के लिए। **शिरा**-नाड़ी, 'नाडी तु धमनी शिरा' इत्यमरः। **व्रतति**-लता, 'वल्ली तु व्रततिर्लता' इत्यमरः। **कण्टक**-क्षुद्र शत्रु, 'कण्टकः क्षुद्रशत्रौ च' इति विश्वः, **पत्त्ररथ**-पक्षी, 'पतत्पत्त्ररथाण्डजाः' इत्यमरः। **'इस्ततः-शिखरः'** यहाँ वाच्योपमा तथा अतिशयोक्ति अलङ्कार हैं। नन्दन इन्द्र का उद्यान, 'अथ नन्दनम् इन्द्रोद्याने नन्दनस्तु तनये हर्षकारिणि' इति हैमः। 'तुङ्गतया.....अभ्युद्यतः' यहाँ 'अवलोकयितुमिव' में **क्रियोत्प्रेक्षालङ्कार** है।

स्वसमीपवर्त्तिनामुपरि सञ्चरतां गगनतलगमनखेदायासितानां रविरथतुरंगमाणां सृक्कपरिस्त्रुतैः फेनपटलैः सन्देहिततूलराशिभिर्धवलीकृतशिखरशाखः, वनगजकपोलकण्डूयनलग्नमदनिलीनमत्तमधुकरमालेन लोहशृङ्खलाबन्धननिश्चलेनेव कल्पस्थायिना मूलेन समुपेतः, कोटराभ्यन्तरनिविष्टैः स्फुरद्भिः सजीव इव मधुकरपटलैः, दुर्योधन इवोपलक्षितशकुनिपक्षपातः, नलिनाभ इव वनमालोपगूढः, नवजलधरव्यूह इव नभसि दर्शितोन्नतिः, अखिलभुवनतलावलोकनप्रासाद इव वनदेवतानाम्, अधिपतिरिव दण्डाकारण्यस्य, नायक इव सर्ववनस्पतीनाम्, सखेव विन्ध्यस्य, शाखाबाहुभिरुपगुह्येव विन्ध्याटवीमवस्थितो महान् जीर्णः शाल्मलीवृक्षः।

हिन्दी अनुवाद - जो अपने निकटवर्ती-(अपने) ऊर्ध्वभाग में सञ्चरण करने वाले-आकाशतल पर पर्यटन करने के प्रयास से थके हुए-सूर्य के रथवाही अश्वों के ओष्ठप्रान्तों से विगलित तथा तूल राशि (रुइ के ढेर) को सन्देह का विषय बनाने वाले फेन समूह से शुभ्र बनाई गई शिखरवर्तिनी शाखाओं वाला था, जो बनैले हाथियों के कपोलमण्डलों के कण्डूयन (खर्जूयन अथवा खुजलाहट) से

उत्पन्न मदजल पर बैठे हुये मदमत्त भ्रमरों की माला से युक्त अतएव (कालिमा की समता के कारण) लौहश्रृंखला के नियन्त्रणवश स्थिरीभूतकल्पान्तवेला तक अक्षुण्ण रहने वाले मूल में समुपेत प्रतीत होता था, जो कोटरों के मध्यभाग में प्रविष्ट तथा देदीप्यमान मधुकर मण्डलों से सजीव (श्वासादिप्राणयुक्त) प्रतीत होता था, जो (जनसमूह द्वारा अपने मामा) शकुनी के प्रति देखे गये पक्षपात (स्वीकृत या समर्थन) वाले दुर्योधन की भाँति (लोगों द्वारा) देखे गये पक्षियों के पंखों के पतनवाला था, जो (आप्रपदीन) वनमाला द्वारा आलिङ्गित कमलनाभ विष्णु की भाँति वनपंक्तियों से आच्छादित था, जो श्रावण मास में वृद्धि प्रदर्शित करने वाले नवीन मेघखण्ड की भाँति आकाश में उच्चता प्रदर्शित करने वाला था, जो समस्त पृथ्वीमण्डल का पर्यवेक्षण करने के लिए वनदेवियों का प्रासाद (अट्टालिका) प्रतीत होता था। जो दण्डकवन का स्वामी प्रतीत होता था, जो (बिना पुष्प के ही फलने वाली) समस्त वनस्पतियों का नायक प्रतीत होता था, जो विन्ध्यपर्वत का मित्र प्रतीत होता था और जो शाखाओं रूपी भुजाओं से विन्ध्याटवी का आलिङ्गन करके अवस्थित प्रतीत होता था।

संस्कृतव्याख्या – **स्वसमीपवर्त्तिनां**=निजान्तिकस्थायिनाम्, **उपरि**=ऊर्ध्वं, **सञ्चरतां**=गच्छतां, **गगनतलगमनखेदायासितानां**=गगनतले आकाशतले गमनेन सञ्चारेण यः खेदः परिश्रमः तेन खेदमुपगतानां तेन आयासितानां, **रवितुरङ्गमाणां**=सूर्यरथनियुक्ताश्वानां, **सृक्कपरिस्रुतैः**=सृक्काभ्याम् ओष्ठप्रान्ताभ्यां परिस्रु तैः पतितैः, **सन्देहिततूलराशिभिः**=सन्देहितः सन्देहविषयीकृतः तूलराशिः कार्पासकपिण्डः यैस्तैः, **फेनपटलैः**=श्वेतकसमूहैः, **धवलीकृतशिखरशाखः**=धवलीकृताः श्वेतीकृता शिखरशाखा अग्रस्थायिन्यः शाखा यस्य सः, **वनगजकपोलकण्डूयनलग्नमद-निलीनमत्तमधुकरमालेन**=वनगजानां काननहस्तिनां कपोलयोः गण्डयोः कण्डूयनेन खर्जनेन लग्नेषु सक्तेषु मदेषु दानवारिषु निलीना अवस्थिताः मत्ताः मधुपानेन क्षीबाः मधुकरमालाः भ्रमरपङ्क्तयो यत्र तेन तादृशेन, **लोहश्रृंखलाबन्धननिश्चलेनेव**=लोह-श्रृंखलया लोहनिगडेन यद् बन्धनं नियन्त्रणं तेन निश्चलं स्थिरं तेनेव विद्यमानेन, **कल्पस्थायिना**=प्रलयपर्यन्तं तिष्ठता, मूलेन, **समुपेतः**=संयुक्तः, **कोटराभ्यन्तरनि-विष्टैः**=कोटराभ्यन्तरे कोटरमध्ये निविष्टैः निलीनैः, **स्फुरद्भिः**=दीप्यमानैः, **मधुकरपटलैः**=भ्रमरसमूहैः, **सजीव इव**=श्वासादिप्राणयुक्त इव, **दुर्योधन इव**=सुयोधन इव, **उपलक्षितशकुनिपक्षपातः**= उपलक्षितः जनैर्दृष्टः, शकुनीनां पक्षिणां पक्षैः छदैः पातः पतनं यस्मिन् स तादृशः दुर्योधनपक्षे उपलक्षितः शकुनौ

स्वमातुले पक्षपातः प्रणयः यस्य स तथोक्तः। **नलिननाभ इव**=नलिनं कमलं नाभौ यस्य स विष्णुरिव, **वनमालोपगूढः**=वनमालया काननपङ्क्त्या उपगूढ आच्छादितः, विष्णुपक्षे वनमाला सर्वर्तुपुष्पोज्ज्वला माला तया उपगूढ आश्लिष्टः। **नवजलधरव्यूह इव**=नवाः नूतनाः ये जलधारा मेघाः तेषां व्यूहः मण्डलं तद्वत्, **नभसि**=आकाशे, **दर्शितोन्नतिः**=दर्शिता उन्नति उच्चत्वं येन स तथोक्तः, जलधरव्यूहपक्षे, नभसि श्रावणे दर्शिता प्रकटिता उन्नतिः वृद्धिः येन स तादृशः, **अखिलभुवनतलावलोकनप्रासाद इव**=अखिलानि समस्तानि यानि भुवनतलानि जगन्ति तेषाम् अवलोकनं निरीक्षणं तदर्थं प्रासादः राजभवनमिव, **वनदेवतानां**=अरण्याधिष्ठत्रीणां देवीनाम्, **दण्डकारण्यस्य**=दण्डकाख्यस्य वनस्य, **अधिपतिरिव**=स्वामी इव, **सर्ववनस्पतीनां**=पुष्पं विना फलं येषामेवंविधसर्वतरूणां, **नायक इव**=अध्यक्ष इव, **विन्ध्यस्य**=एतदाख्यपर्वतस्य, **सखा इव**=मित्रमिव, **शाखाबाहुभिः** शाखाः विटपाः ता एव बाहवः भुजाः तैः, **विन्ध्याटवीं**=विन्ध्यभूमिम्, **उपगुह्येव**=आश्लिष्येव, **अवस्थितः**=विद्यमानः, **महान्**=विशालः, **जीर्णः**=पुरातनः, **शाल्मलीवृक्षः**=सप्तपर्णतरुः।

टिप्पणी - **सृक्क**-घोड़ों के ओष्ठप्रान्त, जबड़ा, 'प्रन्तावोष्ठस्य सृक्कणी' इत्यमरः। 'स्वसमीप...शिखरशाखः' यहाँ अतिशयोक्ति अलङ्कार है। कल्प-एक सृष्टि की अवस्था, इसमें मन्वन्तर होते हैं तथा चारों युग एक हजार बार बीत जाते हैं। एक कल्प में चार अरब बत्तीस करोड़ वर्ष होते हैं। कल्प के पश्चात् प्रलय हो जाती है। **'वनगज....समुपेतः'** यहाँ **काव्यलिङ्ग तथा उत्प्रेक्षालंकार का संकर है। मधुकरमालेन** यहाँ **'माला'** शब्द में 'गोस्त्रियोरुपसर्जनस्य' से ह्रस्व हो जाता है। **'कोटराभ्यन्तर...पटलैः'** यहाँ **गुणोत्प्रेक्षा** है। **शकुनि**-(क) दुर्योधन के पक्ष में-शकुनि नामक दुर्योधन के मामा (ख) शाल्मलीवृक्ष के पक्ष में-पक्षी। **नलिननाभ-भगवान्** विष्णु। **वनमाला**-(क) विष्णु के पक्ष में-भगवान् विष्णु के गले में रहने वाली माला विशेष, जिसका लक्षण इस प्रकार है-'आजानुलम्बिनी माला सर्वर्तु-कुसुमोज्ज्वला। मध्ये स्थूलकदम्बाढ्या वनमालेति कीर्त्तिता॥'' (ख) शाल्मलीवृक्ष के पक्ष में-वनों की पङ्क्ति। **नभसि**-(क) नवजलधरव्यूह के पक्ष में-श्रावण में, (ख) शाल्मलीवृक्ष के पक्ष में-आकाश में; 'नभः खं श्रावणो नभः' इत्यमरः । **'दुर्योधन...दर्शितोन्नतिः'** यहाँ **पूर्णोपमालङ्कार है। वनस्पति**-इसप्रकार के सभी वृक्ष जिनपर बिना पुष्प के फल आते हैं। 'वनस्पतिर्वृक्षमात्रे विना पुष्पफलद्रुमे' इति विश्वः। **'अखिल....विन्ध्यस्य'** यहाँ जात्युप्रेक्षा है। **'शाखाजाहुभिरेव'** यहाँ निरङ्ग केवल रूपक **तथा क्रियोत्प्रेक्षा का** अङ्गाङ्गिभाव संकर है।

तत्र च शाखाग्रेषु कोटरोदरेषु पल्लवान्तरेषु स्कन्धसन्धिषु जीर्णवल्कलविवरेषु च महावकाशतया विश्रब्धविरचितकुलायसहस्राणि दुरारोहतया विगलितविनाशभयानि नानादेशसमागतानि शुकशकुनिकुलानि प्रतिवसन्ति स्म। यैः परिणामविरलसंहतिरपि स वनस्पतिरविरलदलनिचयश्यामल इवोपलक्ष्यते दिवानिशं निलीनैः।

हिन्दी अनुवाद - उस शाल्मलीवृक्ष (सेमर) पर शाखाओं के प्रान्तभागों में, कोटरों के भीतरी भागों में, पल्लवों के अन्तराल में, तनों एवं शाखाओं के जड़ों में तथा पुराने वल्कलों (छालों अथवा पपड़ियों) के छिद्रों में प्रभूत (अत्यधिक) अन्तविस्तार (जगह) होने के कारण निर्विशङ्कभाव से हजारों घोसले बनाये हुए तथा दुरारोह (न चढ़ा जा सकने योग्य) होने के कारण विनाशभय से मुक्त, भिन्न-भिन्न प्रदेशों से (बसेरा लेने के लिये) आए हुए शुकों तथा अन्य पक्षियों के कुल (सन्तति या समूह) रहा करते थे।

रात-दिन भीतर छिपे बैठे जिन (शुक-शकुनिकुलों) के कारण वार्धक्यवश छिट-पुट-पत्रसमूह वाला भी वह सेमर का पेड़ सघन पत्रसमूह से हराभरा प्रतीत होता था।

संस्कृतव्याख्या - **तत्र च**=शाल्मलीवृक्षे, **शाखाग्रेषु**=शाखाप्रान्तेषु, **कोटरोदरेषु** =कोटराणां स्कन्धविवराणाम् उदरेषु मध्यभागेषु, **पल्लवान्तरेषु**=किसलयमध्येषु, **स्कन्धसन्धिसु**=प्रकाण्डबन्धेषु, **जीर्णवल्कलविवरेषु**=जीर्णानि प्राचीनानि यानि वल्कालानि त्वचः तेषां विवरेषु छिद्रेषु च, **महावकाशतया**=महान् अतिदीर्घ अवकाश अन्तर्विस्तारः येषां तेषां भावस्तया तथोक्तया, **विश्रब्धविरचितकुलायसहस्राणि** =विश्रब्धं सविश्वासं निःसंदेहं यथा स्यात्तथा विरचितानि विनिर्मितानि कुलायसहस्राणि नीडसङ्घाः यैस्तानि तथोक्तानि, **दुरारोहतया**=दुःखेन क्लेशेन आरुह्यत इति दुरारोहः तस्य भावः तत्ता तया, **विगलितविनाशभयानि**=विगलितं हृदयात् प्रच्युतं विनाशभयं मृत्युभयं येषां तानि, **नानादेशसमागतानि**=नानादेशेभ्यः भिन्न-भिन्नप्रान्तेभ्यः समागतानि समायातानि, **शुकशकुनिकुलानि**=शुकाः कीराःशकुनयस्तदतिरिक्ताः पतत्रिणःतेषां कुलानि समूहाः, **प्रतिवसन्ति स्म**=निवसन्ति स्म। **दिवानिशं**=रात्रिन्दिवं, **निलीनैः**=निविष्टैः, **यैः**=शकुनिकुलैः, **परिणामविरलदलसंहतिरपि**=परिणामेन पुरातनतया विरला स्वल्पा दलसंहतिः पत्रसमुदायः यत्र स तथोक्तोऽपि, **सः वनस्पतिः**= शाल्मलीवृक्षः, **अविरलदलनिचयश्यामल इव**=अविरलानि सान्द्राणि यानि दलानि पर्णानि तेषां निचयः संहतिः तेन श्यामलः कृष्णवर्ण इव, **उपलक्ष्यते**=जनैरवलोक्यते।

टिप्पणी -**स्कन्धसन्धि**-दो तनों का सन्धिस्थल जहाँ पक्षी घोंसला रख लिया करते हैं। **महावकाशतया**-बहुत स्थान वाला होने के कारण। **कुलाय**-घोंसला। **शकुनि**-पक्षी। **निचय**-समूह। यै:......निलीनै:'-यहाँ श्यामलता गुण है। अतएव उसके उत्प्रेक्षण से **उत्प्रेक्षालङ्कार** है।

ते च तस्मिन् वनस्पतावतिवाह्य रजनीमात्मनीडेषु प्रतिदिनमुत्थायाहारान्वेषणाय नभसि विरचितपङ्क्तयो मदकलहलधरहलमुखोत्क्षेपविकीर्णबहुस्रोतसमम्बरतले कलिन्दकन्यामिव दर्शयन्तः, सुरगजोन्मूलितविगलदाकाशगंगाकमलिनीशंकामुपजनयन्तः, दिवसकररथतुरगप्रभानुलिप्तमिव गगनतलमुपपादयन्तः, सञ्चारिणीमिव मरकतस्थलीं विडम्बयन्तः, शैवालपल्लवावलीमिवाम्बरसरसि प्रसारयन्तः, गगनविततैः पक्षपुटैः, कदलीदलैरिव दिनकरखरकरनिकरपरिखेदितान्याशामुखानि वीजयन्तः, वियति विसारिणीं शष्पवीथीमिवारचयन्तः, सेन्द्रायुधमिवान्तरिक्षमादधाना विचरन्ति स्म शुकशकुनयः। कृताहाराश्च पुनः प्रतिनिवृत्त्यात्मकुलायावस्थितेभ्यः शावकेभ्यो विविधान् फलरसान् कलममञ्जरीविकारांश्च प्रहतहरिणरुधिरानुरक्तशार्दूलनखकोटिपाटलेन चञ्चुपुटेन दत्त्वा अधरीकृतसर्वस्नेहेनासाधारणेन गुरुणापत्यप्रेम्णा तस्मिन्नेव क्रोडान्तर्निहिततनया क्षपाः क्षपयन्ति स्म।

हिन्दी अनुवाद - अपने घोसलों में रात बिताकर प्रतिदिन (सबेरे) उठकर चारा खोजने के लिये आकाश में कतार बाँधे हुये अतएव मानों गगन-मण्डल में मदिरा पान के कारण मनोज्ञ (प्रतीत होने वाले) बलराम के हलाग्रभाग अर्थात् फाल के आकर्षण से पर्यस्त (फैली या छितराई) हुई अनेक धाराओं वाली यमुना को प्रदर्शित करते हुये, सुरगज ऐरावत द्वारा उत्पादित (उखाड़ी गई) अतएव नीचे गिरती हुई आकाशगङ्गा में उगी कमलिनी के भ्रम को उत्पन्न करते हुये, आकाशमण्डल को (अपनी देहप्रभा के कारण) मानो सूर्य के रथवाही (हरित्) अश्वों की शारीरिक कान्ति से उपलिप्त हुआ ज्ञापित करते हुए, भ्रमणशील मरकतमणिखचित भूमि का मानो अनुकरण करते हुए, आकाश रूपी सरोवर में मानों सेवार की किसलय श्रेणी फैलाते हुये, आकाश में फैले हुए तथा कदलीपत्र के समान प्रतीत होने वाले पंखसमूह से मानो सूर्य की तीखी किरणों के समूह से थकाई गई दिशाओं के मुँह पर हवा करते हुए, आकाश में विस्तारित नई घासों का कछार मानो बनाते हुए तथा आकाश को इन्द्रधनुष से संवलित प्रस्तुत करते हुए, वे शुकपक्षी उस सेमर के पेड़ पर विचरण किया करते थे।

चारा खा-पी लेने के बाद पुनः लौटकर मारे-गये हरिण के रक्त से अरुणीकृत सिंह के नखाग्रभाग के समान पाटलवर्णी (श्वेत रक्त) चञ्चुपुट से अपने घोसलों में अवस्थित चिरौंटों (बच्चों) के लिए विविध प्रकार वाले फलों के रसों की तथा जङ्गलीधान की वल्लरियों से उद्‌भूत (पका) चावल देकर-सब प्रकार के स्नेह को नगण्य बना देने वाले, विलक्षण तथा भारी सन्तति प्रेम से उसी (पेड़) पर बच्चों को गोदी में लिए हुए रातें बिताया करते थे।

संस्कृतव्याख्या - '**ते च**=शुकशकुनयः विचरन्ति स्म' इति दूरेणान्वयः। **तस्मिन् वनस्पतौ**=शाल्मलीवृक्षे, **आत्मनीडेषु**=निजनिजकुलायेषु, **रजनीं**=रात्रिम्, **अतिवाह्य**=अतिक्रम्य, **प्रतिदिनं**=प्रत्यहम्, **उत्थाय**=उत्थानं विधाय, **आहारान्वेषणाय**=भक्ष्यमार्गणाय, **नभसि**=गगने, **विरचितपङ्क्तयः**=विरचिता विहिताः पङ्क्तिः श्रेणी यैस्ते तथोक्ताः, **मदकलहलधरहलमुखोत्क्षेपविकीर्णबहुस्रोतसम्**=मदेन मधुपानेन कलो मत्तो यो हलधरो बलरामः तस्य हलमुखेन लाङ्गलप्रदेशेन य उत्क्षेप ऊर्ध्वदेशेक्षेपणं तेन विकीर्णानि विक्षिप्तानि बहूनि स्रोतांसि प्रवाहा यस्याः तां तथोक्तां, **कलिन्दकन्यामिव**=यमुनामिव, **अम्बरतले**=आकाशतले, **दर्शयन्तः**=प्रदर्शयन्तः, **सुरगजोन्मूलितविगलदाकाशगङ्गाकमलिनीशङ्काम्**= सुरगजेन-ऐरावतेन उन्मूलिता उत्पाटिता अतएव विगलन्ती अधःपतन्ती या आकाशगङ्गा मन्दाकिनी तस्याः कमलिनी पद्मिनी तस्याः शङ्कां भ्रान्तिम्, **उपजनयन्तः**=उत्पादयन्तः, **गगनतलं**= अम्बरतलं, **दिवसकररथतुरगप्रभानुलिप्तमिव**=दिवसकरस्य सूर्यस्य ये रथतुरगाः स्यन्दनायोजितशताश्वाः तेषां प्रभाभिः कान्तिभिः अनुलिप्तं रञ्जितमिव, **उपपादयन्तः**=विदधतः, **सम्यग्चारिणीं**=सञ्चरणशीलां, **मरकतस्थलीं**=नीलमणिभूमिं, **विडम्बयन्तः**=अनुकुर्वन्त इव, **अम्बरसरसि**=आकाशजलाशये, **शैवलपल्लवा-वलीं**=शैवलपल्लवस्य शैवालकिसलयस्य अवलीं पङ्क्तिं, **प्रसारयन्तः**=विस्तारयन्त इव, **कदलीदलैरिव**=रम्भापत्रैरिव, **गगनविततैः**=गगने आकाशे विततैः विस्तृतैः, **पक्षपुटैः**=पक्षच्छेदैः, **दिनकरखरकरनिकरपरिखेदितानि** =दिनकरस्य सूर्यस्य खराः तीक्ष्णाः ये करनिकराः किरणसमूहाः तैः परिखेदितानि संक्लेशितानि, **आशामुखानि**= दिग्वदनानि वीजयन्तः **वियति**=आकाशे **विसारिणीं**=विस्तारिणीं, **शष्पवीथीं**=बालतृणपङ्क्तिम्, **आरचयन्तः**=निर्माणं, कुर्वन्त इव, **अन्तरिक्षं**=आकाशं, **सेन्द्रायुधमिव**=शक्रधनुषा सह विद्यमानमिव, **आदधानाः**=कुर्वन्तः, **शुकशकुनयः**=कीरपक्षिणः, **विचरन्ति स्म**=पर्यटन्ति स्म। **कृताहाराश्च**=कृतो विहित आहारो भोजनं यैस्ते तथोक्ताः **पुनः**=भूयः, **प्रतिनिवृत्य**= परावृत्य,

आत्मकुलाया-वस्थितेभ्यः=आत्मीयाः निजाः ये कुलायाः नीडानि तत्र अवस्थितेभ्यः वर्तमानेभ्यः, **शावकेभ्यः**=शिशुभ्यः, **विविधान्**=अनेकप्रकारान्, **फलरसान्**= सस्यनिर्यासान्, **कलममञ्जरीविकारान्**=कलमानां धान्यविशेषाणां मञ्जर्यो वल्लर्यस्तासां विकाराः परिपक्काः कणाः ताश्च, **प्रहतहरिणरुधिरानुरक्त-शार्दूलनखकोटिपाटलेन**=प्रहतस्य विनाशितस्य हरिणस्य मृगस्य रुधिरं शोणितं तेन अनुरक्ता रक्तवर्णीकृता या शार्दूलनखकोटिः व्याघ्रनखाग्रप्रदेशः तद्वत् पाटलेन श्वेतरक्तेन, **चञ्चुपुटेन**=पञ्चाङ्गलसम्पुटेन दत्त्वा, **अधरीकृतसर्वस्नेहेन**=अधरीकृतः निम्नत्वमापादितः सर्वस्नेहः समस्तप्रेम येन तेन तादृशेन अतएव, **असाधारणेन**= असामान्येन, **गुरुणा**=महता, **अपत्यप्रेम्णा**=सन्तानस्नेहेन, **तस्मिन्नेव**=शाल्मलीतरावेव, **क्रोडान्तर्निहिततनयाः**= क्रोडानाम् उत्सङ्गानाम् अन्तर्निहिता मध्येषु रक्षिताः तनया अपत्यानि यैस्ते तथोक्ताः, **शुकशकुनयः**=कीरपक्षिणः, **क्षपाः**=त्रियामाः, **क्षपयन्ति स्म**=अतिवाहयन्ति स्म।

टिप्पणी – नीड-घोंसला, 'कुलायो नीडमस्त्रियाम्' इत्यमरः। अतिवाह्य=व्यती-तकर। अति+वह्+णिच्+क्त्वा-ल्यप्। **'मदकल.......स्रोतसम्'** – भागवत पुराण की कथा है कि एक समय नदी के तट पर मदमत्त होकर विचरण करते हुए बलराम ने यमुना को विहार के लिए बुलाया। यमुना ने बलराम के वचनों की अनसुनी कर दी। तब क्रुद्ध होकर बलराम ने हल के अग्रभाग से यमुना के प्रवाह को ऊपर उछाला और यमुना स्त्री वेष धारण कर बलराम के चरणों पर गिरी। **कलिन्दकन्या**-यमुना, कलिन्द नामक पर्वत से निकलकर बहने वाली यमुना नदी। पौराणिक मान्यता है कि विवस्वान् सूर्य की पत्नी संज्ञा से यम तथा यमुना का जन्म हुआ था। मार्कण्डेय पुराण के अनुसार सूर्य ने प्रसन्न होकर यम को पितरों का अधिपति तथा यमुना को कालिन्द पर्वत से बहने वाली पवित्र नदी बना दिया– 'पितृणामाधिपत्येन च परितुष्टो दिवाकरः। यमनुां यो नदीं चक्रे कलिन्दान्तरवाहिनीम्॥' **'सुरगज... उपजनयन्तः'** यहाँ **भ्रान्तिमान्** अलङ्कार है। **'दिवस.....उपपादयन्तः'** यहाँ **'अनुलिप्तमिव'** में **क्रियोत्प्रेक्षा** अलङ्कार है। 'विडम्बयन्तः' यहाँ भी क्रियोत्प्रेक्षा है। **'शैवल.....प्रसारयन्तः'** यहाँ **'अम्बरमेव सरः'** में निरङ्गकेवलरूपक तथा **प्रसारयन्त इव में क्रियोत्प्रेक्षा**। दोनों का अङ्गाङ्गिभाव सङ्कर। **अवलौ**-माला। **'कदलीदलैरिव'** यहाँ **उपमालङ्कार है। आशा**-दिशा। **'आरचयन्त इव'** में **क्रियोत्प्रेक्षा। 'सेन्द्रायुधमिव'** में **गुणोत्प्रेक्षा। इन्द्रायुध**-इन्द्रधनुष, 'इन्द्रायुधं शक्रधनुः' इत्यमरः। **शावक**-पक्षी। **कलम**-एक प्रकार का धान जिसका चावल

सुगन्धयुक्त तथा बारीक होता है। **शार्दूल**-व्याघ्र। **क्रोड**-गोद। **क्षपा**-रात्रि। **'कृताहाराश्च....क्षपयन्ति स्म'**-यहाँ वात्सल्य रस है।

एकस्मिंश्च जीर्णकोटरे जायया सह निवसतः पश्चिमे वयसि वर्त्तमानस्य कथमपि पितुरहमेवैको विधिवशात् सूनुरभवम्। अतिप्रबलया चाभिभूता ममैव जायमानस्य प्रसववेदनया जननी मे लोकान्तरमगमत्। अभिमतजायाविनाश-दुःखितोऽपि खलु तातः सुतस्नेहादन्तर्निगृह्य पटुप्रसरमपि शोकमेकाकी मत्सम्बर्द्धनपर एवाभवत्। अतिपरिणतवयाश्च कुशचीरानुकारिणीमल्पा-वशिष्टजीर्णपिच्छजालजर्जराम्अवस्त्रस्तांसदेशशिथिलाम् अपगतोत्पतन-संस्काराँ पक्षसन्ततिम् उद्वहन् उपारूढकम्पतया सन्तापकारिणीमंगलग्नां जरामिव विधुन्वन् अकठोरशेफलिकाकुसुमनालपिञ्जरेण कलममञ्जरी-दलनमसृणितक्षीणोपान्तलेखेन स्फुटिताग्रकोटिना चञ्चुपुटेन परनीडनिपतिता-भ्यः शालिवल्लरीभ्यस्तण्डुलकणान् आदायादाय तरुमूलनिपतितानि च शुक-कुलावदलितानि फलशकलानि समाहृत्य परिभ्रमितुमशक्तो मह्यमदात् प्रतिदिवसमात्मना च मदुपभुक्तशेषम् अकरोदशनम्।

हिन्दी अनुवाद - पत्नी के साथ एक पुराने कोटरे में निवास करते हुए, उतरती (वार्धक्य) अवस्था में पहुँचे हुए (अपने) पिता का यथाकथञ्चित् (अर्थात् बड़ी मनौतियों के बाद) दैवयोग से-एकमात्र ही मैं पुत्र हुआ। उत्पन्न होते हुए मेरे ही अत्यन्त प्रबल प्रसव कष्ट (प्रसूतिव्यथा) से पीड़ित होकर मेरी माँ परलोक चल बसी। मनोऽनुकूल प्रियतमा की मृत्यु से उत्पन्न (रोदनादिरूप) शोक से दुःखी होते हुए भी तातचरण पुत्र में प्रेम के कारण तीव्र विस्तार वाले अर्थात् दारुण दुःख को भी भीतर बाँधकर अकेले मेरे पालन-पोषण में ही तल्लीन हुए।

कुशनिर्मित जीर्ण वस्त्र खण्ड का अनुकरण करने वाले, (वार्धक्यवश) अत्यल्प बचे हुए पुराने पिच्छजाल (पूँछों) के कारण विशीर्ण, गलित (झुके हुए) स्कन्धप्रदेश के कारण ढीले अवयव संयोगों वाले तथा उड़ान भरने में असमर्थ पक्ष समूह को धारण करते हुए, कँपकँपी उत्पन्न हो जाने के कारण मानो अंगों में समायी हुई दुःखदायिनी वृद्धावस्था को दूर फेंकते हुए, सुकोमल हारसिंगार डंठल के समान पिङ्गलवर्ण-जंगलीधान की लच्छी खण्डित करने के कारण चिकनाई हुई और घिसी हुई उपान्तलेखा (अग्रभाग) वाले तथा क्षतविक्षत नोंक वाले चञ्चुपुट द्वारा पराये (पक्षियों के) नीडों से नीचे गिरे हुए धान के कच्छों से चावल के दानों को ले-लेकर तथा (अन्यान्य) शुकसमूहों द्वारा खण्डित किये गये फलों

के टुकड़ों को बटोर कर, चलने-फिरने में असमर्थ, अत्यन्त परिपक्व अवस्था वाले (पिता जी) मुझको दिया करते थे और मेरे खाने के बाद बचे हुए भोजन को स्वयं प्रतिदिन ग्रहण करते थे।

संस्कृतव्याख्या - **एकस्मिंश्च**=अन्यतमे च, **जीर्णकोटरे**=पुरातनस्कन्धविवरे, **जायया सह**=पत्न्या साकं, **निवसतः**=निवासं कुर्वतः, **पश्चिमे**=अन्तिमे, **वयसि**=अवस्थायां, **वर्तमानस्य**=विद्यमानस्य, **कथमपि**=महता क्लेशेन **पितुः**=जनकस्य, **विधिवशात्**=दैवयोगात्, **अहमेव**=केवलमहं (वैशम्पायनः), **एकः**=एकाकी, **सूनुः**=पुत्रः, **अभवम्**=अजनिषि, **मम**=वैशम्पायनस्य, **जायमानस्यैव**=उत्पद्यमानस्यैव, **अतिप्रबलया**=अत्यन्ततीव्रया, **प्रसववेदनया**=प्रसूतिपीडया, **अभिभूता**=पीडिता, **मे**=मम, **जननी**=माता, **लोकान्तरं**=परलोकम्, **अगमत्**=अगच्छत्, **अभिमतजायावि-नाशदुःखितोऽपि**=अभिमताया अभीष्टायाः जायायाः पत्न्याः विनाशेन लोकान्तरगमनेन दुःखितोऽपि क्लेशितोऽपि, **खलु**=वस्तुतः, **तातः**=पिता, **सुतस्नेहात्**=पुत्रप्रेम्णः, **पटुप्रसरमपि**=स्पष्टवेगमपि, **शोकं**=क्लेशम्, **अन्तः**=हृदि, **निगृह्य**=निरुध्य, **एकाकी**=एककः, **मत्सम्वर्धनपर एव**=मम परिपोषणतत्पर एव, **अभवत्**=आसीत्, **अतिपरिणतवयाश्च**=अतिपरिणतम् अत्यन्तपरिपक्वम् अतिवृद्धमित्याशयः वयोऽवस्था यस्य स तादृशः, **कुशचीरानुकारिणीं**=कुशः दर्भः चीरं जीर्णवसनखण्डं तदुनकरोति या सा तां तादृशीम्, **अल्पावशिष्टजीर्ण पिच्छजालजर्जरां**=अल्पं स्तोकम् अवशिष्टम् उर्वरितं यत् जीर्णपिच्छजालं पुरातनवर्हसमुदायः तेन जर्जरां विशीर्णाम्। **अवस्त्रस्तांसदेशशिथिलां**=अवस्रंस्ते गलिते अंसदेशे स्कन्धप्रदेशे शिथिलां प्रशिथिलाम्, **अपगतोत्पतनसंस्कारां**=अपगतो दूरीभूत उत्पतने आकाशविचरणे संस्कारः सामर्थ्यविशेषो यस्याः सा तां तथोक्ताम् एतादृशीं, **पक्षसन्ततिं**=पत्रसमुदायम्, **उद्वहन्**=धारयन् सन्, **उपारूढकम्पतया**=उपारूढः आविर्भूतः कम्पः देहसञ्चलनं यत्र सा तादृशी तस्या भावस्तया, **सन्तापकारिणीं**=दुःखकारिणीम् **अङ्गलग्नां**=अङ्गे शरीरे लग्नां विद्यमानां, **जरामिव**=वृद्धावस्थामिव, **विधुन्वन्**=कम्पयन्, **अकठोरशेफा-लिकाकुसुमनालपिञ्जरेण**=अकठोरं मृदुलं यच्छेफालिकाकुसुमं निर्गुण्डीपुष्पं तस्य यत् नालवृन्तं तद्वत् पिञ्जरेण पिङ्गलवर्णेन, **कमलमञ्जरीदलनमसृणितक्षीणोपा-न्तलेखेन**=कलमस्य धान्यविशेषस्य या मञ्जयर्यः शिखाः तासां दलनेन विदारणेन मसृणिता चिक्कणा क्षीणा क्षयं प्राप्ता च उपान्तलेखा प्रान्तसमीपस्थायिनी रेखा यस्य स तेन तादृशेन तथा **चञ्चुपुटेन**=पञ्चाङ्गुलेन, **स्फुटिताग्रकोटिना**=स्फुटिता क्षयं प्राप्ता अग्रकोटिः अग्रिमप्रदेशो यस्य तेन तादृशेन, **परनीडनिपतितेभ्यः**=परेषाम्

अन्येषां शकुनीनां नीडानि कुलायाः तेभ्यः निपतिताः स्रस्ताः ताभ्यः, **शालिवल्लरीभ्यः**=शालीनां धान्यविशेषाणं वल्लर्यः मञ्जर्यः ताभ्यः, **तण्डुलकणान्**=तण्डुलानां शालीनां कर्णान् बीजानि, **आदायादय**=गृहीत्वा गृहीत्वा, **तरुमूलनिपतितानि**=वृक्षमूलच्युतानि, **शुककुलावदलितानि**=शुकानां कीराणां कुलेन समूहेन अवदलितानि विदारितानि, **फलशकलानि च**=फलानां सस्यानां शकलानि खण्डानि, **समाहृत्य**=एकीकृत्य, **परिभ्रमितुं**=दूरे सञ्चरितुम्, **अशक्तः**=असमर्थः, **मह्यं**=वैशम्पायनाय, **अदात्**=ददौ, **प्रतिदिवसं च**=प्रतिदिनं च, **आत्मना**=स्वयं, **मदुपभुक्तशेषं**=मया उपभुक्तस्य अशितस्य शेषम् अवशिष्टम्, **अशनं**=भोजनम्, **अकरोत्**=कृतवान्।

टिप्पणी – **जायया सह**–यहाँ 'सहयुक्तेऽप्रधाने' से तृतीया। **पश्चिमे वयसि**–वृद्धावस्था में। '**मम जायमानस्य एव**' यहाँ 'षष्ठी चानादरे' से षष्ठी; मेरे पैदा होते ही। **सूनुः**–पुत्र। **निगृह्य**=रोककर–निग्रह्+क्त्वाल्यप्। **पिच्छ**–जालपंखों का समूह। **अवस्रतांशदेश**–ढीले पड़े हुए कन्धे। '**उपारूढविधुन्वन्**' यहाँ '**जरामिव**' में उत्प्रेक्षालङ्कार है। **विधुन्वन्**=हिलाकर दूर करते हुए, विधु+शतृ। **मसृणित**–चिकनी। **शालि**–साठि के चावल जो कि साठ दिन में पक जाते हैं। सम्+आङ्+हृ+क्त्वा–ल्यप्=समाहृत्य। **अशनम्**–अश्+ल्युट्=**अशनम्।**

एकदा तु प्रभातसन्ध्यारागलोहिते गगनतलकमलिनीमधुरक्तपक्षसम्पुटे वृद्धहंस इव मन्दाकिनीपुलिनादपरजलनिधितटमवतरति चन्द्रमसि, परिणतरङ्कुरोमपाण्डुनि व्रजति विशालतामाशाचक्रवाले, गजरुधिर रक्तहरिसटालोहिनीभिः प्रतप्तलाक्षिकतन्तुपाटलाभिरायामिनीभिः अशिशिरकिरणदीधितिभिः पद्मरागशलाकासम्मार्जनीभिरिव समुत्सार्यमाणे गगनकुट्टिमकुसुमप्रकरे तारागणे, सन्ध्यामुपासितुमुत्तराशावलम्बिनि मानसरस्तीरमिवावतरति सप्तर्षि-मण्डले, तटगतविघटितशुक्तिसम्पुटविप्रकीर्णमरुणकरप्रेरणाधोगलित-मुडुगणमिव मुक्ताफलनिकरमुद्वहति धवलितपुलिनमुदन्वति पूर्वेतरे।

हिन्दी अनुवाद – एक बार जब कि प्रभातकालीन सन्ध्या (रात्रि एवं प्रातः वेला की सन्धि) की लाली से लोहितवर्ण वाले, गगनमण्डलरूपी कमलिनी के (लाल) मधुरस से रँगे हुए पक्षुपुटों वाले तथा मन्दाकिनी (गंगा) के तट से द्वितीय जलनिधि (अर्थात् मानसरोवर) के तट पर उतर हुये वृद्ध कलहंस की भाँति प्रातःकालीन (रात और दिन की) सन्ध्या की लाली से अरुणायमान कमलिनी सदृश नभोमण्डल के मधुरस (लक्षणया कान्ति) से रञ्जित उभयपार्श्वों वाला

चन्द्रमा आकाशगङ्गा के तट से पश्चिमी सागर तट पर उतर रहा था, जबकि परिणत (परिपक्व) अवस्था वाले रङ्कुमृग की रोमराजि के समान श्वेतपीतदिङ्मण्डल (शनैः-शनैः अन्धकार कटने के कारण) विस्तीर्णता प्राप्त कर रहा था, जबकि (मारे गये) हाथियों के रक्त से अरुणीकृत सिंह के स्कन्धकेशों के समान लोहितवर्ण वाली-दहकी हुई लाख के रेशों की भाँति पाटल (श्वेतरक्त) वर्णवाली, विस्तारयुक्त अतएव पद्मराग मणियों की सींकों से निर्मित सम्मार्जनी (झाड़ू) प्रतीत होने वाली, 'अशिशिरकिरण' अर्थात् सूर्य की किरणों से गगनमण्डलरूपी फर्श पर (बिखरे हुए) पुष्पसमूह सरीखे नक्षत्र समूह दूर किये जा रहे थे, जबकि उत्तर दिशा का आश्रय लेने वाले सप्तर्षिगण (नक्षत्रमण्डल विशेष) मानो सन्ध्योपासना (सायन्तन विधि) सम्पन्न करने के लिए मानसरोवर के तट पर अवतीर्ण हो रहे थे, जबकि तटवर्ती प्रदेशों में प्राप्त-चिटकी हुई सीपियों के संपुटों (कटोरों) से छिटके हुए तथा बालुकामय (सागर) तट को शुभ्र बना देने वाले अतएव सूर्य की प्रेरणा से नीचे गिरे हुए तारकसमूह सरीखे प्रतीत होने वाले मुक्ताफलसमूह 'पूर्वेतर' अर्थात् पश्चिमी समुद्र द्वारा धारण किये जा रहे थे।

संस्कृतव्याख्या - **एकदा तु**=एकस्मिन्, काले तु प्रत्यूषे जाते मृगया-कोलाहलध्वनिरुदचरदिति दूरेणान्वयः। **प्रभातसन्ध्यारागलोहिते**=प्रभातस्य प्रत्यूषस्य या सन्ध्या तत्सम्बन्धी यो रागो रक्तिमा तेन लोहिते रक्तवर्णे, **गगनतलकमलिनी-मधुरक्तपक्षसम्पुटे**=गगनतलम् आकाशमण्डलमेव कमलिनी नलिनी तस्या मधुना लोहितवर्णपुष्परसेन रक्तम् अनुरञ्जितं पक्षसम्पुटं पतत्रयुगलं यस्य तस्मिन्, **वृद्धहंस इव**=पुरातनकलहंस इव, **चन्द्रमसि**=हिमांशौ, **मन्दाकिनीपुलिनात्**=वियद्गङ्गासैक-तात्, **अपरजलनिधितटं**=अपरः पश्चिमो यो जलनिधिः समुद्रः तस्य तटं तीरम्, **अवतरति**=उत्तीर्णे सति, **परिणतरङ्कुरोमपाण्डुनि**=परिणतस्य पुरातनस्य रङ्कोः मृगविशेषस्य रोमाणि लोमानि तद्वत् पाण्डुनि पीतशुभ्रे, **आशाचक्रवाले**=आशानां दिशा चक्रवालं मण्डलं तस्मिन्, **विशालतां**=विस्तृत्वं, **व्रजति**=प्राप्नुवति सति, **गजरुधिररक्तहरिसटालोहिनीभिः**=गजानां हस्तिनां यद्रुधिरं शोणितं तेन रक्ताः लोहिताः याः हरिसटाः तद्वत् लोहिनीभिः रक्तवर्णाभिः, **प्रतप्तलाक्षिकतन्तुपाटलाभिः**=प्रतप्ताः उष्णीकृताः ये लाक्षिकाः जतुसम्बन्धिनः तन्तवः सूत्राणि तद्वत् पाटलाभिः, **आयामिनीभिः**=विस्तारवतीभिः, **अशिशिरकिरण-दीधितिभिः**=अशिशिराः उष्णाः किरणाः रश्यमः यस्य तस्य सूर्यस्य दीधितिभिः कान्तिभिः रश्मिभिर्वा, **पद्मरागशला-कासम्मार्जनीभिरिव**=पद्मरागाः लोहितकमणयः तेषां याः शलाकाः इषीकाः तासां

संमार्जनीभिरिव शोधनीभिरिव, **गगनकुट्टिमकुसुमप्रकरे**=गगनम् आकाशमेव कुट्टिमं बद्धभूमिः तस्य कुसुमप्रकरः पुष्पसमुदायः तस्मिन्, **तारागणे**=नक्षत्रमण्डले, **समुत्सार्यमाणे**=दूरीक्रियमाणे सति, **उत्तराशावलम्बिनि**=उत्तराशा उदीची दिक् तदवलम्बिनि तदवस्थिते, **सप्तर्षिमण्डले**=मरीच्यादिसप्तदेवर्षिसमूहे, **सन्ध्यां**=प्रातः सन्ध्याम्, **उपासितुं**=विधातुमिव, **मानससरस्तीरं**=मानससरोवरतटम्, **अवतरति**=अवरोहति सति, **पूर्वेतरे**=पूर्वात् पूर्वसमुद्रात् इतरः अन्यः पश्चिमः तस्मिन्, **उदन्वति**=समुद्रे, **तटगतविघटितशुक्तिसम्पुटविप्रकीर्णे**=तटगतानि तीरस्थितानि विघटितानि स्फुटितानि यानि शुक्तिसम्पुटानि समुद्रमण्डूकपुटानि तेभ्यः विप्रकीर्णं विपर्यस्तं, **धवलितपुलिनं**=धवलितं श्वेतीकृतं पुलिनं सैकतं येन तं तथोक्तम्, **अरुणकर-प्रेरणाधोगलितं**=अरुणस्य सूर्यस्य कराः किरणाः तेषां प्रेरणया नोदनया अधोगलितं भूमिपतितम्, **उडुगणमिव**=नक्षत्रमण्डलमिव, **मुक्ताफलनिकरं**= मौक्तिकसमूहम्, **उद्वहति**=धारणं कुर्वति सति।

टिप्पणी - **प्रभातसन्ध्या**-प्रातःकालीन सन्धिवेला। सन्ध्यायें तीन हैं- प्रातःसन्ध्या, मध्याह्नसन्ध्या तथा सायंसन्ध्या। **'वृद्धहंस इव'** यहाँ उपमालङ्कार है। **पुलिन**-किसी नदी आदि का वह बालुकामय प्रदेश जहाँ शीघ्र ही में जल उतरने से अभी गीलापन विद्यमान हो। **परिणतरङ्कु-वृद्ध रङ्कु** मृग जिसकी पीठ पर सफेद चित्तियाँ होती है। **पाण्डु**-पीला तथा सफेद 'पाण्डुस्तु पीतभागार्धः केतकीधूलिसन्निभः' इति शब्दार्णवः। **आशाचक्रवाल**-दिशाओं का मण्डल, 'दिशस्तु ककुभः काष्ठा आशाश्च हरितश्च ताः' चक्रवालं तु मण्डलम्' इति चामरः। **'परिणत.......चक्रवाले'** में लुप्तोपमालङ्कार है। **गजरुधिर......लोहिनीभिः'** यहाँ 'रुधिररक्त' में पुनरुक्त-वदाभास अलङ्कार है। **'हरितसटावत् में** लुप्तोपमालंकार। इन दोनों का अङ्गाङ्गिभाव सङ्कर। लाक्षिकतन्तुपाटला-यहाँ लुप्तोपमा है। **आयामिनी**-विस्तृत, लम्बी। **सम्मार्जनी**-गृहशोधिनी, झाड़ू। 'सम्मार्जनी शोधिनी स्यात्' इत्यमरः। **'सम्मार्जनीभिरिव'**-में जात्युत्प्रेक्षा है। **'गगनतारागणे'** यहाँ परम्परितरूपकालंकार है। **सप्तर्षिमण्डल**-मरीचि आदि सात नक्षत्र सप्तर्षिमण्डल के नाम से अभिहित हैं। कहा भी गया है-'मरीचिरङ्गिरा अत्रिः पुलस्त्यः पुलहः क्रतुः। वसिष्ठश्चेति सप्तैते श्रेयाश्चित्रशिखण्डिनः'। **उदन्वति**=सागर में, उदक=मतुप् उदक को उदनादेश। **'उडुगणमिव'**-में जात्युत्प्रेक्षालंकार है।

तुषारबिन्दुवर्षिणि विबुद्धशिखिकुले विजृम्भमाणकेसरिणि करिणीकदम्ब-कप्रबोध्यमानसमदकरिणि क्षपाजलजडकेसरंकुसुमनिकरमुदयगिरिशिखर-

स्थितं सवितारमिवोद्दिश्य पल्लवाञ्जलिभिः समुत्सृजति कानने, रासभरोम-धूसरासु वनदेवताप्रासादानां तरूणां शिखरेषु पारावतमालायमानासु धर्म-पताकास्विव समुन्मिषन्तीषु तपोवनाग्निहोत्रधूमलेखासु, अवश्यायशीकरिणि लुलितकमलवने रतिखिन्नशबरसीमन्तिनीस्वेदजलकणापहारिणि वनमहिषरोम-न्थफेनबिन्दुवाहिनि चलितपल्लवलतालास्योपदेशव्यसनिनि विघटमान-कमलषण्डमधुशीकरासारवर्षिणि कुसुमामोदतर्पितालिजाले, निशावसानजात-जडिम्नि मन्दमन्दसञ्चारिणि प्रवाति प्राभातिके मातरिश्वनि।

हिन्दी अनुवाद - जबकि ओसकणों की वर्षा से युक्त-जगे हुये मयूरों वाले जँभाई लेते हुए सिंहों से संकुल हथिनियों के दल द्वारा जगाये जाते हुए मदोत्कट गजों वाले कानन द्वारा मानों उदयाचलचूडचुम्बी (भगवान्) सूर्य को लक्ष्य बनाकर पल्लवरूपी (प्रणाम) अञ्जलियों से तुषारपात के कारण स्तम्भित (जमे हुए) परागवाला पुष्पसमूह समर्पित किया जा रहा था, जबकि गदर्भलोम की भाँति धूम्रवर्ण (धौरेरंग) वाली वनदेवियों के प्रासाद (राजभवन) स्वरूप वृक्षों के शिखरों पर कपोतमाला के समान आचरण करने वाली तथा (फहराती हुई) धर्मध्वजाओं के समान तपोवन में होने वाले अग्निहोत्रों की घूमावालियाँ ऊपर उठ रही थीं, जबकि बर्फीली जलकणिकाओं वाला कमलवन को प्रकम्पित कर देने वाला-रतिक्रीडा से थकी हुई भीलवधुओं की (आभासजनित) स्वेदजलबिन्दुओं का अपहरण करने वाला-जंगली भैसों के रोमन्थन (चर्वितचर्वण अथवा पागुर) से उत्पन्न फेन की बिन्दुओं को वहन करने वाला चञ्चल किसलयों वाली लताओं के नृत्य-शिक्षण (दान) रूपी व्यसनवाला प्रस्फुटित होते हुए कमलवनों के मधुरस-फुहारों की वेगमयी वर्षा करने वाला पुष्पों की सुरभि से मधुकर गणों को सन्तप्त कर देनेवाला तथा रात्रि की समाप्ति से उत्पन्न (अर्थात् प्रातःकालीन) जड़तत्त्वाला अतएव शशैः-शनैः सञ्चरण करने वाला प्रत्यूषकालीन पवन प्रवर्त्तित हो रहा था।

संस्कृतव्याख्या - **तुषारबिन्दुवर्षिणि** तुषारस्य तुहिनस्य बिन्दवः कणाः तान् वर्षति पातयतीति तस्मिन् तथोक्ते, **विबुद्धशिखिकुले**=विबुद्धानि जागरितानि शिखिकुलानि मयूरकुटुम्बानि मयूरगणाः यत्र तस्मिन् तथोक्ते, **विजृम्भमाणके-सरिणि**=विजृम्भमाणाः जृम्भाविधायिनः केसरिणः सिंहाः यत्र तस्मिन् तादृशे, **करिणीकदम्बकप्रबोध्यमानसमदकरिणि**=करिणीनां हस्तिनीनां कदम्बकं समूहः तेन प्रबोध्यमानाः जागरणं कुर्वाणाः समदाः दानजलस्यन्दिनः करिणो गजाः यस्मिन्

तस्मिन् तादृशे, **कानने**=वने, **क्षपाजलजडकेशरं**=क्षपाया: रात्रे: जलेन सलिलेन जडा: स्तिमिता: केशरा: किञ्जल्का: यस्य तं तथोक्तं, **कुसुमनिकरं**=पुष्पसमूहम्, **उदयगिरिशिखरस्थितं**=उदयगिरि:उदयाचल: तस्य शिखरे श्रृंगे स्थितं विद्यमानं, **सवितारं**=सूर्यम्, **उद्दिश्येव**=उद्देश्यं कृत्वेव, **पल्लवाञ्जलिभि:**=पल्लवानि किसलयानि एव अञ्जलय: तै:, **समुत्सृजति**=समर्पयति सति, **रासभरोमधूसरासु**=रासभस्य गर्दभस्य रोमाणि लोमानि तद्वत् धूसरासु धूम्ररूपासु, **वनदेवताप्रासादानां**=वनदेवता-नाम् अरण्याधिष्ठात्रीणां प्रासादा: भवनानि तेषां भवनरूपाणां तरूणां-वृक्षाणां, **शिखरेषु**= श्रृङ्गेषु, **पारावतमालायमालासु**=परावतानां कपोतानां माला पङ्क्ति: तद्वत् आचरन्तीषु तथोक्तासु, **तपोवनाग्निहोत्रधूमलेखासु**=तपोवनेषु मुन्याश्रमेषु यानि अग्निहोत्राणि अग्नि-होत्रहोमा: तेषां धूमलेखासु धूमपंक्तिषु, **धर्मपताकास्विव**=धर्मोद्घोषणाय वैजयन्तीष्विव, **समुन्मिषन्तीषु**=समत्सर्पन्तीषु, **अवश्यायशीकरिणि**=अवश्याय: तुषार: तस्य शीकरा: अम्बुकणा: ते अस्य सन्तीति तस्मिन् तथोक्ते, **लुलितकमल-वने**=लुलितम् आन्दोलितं कमलवनं पद्मवातं येन तस्मिन् तथोक्त, **रतिखिन्नशबर-सीमन्तिनीस्वेदजलकणापहारिणि**=रतिखिन्नानां निधुवनश्रान्तानां शबरसीमन्तिनीनां किरातवधूनां यत् स्वेदजलं घर्मवीर तस्य कणा: बिन्दव: तेषाम् अपहारिणि नाशविधायिनि तस्मिन् तादृशे, **वनमहिषरोमन्थनफेनबिन्दुवाहिनि**=वनमहिषाणां काननसैरिभाणां रोमन्थ: चर्वितचर्वणं तत्र ये फेनबिन्दव: फेनकणा: तान् वहति धारयतीति तस्मिन् तथोक्ते, **चलितपल्लवलतालास्योपदेशव्यसनिनि**=चलितानाम् आन्दोलितानां पल्लवानां किसलयानां लतानां वल्लीनाञ्च यत् लास्यं चाञ्चल्यरूपं नृत्यं तस्य उपदेशे शिक्षणे व्यसनम्, तत्र आसाक्तिरस्यास्तीति तस्मिन् तथोक्ते, **विघटमानकमलषण्डमधुशीकरासारवर्षिणि**=विघटमानानि विकासं प्राप्यमाणानि यानि कमलषण्डानि पद्मवनानि पेषां मधु पुष्परस: तस्य शीकराणां बिन्दूनाम् आसारं धारासम्पातं वर्षति क्षिपति इति तस्मिन् तथोक्ते, **कुसुमामोदतर्पितालिजाले**= कुसुमानां पुष्पाणाम् आमोद: सौरभ: तेन तर्पितं प्राणितम् अलिजालं भ्रमरसमूह: येन तस्मिन् तथोक्ते, **निशावसानजातजडिम्नि**=निशावसाने रात्रिशेषे जात: उत्पन्न: जडिमा जाड्यं यस्य तस्मिन् तथोक्ते, **मन्दमन्दसञ्चारिणि**=शनै:-शनै: प्रवहति, **प्राभातिके**=प्रात: कालिके, **मातरिश्वनि**=वायौ, **प्रवाति**=प्रवहति सति।

टिप्पणी -**तुषारं**-तुहिन, 'तुषारस्तुहिनं हिमम्' इत्यमर:। 'सवितारमिवोद्दिश्य' में क्रियोत्प्रेक्षालंकार है। 'पल्लवाञ्जलय:' में निरङ्गकेवलरूपक है। इनके अतिरिक्त समासोक्ति भी है। इनका परस्पर अङ्गाङ्गिभाव संकर है। पारावत-कबूतर। 'रासभ....

धूमलखासु' यहाँ रासभरोमधूसरासु में लुप्तोपमा, पारावतमालायमानसु में क्यङ्गतोपमा तथा धर्मपताकासु में जाति स्वरूपोत्प्रेक्षा। इनका परस्पर अङ्गाङ्गिभाव संकर। अवश्याय-तुषार 'अवश्यायस्तु नीहारस्तुषारस्तुहिनं हिमम्' इत्यमरः। **आसार**-धारारूप में वर्षा 'धारासम्पात आसारः' इत्यमरः। **मातरिश्वा**-वायु 'मातरिश्वा सदागतिः' इत्यमरः।

.....कमलवनप्रबोधमङ्गलपाठकानामिभगण्डडिण्डिमानां मधुलिहां कुमुदोदरेषु विघटमानदलपुटनिरुद्धपक्षसंहतीनामुच्चरत्सु हुङ्कारेषु, प्रभातशिशिरवाय्वाहतमुत्तप्तजतुरसाश्लिष्टपक्ष्ममालमिव सशेषनिद्रा जिह्मतारं चक्षुरुन्मीलयत्सु शनैः शनैरूषरशय्याधूसरक्रोडरोमराजिषु वनमृगेषु, इतस्ततः संचरत्सु वनचरेषु, विजृम्भमाणे श्रोत्रहारिणि पम्पासरः कलहंसकोलाहले समुल्लसति नर्तितशिखण्डिमण्डले मनोहरे वनगजकर्णतालशब्दे, क्रमेण च गगनतलमवतरतो दिवसकरवारणस्यावचूडचामरकलाप इवोपलक्ष्यमाणं मञ्जिष्ठारागलोहिते किरणजाले, शनैः शनैरुदिते भगवति सवितरि, पम्पासरः पर्यन्ततरुशिखरसंचारिण्याध्यासितगिरिशिखरे दिवसकरजन्मनि हृततारे पुनरिव कपीश्वरे वनमभिपतति बालातपे, स्पष्टे जाते प्रत्यूषसि, नचिरादिव दिवसाष्टमभागभाजि स्पष्टभासि भास्वति भूते, प्रयातेषु यथाभिमतानि दिगन्तराणि शुककुलेषु, कुलायनिलीननिभृतशुकशावकसनाथेऽपि निःशब्दतया शून्य इव तस्मिन् वनस्पतौ, स्वनीडावस्थित एव ताते, मयि य शैशवादसंजातबलसमुद्भिद्यमानपक्षपुटे पितुः समीपवर्तिनि कोटरगते....।

हिन्दी अनुवाद - जबकि कमलकाननों को जगाने के लिए मंगलपाठ (स्वस्त्ययन) करने वाल हाथियों के गण्डस्थल रूपी डिण्डिम (नगाडों) वाले तथा कुमुदपुष्पों के भीतर सघनरूप से अर्थात् कसकर बन्द हुए दलपटों (पत्रसमूहों) में अवरुद्ध पक्षसमूहों वाले भ्रमरों की हुंकारें (भनभनाहटें) प्रकट हो रही थीं, जबकि ऊसर (तृणरहित) भूमि पर शयन करने के कारण धूम्रवर्णी वक्षःस्थल की रोमावलियों वाले वनमृग प्रातःकालीन शीतल पवन से पीड़ित-दहकी हुयी लाख के रस से चिकपी हुई नेत्र की रोमपंक्तियों (बरौनियों) वाली प्रतीत होती हुई तथा उखड़ी हुई नींव के कारण ऊपर चढी हुई पुतलियों वाली आँख को धीरे-धीरे खोल रहे थे, जबकि अरण्यचार (जीव जन्तु) इधर-उधर सञ्चरण कर रहे थे, जबकि श्रवणसुखदपम्पासरोवर में रहने वाले कलहंसमण्डल का कोलाहल फैल रहा था, जबकि मयूरपक्षियों के समूह को नर्तनप्रवृत्त बनाने वाली मनोहर-जंगली

हाथियों के कानों का 'करतल ध्वनि' जैसा शब्द उठ रहा था, जबकि क्रमशः आकाश-मण्डल में (ऊपर) चढ़ते हुए सूर्य रूपी गजराज के मँजीठी के रंग की तरह लाल अधोमुख कूर्चकों (चूड़ा) वाले चामर-समूह की भाँति मँजीठी के रंग की तरह लाल रंगवाली किरणों का जाल दृष्टिगोचर हो रहा था, जबकि भगवान् सूर्य धीरे-धीरे उदित हो चले थे। जबकि पम्पासरोवर की चौहद्दियों पर विद्यमान वृक्षों के शिखरों पर सञ्चरण करने वाले (ऋष्यमूक) गिरिशिखर का आश्रय लेने वाले (बड़े भाई बालि की पत्नी) तारा का अपहरण करने वाले तथा बालि से हारकर पुनः वन की ओर पलायन करने वाले सूर्यजन्मा वानरराज सुग्रीव की भाँति पम्पासरोवर की चौहद्दियों पर विद्यमान वृक्षों के शिखरों पर सञ्चरण करने वाला, (उदय) गिरि-शिखर का आश्रय लेने वाला सूर्य से उत्पन्न होने वाला, तारक मण्डल अपहरण (विनाश) करने वाला, अभिनव आलोक (प्रकाश) पुनः वन को व्याप्त कर रहा था।, जबकि प्रत्यूष (प्रभातवेला) स्पष्ट हो चुका था, जबकि थोड़ी देर में दिन के आठवें भाग अर्थात् आधे पहर का भागी बनकर सूर्य स्पष्ट प्रकाश वाला हो चुका था, जबकि शुक (पक्षियों के) समूह मनचाहे दिग्विभागों में (भोजनार्थ) प्रस्थान कर चुके थे, जबकि घोसलों में छिपे बैठे-चुप्पी साधे हुए शुकशावकों से संकुल होने पर भी वह सेमर का पेड़ (अकेला होने के कारण बच्चों की) निश्शब्दता के कारण सुनसान प्रतीत हो रहा था, जबकि पिताजी अपने नींड में ही विद्यमान थे, जबकि उगते हुए पक्ष समूहवाला (किन्तु) बाल्यावस्था के कारण असमर्थ मैं पिताजी के ही निकटवर्ती कोटर में चला गया था।

संस्कृतव्याख्या - **कमलवनप्रबोधमङ्गलपाठकानाम्**=कमलानां नलिनानां वनं विपिनं तस्य प्रबोधे जागरणे विकसने वा मङ्गलपाठकाः प्रशस्तिवाचकाः तेषाम्, **इभगण्डडिण्डिमानाम्**=इभानां हस्तिनां गण्डः यः कपोलभागः सः डिण्डिमः पटहः येषां तेषाम्, **कुमुदोदरेषु**=कुमुदानां कैरवाणाम् उदरेषु मध्येषु, **विघटमानदलपुटनिरुद्धपक्षसंहतीनाम्**=विघटमानानि संकुचन्ति यानि दलपुटानि पत्रसंपुटानि तेषु निरुद्धा अवरुद्धा पक्षसंहतिः छन्दसमूहः येषां तेषाम्, **मधुलिहाम्**=मधु पुष्परसं लिहन्ति स्वदन्ते इति मधुलिहः मधुकराः तेषाम्, **हुंकारेषु**=क्रोधवशात् हुंकृतिषु, **उच्चरत्सु**=उत्सर्पत्सु सत्सु, **ऊषरशय्याधूसरक्रोडरोमराजिसु**=ऊषरा अतृणा या शय्या शयनस्थली तस्याः धूसरा घूमवर्णा क्रोडस्य उदरस्य रोम्णां लोम्नां राजिः पङ्क्तिः येषां तेषु, **वनमृगेषु**=वनानां विपिनानां मृगेषु हरिणेषु, **शनै-शनैः**=मन्दं मन्दम्, **प्रभातशिशिरवाय्वाहतम्**=प्रभातस्य प्रातः कालस्य यः शिशिरः शीतलः

वायुः पवनः तेन आहतम् पीडितम्, **उत्तप्तजतुरसाश्लिष्टपक्ष्ममालम् इव**=उत्तप्तस्य उष्णीकृतस्य जतुनः लाक्षायाः रसः द्रवः तेन आश्लिष्टा लिप्ता पक्ष्मणां नेत्ररोम्णां माला पंक्तिः यस्य तद् इव, **सशेषनिद्राजिह्मतारम्**=सशेषा अवशिष्टा या निद्रा स्वापः तया जिह्मा वक्रा तारा कनीनिका यस्य तत्, **चक्षुः**=नेत्रम्, **उन्मीलयत्सु**= उद्‌घाटयत्सु सत्सु, **वनचरेषु**= वनेषु विपिनेषु चरन्ति विहरन्तीति तेषु वनजीवेषु, **इतस्ततः**= चतुर्दिक्षु, **संचरत्सु**=विहरत्सु, **श्रोत्रहारिणि**=श्रोत्रं कर्णं हरति आकर्षतीति तच्छीलं तस्मिन् आकर्षके, **पम्पासरःकलहंसकोलाहले**=पम्पासरसः पम्पाभिधानस्य सरोवरस्य ये कलहंसाः कादम्बाः तेषां कोलाहलः कलकलः तस्मिन्, **विजृम्भमाणे**= विवर्धमाने सति, **नर्तितशिखण्डिमण्डले**=नर्तितं नृत्यं प्रापितं (उल्लासितम्) शिखण्डिनां मयूराणां मण्डलं समूहः येन तस्मिन्। **मनोहरे**=चित्ताकर्षके, **वनगज-कर्णताल शब्दे**=वनगजानां जङ्गलहस्तिनां कर्णतालस्य कर्णः ताल इव तस्य अथवा कर्णयोः तालः ध्वनिविशेषः गीतवाद्यपादन्यासानां कालक्रिययोः नियमहेतुः यस्य शब्दः निनादः तस्मिन्, **समुल्लसति**=प्रसरति सति, **क्रमेण च**=क्रमशः च, **गगनतलम्** =आकाशतलम्, **अवतरतः**=अवरोहतः, **दिवसकरवारणस्य**=दिवसकरः सूर्यः स एव वारणः हस्ती तस्य, **अवचूडचामरकलापे इव**=अवगता अधोगता चूडा शिखा यस्य तादृशः चामरकलापः चमरीरोमगुच्छकं तस्मिन् इव, **उपलक्ष्यमाणे**= विलोक्यमाने, **किरणजाले**=किरणानां रश्मीनां जालं समूहः तस्मिन्, **मञ्जिष्ठाराग-लोहिते**=मञ्जिष्ठा ओषधिविशेषः तस्या रागः रक्तिमा तेन लोहिते तद्वद् वा लोहिते रक्तवर्णे जाते सति, **भगवति**=ऐश्वर्यशालिनि, **सवितरि**=भास्करै, **शनैः-शनैः**=मन्दं मन्दम्, **उदिते**=उदयं प्राप्ते सति, **पम्पासरपर्यन्ततरुशिखरसंचारिणि**= पम्पासरसः तन्नाम्नो जलाशयस्य पर्यन्ततरवः प्रान्तवृक्षाः तेषां शिखरेषु श्रृङ्गेषु संवरतीति तच्छीलः तस्मिन्, **अध्यासितगिरिशिखरे**=अध्यासितं पूर्वम् आश्रितं गिरेः उदयाचलस्य किष्किन्धस्य च शिखरं श्रृङ्गं येन तस्मिन्, **दिवसकरजन्मनि**=दिवसकरः भास्करः तस्मात् उत्पत्तिः यस्य तस्मिन्, **हततारे**=हताः अस्तंगमितः ताराः नक्षत्राणि येन तस्मिन्, सुग्रीवपक्षे हताः गृहीताः तारा बालिपत्नी येन तस्मिन्, **बालातपे**=बालः प्रभातकालिक आतपः सूर्यप्रकाशः तस्मिन्, **कपीश्वरे इव**=कपीनां वानराणाम् ईश्वरः स्वामी सुग्रीवः तस्मिन् इव, **पुनः**=भूयः, **वनम्**=काननम्, **अभिपतति**= अभिगच्छति सति, **प्रत्यूषसि**=प्रातःकाले, **स्पष्टे जाते**=व्यक्ते भूते, **नचिरादिव**= क्षणानन्तरमिव, **भास्वति**=सूर्ये, **दिवसाष्टमभागभाजि**=दिवसस्य अहोरात्रस्य अष्टमः प्रहरात्मकः भागः अंशः तं भजति आश्रयति इति तस्मिन्, **भूते**=जाते सति, **शकुकुलेषु**=कीरवृन्देषु,

यथाभिमतानि=यथेप्सितानि, **दिगन्तराणि**=दिशाम् आशानाम् अन्तराणि मध्यानि दिग्विभागान् इत्याशयः, **प्रयातेषु**=प्रस्थितेषु, **तस्मिन्**=पूर्वोक्ते, **वनस्पतौ**=शाल्मलीवृक्षे, **कुलायनिलीननिभृतशुकशावकसनाथेऽपि**=कुलायेषु नीडेषु निलीनाः निविष्टाः निभृताः शान्ताः शुकशावकाः कीरशिशवः तैः सनाथेऽपि अलङ्कृतेऽपि, **निःशब्दतया**=निर्गतः शब्दः कोलाहलः यस्मात् स निःशब्दः तस्य भावः तत्ता तया नीरवतया, **शून्ये इव**=प्राणिरहिते इव, **ताते**=मम जनके, **स्वनीडावस्थिते एव**=स्वस्य आत्मनः नीडे कुलाये एव अवस्थिते विनिष्टे सति, **शैशवात्**=बाल्यात्, **असंजातबलसमुद्भिद्यमानपुटे**=असंजातम् अनुत्पन्नं बलम् उत्पतन्शक्तिः यस्य तादृशं समुद्भिद्यमानं प्रस्फुटम् पक्षपुटं पतत्रयुगलं यस्य तस्मिन्, **मयि**=वैशम्पायने च, **पितुः**=जनकस्य, **समीपवर्तिनि**=समीपं वर्तते इति तच्छीलः तस्मिन् निकटवर्तिनि, **कोटरगते**=वृक्षस्कन्धविवरस्थिते।

टिप्पणी - **इभगण्डडिण्डिमानाम्**=हाथियों के गण्डस्थल को नगाड़ा समझकर उन पर चोब लगाने वाले नक्कारचियों की भाँति गुंजार करने वाले। **विघटमान**-संकुचित होते हुए, वि+घट्+शानच्। **सशेषनिद्राजिह्मतारम्**-निद्रा न पूरी होने के कारण तिरछी पुतलियों वाला नेत्र, नींद पूरी न होने पर अलसाई हुई आँखें बाँकी पुतलियों से देखा करती हैं। **विजृम्भमाणे**-शनैः-शनैः उभरने लगा, जागने लगा। **दिवसकरजन्मनि**-दिनकर से जन्म लेने वाले आतप तथा सुग्रीव, रामायण के अनुसार सुग्रीव सूर्य का पुत्र था। योगध्यान में मग्न सुमेरुपर्वत पर स्थित भगवान् ब्रह्मा के नेत्रों से एव बार अकस्मात् अश्रुपात हुआ उससे एक सुन्दर वानरी उत्पन्न हुयी। उसी के द्वारा सूर्यदेव का औरस पुत्र सुग्रीव तथा इन्द्रदेव का औरस पुत्र बाली हुआ। प्रत्यूषसि-उषाकाल, दिन का आरम्भकाल (प्रत्यूषोऽहर्मुखं कल्यमुषः प्रत्युषसी अपि, अमरकोष) सूर्योदय से पूर्व की छः घड़ियों का नामकरण इसप्रकार है-'**पञ्चपञ्च**' उषः कालः षट्पञ्चारुणोदयः। सप्तपञ्च प्रभातः स्यात् शेषे सूर्योदयः स्मृतः'॥ **दिवसाष्टमभाग**-दिन का आठवाँ भाग जिसे प्रहर कहते हैं इसमें तीन घण्टे या ७॥ घड़ी होती है। यहाँ पहले ६० घड़ी के अहोरात्र के अन्तिम भाग को आठवाँ भाग कहा गया है। इसी में सूर्योदय की ३ घडियाँ भी आ जाती है। **असंजात......पक्षपुटे**-मेरे (वैशम्पायन) के पंख अभी फूट रहे थे, उनमें उड़ने की शक्ति नहीं आ पाई थी। **समुद्भिद्यमान**-सम् +उद्+भिद्+शानच्। '**इभगण्ड-डिण्डिम**' यहाँ निरङ्गकेवलरूपकालङ्कार। तालशब्दे में उपमालङ्कार तथा 'शून्य इव' में क्रियोत्प्रेक्षालङ्कार है।

सहसैव तस्मिन् महावने संत्रासितसकलवनेचरः सरभससमुत्पतत्पतत्रिपक्षपुटशब्दसंततः भीतकरिपोतचीत्कारपीवरः प्रचलितमत्तालिकुलक्कणितमांसलः परिभ्रमदुद्धोणवनवराहरवघर्घरो गिरिगुहासुप्तवप्रबुद्धसिंहनिनादोपवृंहितः, कम्पयन्निव तरून् भगीरथावतार्यमाणगङ्गाप्रवाहकलकलबहलो भीतिवनदेवताकर्णितो मृगयाकोलाहलध्वनिरुदचरत्। आकर्ण्य च तमहमश्रुतपूर्वमुपजातवेपथुरर्भकताया जर्जरितकर्णविवरो भयविह्वलः समीपर्तिनः पितुः प्रतीकारबुद्ध्या जराशिथिलपक्षपुटान्तरमविशम्।

हिन्दी अनुवाद -(कि तभी) अचानक ही उस महावन में-समस्त वनचरों को भयभीत कर देने वाली, वेगपूर्वक उड़ते हुये पक्षियों के पक्ष-समूह से विस्तीर्ण (फैलायी गई), डरे हुए गजशावकों की चीत्कार से परिपुष्ट, (भयवश) उड़े हुए मदमत्त भ्रमर समुदाय की 'भनभनाहट' से भरी पूरी, इधर-उधर सञ्चरण करते हुए, ऊँचे थूथनों (नासिकाओं) वाले वनैले सूकरों की 'घरघराहट' से कठोर पर्वत की गुफा में सोये (तथा बाद में) उठे वनकेसरी की दहाड़ से बढी हुई, वृक्षों को कँपाती हुई-सी, (महाराज) भगीरथ द्वारा (भूलोक पर) उतारी जाती हुई भगवती गङ्गा के धाराकोलाहल की भाँति प्रचुर (कोलाहल वाली) तथा डरी हुई वनदेवियों द्वारा सुनी गई-मृगया कोलाहल की ध्वनि फूट पड़ी।

पहले कभी न सुनी गई उस (भयावह) ध्वनि को सुनकर, उत्पन्न हुई कँपकँपी वाला, बच्चा होने के कारण (उस प्रकार का कोलाहल सुनकर ही) बधिरीभूत कर्णकुहरों वाला भयविह्वल मैं प्रतिकार-बुद्धि अर्थात् भय से छुटकारा पाने के विचार से समीपवर्ती पिताजी की वृद्धावस्था के कारण ढीले-ढीले पंखों के भीतर घुस गया।

संस्कृतव्याख्या - **तस्मिन्**=पूर्वोक्ते, **महावने**=महारण्ये, **सहसा एव**=अकस्मात् एव, **संत्रासितसकलवनेचरः**=संत्रासिताः भयं प्रापिताः सकलाः संपूर्णाः वनचराः काननचारिणो जीवाः येन सः, **सरससमुत्पतत्पतत्रिपक्षपुटशब्दसंततः**=रभसेन सह सरभसं सवेगं समुत्पतन्तः उड्डीयमानाः पतत्रिणः खगाः तेषां पक्षपुटानि पतत्रसंपुटानि तेषां शब्दः ध्वनिः तेन, **संततः**=अधिकं विस्तृतः, **भीतकरिपोतचीत्कारपीवरः**=भीताः त्रस्ताः ये करिपोतः गजशावकाः तेषां चीत्कारेण व्यथाशब्देन पीवरः संपुष्टः, **प्रचलितलताकुलमत्तालिकुलक्कणितमांसलः**=प्रचलिताः आन्दोलिताः लताः वल्लर्यः तासुः आकुलाः उद्विग्नाः मत्ताः क्षीवाः अलयः मधुपाः

तेषां कुलं समूहः तस्य क्वणितेन गुञ्जितेन मांसलः पुष्टः, **परिभ्रमदुद्घोणवनवराहर-वघर्घरः**=परिभ्रमन्तः परिभ्रमणं कुर्वन्तः उद्घोणाः उद्गता घोणाः येषां ते उच्चनासिकाः वनवराहाः विपिनसूकराः तेषां रवेण शब्देन घर्घरः कठोरः, **गिरिगुहासुप्तप्रबुद्धसिंह-निनादोपबृंहितः**=गिरीणां पर्वतानां गुहाः कन्दराः तासु सुप्ताः क्षायिताः पश्चाच्च प्रबुद्धाः जागरिताः सिंहा मृगेन्द्राः तेषां निनादेन ध्वनिना उपबृंहितः बृद्धिं प्राप्तः, **तरून्**=पादपान् **कम्पयन् इव**=आन्दोलयन् इव, **भगीरथावतार्यमाणगङ्गाप्रवाह-कलकलबहलः**=भगीरथेन सगरवशंजेन राज्ञा अवतार्यमाणा अवरोह्यमाणा या गङ्गा जाह्नवी तस्याः प्रवाहः स्रोतः तस्य कलकलः प्रवाहध्वनिः तद्वत् बहलः बहुलीभूतः अनेकध्वनिमिश्रणादिति भावः, **भीतवनदेवताकर्णितः**=भीताः त्रस्ताः वनदेवताः= अरण्याधिष्ठात्रीदेव्यः ताभिः आकर्णितः श्रुतः, **मृगयाकोलाहलध्वनिः**=मृगया आखेटः तस्याः कोलाहलः कल्लोलः तस्य ध्वनिः स एव वा ध्वनिः शब्दः, **उदचरत्**=उदतिष्ठत्, **अहं च तम्**=पूर्वोक्तम्, **अश्रुतपूर्वम्**=पूर्वं श्रुतं श्रुतपूर्वम् न श्रुतपूर्वम् अश्रुतपूर्वम् नवीनं शब्दम्, **आकर्ण्य**= श्रुत्वा, **उपजातवेपथुः**=उपजातः उत्पन्नः वेपथुः कम्पनं यस्य सः, **अर्भकतया**= शिशुत्वेन, **जर्जरितकर्णविवरः**=जर्जरिते विदीर्णे कर्णयोः श्रोत्रयोः विवरे छिद्रे यस्य सः, **भयविह्वलः**=भयेन भीत्या विह्वलः व्याकुलः, **प्रतीकारबुद्ध्या**=प्रतीकारः रक्षणोपायः तस्य बुद्ध्या विचारेण, **समीपवर्तिनः**= निकटस्थितस्य, **पितुः**=तातस्य, **जराशिथिलपक्षपुटान्तरम्**=जरया परिणतवयसा शिथिलं श्लथम् अदृढं पक्षपुटं पतत्रसंपुटं तस्य अन्तरम् अभ्यन्तरम्, **अविशम्**= प्रविष्टोऽभवम्।

टिप्पणी – महच्च तद्वनं चेति महावनं तस्मिन्–महावने। **पतत्री**–पक्षी, पतन्तं त्रायते इति पत्रम् पक्षः तद् अस्य अस्तीति पतत्री। **करिपोत**–हाथी का बच्चा। **उद्घोण**–ऊपर को थूंथ किये हुए जंगली सुअर। **घोणा**–नासिका 'क्लीबे घ्राणे गन्धवहा घोणा नासा च नासिका'(अमरकोष)। **भगीरथ......बहलः**–भगीरथ के द्वारा लायी हुई गङ्गा के प्रवाह की कलकल ध्वनि के तुल्य सघन पुञ्जीभूत ध्वनि। पौराणिक मान्यता है कि कपिलमुनि के शाप से दग्ध सगर के साठ हजार पुत्रों के मोक्ष के लिए राजा भगीरथ गङ्गा जी को ब्रह्मलोक से पृथ्वीलोक पर लाये थे। आते समय गङ्गा के प्रवाह की भयंकर कलकल ध्वनि से मृगया के भयकारी कोलहल की तुलना की गई है। **प्रतीकारबुद्ध्या**–रक्षा की भावना से, (प्रतिकृञ्+ घञ्)। 'कम्पयन्निव तरून्' में **क्रियोत्प्रेक्षालङ्कार** है। **अविशम्**–विश् धातु लङ् उ० पु० ए० व०।

अनन्तरं च सरभसमितो गजयथपतिलुलितकमलिनीपरिमलः, इतः क्रोडकुलदश्यमानभद्रमुस्तारसामोदः, इतः करिकलभभज्यमानसल्लकीकषाय-गन्धः, इतो निपतितशुष्कपत्रमर्मरध्वनिः इतो वनमहिषविषाणकोटिकुलि-शभिद्यमानवल्मीकधूलिः इतो मृगकदम्बकम्, इतो वनगजकुलम्, इतो वनवराहयूथम्, इतो वनमहिषवृन्दम्, इतः शिखण्डिमण्डलविरुतम्, इतः कपिञ्जलकुलकलकूजितम्, इतः कुररकुलक्वणितम्, इतो मृगपतिनखभि-द्यमानकुञ्जररसितम्, इयमार्द्रपङ्कमलिना वराहपद्धतिः, इयमभिनवशष्पक-वलरसश्यामला हरिणरोमन्थफेनसंहतिः इयमुन्मदगन्धगजगण्ड-कण्डूयनपरिमलनिलीमुखरमधुकरविरुतिः, एषा निपतितरुधिरबिन्दुसिक्त-शुष्कपत्रपाटला रुरुपदवी, एतद् द्विरदचरणमृदितविटपपल्लवपटलम्, एतत् खड्गिकुलक्रीडितम्, एष नखकोटिविलिखितविकटपत्रलेखो रुधिर-पाटलः करिमौक्तिकदलदन्तुरो मृगपतिमार्गः, एषा प्रत्यग्रप्रसूतवनमृगीगर्भरुधिरलोहिनी भूमिः, इयमटवीवेणिकानुसारिणी पक्षचरस्य यूथपतेर्मदजलमलिना संचारवीथी..।

हिन्दी अनुवाद – इसके अनन्तर मैंने शिकार में डूबे हुए, वृक्षों की सघनता के कारण अदृश्य शरीरों वाले जनसम्मर्द कानन को संक्षुब्ध कर देने वाला कोलाहल सुना, जो (लोग) कि यहाँ गजराज द्वारा विदलित कमलिनी की महँक आ रही है, इधर सूकर-समूह द्वारा चबाए जाते हुए नागरमोथे के रस की गन्ध है, इस ओर करिशावकों द्वारा आमर्दित की जाती हुई सल्लकी की कसैलीवास है, इस स्थान पर गिरे हुए सूखे पत्तों की 'मर्मराहट' है, यहाँ जंगली भैंसों के श्रृंगाग्रभाग रूपी वज्र से छिन्न भिन्न की गई (दीमक की) बांबियों की धूल है, इधर हरिणों का झुण्ड है, इधर जंगली हाथियों का जत्था है, यहाँ बनैले सुअरों की टोली है। यहाँ बनैले भैंसों का समूह है, इस ओर मयूर मण्डली की 'पिहकन' (बोली) है; इस ओर सफेद तीतरों के दल का मधुर कूजन है, इस ओर टिटहरियों के समूह का कलरव है, यहाँ वन केसरी के नखों से विदीर्ण किये जाते हुए कुम्भमण्डल वाले हाथियों की चिंघाड़ है, यह गीले कीचड़ से मैला बनाया गया वनसूकरों का मार्ग है, यह अचिरोत्पन्न नरम घास के कौरों के रस से सँवराया हुआ हरिणों के रोमन्थन (पागुर) से उत्पन्न फेन-समूह है, यह मदोन्मत्त गन्धगजों के गण्डस्थल खुजलाने से उत्पन्न सुरभि में आसक्त वाचाल भ्रमरों की 'भनभनाहट' है, यह गिरे हुए रक्त बिन्दुओं से सींचे गये सूखे पत्र-समूह के कारण श्वेत-रक्त बनी हुई रुरु मृगों की

सरणि है, यह हाथियों के पैरों से विदलित किये गये तरुपल्लवों का ढेर है, यह गैंडों के समूह द्वारा खेला गया (स्थान) है, यह नखराग्रभाग से चित्रित भयावह पत्राकार चिह्नों (छापों) वाला रक्त के कारण पाटलवर्णी तथा (मारे गये) हाथियों के मुक्तासमूह से उच्चावच बना हुआ मृगपति-सिंह का मार्ग है, यह अभी-अभी व्यायी हुई वनमृगो के गर्भ रक्त से लाल रंगवाली जमीन है, यह दल से बिछुड़े हुए यूथपति-गजराज के मदजल से मलिन बनी हुई तथा वनस्थली की वेणी का अनुकरण करने वाली अर्थात् उच्चावच (उस गजराज की) सञ्चरणवीथी है।

संस्कृतव्याख्या - **अनन्तरम्**=पितुः पक्षपुटान्तरप्रवेशानन्तरम्, **च**= पूर्वसमुच्चयार्थकोऽयम्। अत्र लोकसमूहस्य कोलाहलमश्रृणवमिति दूरतरेण संबंधः। **सरभसम्**=सवेगम् **इतः**=अस्मात् स्थानात्, **गजयूथपतिलुलितकमलिनी-परिमलः**=गजानां हस्तिनां यूथस्य समूहस्य पतिः स्वामी तेन लुलिताः मर्दिताः कमलिन्यः नलिन्यः तासां परिमलः गन्धः, **इतः**=अस्मात् प्रदेशात्, **क्रोडकुलदश्य-मानभद्रमुस्तारसामोदः**=क्रोडानां वराहाणां कुलेन समूहेन दश्यमानाः भक्ष्यमाणाः भद्रमुस्ताः गुन्द्राः घासविशेषाः तासां रसस्य द्रवस्य आमोदः गन्धः, इतः **करिकलभभज्यमानसल्लकीकषायगन्धः**=करिणां हस्तिनां शलभाः शावकाः तैः भज्यमानाः मर्द्यमानाः सल्लक्यः गजप्रियाः घासविशेषाः तासां कषायः तूवरः गन्धः आमोदः, इतः **निपतितशुष्कपत्रमर्मरध्वनिः**=निपतितानि पतितानि शुष्कपत्राणि नीरसपर्णानि तेषां मर्मरध्वनिः मर्मरध्वानः, इतः **वनमहिषविषाणकोटिकुलिश-भिद्यमानवल्मीकिधूलिः**=वनमहिषाः विपिनसैरिभाः तेषां विषाणयोः श्रृंगयोः कोटिः अग्रभागः सा एव कुलिशं भिदुरं तेन भिद्यमानानि विदार्यमाणानि वल्मीकानि मृत्तिकास्तूपाः तेषां धूलिः रेणुः, इतः **मृगकदम्बकम्**=मृगाणां हरिणानां कदम्ब एव कदम्बकम् समूहः इतः **वनगजकुलम्**=वनगजानां विपिनहस्तिनां कुलं समूहः, इतः **वनवराहयूथम्**=वनवराहाणां जङ्गलसूकराणां यूथं कादम्बकम्, **इतः वनमहिषवृन्दम्**=वनमहिषाणां जङ्गलसैरिभाणां वृन्दं कदम्बकं, **इतः शिखण्डिमण्डलविरुतम्**=शिखण्डिनां मयूराणां, **मण्डलम्**=समूहः तस्य विरुतं केका, इतः **कपिञ्जलकुलकलकूजितम्**=कपिञ्जलानां गौरतित्तिराणां कुलं समूहः तस्य कलं सुमधुरं कूजितं स्वनितम्, **इतः कुररकुलक्वणितम्**=कुरराणां मत्स्यनाशनानां कुलस्य समूहस्य क्वणितं रणनम्, इतः **मृगपतिनखभिद्यमानकुम्भ-कुञ्जररसितम्**=मृगपतिः सिंहः तस्य नखाः करजाः तैः भिद्यमानः विदार्यमाणः कुम्भः शिरस्थगांसपिण्डः येषां ते कुञ्जराः हस्तिनः तेषां रसितं चीत्कारः, **इयम्**=एषा

पुरो दृश्यमाना, **आर्द्रपङ्कमलिना**=आर्द्रः क्लिन्नः पङ्ककर्दमः तेन मलिना मलीमसा, **वराहपद्धतिः**=वराहाणां वनसूकराणां पद्धतिः मार्गः, **इयम् अभिनवशष्पकवलरस-श्यामला**=अभिनवाानि नवीनानि शष्पाणि बालतृणानि तेषां कवलाः ग्रासाः तेषां रसेन निर्यासेन श्यामला हरितवर्णा, **हरिणरोमन्थफेनसंहतिः**=हरिणानां मृगाणां रोमन्थः चर्वितस्य आकृष्य चर्वणं तेन तस्य वा फेनाः कफाः तेषां संहतिः संघातः, **इयम्**=एषा प्रत्यक्षश्रूयमाणा, **उन्मदगन्धगजगण्डकण्डूयनपरिमलनिलीनमुखरमधुकरविरुतिः** =उन्मदाः मदोत्कटाः गन्धगजाः मत्तमतङ्गजाः तेषां गण्डः कटः तस्य कण्डूयनं खर्जनं तेन यः परिमलः मदगन्धः तत्र निलीनाः निविष्टाः मुखराः वाचालाः मधुकराः मधुपाः तेषां विरुतिः गुञ्जनम्, **एषा**=इयं पुरो दृश्यमाना, **निपतितरुधिरबिन्दुसिक्त-शुष्कपत्रपाटला**=निपतिताः पतिताः रुधिरबिन्दवः शोणितपृषताः तैः सिक्तानि आर्द्री-कृतानि यानि शुष्कपत्राणि नीरसपर्णानि तैः पाटला श्वेतरक्ता, **रुरुपदवी**=रुरुमृगमार्गः, **एतद्**=इदं पुरतः स्थितम्, **द्विरदचरणमृदितविटपपल्लवपटलम्**=द्वौ रदो दन्तौ येषां ते द्विरदाः करिणः तेषां चरणाः पादाः तै मृदितानि लुलितानि विटपानां वृक्षशाखानां पल्लवानि किसलयानि तेषां पटलं समूहः, **एतत्**=इदं दृश्यमानम्, **खड्गिकुलक्रीडितम्** =खड्गिनां गण्डकानां, कुलस्य=समूहस्य क्रीडितं निहतम्, **एषः**=अयं दृश्यमानः, **नखकोटिविलिखितविकटपत्रलेखः**=नखानां पुनर्भवानां कोट्यः अग्रभागाः ताभिः विलिखताः चित्रिताः विकटाः भयङ्कराः पत्रलेखाः पत्ररचनाः यत्र सः, **रुधिरपाटलः** =रुधिरेण शोणितेन पाटलः श्वेतरक्तः, **करिमौक्तिकदलदन्तुरः**=करीणां गजानां मौक्तिकानि मुक्ताफलानि तेषां दलानि खण्डानि तैः दन्तुरः उन्नतावनतः, **मृगपतिमार्गः** =सिंहसञ्चरणपथः, **एषा**=पुरोदृश्यमाना, **प्रत्यग्रप्रसूतवनमृगीगर्भरुधिर-लोहिनी**=प्रत्यग्रप्रसूता नूतनप्रसूतवती या वनमृगी विपिनहतिणी तस्यः गर्भ : भ्रूणः तस्य रुधिरं शोणितं तेन लोहिनी रक्ता, **भूमिः**=पृथ्वी, **इयम् अटवीवेणिकानुसारिणी**= अटवी अरण्यानी तस्याः वेणिका ग्रथितचूडा ताम् अनुसरति अनुकरोतीति तच्छीला, **पक्षचरस्य**=पक्षेण निजमण्डलेन सह चरति विहरति इति पक्षचरः मण्डलचारी तस्य, **यूथपतेः**=यूथस्य मण्डलस्य पतिः स्वामी तस्य गजेन्द्रस्य, **मदजलमलिना**= मदजलेन दानवारिणा मलिना कृष्णवर्णा, **संचारवीथी**=संचारस्य वीथीसंचारवीथी= विहरणमार्गः।

टिप्पणी – **गजयूथपतिः**–हाथियों का यूथपति। यूथ शब्द पशु–पक्षियों के समूह के लिए प्रयुक्त होता है। (सजातीयैः कुलं यूथं तिरश्चां पुन्नपुंसकम्, अमरकोष)। **लुलित**–मसली हुई, झुलसी हुई। **परिमल**–गन्ध, किसी वस्तु के मसलने से

उत्पन्न गन्ध का नाम परिमल है। (विमर्दोत्थे परिमलो गन्धे जनमनोहरे)। आमोदः सोऽतिनिर्हारी.......॥ (अमरकोष) वह गन्ध अत्यन्त आकर्षक होने पर आमोद कही जाती है। **मुस्ता**-नागरमोथा, **कपिञ्जल**-चातकपक्षी:, 'कपिञ्जलः चातकपक्षी' इति शब्दकल्पद्रुमः। **कलभ**-हाथी का बच्चा (कलभः करिशावकः, अमरकोष)। **खड्गिकुलक्रीडितम्**-गैंडों के समूह के खेलने का स्थान, यहाँ क्रीडित शब्द में अधिकरण अर्थ में क्त प्रत्यय हुआ है। **दन्तुर**-ऊँचा-नीचा। **प्रत्यग्रप्रसूता**-नयी जच्चा, तुरन्त व्यायी हुई। **वेणिका**-वेणी, गुथी हुयी चोटी। **पक्षचर**-मण्डल के साथ विचरण करने वाला सरदार। **सञ्चारवीथी**-गमनमार्ग। **वनमहिष......धूलिः**- यहाँ लुप्तोपमा तथा रूपक का सन्देहसङ्कर है।

चमरीपङ्क्तिरियमनुगम्यताम्, उच्छुष्कमृगकरीषपांसुला त्वरिततरमध्यास्य-तामियं वनस्थली, तरुशिखरमारुह्यताम्, आलोक्यतां दिगियम्, आकर्ण्यतामयं शब्दः, गृह्यतां धनुः, अवहितैः स्थीयताम्, विमुच्यतां श्वान इत्यन्योन्यमभिवदतो मृगयासक्तस्य महतो जनसमूहस्य तरुगहनान्तरितविग्रहस्य क्षोभितकाननं कोलाहलमश्रृणवम्।

हिन्दी अनुवाद - चमरी गायों की इस टोली का पीछा करो, मृगों की सूखी मेंगनियों की रज से भरी गयी इस वनस्थली पर शीघ्र ही पड़ाव डाल दो, पेड़ों की चोटी पर चढ़ जाओ, इस दिशा की ओर देखो,यह शब्द सुनो, धनुष ले लो, सावधान हो जाओ, कुत्ते छोड़ दो, इस प्रकार आपस में कहते हुए मृगया में आसक्त और वृक्षों के झुरमुट तें शरीर को छिपाये हुए महान् जनसमूह का वन में खलबली मचा देने वाला कोलाहल मैंने सुना।

संस्कृतव्याख्या - **इयम्**=प्रत्यक्षोपलक्ष्यमाणा, **चमरीपङ्क्तिः**=चमर्याख्य-मृगराजिः, **अनुगम्यताम्**-अनुव्रज्यताम्। **इयं**=पुरो दृश्यमाना, **उच्छुष्कमृगकरीषपां-सुला**=उच्छुष्काः अत्यन्तनीरसाः मृगकरीषाः हरिणपुरीषाः तैः पांसुला सधूलीका, **वनस्थली**=काननभूमिः , **त्वरिततरम्**=शीघ्रतरं, **अध्यास्यताम्**=अवलम्ब्यतां, **तरुशिखरम्**=तरूणां पादपानां शिखरं श्रृङ्गम्, **आरुह्यताम्**=आरोहणविषयीक्रियतां, **इयं दिक्**=एषा काष्ठा, **आलोक्यताम्**=विलोक्यतां, **अयं शब्दः**=ध्वनिः, **आकर्ण्यताम्**=श्रूयतां **धनुः**=चापः, **गृह्यताम्**=आदीयतां, **अवहितैः**=सावधानैः **स्थीयताम्**=अवस्थीयतां उपविश्यतां वा, **श्वानः**=कौलेथयकाः, **विमुच्यन्ताम्**= विसृज्यन्तां, **इति**=एवं विधम्, **अन्योन्यम्**=परस्परम्, **अभिवदतः**=संलपतः, **मृगयासक्तस्य**= मृगया आखेटः तत्र सक्तस्य संलग्नस्य, **तरुगहनान्तरितविग्रहस्य**=

तरूणां वृक्षाणां गहनं निकुञ्जः तेन अन्तरिताः आच्छादिताः विग्रहाः शरीराणि यस्य तस्य, **महतः**=विशालस्य, **जनसमूहस्य**=जनानां लोकानां समूहः तस्य आखेटिकमण्डलस्य, **क्षोभितकाननम्**=क्षोभितं संचालितं काननं वनं येन तम्, **कोलाहलम्**=कलकलम्, **अश्रृणवम्**=अश्रौषम्।

टिप्पणी - **चमरी**=मृगविशेष, इसकी पूँछ के बालों से चामर बनाया जाता है। **अवहितैः**-सावधान(अव-धा+क्त, धा को हि आदेश)। **विग्रह**-शरीर। **अभिवदतः**-अभि+वद्+शतृ; ष० ए० व०।

अथ नातिचिरादेवानुलेपनार्द्रमृदङ्गध्वनिधीरेण गिरिविवरविजृम्भितप्रतिनिनादगम्भीरेण शबरशरताडितानां केसरिणां निनादेन, संत्रस्तयूथमुक्तानामेकाकिनां च संचरतामनवरतकरास्फोटमिश्रेण जलधररसितानुकारिणा गजयूथपतीनां कण्ठगर्जितेन सरभससारमेयविलुप्यमानावयवानामालोलकातरतरलतरतारकाणामेणकानां च करुणकूजितेन, निहितयूथपतीनां वियोगिनीनामनुगतकलभानां च स्थित्वास्थित्वा समाकर्ण्य कलकलमुत्कर्णपल्लवानामितस्ततः परिभ्रमन्तीनां प्रत्यग्रपतिविनाशशोकदीर्घेण करिणीनां चीत्कृतेन, कतिपयदिवसप्रसूतानां च खड्गिधेनुकानां त्रासपरिभ्रष्टपोतकान्वेषिणीनामुन्मुक्तकंठमारसन्तीनां क्रन्दितेन, तरुशिखरसमुत्पतितानामाकुलाकुलचारिणां च पत्ररथानां कोलाहलेन,..............।

हिन्दी अनुवाद - इसके अनन्तर थोड़ी ही देर में-(पिसान आदि का) अनुलेपन के कारण गीले मृदङ्ग की ध्वनि के समान गम्भीर, पर्वत-कन्दराओं में फैली हुई प्रतिध्वनियों के कारण मन्द्रता को प्राप्त हुई, किरातों के बाणों से व्यथित किये गये वनकेशरियों की दहाड़ से, संत्रस्त जत्थे से बिछुड़े हुए अकेले पड़े हुए-भागदौड़ करते हुए गजराजों के अनवरत शुण्डाघात से संचलित तथा मेघगर्जन का अनुकरण करने वाले कण्ठ गर्जन (चिंग्घाड़) से तीव्रगामी (शिकारी) कुत्तों द्वारा नोचे जाते हुए अंग-प्रत्यङ्गों वाले अतएव चञ्चल, कातर एवं अतिशय तरल (अश्रुपूर्ण) पुतलियों वाले हरिणों के करुण शब्द से, मारे गये (अपने स्वामिभूत) यूथपतियों वाली-विछोहभरी-पीछे-पीछे चलते हुए कलभों (करिशावकों) से मुक्त-रुक-रुक कर (पूर्वोक्त)कोलाहल को सुनकर उठे हुए (उतरे हुए) कर्णपल्लवों वाली-चारों ओर परिभ्रमण करती हुई हथनियों की तात्कालिक पतिविनाश से उत्पन्न शोक के कारण दीर्घ बनी हुई चीत्कार से, कुछ ही पहले की व्यायी हुई संत्रास (भय) के कारण खोये हुए (स्तनन्धय) शावकों को खोजती हुई गैंडियों

के उन्मुक्तकण्ठ (गलाफाड़) आक्रन्दन से, वृक्षों के शिखर से उड़े हुए तथा अत्यन्त व्याकुल होकर चलने वाले विहगों के कलकल शब्द से।

संस्कृतव्याख्या - **अथ**=कोलाहलश्रवणानन्तरम्, **नातिचिरात् एव**=स्वल्प-समयेनैव, **शबरशरताडितानाम्**=शबराः किराताः तेषां शराः बाणा तैः ताडिताः पीडिताः तेषाम्, **केसरिणाम्**=सिंहानाम्, **अनुलेपनार्द्र मृदङ्गध्वनिधीरेण**=अनुलेपनं द्रवद्रव्यलेपनं तेन आर्द्रःस्विन्नः मृदङ्गः मुरजः तस्य ध्वनिः ध्वानः तद्वत् धीरेण गम्भीरेण, **गिरिविवरविजृम्भितप्रतिनिनादगम्भीरेण**=गिरिविवरेषु पर्वतकन्दरासु विजृम्भितः प्रसृतः प्रतिनिनादः प्रतिध्वनिः तेन हेतुना गम्भीरेण सान्द्रेण, **निनादेन**= हुंकारेण, **संत्रस्तयूथमुक्तानाम्**=संत्रस्तं भयभीतं यूथं मंडलं तस्मात् मुक्तानां पृथग्भूतानाम्, **एकाकिनाम्**=यूथरहितानाम्, **संचरतां**=परिभ्रमताम्, **गजयूथपतीनां**= गजानां यूथपतयः तेषां हस्तिपक्षचराणाम्, **अनवरतकरास्फोटमिश्रेण**=अनवरतं निरन्तरं यः करास्फोटः शुण्डाप्रहारः तेन मिश्रेण संमिलितेन, **जलधररसितानुकारिणा** =जलधराः मेघः तेषां रसितं गर्जनम् अनुकरोति सादृश्यं भजते इति तच्छीलः तेन, **कण्ठगर्जितेन**=कण्ठस्य गलस्य गर्जितं गर्जनं तेन, **सरभससारमेयविलुप्यमाना-वयवानाम्**=सरभसं सवेगं सारमेयैः कुक्कुरैः। विलुप्यमानाः दश्यमानाः अवयवाः अङ्गानि येषां तेषाम्, **आलोलकातरतरलतरतारकाणां**=आलोलाः चञ्चलाः कातराः दीनाः तरलतराः अश्रुव्याप्ततराः ताराः कनीनिकाः येषां तेषां, **एणकानाम्**=मृगाणाम् **करुणकूजितेन**=करुणोत्पादकक्रन्दनेन, **निहतयूथपतीनां**=निहिताः मृताः यूथपतयः पक्षस्वामिनः यासां तासां, **वियोगिनीनां**=पतिवियोगिनीनाम्, **अनुगतकलभानां**= अनुगताः अनुसृताः कलभाः करिपोताः यासां तासाम्, **स्थित्वास्थित्वा**=भूयो भूयो विरम्य, **कलकलं**=कोलाहलम्, **समाकर्ण्य**=सम्यक् श्रुत्वा, **उत्कर्णपल्लवानां**=उद् ऊर्ध्वीकृताः कर्णपल्लवाः श्रोत्रकिसलयानि याभिः तासाम्, **इतस्ततः**=चतुर्दिक्षु, **परिभ्रमन्तीनां**=संचरन्तीनाम्, **करिणीनां**=हस्तिनीनां, **प्रत्यग्रपतिविनाशशोकदीर्घेण** =प्रत्यग्रः अभिनवः पतिविनाशः स्वामिमृत्युः तस्य शोकः करुणा तेन दीर्घेण विस्तृतेन, **चीत्कृतेन**=चीत्कारेण, **कतिपयदिवसप्रसूतानाम्**=कतिपये केचित् दिवसाः दिनानि तदा प्रसूताः कृतप्रसवाः तासाम्, **त्रासपरिभ्रष्टपोतकान्वेषिणीनाम्**= त्रासेन भयेन परिभ्रष्टाः यूथच्युताः पोतकाः अर्भकाः तान् अन्वेषयन्ति मार्गयन्ति इति तच्छीलाः तासाम्, **उन्मुक्तकण्ठं**=उन्मुक्तः कण्ठः यस्मिन् कर्मणि तत्, उन्मुक्तकण्ठं यथा स्यात् तथा अनिरुद्धगलं तारस्वरेणेत्याशयः, **आरसन्तीनाम्**=आरटन्तीनां, **खड्गिधेनुकानाम्**=खड्गिनः गण्डकाः तेषां धेनुकाः स्त्रियः तासां, **आक्रन्दितेन**=

रोदनशब्देन, **तरुशिखरसमुत्पतितानाम्**=तरूणां वृक्षाणां शिखराणि श्रृंगाणि तेभ्यः समुत्पतितानाम् उड्डीनाम्, **आकुलाकुलचारिणाम्**=आकुलाकुलं यथा स्यात् यथा चरन्तीति तच्छीलाः आकुलाकुलचारिणः अतिव्याकुलतया भ्रमणशीलाः तेषाम्, **पत्ररथानाम्**=पक्षिणाम्, **कोलाहलेन**=कलकलध्वनिना।

टिप्पणी – अनुलेपनार्द्रमृदङ्ग=मृदङ्ग या ढोल की ध्वनि को तीव्र करने के लिए उसके मुँह पर एक विशेष प्रकार का लेप किया जाता है।–'मृदङ्गो मुखलेपेन करोति मधुरध्वनिम्' ताजे लेप के कारण गीला मृदङ्ग और भी अधिक गम्भीर ध्वनि करता है। **करास्फोट**–सूँड फटकारना, हाथी पुनः पुनः सूँड मुख में देकर फिर झटके से बाहर फेंककर अपनी पीड़ा का प्राकट्य किया करते हैं। यहाँ वे अपने यूथ से बिछुड़ जाने के कारण करास्फोट द्वारा अपनी छटपटाहट प्रकट कर रहे हैं। **सारमेय**–कुत्ते, कश्यप प्रजापति की पत्नी सरमा की सन्तान होने से इन्हें सारमेय कहा जाता है। **खड्गिधेनुका**–गैंडों की मादायें, यद्यपि 'करिणी धेनुका वशा' तथा 'धेनुका तु करेण्वां च' अमरकोष के कथनानुसार केवल हथिनी को तथा चकारात् नवप्रसूता गौ को धेनुका कहा जाता है तथापि 'धयति लेढि नवजातं शिशुम् इति धेनुः,'नवजात शिशु को चाटने वाली' इस सामान्य अर्थ में प्रत्येक जाति की नवप्रसूता मादा को धेनु या धेनुका शब्द के द्वारा व्यवहार में बोला जाने लगा है–'खड्गिधेनुः, वडवधेनुः, ऐसे ही प्रयोग हैं। **पोतक**–शिशु। **पत्ररथ**–पक्षी, **'जलधर... गर्जितेन'** में लुप्तोपमालङ्कार है। **'सरभससारमेय'**–में वृत्त्यनुप्रास अलंकार है।

रूपानुसारप्रधावितानां च मृगयूणां युगपदतिरभसपादपाताभिहतायाः भुवः कम्पमिव जनयता चरणशब्देन, कर्णप्रान्ताकृष्टज्यानां च मदकलकुरर-कामिनीकण्ठकूजितकलशबलितेन शरनिकरवर्षिणां धनुषां निदानेन, पवनाहतिक्वणितधाराणामसीनां च कठिनमहिषस्कन्धपीठपातिनां रणितेन, शुनां च सरभसविमुक्तघर्घरध्वनीनां वनान्तरव्यापिना ध्वानेन सर्वतः प्रचलितमिव तदरण्यमभवत्।

हिन्दी अनुवाद - वन्य पशुओं के (वधार्थ) अनुगमन हेतु वेगपूर्वक दौड़े हुए शिकारियों के एक ही साथ अतिशय वेगपूर्वक (किये गये) पादविक्षेप से प्रताड़ित की गई पृथ्वी की मानों कँपकँपी उत्पन्न कर देने वाले चरणों के शब्द से, कानों के छोर तक खींची हुई डोरियों वाले तथा मद के कारण मनोज्ञभूत कुररी (टिटहिरी) के मधुर कूजन के समान रसपगी शरसमूह की वर्षा करने वाले धनुषों

की 'सनसनाहट' से, पवन के आघातवश शब्दायमान धारवाली तथा कठोर वनमहिष के स्कन्ध प्रदेश पर गिरने वाली तलवारों के शब्द से तथा वेगपूर्वक घर्घरध्वनि (गुर्राहट) उत्पन्न करने वाले (शिकारी) कुत्तों के वनान्तरव्यापी ध्वनि (शब्द) से वह वन डाँवाडोंल-सा हो उठा।

संस्कृतव्याख्या - **रूपानुसारप्रधावितानां**=रूपा: मृगा: तेषाम् अनुसारेण गगनक्रमेण प्रधावितानां चलितानाम्, **मृगयूणां**=मृगयन्ते पशून् इति मृगयव: किराता: तेषाम्, **युगपत्**=एकस्मिन् समये, **अतिरभसपादपाताभिहताया:**=अतिरभसेन अत्यन्तवेगेन य: पादपात: चरणविक्षेप: तेन अभिहता प्रताडिता यस्या:, **भुव:**=पृथिव्या:, **कम्पमिव**=वेपथुम् इव, **जनयता**=उत्पादयता, **चरणशब्देन**= पादध्वनिना, **कर्णान्ताकृष्टज्यानां**=कर्णान्तं श्रोत्रपर्यन्तम् आकृष्टा आहिता ज्या मौर्वी येषां तेषाम्, **शरनिकरवर्षिणां**=शराणाम् इषूणां निकर: समूह: तं वर्षन्ति मुञ्चन्ति इति तच्छीला: तेषाम्, **धनुषां**=चापानाम्, **मदकलकुररकामिनीकण्ठकूजित-कलशबलितेन**=मदेन उन्मादेन कला: सुमनोहरा: या: कुररकामिन्य: मत्स्यनाशन-सुन्दर्य: तासां कण्ठकूजितं गलकूजनं तस्य कल: मधुरध्वनि: तेन शवलित: मिश्रित: तेन, **निनादेन**=ध्वनिना, **पवनाहितक्वणितधाराणां**=पवनस्य वायो: आहति: आघात: तया क्वणिता: शब्दिता धारा तीक्ष्णाग्रभाग: यासां तासाम्, **कठिनमहिषस्कन्ध-पीठपातिनां**=कठिन: कठोर: महिषाणां सैरिभाणां स्कन्ध: बाहुशिर: स एव पीठं स्थलं तत्र पतन्तीति तच्छीला: तेषाम्, **असीनां**=खड्गानाम्, **रणितेन**=शब्दितेन, **सरभसविमुक्तघर्घरध्वनीनां**=सरभसं सवेगं विमुक्ता नि:सारिता: (विहिता इत्यर्थ:) घर्घरध्वनय: घर-घरध्वाना: यै: तेषाम्, **शुनां**=सारमेयाणां, **वनान्तरव्यापिना**=यद् वनं वनान्तरं अपरकाननं तद्व्याप्नोति इति तच्छील: काननान्तरप्रसारी तेन, **ध्वानेन**= शब्देन, **च**=समुच्चयार्थकमिदं अव्ययपदं, **तद्**=पूर्वोक्तम्, **अरण्यं**=काननं, **सर्वत:**=समन्तात्, **प्रचलितम् इव**=कम्पितम् इव, **अभवत्**=अभूत्।

टिप्पणी -**रूपानुसार**-वन्य पशुओं अर्थात् हरिणों की गति के अनुसार, जिस ओर पशु गये थे उसी दिशा में। 'रूपं स्वभावे सौंदर्ये नामगे पशुशब्दयो:' (मेदिनीकोष)। **मृगयु**-शिकरी पशुओं को ढूँढ़-ढूँढ़ कर मारने वाला। **शबलित**-मिश्रित, मिला हुआ। मदकल........यहाँ **लुप्तोपमालंकार** है। **'प्रचलितमिव'** में **क्रियोत्प्रेक्षालंकार है।**

अचिराच्च प्रशान्ते तस्मिन् मृगयाकलकले निर्वृष्टमूकजलधरवृन्दानुकारिणि मथनावसानोपशान्तवारिणि सागर इव स्तिमिततामुपगते कानने,

मन्दीभूतभयोऽहमुपजातकुतूहलः पितुरुत्सङ्गादीषदिव निष्क्रम्य कोटरस्थ एव शिरोधरां प्रसार्य संत्रासतरलतारकः शैशवात् किमिदमित्युपजातदिदृक्षस्तामेव दिशं चक्षुः प्राहिणवम्।

हिन्दी अनुवाद - थोड़ी ही देर में उस मृगया-कोलाहल के शान्त हो जाने पर तथा भली-भाँति बरस चुके हुए अतएव निश्शब्द मेघमण्डल का अनुकरण करने वाले एवं मन्थन की समाप्तिवश प्रशान्त जल वाले सागर की भाँति वन के सुस्थिर हो जान पर, मन्द पड़े हुये भय वाले तथा आश्चर्य से अभिभूत मैंने पिता जी की गोदी से थोड़ा सा ही उचक कर कोटर में ही बैठे-बैठे गर्दन बढ़ाकर, भय के कारण चंचल पुतलियों वाला होकर लड़कपन के कारण 'यह क्या है?' इस उत्कण्ठावश उत्पन्न हुई देखने की आकांक्षा से युक्त होकर उसी दिशा की ओर आँखें फेरीं।

संस्कृतव्याख्या - **अचिरात् च**=शीघ्रमेव च, **तस्मिन्**=पूर्वोक्ते, **मृगयाकलकले**=मृगया आखेटः तस्य कलकलः कोलाहलः तस्मिन्, **प्रशान्ते**= पूर्णरूपेण शांतिप्राप्ते सति, **निर्वृष्टमूकजलधरवृन्दानुकारिणि**=निर्वृष्टाःपूर्णतः कृतवर्षा अतएव मूकाः शान्ताः जलधराः मेघाः तेषां वृन्दं समूहः तम् अनुकरोति सादृश्यं भजते इति तच्छीलं तस्मिन् वर्षान्ते शान्तमेघमण्डलसदृशे, **मथनावसानोपशान्तवारिणि**=मथनं सुधायै विलोडनं तस्य अवसानं समाप्तिः तस्मिन् उपशान्तं प्रकृतावस्थं वारि सलिलं यस्य तस्मिन्, **सागरे इव**=समुद्रे इव, **कानने**=विपिने, **स्तिमिताम्**= निश्चलताम्, **उपगते**=प्राप्ते सति, **अहम्**=वैशम्पायनः, **मन्दीभूतभयः**= अमन्दं मन्दं भूतम् इति मन्दीभूतः न्यूनीभूतं भयं दरः तस्य तादृशः अतएव, **उपजातकुतूहलः**= उपजातम् उत्पन्नं कुतूहलं कौतुकम्, **पितुः**=जनकस्य, **उत्सङ्गात्**=क्रीडात्, **ईषदिव**= अल्पमिव **निष्क्रम्य**=उन्नमय्य, **कोटरस्थ एव**=स्कन्धवि-विरस्थित एव, **शिरोधराम्**= ग्रीवाम्, **प्रसार्य**=विस्तार्य, **संत्रासतरलतारकः**=संत्रासः भयं तेन तरले अश्रुव्याप्ते चञ्चले वा तारके कनीनिके यस्य तादृशः, **शैशवात्**= बाल्यात्, **इदम्**=अनुभूयमानम्, **किम्**=किंस्वरूपम्, **इति**=एवम्, **उपजातदिदृक्षः**= उपजाता समुत्पन्ना दिदृक्षा दर्शनेच्छा यस्य तादृशः, **ताम् एव**=घटनाचक्राश्रयभूताम् एव, **दिशम्**=आशाम्, **चक्षुः**=नेत्रम्, **प्राहिणवम्**=अपातयम्।

टिप्पणी - **निर्वृष्ट**=पूर्णरूप से बरस चुकने वाला निर्+वृष्+क्त=निर्वृष्ट। **मथना... सागरे**=मन्थन के पश्चात् शान्त जल वाला समुद्र। पौराणिक परम्परा के अनुसार विष्णु की आज्ञा से देवों ने दैत्यों से सन्धि करके अमृत प्राप्ति के लिये

क्षीरसागर का मन्थन किया था। उसमें से चौदह रत्न, निकले थे। **स्तिमितता**=निश्चलता, स्तब्धता शान्तिः स्तिम्+क्त, तल् प्रत्यय। **तरलतारक**-चञ्चल पुतलियों वाला। **दिदृक्षा**=देखने की इच्छा (द्रष्टुम् इच्छा दिदृक्षा)-दृश्+सन्, टाप्। यहाँ उपमा तथा लुप्तोपमा की निरपेक्ष स्थिति होने से संसृष्टि है।

अभिमुखमापतच्च तस्माद् वनान्तरादर्जुनभुजदण्डसहस्त्रविप्रकीर्णमिव नर्मदाप्रवाहम्, अनिलचलितमिव तमालकाननम्, एकीभूतमिव कालरात्रीणां यामसंघातम्, अञ्जनशिलास्तम्भसंभारमिव क्षितिकम्पविघूर्णितम्, अन्धकार-पूरमिव रविकिरणाकुलितम्, अन्तकपरिवारमिव परिभ्रमन्तम्, अवदारितरसात-लोद्भूतमिव, दानवलोकम्, अशुभकर्मसमूहमिवैकत्र समागतम्, अनेकदण्ड-कारण्यवासमुनिजनशापसार्थमिव संचरन्तम् अनवरतशरनिकरवर्षिरामनिहत-खरदूषणबलनिवहमिव तदपध्यानात् पिशाचातामुपगतम्, कलिकालबन्धु-वर्गमिवैकत्र संगतम्, अवगाहप्रस्थितमिव वनमहिषयूथम्, अचलशिखरस्थित-केसरिकराकृष्टिपतनशीर्णमिव कालाभ्रपटलम्, अखिलरूपविनाशाय धूमकेतु-जलमिव समुद्गतम्, अन्धकारितकाननम्, सहस्त्रसंख्यम् अतिभयजनक-मुत्पातवेतालव्रातमिव शबरसैन्यमुद्राक्षम्।

हिन्दी अनुवाद - (और) उस वनान्तराल से अपनी ओर आती हुई शबर-सेना को (मैंने) देखा-जो (राजा कार्तवीर्य) सहस्त्रार्जुन की हजारों भुजाओं द्वारा (इधर-उधर) बिखराई गई नर्मदा नदी की जलधारा के समान थी, जो प्रभञ्जन (वायु) द्वारा आन्दोलित तमालवन के समान थी, जो कालरात्रियों के पुञ्जीभूत प्रहरसमूह सी प्रतीत होती थी, जो पृथ्वी के प्रकम्प (भूचाल) वश मूर्च्छित बनाये गए काली चट्टानों के स्तम्भों के समुदाय सरीखी थी, रवि रश्मियों से व्याकुल बनाई गई अन्धकारराशि प्रतीत होती थी, जो इतस्ततः पर्यटन करते हुए यमराज के परिवार-सी प्रतीत होती थी, जो विदीर्ण किये गये रसातल (पृथ्वी) से प्रकटीभूत दानवगण-सी प्रतीत होती थी, जो एक स्थान पर इकट्ठे हुये पाप-कर्मों का समुदाय प्रतीत होती थी, जो संचरण करते हुए-अनेक दण्डकारण्यवासी मुनिजनों के (द्वारा दिये गये) शापसमूह-सी प्रतीत होती थी, जो निरन्तर बाणवर्षा करने वाले श्रीराम द्वारा मारी गई तथा उन (श्रीराम) के प्रति अपध्यान (दुर्भावना) होने के कारण (पुनः) पिशाचभाव प्राप्त करने वाली खरदूषण की सेना प्रतीत होती थी, जो परस्पर मिले हुए कलिकाल के बन्धुसमुदाय-सी प्रतीत होती थी, जो जलावगाहनार्थ चले हुये जंगली भैंसों के समूह जैसी थी, पर्वत-शिखरों पर विद्यमान वनकेसरियों

के पंजों द्वारा (हाथी समझकर) बालादाकृष्ट अतएव गिरने के कारण छिन्न-भिन्न हुए प्रलयकालीन मेघमण्डल-सी प्रतीत होती थी, जो समस्त (अरण्यचारी) जीव-जन्तुओं के विनाशार्थ उदित हुए पुच्छलतारों का समूह प्रतीत होती थी, जिसने सम्पूर्ण वन को अन्धकारमय कर दिया था, जो कई हजार संख्या वाली थी, जो अत्यन्तभयावह थी और जो अमंगल जनक वेताल (प्रेत) समूह-सी प्रतीत होती थी।

संस्कृतव्याख्या -**च अभिमुखम्**=समक्षम्, **तस्मात्**=पूर्वोक्तात्, **वनान्तरात्**=विपिनमध्यात्, **आपतत्**=आगच्छत्, **अर्जुनभुजदण्डसहस्रविप्रकीर्णम्**=अर्जुनः कार्तवीर्यः हैहयवंशीयो नृपः तस्य भुजदण्डानां सहस्रं सहस्रसंख्याकाः बाहवः तेन विप्रकीर्णम् विक्षिप्तम्, **नर्मदाप्रवाहम् इव**=नर्मदा रेवानदी तस्याः प्रवाहः स्रोतः, तम् इव, **अनिलचलितम्**=पवनान्दोलितम्, **तमालकाननम् इव**=तमालानां तापिच्छानां काननं गहनम् इव, **कालरात्रीणाम्**=प्रलयनिशानाम्, **एकीभूतम्**=पञ्जीभूतम्, **यामसंघातम् इव**=यमानां प्रहराणां संघातः समुदायः तम् इव, **क्षितिकम्पविधूर्णितम्**=क्षितेः कम्पः क्षितिकम्पः भूकम्पः तेन विघूर्णितम् मूर्च्छितम्, **अञ्जनशिलास्तम्भसंभारम् इव**=अञ्जनवत् कज्जलवत् शिलाः पाषाणखण्डानि तासां स्तम्भाः स्थूणाः तेषां संभारः समूहः तम् इव, **रविकिरणाकुलितम्**=रवेः सूर्यस्य किरणाः कराः तैः आकुलितम् पर्यस्तम्, **अन्धकारपूरम् इव**=अन्धकारस्य तिमिरस्य पूरं प्रवाहम् इव, **परिभ्रमन्तम्**=पर्यटन्तम्, **अन्तकपरिवारम् इव**=यमकुटुम्बकम् इव, **अवदारिंतरसातलोद्भूतम्**=अवदारितं विदारितं यद् रसातलं धरातलं तस्माद् उद्भूतम्, **दानवलोकम् इव**=दानवानां दैत्यानां लोकः जगत् तम् इव, **एकत्र**=एकस्मिन् स्थाने, **समागतम्**=समायातम्, **अशुभकर्मसमूहम् इव**=अशुभकर्माणि पापकर्माणि तेषां समूहः तम् इव, **संचरन्तम्**=भ्रमन्तम्, **अनेकदण्डकारण्यवासिमुनिजनशापसार्थम् इव**=अनेके असंख्या ये दण्डकारण्यवासिनः दण्डकवननिवासिनः मुनिजनाः ऋषिजनाः तेषां शापाः दुर्वचनानि तेषां सार्थः समूहः तम् इव, **अनवरतशरनिकरवर्षिरामनिहतखरदूषणबलनिवहम्**= अनवरतं सततं शरनिकरं बाणसमूहं वर्षति मुञ्चति इति तच्छीलः रामः राघवः तेन निहितानि व्यापादितानि खरदूषणयोः पातालल‌ङ्काधिपत्योः बलानि सैन्यानि तेषां निवहः समूहः तम् इव, **तदपध्यानात्**=तस्मिन् रामे अपध्यानं दुश्चिन्तनम् तस्माद्हेतोः, **पिशाचताम्**=भूतभावम्, **उपगतम्**=प्राप्तम्, **एकत्र**=एकस्थाने, **संगतम्**= सम्मिलितम्, **कलिकालबन्धुवर्गम् इव**=कलिकालस्य कलियुगस्यय, **बन्धुवर्गं**=मित्रमण्डलम्

तम् इव, **अवगाहप्रस्थितम्**=अवगाह: स्नानं तदर्थं प्रस्थितं प्रचलितम्, **वनमहिषयूथम् इव**=वनमहिषा: अरण्यसैरिभा: तेषां यूथ: समूह: तम् इव, **अचलशिखरस्थितकेसर-कराकृष्टिपतनशीर्णम्**=अचलस्य पर्वतस्य शिखरे श्रृंगे स्थित: विद्यमान: केसरी सिंह: तस्य करौ पाणी ताभ्याम् आकृष्टि: आकर्षणं तया यत् पतनं तेन शीर्णं **भ्रंश:**, **कालाभ्रपटलम् इव**=श्याममेघमण्डलम् इव, **अखिलरूपविनाशाय**= अखिला: सम्पूर्णा: रूपा: जङ्गलपशव: मृगा: वा तेषां विनाशाय व्यापादनाय, **समुद्गतम्**= उदितम्, **धूमकेतुजालम् इव**=उत्पातग्रहमण्डलम् इव, **अन्धकारितकाननम्**= अन्धकारितम् अन्धकार: संजातोऽस्मिन् इति संजाततमस्कं काननं विपिनं येन तत्, **अनेकसहस्त्रसंख्यम्**=अनेकानि बहूनि सहस्राणि दशशतात्मकानि संख्यागणना यस्य तत् असंख्यमित्यर्थ:, **उत्पातवेतालव्रातम् इव**= उत्पाताय उपद्रवाय यो वेतालव्रात: भूतसमूह: तम् इव अतिभयजनकम् अत्यन्तभय-ङ्करम्, **शर्बरसैन्यम्**= किरातदलम्, **अद्राक्षम्**=अपश्यम्।

टिप्पणी - **अर्जुन...प्रवाहमिव** (कार्तवीर्य) सहस्रबाहु अर्जुन, इसने एक समय अपनी हजार भुजाओं से नर्मदा के प्रवाह को रोककर जलक्रीडा की थी। इसकी नगरी का नाम माहिष्मती था। **अञ्जनशिलां**-काजल के सदृश पत्थर, काला पत्थर। **अन्तक**-यमराज विवस्वान् का पुत्र (वैवस्वतोऽन्तक:, अमरकोष), विवस्वान् ने प्रसन्न होकर इन्हें मृत जीवों के धर्माधर्म विवेचन का अधिकार दे रखा है, इसलिये इन्हें धर्मराज भी कहा जाता है। दण्ड देने के कारण ये यमराज कहलाते हैं (यमो यमयतामस्मि, गीता) **अवदारितदानवलोकम्**-पौराणिक मान्यता है कि भूतल के नीचे के लोकों में दानवादियोगिनियों का निवास स्थान है। प्रह्लाद के पौत्र विरोचन के पुत्र राजा बलि को भगवान् वामन ने तीन पैरों में उसकी पृथ्वी लेकर पाताल लोक में ही रहने का आदेश दिया। **दण्डक...सार्थमिव**-दण्डक वन में एक बार दुर्भिक्ष पड़ने पर दण्डकारण्य निवासी मुनि लोग गौतम ऋषि के आश्रम में पहुँचे। ऋषि ने तपोबल से उनकी पर्याप्तकाल तक रक्षा की। इसके बाद ऋषिजन पुन: दण्डाकारण्य जाने की इच्छा करने लगे, किन्तु गौतम ऋषि के भय से आज्ञा लेने में संकोच करते रहे। उन्होंने छल से एक गौ की रचना की और उसे गौतम के धान्यागार में छोड़ दिया। गौतम ने जैसे ही उसका हाथ से स्पर्श किया उसने प्राण त्याग दिये। ऋषि लोग गौहत्या से गौतम जी को कलंकित होने का बहाना लेकर वहाँ से चले गये। बाद में जब इस छल का पता चला तो गौतम ऋषि ने शाप दे दिया कि जिस दण्डाकरण्य के लोभ से तुम मेरे आश्रम को छल से

त्याग कर गये हो वह दण्डाकरण्य भस्म हो जाये। इस शाप के कारण सभी मुनियों को अत्यधिक कष्ट उठाने पड़े और भगवान् राम के वहाँ जाने पर वह शाप समाप्त हुआ। **धूमकेतुजाल**-पुच्छलताराओं का समूह-ज्योतिष शास्त्र के अनुसार जहाँ पुच्छलतारा दिखाई देता है वहाँ के लोगों के अनिष्ट की कल्पना की जाती है। **'धूमकेतुः स्मृतो वह्नावुत्पातेग्रहभेदयोः'** इतिविश्वः। यहाँ **एकीभूतमिव से लेकर वेतालव्रातमिव** तक सर्वत्र जात्युत्प्रेक्षालङ्कार है।

मध्ये च तस्यातिमहतः शबरसैन्यस्य प्रथमे वयसि वर्तमानम्, अतिकर्कशत्वादायसमयमिव, एकलव्यमिव जन्मान्तरागतम्, उद्भिद्यमानश्मश्रुराजितया प्रथममदलेखामण्ड्यमानगण्डभित्तिमिव गजयूथपतिकुमारकम्, असितकुवलयश्यामलेन देहप्रभाप्रवाहेण कालिन्दीजलेनेव पूरितारण्यम्, आकुटिलाग्रेण स्कन्धावलम्बिना कुन्तलभारेण केसरिणमिव गजमदमलिनीकृतेन केसरकलापेनोपेतम्, आयतललाटम्, अतितुङ्गघोरघोणम्, उपनीतस्यैककर्णाभरणतां भुजगफणामणेरापाटलैरंशुभिरालोहितीकृतेन पर्णशयनाभ्यासाल्लग्नपल्लवरागेणेव वामपार्श्वेन विराजमानम्, अचिरप्रहतगजकपोलगृहीतेन सप्तच्छदपरिमलवाहिना कृष्णागुरुपङ्केनेव सुरभिणा मदेन कृताङ्गरागम्, उपरितत्परिमलान्धेन परिभ्रमता मायूरपिच्छातपत्रानुकारिणा मधुकरकुलेन तमालपल्लवेनेव निवारितातपम्, आलोलपल्लवव्याजेन भुजबलनिर्जितया भयप्रयुक्तसेवया विन्ध्याटव्येव करतलेनापमृज्यमानगण्डस्थलस्वेदलेखम्....।

हिन्दी अनुवाद - उस अत्यन्त विशाल शबरसेना के बीच मैंने 'मातङ्ग' नामवाले भील सेनापति को देखा-जो पहली अवस्था (यौवन) में विद्यमान था, (शरीर की) अतिशय कठोरता के कारण जो लौहनिर्मित प्रतीत होता था, (एक जन्म से) दूसरे जन्म में आया हुआ एकलव्य प्रतीत होता था, जो उत्पन्न होती हुई श्मश्रुपंक्ति (दाढी की रोमराजि) के कारण प्रथम मदलेखा से शोभायमान कपोलमण्डल वाले गजराज के बच्चे के समान था, जो नीलकमल की भाँति श्यामल-देहप्रभा के प्रवाह से वनप्रदेश को मानो (श्यामल) यमुनाजल से आप्लावित कर रहा था, जो कुछ कुछ घुँघराले अग्रभागों वाले तथा स्कन्धदेश तक लटके हुए चूर्णकुन्तलसमूह (घुँघराली अलकों) के कारण (मारे गये) गजराज के मद से मलिनीकृत सटाभार से सुशोभित वनकेसरी के समान था, चौड़े मस्तक वाला था, जो अत्यन्त उन्नत तथा रौद्रनासिका वाला था, जो एक कर्णप्रान्त (अर्थात् बाएँ) में आभरण बनाई गई सर्प की फणामणि की श्वेत-रक्त मयूखों द्वारा कुछ-कुछ लाल

बनाये गये अतएव मानो पर्णशय्या पर शयन करने के अभ्यासवश पल्लवों की अरुणाई संवलित वामपार्श्व से शोभायमान था, जो सद्यः व्यापादित (मारे गये) गजराज के गण्डस्थल से गृहीत अतएव सप्तवर्ण (सतौना) वृक्ष की गन्ध को वहन करने वाले तथा कालागुरु के उबटन की भाँति सुरभियुक्त मदजल से चर्चित (शरीर वाला) था, जो मदजल की मँहक से विकलीभूत (अतएव सिर के) ऊपर संचरण करने वाले मयूरपंखी आतपत्र (छत्ते) का अनुकरण करने वाले तथा तमालपल्लव के समान (श्यामवर्णी) भ्रमरसमुदाय द्वारा अवरुद्ध सूर्यातप (धूप) वाला था, जो (कर्णावतंसीकृत) चञ्चल पल्लवों के बहाने मानो भुज पराक्रम से वशीकृत अतएव भय के कारण परिचर्या में लगी हुई विन्ध्यवनस्थली द्वारा (अपनी) हथेलियों से पोंछे जाते हुए कपोलमण्डल के स्वेद-बिन्दुओं वाला था।

संस्कृतव्याख्या - **तस्य**=पूर्वोक्तवर्णितस्य, **अतिमहतः**=अत्यन्तविशालस्य, **शबरसैन्यस्य**=किरातदलस्य च, **मध्ये**=अन्तः, **प्रथमे**=वार्धकापेक्षया पूर्वोत्तरे, **वयसि** =अवस्थायाम्, **वर्तमानम्**=विद्यमानम्, **अतिकर्कशत्वात्**=अतिकठिनत्वात् **आयसमयमिव**=आयसं लौहं तेन निर्मितम् इव, **लौहमयमिव जन्मान्तरागतम्**=अन्यद् जन्म जन्मान्तरम् अपरजन्म तस्मिन् आगतम् आयातम्, **एकलव्यम् इव**=द्रोणशिष्य-भूतं भिल्लकुमारम् इव, **उद्भिद्यमानश्मश्रुराजितया**=उद्भिद्यमाना श्मश्रुराजिः मुखलोमपंक्तिः यस्यः सः तस्य भावः तत्ता तया उत्पद्यमानमुखलोमश्रेणितया, **प्रथममदलेखामण्ड्यमानगण्डभित्तिम्**=प्रथमा नवीना या मदलेखा तया मण्ड्यमाना अलङ्क्रियमाणा गण्डभित्तिः कपोलप्रदेशः यस्य तम्, **गजयूथपति-कुमारकम्**=गजानां हस्तिनां यूथपतिः मण्डलाधिपतिः गजेन्द्रः तस्य कुमारकः शावकः तम् इव, **असितकुवलयश्यामलेन**=असितं कृष्णवर्णं यत् कुवलयम् उत्पलं तद्वत् श्यामलः कृष्णवर्णः तेन, **देह प्रभाप्रवाहेण**=देहस्य शरीरस्य प्रभाद्युतिः तस्याः प्रवाहः स्रोतः तेन, **कालिन्दीजलेन इव**=यमुनाजलसदृशेन, **पूरितारण्यम्**= पूरितं भृतम् अरण्यं काननं येन तम्, **गजमदमलिनीकृतेन**=गजमदः हस्तिदानवारि तेन मलिनीकृतः अमलिनः मलिनः कृतः इति कृष्णीकृतः तेन, **केसरकलापेन**= केसराणां जटानां कलापः समूहः तेन युक्तम्, **केसरिणम् इव**=सिंहम् इव, **आकुटिलाग्रेण**=आ ईषत् कुटिलं कुञ्चितम् अग्रं प्रान्तभागः यस्य तेन, **स्कन्धावलम्बिना**=स्कन्धयोः अंसदेशयोः अवलम्बते विराजते इति तच्छील:तेन, **कुन्तलभारेण**=कुन्तलनां बालानां भारः कलापः तेन केशकलापेन, **उपेतम्**=युक्तम्, **आयतललाटम्**=आयतं विशालं ललाटं भालं यस्य तम्, **अनितुङ्गघोरघोणम्**=

अतितुङ्गा अत्युच्चा घोरा भयंकरो घोणा नासा यस्य तम्, **एककर्णाभरणताम्**=एककर्णस्य एकश्रोत्रस्य आभरणताम् आभूषणताम्, **पनीतस्य**=प्रापितस्य, **भुजगफणामणे**=भुजगः सर्पः तस्य फणा फटा तस्याः मणिः रत्नं तस्य, **आपाटलैः**=आ ईषत् पाटलाः श्वेतरक्ताः तैः, **अंशुभि**=दीप्तिभिः, **आलोहितीकृतेन**=आ ईषत् लोहितं लोहितं कृतम् इति लोहितीकृतम् ईषल्लोहितीकृतम् किञ्चिद् आलोहितीकृतम् अरुणीकृतं तेन, अतएव, **पर्णशयनाभ्यासात्**=पर्णेषु पत्रेषु यत् शयनं स्वापः तस्य अभ्यासात् पुनः अनुष्ठानात्, **लग्नपल्लवरागेण इव**=लग्नः आश्लिष्टः पल्लवानां किसलयानां रागः आरुण्यं यस्मिन् तथाभूतेन इव, **वामपार्श्वेन**=सव्यपक्षेण, **विराजमानम्**=शोभमानम्, **अचिरप्रहतगजकपोलगृहीतेन**=अचिरम् अविलम्बं **प्रहतः** व्यापादितः यः गजः करिः तस्य कपोलौ गण्डौ ताभ्यां गृहीतेन आदत्तेन, **सप्तच्छदपरिमलवाहिनः**=सप्त सप्तसंख्यायाः छदाः पर्णानि यस्य सः सप्तपर्णवृक्षः तस्य परिमलः गन्धः तम् इव परिमलं वहति धारयति इति तच्छीलः तेन, **कृष्णागुरुपंकेन इव**=कृष्णागुरुः काकतुण्डः सुगन्धिद्रव्यविशेषः तस्य पङ्कः कर्दमः। तेन इव तत्सदृशेन, **सुरभिणा**=घ्राणतर्पणेन, **मदेन**= दानवारिणा, **कृताङ्गरागम्**=कृतः विहित अंगरागः शरीरलेपनं येन तम्, **उपरि**=शिरोभागे, **तत्परिमलगन्धेन**=तस्य मदस्य परिमलः गन्धः तेन अन्धः मत्तः तादृशेन, **परिभ्रमता**=पर्यटता, **मायूरपिच्छात -पत्रानुकारिणा**=मयूरस्य इमानि मायूराणि मयूरसम्बन्धीनि पिच्छाणि बर्हाणि तेषाम् आतपत्रं छत्रं तद् अनुकरोति सादृश्यं भजते इति तच्छीलं तेन, **मधुकरकुलेन**=मधुकराणां भ्रमराणां कुलं समूहः तेन, **तमालपल्लवेन इव**=तापिच्छकिसलयेन इव, **निवारितातपम्**=निवारितः दूरीकृतः आतपः उष्णता येन तम्, **भुजबलनिर्जितया** =भुजयोः बाह्वोः बलं शक्तिः तेनः निर्जिता पराजित तया, **अतएव भयप्रयुक्तसेवया**=भयेन भीत्या प्रायुक्ता आरब्धा सेवा परिचर्या यया तया, **आलोलपल्लवव्याजेन**=आलोलाः चञ्चलाः पल्लवाः किसलयानि तेषां ब्याजः छद्म तेन, **करतलेन इव**=पाणितलेन इव, **अपमृज्यमानगण्डस्थलस्वेदलेखम्**= अपमृज्यमाना प्रोञ्छ्यमाना गण्डस्थलयोः कपोलस्थलयोः स्वेदलेखाः धर्मबिन्दु-पङ्क्तिः यस्य तं तादृशम्।

टिप्पणी - **प्रथमे वयसि**=युवा अवस्था में। **आयसमयम्**=लोहे का बना हुआ; (अथः एव आयसम् स्वार्थ में अण्) अयः और आयस दोनों शब्द लोहे के अर्थ में चलते हैं। **एकलव्य**=भीलकुमार, जिसने द्रोणाचार्य की प्रतिमा को गुरु बना कर बाणविद्या का अभ्यास करके अर्जुन को भी आश्चर्यान्वित कर दिया था। **श्मश्रुराजि**=दाढ़ी की रेखा। **सुरभि**=नासिका को तृप्त करने वाली गन्धवाला

(सुरभिर्घ्राणतर्पण, अमरकोष) **परिमल**=गन्ध; पत्र पुष्प आदि को मसलने से उत्पन्न गन्ध के लिए प्रयुक्त होने वाला यह शब्द अब सामान्य गन्धमात्र के लिए प्रचलित हो गया है। **'असित...अरण्यम्'** यहाँ **लुप्तोपमा द्रव्योत्प्रेक्षा** तथा **अतिशयोक्ति** का **संकर** है। **करतलेन इव** में **अपन्हवोत्प्रेक्षा** है।

आपाटलया हरिणकुलकालरात्रिसन्ध्यायमानया शोणितार्द्रयेव दृष्ट्या रञ्जयन्तमिवाशाविभागान्, आजानुलम्बिना कुञ्जरकरप्रमाणमिव गृहीत्वा निर्मितेन चण्डिकारुधिरबलिप्रदानायासकृन्निशितशस्त्रोल्लेखविषमितशिखरेण भुजयुगलेनोपशोभितम्, अन्तरान्तरालग्नाश्यानहरिणरुधिबिन्दुना स्वेदजलकणिकाचितेन गुञ्जाफलमिश्रैः करिकुम्भमुक्ताफलैरिव रचिताभरणेन विन्ध्यशिलातलविशालेन वक्षःस्थलेनोद्भासमानम्, अविरतश्रमाभ्यासादुल्लिखितोदरम्, इभमदमलिनमालानस्तम्भयुगलमुपहसन्तमिवोरुदण्डद्वयेन, लाक्षालोहितकौशेयपरिधानम्, अकारणेऽपि क्रूरतया बद्धत्रिपताकोदग्र, भ्रुकुटिकराले ललाटफलके प्रबलभक्त्याराधितया मत्परिग्रहोऽयमितिकात्यायन्या त्रिशूलेनेवाङ्कितम्....

हिन्दी अनुवाद - जो कुछ-कुछ पाटलवर्ण (श्वेत-रक्त) वाली अतएव मृगसमुदाय की कालरात्रि (मरणयामिनी) की (रक्तवर्णा) पूर्वसन्ध्या प्रतीति होनेवाली तथा मानो (उनके) रक्त से गीली हुई (अपनी) दृष्टि से दिग्विजय भागों को रंग रहा था, जो घुटने तक लटकने वाले अतएव मानो दिग्गजों शुण्डादण्डों की नाप लेकर (विधाता द्वारा) बनाने गये तथा महाकाली को रक्तबलि देने के लिए बारम्बार तीक्ष्ण किये गये (खड्गादि) शस्त्रों के संघर्षवश क्षतविक्षत हुए अग्रभागों वाले बाहु-युगल से अलंकृत था, जो बीच-बीच में लगे हुए कुछ-कुछ सूखे हुए (मृत) हरिण की रक्तबिन्दुओं वाले स्वेद जलकणों से परिव्याप्त अतएव मानो गुञ्जाफलों से सम्मिश्रित गजकुम्भों से उत्पन्न मुक्ताफलों से अलंकरण सम्पन्न किए हुए तथा विन्ध्यशिलातल के समान विस्तीर्ण वक्षःस्थल से शोभायमान था, जो निरन्तर किये जाने वाले श्रम की पौनःपुन्येन आवृत्ति होने के कारण उल्लिखित (कृश अथवा चिह्नित) उदरवाला था, जो स्तम्भसदृश ऊरुयुगल (दोनों जांघों) से मानों गजमद से मलिन हुए आलान (गजबन्धनार्थ) स्तम्भयुगल का उपहास कर रहा था, जो लाक्षारस से रंगे हुए रेशमीवस्त्रों वाला था, जो (क्रोध का) कारण न होने पर भी, निष्करुण जाति का होने के कारण त्रिवलियों से संबंधित ऊँची भौंहों

के कारण विकराल भालफलक पर मानो उत्कृष्ट भक्ति से वशीभूत भगवती दुर्गा द्वारा यह (मातङ्ग) मेरा प्रियजन है, ऐसा समझ कर त्रिशूल से चिह्नित कर दिया गया था।

संस्कृतव्याख्या - आपाटलया:=ईषच्छ्वेतरक्तया। **हरिणकुलकालरात्रि-संध्यायमानया**=हरिणानां मृगाणां कुलं वृन्दं तस्य काल-रात्रि: विनाशनिशा तस्या: सन्धायमाना सन्ध्यावद् आचरतीति सन्ध्यायमाना सन्ध्यासदृशी तया। **शोणितार्द्रया इव**=शोणितं रक्तं तेन आर्द्रा क्लिन्ना तया इव रक्तस्नातया इव। **दृष्ट्या**=नेत्रेण। **आशाविभागान्**=दिग्भागान्। **रञ्जयन्तम् इव**=रक्तीकुर्वन्तम् इव। **आजानुलम्बिना**=आजानु ऊरुपर्यन्तं लम्बते इति तच्छीलम् तेन अतिदीर्घेण इति भाव:, **कुञ्जरकर-प्रमाणमिव**=कुञ्जर: करी तस्य कर: शुण्डा तस्यप्रमाणम् इव परिमाणम् इव। **गृहीत्वा**=आदाय, **निर्मितेन**=विरचितेन। **चण्डिकारुधिरबलिप्रदानाय**=चण्डिका दुर्गा तस्यै रुधिरबले: रक्तोपहारस्य प्रदानं समर्पणं तस्मै। **असकृत्**=वारं वारम्। **निशितशस्त्रोल्लेखविषमितशिखरेण**=निशितानि तीक्ष्णानि शस्त्राणि खड्गादीनि तेषाम् उल्लेख:-शाणघर्षणं तेन विषमितम् उन्नतानतं शिखरं भुजशिर: यस्य तेन। **भुजयुगलेन**=बाहुद्वन्द्वेन। **उपशोभितम्**=विराजमानम् **अन्तरान्तरा**=मध्ये-मध्ये। **लग्नश्यानहरिणरुधिरबिन्दुना**=लग्ना: आश्लिष्टा: अश्याना: अशुष्का: हरिणानां मृगाणां रुधिरबिन्दव: रक्तकणा: यत्र तेन। **स्वेदजलकणिकाचितेन**=स्वेदजलं धर्मजलं तस्य कणिका: बिन्दव: ताभि: चितेन व्याप्तेन। अतएव **गुञ्जाफलमिश्रै:**=गुञ्जाफलानि काकचिञ्चाफलानि तै: मिश्रै: संयुक्तै:। **करिकुम्भमुक्ताफलै:**=करिणां हस्तिनां कुम्भेषु शिरपिण्डेषु यानि मुक्ताफलानि मौक्तिकानि तै: **रचिताभरणेन इव**=रचितं निर्मितम् आभरणम् आभूषणम् यस्य तेन इव। **विन्ध्यशिलातलविशालेन**=विन्ध्यस्य विन्ध्याख्यपर्वतस्य शिलातलं प्रस्तर: तद्वत् विशालेन आयतेन। **वक्ष:स्थलेन**= उर:स्थलेन। **उद्भासमानम्**=देदीप्यमानम्। **अविरतश्रमाभ्यासात्**=अविरतं निरन्तरं य: श्रम: व्यायाम: तस्य अभ्यासात् पुन: पुन: अनुष्ठानात्। **उल्लिखितोदरम्**=उल्लिखितं कृशम् उदरं जठरं यस्य तम्। **ऊरुदण्डद्वयेन**=ऊर्वौ दण्डौ इव इति ऊरुदण्डौ तयो: द्वयं तेन जङ्घायुगलेन। **इभमदमलिनम्**=इभानां हस्तिनां मदेन दानवारिणा मलिनं श्यामवर्णम्। **आलानस्तम्भयुगलम्**=आलानं गजबन्ध: तदेव स्तम्भ: स्थूण: तयो: युगलं द्वन्द्वम्। **तद् उपहसन्तम् इव**=तिरस्कुर्वन्तम् इव। **लाक्षालोहितकौशेय-परिधानम्**=लाक्षालोहितं लाक्षारसरञ्जितं कौशेयं क्षौमं

परिधानम् अधोऽशुकं यस्य तम्। **अकारणेऽपि**=हेतु–विरहेऽपि, **क्रूरतया**=घातकतया, **बद्धत्रिपताकोदग्रभ्रुकुटिक -राले**=बद्धा रचिता त्रिपताका त्रिवलिः या सा चासौ उदग्रा उन्नता भ्रकुटिः कुटिलभ्रूलता तया कराले कुटिले, **ललाटफलके**=ललाट फलकम् इव इति तस्मिन् भालपट्टे, **प्रबलभक्त्या-राधितया**=प्रबला उत्कृष्टा या भक्तिः आराधना तया आराधितो पूजिता तया, **कात्यायन्या**=दुर्गया:, **अयम्**=एष मातङ्गः, **मम**=दुर्गायाः, परिग्रहः कृपापात्रम्, **त्रिशूलेन**=त्रिशूलाख्यास्त्रविशेषेण, **अंकितम् इव**=चिह्नितमिव।

टिप्पणी - **आशाविभागान्**=दिग्भाग, सभी दिशायें, दिशाओं के नाम इस प्रकार हैं - पूर्व, आग्नेय, दक्षिण, नैर्ऋत्य, पश्चिम, वायव्य, उत्तर, ईशान, ऊर्ध्व, अधः। **अविरत...उदरम्**-सर्वदा व्यायाम करने से जिसका पेट (पेट की चर्बी) छट गया था और इसीलिए जो बीच से खरीदा गया-सा लगता था। गुप्तकालीन कला के आदर्श रूप में शारीरिक सौन्दर्य के लिए मध्यभाग का उल्लिखित होना आवश्यक था। **आलान**=हाथी बांधने का खूँटा, 'आलानं बन्धस्तम्भे' (अमरकोष) के अनुसार आलान का अर्थ स्वयं बंधस्तम्भ है फिर भी बाण ने आलानस्तम्भ लिखा है इससे ज्ञात होता है कि उस समय आलान केवल 'बन्धन' के अर्थ में प्रयुक्त होने लगा था इसलिए बाद में कोशों में 'आलानं गजबन्धनम्' पाठ भी दिखाई देता है। **बद्धत्रिपताका....कराले**=त्रिपताका का युक्त उग्र भौंहों से विकराल लगने वाला माथा। अहिच्छत्रा से प्राप्त मिट्टी के खिलौनों में एक गुप्तकालीननृसिंहमूर्ति में भी त्रिशूल से अंकित जैसी त्रिपताक भृकुटी का सुन्दर चित्रण पाया जाता है। **उपसहन्तमिव** में क्रियोत्प्रेक्षालङ्कार है। **'अंकितमिव'** में भी क्रियोत्प्रेक्षा है।

उपजातपरिचयैरनुगच्छद्भिः श्रमवशाद् दूरनिर्गताभिः स्वभावपाटलया शुष्काभिरपि हरिणशोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखेदैर्विवृतमुखतया स्पष्टदृष्टदन्तांशून् दंष्ट्रान्तराललग्नकेसरिसटानिव सृक्कभागानुद्वहद्भिः स्थूलवराटकमालिकापरिगतकण्ठैर्महावराहदंष्ट्राप्रहारजर्जरैल्पकायैरपि महाशक्तित्वादनुपजातकेसरीव केसरिकिशोरकैर्मृगवधवैधव्यदीक्षादानदक्षैर-नेकवर्णैः श्वभिरतिप्रमाणाभिश्च केसरिणामभयप्रदानयाचनार्थमागताभिः सिंहीभिरिव कौलेयककुटुम्बिनीभिरनुगम्यमानम्...।

हिन्दी अनुवाद - जो परिचय उत्पन्न हो जाने के कारणा अनुगमन करने वाले (आखेटजन्य) परिश्रम के कारण दूर तक (मुँह से बाहर) निकली हुई स्वभावतः पाटलवर्णी (श्वेतरात्त) होने के कारण सूखी हुई होने पर भी मानो

मृगरुधिर का क्षरण (वमन) करती हुई जीभों से (अपनी) विषण्णता का ज्ञापन करने वाले-मुख खुले होने के कारण स्पष्टतः दृष्टिगोचर होती हुई दन्तदीप्तियों वाले अतएव मानों दाढों के बीच में लगी हुइ वनकेसरी की सटाओं (स्कन्धकेसरों) वाले ओष्ठप्रान्त को वहन करते हुए-बड़ी-बड़ी कौड़ियों की माला से घिरे हुए कण्ठदेशों वाले-विशाल वनशूकरों की मार से शिथिल अङ्गों वाले-छोटा आकार होने पर भी प्रौढ़पराक्रम वाला होने के कारण अनुत्पन्न स्कन्धकेशों वाले वनकेसरी के बच्चों जैसे प्रतीत होते हुए तथा हरिणाङ्गनाओं को वैधव्यव्रत प्रदान करने में निपुण अनेक रंगों वाले (शिकारी) कुत्तों एव विशालकाय अथच (अपने पतियों) वनकेसरियों के लिए अभयदान (प्राणरक्षा) की अभ्यर्थना करने के लिए आई हुईं सिंहनियों-सी प्रतीत होने वाली कुतियों द्वारा अनुसरण किया जा रहा था।

संस्कृतव्याख्या - **उपजातपरिचयैः**=उपजातः परिचयः संस्तवः येषां तैः, अतएव **अनुगच्छद्भिः**=अनुसरद्भिः, **श्रमवशात्**=श्रमः गमनखेदः तस्य वशात्, **स्वभावपाटलतया**=स्वभावेन प्रकृत्या पाटलाः श्वेतरक्ताः तासौ भावः तत्ता तया, **शुष्काभिः अपि**=नीरसाभिः अपि, **हरिणशोणितम्**=हरिणानां मृगाणां शोणितं रुधिरम्, **क्षरन्तीभिः इव**=स्रवन्तीभिः इव, **जिह्वाभिः**=रसनाभिः, **आवेद्यमानखदैः**= आवेद्यमानः प्रकटीक्रियमाणः खेदः श्रमः यैः तैः, **विदृतमुखतया**=विवृतं व्यात्तं मुखं लपनं येषां ते विवृतमुखाः तेषां भावः तत्ता तया, **स्पष्टदृष्टदन्तांशून्**=स्पष्टं सुस्फुटं दृष्टाः अवलोकिताः दन्तानां रदानां अंशवः किरणाः तान्, **अतएव दंष्ट्रन्तराललग्नकेसरिसटान् इव**=दंष्ट्राणां दशनानाम् अन्तराले मध्ये लग्नाः सक्ताः केसरिणां सिंहानां सटाः केसराः येषु तान् इव। **सृक्कभागान्**=ओष्ठप्रान्तान् उद्वहद्भिः धारयद्भिः। **स्थूलवराटकमालिकापरिगतकण्ठैः**=स्थूलाः पीवराः वराटकाः कपर्दकाः तेषां मलिकाः स्रजः ताभिः परिगताः वेष्टिताः कण्ठाः गलप्रदेशाः येषां तैः **महावराहदंष्ट्राप्रहारजर्जरैः**=महावराहाः वनशूकराः तेषां दंष्ट्राः दाढाः तासां प्रहाराः आघाताः तैः जर्जराः क्षतविक्षताः तैः **अल्पकायेः अपि**=स्वल्पशरीरैः अपि सद्भिः। **महाशक्तित्वात्**=महती प्रबला शक्तिः सामर्थ्ये येषां ते महाशक्तयः तेषां भावः तत्त्वं तस्मात्। **शिखरेण**=तेज धार वाले शस्त्रों को शाण पर चढ़ाने से जिस भुजयुगल के शिखर भाग पर विषमता झलक आई थी। जब अधिक शक्ति से शस्त्र की धार पैनाई जाती है तो कंधों का मांसल प्रदेश कुछ दब-सा जाता है इसीलिए उसमें दन्तुरता झलकने लगती है। अविरत...उदरम्-सर्वदा व्यायाम करने से जिसका पेट (पेट की चर्बी) छट गया था और इसीलिए जो बीच से खरादा गया-सा लगता

था। गुपतकालीन कला के आदर्शरूप में शारीरिक सौन्दर्य के लिए मध्यभाग का उल्लिखित होना आवश्यक था। आला-हाथी बांधने का खूंटा, अलानं बन्धस्तम्भे (अमरकोष) के अनुसार अलान का अर्थ स्वयं बन्धस्तम्भ है फिर भी बाण ने आलानस्तम्भ लिखा है, इससे ज्ञात होता है कि उस समय आलान केवल बन्धन के अर्थ में प्रयुक्त होने लगा था। इसलिए बाद के कोशों में आलानं गजबन्धनम् पाठ भी दिखाई देता है। **बद्धत्रिपताकाः...कराले**-त्रिपताका का युक्त उग्र भौंओं से विकराल लगने वाला माथा। अहिच्छत्रा से प्राप्त मिट्टी के खिलौनों में एक गुप्तकालीन नृसिंहमूर्ति में भी त्रिशूल से अङ्कित जैसी त्रिपताक भुकुटी का सुन्दर चित्रण पाया जाता है। बाण ने हर्षचरित में भी शवर युवा निर्घात् की तनी भौंहों के बीच में त्रिशाखा (तीन शाखाओं वाले) त्रिशूल की आकृति का संकेत किया है। **मत्परिग्रहोऽयम्**-यह मेरा कृपापात्र है, यह मेरी कृपा है। त्रिशूल अङ्कित करना मानो दुर्गा का अनुग्रह है, कृपा है, प्रसाद है। परिग्रह का शाब्दिक अर्थ है लेना भाव यह है कि मानो दुर्गा ने इसे अपनी शरण में ले लिया है। इसलिए इसे अपने चिह्न से (मोहर से) अङ्कित कर दिया जाय। **उपहसन्तमिव** में क्रियोत्प्रेक्षलङ्कार है।

उपजातपरिचयैरनुगच्छद्भि श्रमवशाद् दूरनिर्गताभिः स्वभावपाटलया शुष्काभिरपि हरिणशोणितमिव क्षरन्तीभिर्जिह्वाभिरावेद्यमानखैदेर्विवृत्तमखतया स्पष्टदृष्टदन्तांशून दष्ट्रान्तराललग्नकेसरिसटानिव सृक्काभागानुद्रवहद्भिः स्थूलवराटकमालिकापरिगतकण्ठैर्महावराहदंष्ट्राप्रहारजजरैरल्पकायैरपि महाशक्तित्वादनुपजातकेसरीव केसरिकिशोरकैर्मृगवधूवैधव्यदीक्षादानदक्षैरनेक -वर्णैः श्वभिरभिरिव कौलेयककुटुम्बिनीभिरनुगम्यमानम्...

हिन्दी अनुवाद :- जो परिचय उत्पन्न हो जाने के कारण अनुगमन करने वाले (आखेटजन्य) परिश्रम के कारण दूर तक (मुँह से बाहर) निकली हुई स्वभावतः पाटलवर्णी (श्वेतरक्त) होने के कारण सूखी हुई होने पर भी मानो मृगरुधिर का क्षरण (वमन) करती हुई जीभों से (अपनी) विषण्णता का ज्ञापन करने वाले-मुख खुले होने के कारण स्पष्टतः दृष्टिगोचर होती हुई दन्त-दीप्तिओं वाले अतएव मानो दाढों के बीच में लगी हुई वनकेसरी की सटाओं (स्कन्धकेसरों) वाले ओष्ठप्रान्त को वहन करते हुए बड़ी-बड़ी कौड़ियों की माला से घिरे हुए कण्ठदेशों वाले-विशाल वनशूकरों की मार से शिथिल अङ्गों वाले-छोटा आकार होने पर भी प्रौढ़पराक्रम वाला होने के कारण अनुत्पन्न स्कन्धकेशों वाले वनकेसरी के बच्चों जैसे प्रतीत होते हुए तथा हरिणाङ्गनाओं को वैधव्यव्रत प्रदान करने में

निपुण-अनेक रंगों वाले (शिकारी) कुत्तों एवं विशालकाय अथच (अपने पतियों) वनकेसरियों के लिए अभयदान (प्राणरक्षा) की अभ्यर्थना करने के लिए आई हुई सिंहनियों-सी प्रतीत होने वाली कुतियों द्वारा अनुसरण किया जा रहा था।

संस्कृतव्याख्या - **उपजातपरिचयैः**=उपजातः परिचयः संस्तवः येषां तैः, अतएव **अनुगच्छद्भि**=अनुसरद्भिः, **श्रमवशात्**=श्रमः गमनखेदः तस्य वशात्, **स्वभावपाटलतया**=स्वभावेन प्रकृत्या पाटलाः श्वेतरक्ताः तासां भावः तत्ता तया, **शुष्काभिः अपि**=नीरसाभिः अपि, **हरिणशोणितम्**=हरिणानां मृगाणां शोणितं रुधिरम्, **क्षरन्तीभिः इव**=स्रवन्तीभिः इव, **जिह्वाभिः**=रसनाभिः, **आवेद्यमानखेदैः**= आवेद्यमानः प्रकटीक्रियमाणः खेदः श्रमः यैः तैः, **विदृतमुखतया**=विवृत्तं व्यात्तं मुखं लपनं येषां ते विवृत्तमुखाः तेषां भावः तत्ता तया, **स्पष्टदृष्टदन्तांशून्**=स्पष्टं सुस्फुटं दृष्टाः अवलोकिताः दन्तानां रदानां अंशवः किरणाः तान्, **अत एव दंष्ट्रन्तराललग्नकेसरिसटान् इव**=दंष्ट्राणां दशनानाम् अन्तराले मध्ये लग्नाः सक्ताः केसरिणां सिंहानां सटाः केसराः येषु तान् इव, **सुक्कभागान्**=ओष्ठप्रान्तान्, **उद्वहद्भिः**=धारयद्भिः, **स्थूलवराटकमालिकापरिगतकण्ठैः**=स्थूलाः पीवराः वराटकाः कपर्दकाः तेषां मालिकाः स्रजः ताभिः परिगताः वेष्टिताः कण्ठाः गलप्रदेशाः येषां तैः, **महावराहदंष्ट्राप्रहारजर्जरैः**=महावराहाः वनशूकरा तेषां दंष्ट्राः दाढ़ाः तांसा प्रहाराः आघाताः तै, जर्जराः क्षतविक्षताः तै, **अल्पकार्यैः अपि**=स्वल्पशरीरैः अपि सद्भिः, **महाशक्तित्वात्**=महती प्रबला शक्तिः सामर्थ्यं येषां ते महाशक्तयः येषां भावः तत्त्व तस्मात्, **अनुपजातकेसरैः**=अनुपजाताः अनुत्पन्नाः केसराः सटाः येषां तैः। **केसरिकिशोरकैः इव**=केसरिणां सिंहानां किशोरकाः शिशवः तैः इव सिंहशिशुसदृशैरित्यर्थः। **मृगवधूवैधव्यदीक्षादानदक्षैः**=मृगाणां हरिणानां वध्वः स्त्रियः हरिण्यः ताभ्यः यत् वैधव्यदीक्षादानं वैधव्यं विनष्टभर्तृकता तस्य दीक्षा व्रतशिक्षा तस्याः दानं शिक्षणं तस्मिन् दक्षैः कुशलैः। **अनेकवर्णैः**=अनेके बहवः वर्णा रक्तपीतादयः येषां तैः श्वभिः कौलेयकैः। **अतिप्रमाणाभि**=विशालाकाराभिः। **केसरिणाम्**=सिंहानाम्। **अभयप्रदानयाचनार्थम्**=अभयस्य मरणभयविरहस्य प्रदानम् आश्वासनं तस्य याचनार्थं प्रार्थनार्थम्। **आगताभिः**=आयाताभिः। **सिंहीभिः इव**=सिंहिनीभिः इव। **कौलेयककुटुम्बिनीभिः**=सारमेयभार्याभिः, च=समुच्चयार्थ-कोऽयम्। **अनुगम्यमानम्** =अनुव्रज्यमानम्।

टिप्पणी :- **सृक्कभाग**-जबड़े, ओष्ठों के दोनों प्रान्त भाग। **वैधव्यदीक्षादान-दक्षैः**=विधवाओं के लिए पालनीय व्रत की शिक्षा देने में निपुण, मृगों को मार देने

में चतुर। **कौलेयककुटुम्बिनीभिः**=कुत्तों की भार्याओं के द्वारा। **क्षरन्तीभिरिव** में क्रियोत्प्रेक्षा है। सिंहीभिरिव में जात्युत्प्रेक्षा है।

कैश्चिद् गृहीतचमरबालगजदन्तभारैः, कैश्चिदच्छिद्रपर्णबद्धमधुपुटैः, कैश्चिन्मृगपतिभिरिव विभिन्नगजकुम्भमुक्ताफलनिकरसनाथपाणिभिः, कैश्चिद्यातुधानैरिव गृहीतपिशितभारैः, कैश्चित् प्रमथैरिव केसरिकृत्तिधारिभिः, कैश्चित् क्षपणकैरिव मयूरपिच्छवाहिभिः, कैश्चिच्छिशुभिरिव काकपक्षधरैः, कैश्चिज्जलदागमदिवसैरिव जलधरच्छाया मलिनाम्बैररनेकवृत्तान्तैः शबरवृन्दैः परिवृतम्....

हिन्दी अनुवाद :- जो चमरमृगों के केश तथा हाथी दांत का गट्ठर लिए हुए कुछ लोगों से-छिद्रविहीन पर्णों से मधु (रखने के लिए) का दोना बांधे हुए, कुछ लोगों से-हाथियों के कुम्भस्थल से उत्पन्न मुक्ताफल-समूह से भरे हुए पञ्जों वाले वनकेसरियों की भांति हाथियों के ललाट प्रदेश से उद्भूत मुक्ताफलसमूह से अलंकृत हाथों वाले, कुछ लोगों से-मांस का भार लिए हुए राक्षसों की भांति मांस का भार ढोते हुए, कुछ लोगों से-सिंहचर्म धारण करने वाले प्रमथों (भगवान् शङ्कर के पार्षदों) की भांति सिंहचर्म धारण करनेवाले, कुछ लोगों से-मयूरपंख लिए रहने वाले दिगम्बरों (नागा संन्यासियों) की भांति मयूरपंख धारण किए हुए, कुछ लोगों से-काकपक्ष (शिखण्डक अथवा जूड़ा) धारण करनेवाले शिशुओं की भांति कौओं के पंख धारण करनेवाले, कुछ लोगों से (पहले) सम्यक्प्रकार से उत्पाटित (तथा बाद में) विशिष्ट रूप से धारण किये गये हाथी दांतों वाले अतएव (कंस के यज्ञमण्डप में) सम्यक् रूप से उखाड़ कर धारण किये गये (कुवलयापीड नामक) हाथी के दांतों वाले भगवान् कृष्ण की लीला को मानो प्रकाशित करने वाले, कुछ लोगों से-बादलों की छांह से मलिनीभूत गगनमण्डल वाले वर्षाकालीन दिनों की भांति (काली) मेघों की कान्ति के समान मलिन वस्त्रों वाले, कुछ लोगों से तथा बहुविध चरित्रों वाले भील-समुदाय से घिरा हुआ था।

संस्कृतव्याख्या :- **कैश्चित्**=कतिपयैः। **गृहीतचमरबालगजदन्तभारैः**=गृहीताः आत्ताः चमरबालानाम् एतन्नामकमृगपुच्छकेशानां गजदन्तानां हस्तिदशनानां च भाराः परिमाणविशेषाः यैः तैः। **कैश्चित् अच्छिद्रपर्णबद्धमधुपुटैः**=अच्छिद्राणि रन्ध्ररहितानि यानि पर्णानि पत्राणि तैः बद्धानि निर्मितानि मधुपुटानि पुष्परससंपुटानि यैः तैः। **कैश्चित् मृगपतिभिरिव**=सिंहैरिव। **विभिन्नगजकुम्भमुक्ताफलनिकरसनाथपाणिभिः**=विभिन्नाः विदीर्णाः ये गजकुम्भाः हस्तिशिरपिण्डाः तेषां यानि

मुक्ताफलानि मौक्तिकानि तेषां निकरः समूहः तेन सनाथाः सहिताः पाणयः कराः येषां तैः, **कैश्चित्यातुधानैरिव**=पिशाचैः इव, **गृहीतपिशितभारैः**=गृहीतः धृतः पिशितस्य मांसस्य भारः परिमाणविशेषः यैः तैः। **कैश्चित्प्रमथैः इव**=रुद्रगणैः इव। **केसरिकृतधारिभिः**=केसरिणां सिंहानां कृत्तयः चर्माणि ताः धारयन्ति बिभ्रति इति तच्छीलाः तैः, **कैश्चित् क्षपणकैः इव**=जैनेः दिगम्बरैः इव, **मयूरपिच्छवाहिभिः**=मयूराणां शिखिनां पिच्छानि कलापान् वहन्ति धारयन्ति इति तच्छीलः तैः, **कैश्चित् शिशुभिः इव**=शावकैः इव, **काकपक्षधरैः**=काकानां वायसानां पक्षाः पतत्राणि तान् धरन्ति वहन्ति इति तैः शिशुपक्षे काकपक्षाः कुञ्चितकेशाः तान् वहन्ति इति तैः, **कैश्चित् कृष्णचरितम्**=वासुदेवचरित्रं, **दर्शयद्भिः इव**=प्रकटयद्भिरिव, **समुत्खातविधृतगजदन्तैः**=पूर्वं समुत्खाताः उत्पाटिताः पश्चात् विधृताः गृहीताः गजदन्ताः हस्तिरदाः तैः कृष्णोऽपि, पूर्वसमुत्थातं पश्चात् विधृतं गजदन्तं गजस्य कंसप्रेरितस्य कुवलयापीडस्य करिणः दन्तं धारितवान् इति श्रीमद्भागवतकथा। **कैश्चित् जलदागमदिवसैः इव**=जलदागमः वर्षतुः तस्य दिवसाः दिनानि तैः इव, **जवधरच्छायामलिनाम्बरैः** जलधराः जलदाः तेषां छाया कान्तिः तद्वत् मलिनानि कृष्णानि अम्बराणि वस्त्राणि येषां तैः जलदागमदिवसपक्षे–जलधराणां मेधानां छायया घटया मलिनं कृष्णवर्ण अम्बरं नभः यत्र तैः, **अनेकवृत्तान्तैः**=अनेके बहुप्रकाराः वृत्तान्ताः आचरणानि येषां तैः, **शबरवृन्दैः**=भिल्लगणैः, **परिवृतम्**=परिवेष्टितम्।

टिप्पणी – **गृहीत**=ग्रह+क्त=गृहीत। **यातुधान**–राक्षस, पिशाच, हिंसा कारने वाला जादू या माया दिखाने वाला (यातुः हिंसा माया वा धीयते पात्रत्वेन यस्मिन्)। **पिशित माँस। प्रमथ**–शिव के गण। शास्त्रों में देवताविशेष के गणों या सेवकों का वेष भी देवतानुसार ही लिखा गया है। शिव की भाँति प्रमथ भी बाधम्बर धारण करते हैं। कृत्ति–खाल चर्म; कृत्+क्तिन्। **क्षपणक**–जैन साधु जो वस्त्र नहीं पहनते, दिगम्बर रहते हैं। मोरपंख लिए रहा करते हैं। (क्षपयति वस्त्रं दूरीकरोति इति क्षपणः–क्षप्+णिच्+ल्यु, स एव क्षपणकः स्वार्थे कन्।) **काकपक्ष**=कौए के पंख, बच्चों के घुघराले बाल। **गजदन्त**=हाथीदाँत, कुवलयापीड नामक हाथी का दाँत, जिसे कृष्ण ने कंस की मल्लशाला में प्रवेश करते समय सूँड को पकड़ कर पटका था और उसका दाँत उखाड़कर उसी से कुवलयापीड तथा उसके महावत अम्बष्ठ को मारा था। यहाँ प्रायः उपमालंकार है। दर्शयद्भिरिव क्रियोत्प्रेक्षालंकार है।

अरण्यमिव सखड्गधेनुकम्, अभिनवजलधरमिव मयूरपिच्छचित्रचाप-धारिणम्, बकराक्षसमिव गृहीतैकचक्रम्, अरुणानुजमिवोद्धृतानेकमहानाग-

दशनम्, भीष्ममिव शिखण्डिशत्रुम्, निदाघदिवसमिव सतताविर्भूतमृगतृष्णम्, विद्याधरमिव मानसवेगम्, पराशरमिव योजनगन्धानुसारिणम्, घटोत्कचमिव भीमरूपधारिणम्, अचलराज कन्यका केशपाशमिव नीलकण्ठचन्द्रकाभरणम्, हिरण्याक्षदानवमिव महावराहदंष्ट्राविभिन्नवक्षःस्थलम्, अतिरागिणमिव कृतबहु-बन्दीपरिग्रहम्, पिशिताशनमिव रक्तलुब्धकम्, गीतकलाविन्यासमिव निषादानु-गतम्, अम्बिकात्रिशूलमिव महिषरुधिरार्द्रकायम्......।

हिन्दी अनुवाद - जो गैडों तथा वनकरिणियों से सङ्कुल वनप्रदेश की भाँति खड्ग (अर्थात् कौक्षेयक, कटार) तथा धेनुका (कृपाणिका, छुरी) से युक्त था। जो मोरपंख के समान चित्र-विचित्र (रङ्गों वाले) इन्द्रधनुष को धारण करने वाले मेघ की भाँति मोरपङ्खों के कारण विविधवर्णों वाले धनुष को धारण किये था, जो एकचक्रा नगरी को स्वायत्तीकृत (स्वाधीन) कर लेने वाले राक्षस बकासुर की भाँति एक चक्र (अस्त्रविशेष) लिये हुआ था, जो असंख्य महानागों (सर्पों) के दाँत उखाड़ लेने वाले अरुणानुज (विनतानन्दन गरुड़) की भाँति अनेक विशालकाय हाथियों के दाँत उखाड़ चुका था, जो (पाञ्चालनरेश द्रुपद के पुत्र) शिखण्डी के वैरी भीष्मपितामह की भाँति शिखण्ड (कँलगी या चूडा) धारी मयूरों का शत्रु था जो निरन्तर उत्पन्न हुई मृगमरीचिका (के भ्रम) वाले ग्रीष्मकालीन दिन की भाँति निरन्तर (वनों से) आविर्भूत मृगों (के वध) के लालच बोला था जो मानसरोवर में (स्नानादिहेतु) शीघ्रतापूर्वक गमन करने वाले विद्याधर (आकाशचारी देवयोनिविशेष) की भाँति 'मान' अर्थात् अहंकार के कारण 'संवेग' अर्थात् तीव्रगति वाला था (अथवा मानस मन की भाँति तीव्र गति वाला था,) जो (धीवरकन्या) योजनगन्धा का (कामोपभोगार्थ) अनुगमन करने वाले महर्षि पराशर की भाँति योजनगन्ध अर्थात् कस्तूरीमृग का पीछा करनेवाला था, जो (पुत्र रूप में) भीम का रूप धारण करनेवाले (हिडिम्बा राक्षसी के पुत्र) घटोत्कच की भांति भयावह रूप धारण करनेवाला था, जो नीलकण्ठ अर्थात् भगवान् शङ्कर की (ललाटस्थ) चन्द्रकला रूपी आभरण से संवलित पर्वतराज (हिमाचल) की पुत्री (पार्वती) के वेणीबन्धन की भांति नीलकण्ठ अर्थात् मयूरों की पिच्छचन्द्रिकाओं रूपी अलङ्करण वाला था, जो महावराह (रूपधारी भगवान् विष्णु) की दाढ़ों द्वारा घायल किये गये वक्षःस्थल वाला था, जो असंख्य वैतालिकों (स्तुतिगायकों) को अपनाने वाले उत्कट यथोऽभिलाषी अथवा अत्यन्त विलासी व्यक्ति की भांति असंख्य बलादपहत स्त्रियों को (पत्नीरूप में) स्वीकार करनेवाला था, जो रक्तलोलुप

आमिषभोजी (राक्षस) की भांति अनुरक्त (आज्ञापालक) व्याधों से युक्त था, जो (वीणातंत्री से उत्पन्न) निषाद नामक स्वरविशेष से अनुगत गायनकला की रचना के समान निषादों (भीलों) द्वारा अनुगत था, जो महिषासुर के रक्त से नीली आकृतिवाले सिंहवाहिनी दुर्गा के त्रिशूल की भांति (मारे गये) वनमहिषों के रक्त से भींगे हुए शरीर वाला था।

संस्कृतव्याख्या - **अरण्यम् इव**=विपिनमिव। **खड्गधेनुकम्**=खड्गधेनुका छुरिका तया सह विद्यमानम्, अरण्यपक्षे खड्गाः गण्डकाः धेनुकाः करिण्यः ताभिः सह विद्यमानम् **अभिनवजलधरम् इव**=अभिनवः नवीनः जलधरः जलदः तम् इव। **मयूरपिच्छचित्रचापधारिणम्**=मयूरपिच्छैः शिखिकलापैः चित्रः विविधवर्णः चापः धनुः तं धारयति वहति इति तच्छीलः तम्, जलधरपक्षे=मयूरपिच्छवत् चित्रं विविधवर्णं चापम् इन्द्रधनुः धारयति इति तच्छीलः तम्, **बकराक्षसम् इव**=बकासुरम् इव। **गृहीतैकचक्रम्**=गृहीतं धृतम् एकम् अद्वितीयं चक्रं शस्त्रविशेषः येन तम्, बकपक्षे-गृहीता अधीनीकृता एकचक्रा एतन्नाम्नी नगरी येन तम्। **अरुणानुजम् इव**=अरुणस्य सूर्यसारथेः अनुजः लघुभ्राता गरुडः तम् इव। **उद्धृतानेकमहानाग-दशनम्**=उद्धृतानि उत्पाटितानि अनेकेषां बहूनां महानागानां वनहस्तिनाम् दशनानि दन्ताः येन तम्, गरुडपक्षे-उद्धृतानि अनेकेषां महानागानां महासर्पाणां दशनानि येन तम्। **गरुडपक्षे**=उद्धृतानि अनेकेषां महानागानां महासर्पाणां दशनानि येन तम्। **भीष्मम् इव**=शान्तनुपुत्रम् इव। **शिखण्डिशत्रुम्**=शिखण्डिनां मयूराणां शत्रुं रिपुम्, भीष्मपक्षे शिखण्डिनः द्रुपदपुत्रस्य शत्रुम्। **निदाघदिवसम् इव**=निदाघस्य ग्रीष्मस्य दिवसः वासरः तम् इव। **सततविर्भूतमृगतृष्णम्**=सततं निरन्तरम् आविर्भूताः प्रकटीभूताः मृगाणां हरिणानां तृष्णा मारणाभिलाषः यस्य तम्। निदाघदिवसपक्षे सततम् आविर्भूता मृगतृष्णा सूर्यरश्मिषु जलभ्रान्तिः यस्मिन् तम्। **विद्याधरम् इव**=देवयोनिविशेषम् इव। **मानसवेगम्**=मानेन गर्वेण सवेगः तीव्रगतिमान् तम्, विद्याधरपक्षे मानसे एतन्नामके सरोवरे वेगः तीव्रता स्नानादिनिमित्तं यस्य तम्। **पराशरम् इव**=व्यासजनकम् इव। **योजनगन्धानुसारिणम्**=योजनं चतुष्कोशं गन्धः सौरभं यस्याः सा योजनगन्धा कस्तूरी सा अस्यास्तीति योजनगन्धः कस्तूरीमृगः तम् अनुसरति अनुधावति इति तच्छीलः तम्, पराशरपक्षे योजनगन्धाधीवरकन्या सत्यवती ताम् अनुसरतीति तच्छीलः तम्। **घटोत्कचम् इव**=हिडिम्बासुतम् इव। **भीमरूपधारिणम्**=भीमं भयङ्करं रूपं वेषं धारयति इति तच्छीलः तम्, घटोत्कचपक्षे भीमस्य मध्यमपाण्डवस्य स्वपितुः रूपम् आकृतिं धारयति इति तच्छीलः तम्।

अचलराजकन्याकेशपाशम् इव=न चलन्तीति अचला: पर्वता: तेषां राजा हिमालय: तस्य कन्यका पुत्री पार्वती तस्या: केशपाश: बलजालम् तम् इव। **नीलकण्ठ-चन्द्रकाभरणम्**=नीलकण्ठा: मयूरा: तेषां चन्द्रका: मेचका: (चन्द्राकारा: शिखण्डका इत्यर्थ:) ते एव आभरणानि आभूषणानि यस्य तम्। केशपाशपक्षे नीलकण्ठ शिव: तस्य चन्द्र: एव चन्द्रक: भालचन्द्रमा स एव आभरणं यस्य तम्। **हिरण्याक्षदानवम् इव**=हिरण्याक्ष: हिरण्यकशिपुभ्राता स चासौ दानव: दैत्य: तम् इव। **महावराहदंष्ट्रा-विभिन्नवक्ष:स्थलम्**=महावराहाणां वनसूकराणां दंष्ट्राभि: दशनै: विभिन्नं विक्षतं वक्ष:स्थलम् उर:स्थलं तम्, हिरण्याक्षपक्षे महावराहस्य वराहावताररूपस्य विष्णो: दंष्ट्राभि: विभिन्नं विदीर्णे वक्ष:स्थलं यस्य तम्। **अतिरागिणम् इव**=अतिरागी अत्यन्तं कीर्तिलोभी (यशोरागी इत्यर्थ:) तम् इव। **कृतबहुवन्दीपरिग्रहम्**=कृत: विहित: बहूनां बहुसंख्यकानां बन्दीनां हठादपहृतनारीणां परिग्रह: संग्रह: पत्नीत्वेन स्वीकारो वा येन तम्, अतिरागिपक्षे, कृत: बहूनां बन्दिनां चारणानां परिग्रह: येन तम्। **पिशिताशनम् इव**=पिशितं मांस: अशनं भोजनं यस्य स पिशिताशन: पिशाच: तम् इव, **रक्तलुब्धकम्**=रक्ता: अनुरक्ता: लुब्धाका: व्याधा: यस्मिन् तम् पिशिताशनपक्षे रक्तस्य रुधिरस्य लुब्ध: एव लुब्धक: लोभी तम्, **गीतकलाविन्यासम् इव**=गीतस्य गानस्य कला विद्या तस्या: विन्यास: स्थापना तम् इव, **निषादानुगतम्**=निषादै: शबरै: अनुगत: अनुसृत: तम् गीतकलापक्षे निषादेन एतदाख्येन स्वरेण अनुगतं सहितम, **अम्बिकात्रिशूलम् इव**=अम्बिका पार्वती तस्या: त्रिशूल: शस्त्रविशेष: तम् इव, **महिषरुधिरार्द्रकायम्**=महिषाणां सैरिभाणां रुधिरेण शोणितेन आद्र: क्लिन्न: काय: शरीरं यस्य तम् त्रिशूलपक्षे महिषस्य महिषासुरस्य रुधिरेण शोणितेन आर्द्र: क्लिन्न: काय: शरीरं यस्य तम्।

टिप्पणी - **सखड्गधेनुकम्**-छुरी के साथ (छुरिका खड्गधेनुका) छोटी तलवार के साथ, वनपक्ष में खड्गों-गैंडों और धेनुकाओं-हथिनियों से युक्त। **गृहीतैकचक्रम्**-जिसने एक चक्र धारण कर रखा था; बकराक्षस पक्ष में एक चक्रा नगरी को जिसने अपने अधीन कर रखा था इस नगरी का नाम एक चक्रा इसलिए था, क्योंकि इस नगरी के राजा ने बकासुर के भोजन की व्यवस्था के लिए एक-एक व्यक्ति का चक्र बना रखा था। इस चक्र के अनुसार एक बार एक ब्राह्मण पुत्र का क्रम आया जिसकी रक्षा के लिए पाण्डुपत्नी कुन्ती ने उसके स्थान पर भीम को भेज दिया था और भीम ने बकासुर का संहार किया था। **अरुणानुज**-अरुण का छोटा भाई गरुड, प्रजापति कश्यप की पत्नी विनता से इसका जन्म हुआ

था, ये बडे ही पराक्रमी थे। इन्होंने अपनी माता की दासता को अपने पराक्रम से ही समाप्त किया था, ये भगवान् विष्णु के वाहन है। अरुण सूर्य का सारथी है। **शिखण्डिशत्रु**-मोरों का विनाशक, शिखण्डी का शत्रु भीष्म। महाभारत की मान्यता है कि शिखण्डी की शत्रुता भीष्म से पूर्व जन्म की थी। पूर्वजन्म के काशीराज की कन्या अम्बालिका ने भीष्म से विवाह करने की इच्छा प्रकट की थी। भीष्म से स्वीकृति न मिलने पर उसने प्राण त्याग दिए और उसने अगले जन्म में द्रुपद के यहाँ शिखण्डी कन्या के रूप में जन्म ग्रहण किया। बाद में स्थूणाकर्ण नामक यक्ष ने इसे पुंसत्व प्रदान कर दिया था, यही शिखण्डी भीष्म की मृत्यु का कारण बना क्योंकि अर्जुन ने इसी को आगे करके बाण प्रहार किया था। **योजनागन्धानुसारिणम्**-जिसकी गन्ध एक योजन (अर्थात्) चार कोस तक जाती है ऐसी योजनगन्धा (कस्तूरी वाले मृगों का अनुसरण करने वाला, योजनभर तक गन्धवाली) धीवर, कन्या सत्यवती का अनुसरण करने वाले ऋषि पराशर ने इस योजनगन्धा के साथ समागम करके व्यास पुत्र को जन्म दिया था। **भीमरूपधारिणम्**-भयंकर (उग्र) रूप को धारण करने वाला, भीम के समान रूप धारण करने वाला घटोत्कच। हिडिम्बा राक्षसी से भीम के द्वारा इसकी उत्पत्ति हुई थी। पुत्र होने के कारण इसकी आकृति भीम से मिलती जुलती थी। **महावराहदंष्ट्रा०**-जंगली सुअरों से लड़ने के कारण उनकी दाढ़ों से घायल छाती वाला सेनापति, वराह अवतार के रूप में दाढ़ों से फाड़ी गई छाती वाला हिरण्याक्ष जो हिरण्यकशिपु का भाई था। जिसने समस्त पृथ्वी को जल में डुबों दिया था। भगवान् विष्णु ने वराह रूप धारण करके पृथ्वी का उद्धार किया और हिरण्याक्ष के वक्षःस्थल को विदीर्ण करके उसका वध किया। **निषादानुगतम्**-राक्षसों से अनुगत सेनापति, निषाद नामक स्वर से युक्त गानविद्या की रचना। **अरण्यमिव**-से लेकर **महिषरुधिरार्द्रकायम्**-तक सर्वत्र उपमा अलङ्कार है।

अभिनवयौवनमपि क्षपितबहुवयसम्, कृतसारमेयसंग्रहमपि फलमूलाशनम्, कृष्णमप्यसुदर्शनम्, स्वच्छप्रचारमपि दुर्गकशरणम् क्षितिभृत्पादानुवर्तनमपि राजसेवानभिज्ञम् अपत्यमिव विन्ध्याचलस्य, अंशावतारमिव कृतान्तस्य, सहोदरमिव पापस्य, सारमिव कलिकालस्य, भोषणमपि महासत्त्वतया गम्भीरमिवोपलक्ष्यमाणम्, अनभिभवनीयाकृतिं मातङ्गनामानं शबरसेनापतिमपश्यम्। अभिधानं तु तस्य पश्चादहमश्रौषम्।

हिन्दी अनुवाद -जो नूतन युवावस्था वाला होकर भी लम्बी उम्र काट चुका

था, जो 'सार' (धन) 'मेय' (नापने योग्य) अर्थात् धान्यादि अन्नों का संग्रह कर लेने पर भी फलफूल (मात्र) खाने वाला था, जो कृष्ण होकर भी कृष्ण सुदर्शन (चक्र) विहीन था, जो अप्रतिहतगति (स्वेच्छाभ्रमण) वाला होकर भी दुर्ग (किले) सरीखे एकमात्र आश्रय वाला था, जो भूपतियों के चरणों का अनुगामी होकर भी राजसेवा से अनभिज्ञ था, जो विन्ध्यपर्वत की सन्तति प्रतीत होता था, जो कृतान्त यमराज का अंशावतार प्रतीत होता था, जो पाप का सगा भाई प्रतीत होता था, जो कलिकाल का सर्वस्व प्रतीत होता था, जो भयावह होने पर भी महापराक्रमशाली होने के कारण मानो धीर-गम्भीर दिखाई पड़ रहा था तथा जो (दूसरों द्वारा) तिरस्कृत न की जा सकने योग्य अर्थात् दुर्धर्ष आकृतिवाला था। उस (सेनापति) का नाम तो मैंने बाद में (दर्शनानन्तर) सुना।

संस्कृत-व्याख्या :- **अभिनवयौवनम् अपि**=अभिनवं नवीनं यौवनं तारुण्यं यस्यास्ति तादृशम् अपि। **क्षपितबहुवयसम्**=क्षपितानि यापितानि बहूनि शैशवादीनि वयांसि आयूंषि येन तम्, अत्र विरोधः तत्परिहाराय क्षपितानि नाशितानि बहूनि वयांसि पक्षिणः येन तम् इत्यर्थः। **कृतसारमेयसंग्रहम् अपि**=कृतः विहितः साराणां घनानां मेघानां परिमातुं योग्यानां धान्यानां संग्रहः स्वीकारः येन तादृशम् अपि। **फलमूलाशनम्**=फलमूलानि एव कन्दादीनि एव अशनं भोजनं यस्य तम्, धनधान्यसंग्रहेऽपि फलमूलाशने विरोधः तत्परिहारस्तु कृतः सारमेयाणां शुनां संग्रहः येन तादृशमिति। **कृष्णम् अपि**=वासुदेवम् अपि। **असुदर्शनम्**=अविद्यमानं सुदर्शनं सुदर्शनचक्रं यस्य तम्, अत्र विरोधः तत्समाधानाय कृष्णं कालवर्णम् अत एव असुदर्शनम् असुन्दरम् इत्यर्थः। **स्वच्छन्दप्रचारम् अपि**=स्वच्छन्दः स्वतंत्रः प्रचारःपरिभ्रमणं यस्य तादृशम् अपि। **दुर्गैकशरणम्**=दुर्गः कोटाः एव एकं केवलं शरणं आवासस्थानं यस्य तम्, अत्र विरोधः तत्परिहारः दुर्गा एव चण्डी एव एकं शरणम् रक्षिका यस्य तम् तादृशमिति। **क्षितिभृत्पादानुवर्तिनम् अपि**=क्षितिभृतः राज्ञः पादौ चरणौ अनुवर्तते सेवते इति तच्छीलः तादृशम् अपि। **राजसेवानभिज्ञम्**=राज्ञः सेवा राजसेवा नृपपरिचर्या तस्याः अनभिज्ञः अपरिचितः तम्। अत्र विरोधः, तत्परिहारः-क्षितिभृत् पर्वतः तस्यः पादाः प्रत्यन्तप्रदेशाः तान् अनुवर्तते इति तच्छीलं तम् इत्यर्थः। **विन्ध्याचलस्य**=विन्ध्यपर्वतस्य। **अपत्यम् इव**=सन्तानम् इव, कठिन-शरीरमित्याशयः। **कृतान्तस्य**=यमराजस्य। **अंशावतारम् इव**=अवतीर्णां कलाम् इव, संहारकमित्याशयः। **पापस्य**=अशुभस्य। **सहोदरम् इव**=समानम् उदरं यस्य स सहोदरः सोदर्यः तम् इव, यातनाप्रदमित्याशयः। **कलिकालस्य**=कलियुगस्य।

सारम् इव=सर्वस्वम् इव, **भीषणम् अपि**=भयंकरम् अपि। **महासत्त्वतया**=महत् महनीयं सत्त्वं सामर्थ्यं यस्य सः महासत्त्वः तस्य भावः तत्ता तया अतिबलशालितया इत्यर्थः। **गम्भीरम् इव**=गाम्भीर्यगुणयुक्तम् इव। **उपलक्ष्यमाणम्**=दृश्यमानम्। **अनभिभवनीया**=अभिभवितुं योग्या अभिभवनीया न अभिभवनीया अनभिभवनीया अतिरस्करणीया आकृतिः आकारः यस्य तम्। **मातङ्गनामानम्**=मातङ्गः नाम यस्य स मातङ्गनामा तं मातङ्गाभिधानम्। **शबरसेनापतिम्**=शबराणां किरातानां सेना दलं तस्याः पतिः स्वामी तम्, किरातदलस्वामिननाम् इत्यर्थः। **अपश्यम्**=व्यलोकयम्। तस्य नाम्नः संस्तवः कथं जात इति शङ्कानिवारणाय आह-**तस्य**=शबरसेनापतेः। **अभिधानम्**=नाम, 'आख्याह्वे अभिधानं च नामधेयं च नामधेयं च नाम च' इत्यमरः तु, **अहम्**=वैशम्पायनः। **पश्चात्**=तद्दर्शनानन्तरम्। **अश्रौषम्**=आकर्णयम्।

टिप्पणी - **वयस्** (क) अवस्था, (ख) पक्षी। **सारमेयसंग्रहः** -(क) सार-धन, मेय-नापने योग्य वस्तु धान्यादि (ख) सारमेय-कुत्ता, इनका संग्रह। **क्षितिभृत्पाद**-क्षितिभृत्-राजा उसके पाद-चरण, **क्षितिभृत्**=पर्वत उसके पादनिकटस्थ प्रदेश। **भीषणमपि गम्भीरमिव**=यद्यपि वह शबर सेनापति अपने निम्नकोटि के आचरणों से सभी प्राणियों के लिए भयंकर था और भय पैदा करता हुआ, वह प्रतिक्षण चञ्चल स्वभाव वाला था तथापि अधिक बलशाली होने के कारण वह गम्भीर-सा दिखाई देता था। भीषणता जैसे दुर्गुण के रहते हुए भी महासत्त्वता के कारण गम्भीरता जैसा सद्गुण उसमें दिखाई देता था। **अनभिभवनीयाकृति**-उस शबर सेनापति के चेहरे पर ऐसा प्रभाव दिखाई देता था कि कोई उसका अपमान करने का साहस ही नहीं कर सकता था। **'अभिनव'** से **'राजसेवानभिज्ञम्'** तक वहाँ विरोधाभास अलङ्कार है। **'अपत्यमिव'** इत्यादि में उत्प्रेक्षालंकार है।

आसीच्च मे मनसि - अहो मोहप्रायमेतेषां जीवितं साधुजनविगर्हितं च चरितम्। तथाहि - पुरुषपिशितोपहारे धर्मबुद्धिः, आहारः साधुजनविगर्हितो मधुमांसादिः, श्रमो मृगया, शास्त्रं शिवारुतम्, उपदेष्टारः सदसतां कौशिकाः-प्रज्ञा शकुनिज्ञानम्, परिचिताः श्वानः, राज्यं शून्याटवीषु, आपानकमुत्सवः, मित्राणि क्रूरकर्मसाधनानि धनूंषि, सहाया विषदिग्विमुखा भुजङ्गा इव सायकाः, गीतमुत्सादकारि मुग्धमृगाणाम्, कलत्राणि बन्दीकृताः परयोषितः, क्रूरात्मभिः शार्दूलैः सह संवासः पशुरुधिरेण देवतार्चनम्, मांसेन बलिकर्म, चौर्येण जीवनम्, भूषणानि भुजङ्गमणयः, वनगजमदैरङ्गरागः यस्मिन्नेव कानने

निवसन्ति तदेवोत्खातमूल-मशेषतः कुर्वते' इति चिन्तयत्येव मयि स शबरसेनापतिरटवीपरिभ्रमणसमुद्भवं श्रममपनिनीषुरागत्य तस्यैव शाल्मलीतरोरधश्छायामवतारितकोदण्डस्त्वरित-परिजनोपनीतपल्लवासने समुपाविशत्।

हिन्दी अनुवाद - (उस समय) मेरे मन में आया-आश्चर्य है! इन (भीलों) का जीवन अज्ञान से परिपूर्ण और इनका आचरण (भी) साधु पुरुषों के द्वारा विनिन्दित है। क्योंकि ये (भगवती दुर्गा को) नरमांस के नैवेद्यार्पण को ही धर्म समझते हैं। सत्पुरुषों द्वारा विगर्हित मदिरा एवं मांस इत्यादि ही (इनका) भक्ष्य है। आखेट (ही) व्यायाम है। श्रृंगाली का रोदन ही (इनका) शास्त्र (प्रबोधजनक सिद्धान्त) है। उल्लू पक्षी (इनके लिए) शुभ एवं अशुभ के उपदेशक हैं। पक्षियों का ज्ञान अर्थात् पक्षियों के शब्द से शुभाशुभनिरूपणं कर लेना इनकी विवेकबुद्धि है। कुत्ते (ही इनके) विश्वासपात्र हैं। जनशून्य वनस्थलियों में स्वामित्व है। मद्यपान गोष्ठी (ही) उत्सव है। दारुणकर्मों में सहायक बनने वाले धनुष् (ही) मित्र है। विषव्यास मुँखों वाले सर्पों की भाँति विष बुझी नोकों वाले बाण (ही इनके) सहायक हैं। भोले-भोले मृगों का विनाश करने वाला (कर्म ही इनका) गीत है। बन्दिनी के रूप में बालादपहृत पराई नारियाँ (इनकी) गृहणियाँ हैं। निर्दय आत्मावाले बाघों के साथ (इनका) रहन-सहन है। पशुओं के रक्त से (इनकी) देवोपासना होती है। मांस से बलि प्रदान (चढ़ावा) होता है। परद्रव्यापहरण से (इनका) प्राणधारण होता है। सापों की मणियाँ अलङ्करण हैं। बनैले गजराज के मद से अंगविलेपन होता है। (ये कोलभील) जिस वन में टिकते हैं उसी को समग्रतः समूल उन्मीलित कर देते हैं। मेरे इस प्रकार ध्यानावस्थित रहने पर भी वह शबरसेनापति वनस्थली में (इतस्ततः) पर्यटन करने से उत्पन्न थकावट को दूर करने की इच्छा से, उसी सेमर के पेड़ की अधोवर्तिनी छाया में आकर, धनुष को उतार कर (अनधिज्य करके) तत्काल अनुचरों द्वारा लाये गए पल्लवों के आसन पर बैठ गया।

संस्कृतव्याख्या -**मे**=मम, **मनसि**=हृदये, **आसीत्**=अभवत्, **अहो**=आश्चर्यम्, **एतेषाम्**=पुरोदृश्यमानानाम्, **जीवितम्**=जीवनम्, **मोहप्रायम्**=मोहः अविवेकः प्राचुर्येण यस्मिन् तत्, प्रायः विवेकशून्यम्, **चरितम्**=आचरणं च, **साधुजनविगर्हितम्**= साधुजनैः सज्जनैः विगर्हितं विनिन्दितम्, तथाहि-पूर्वोक्तमेव, यथा **पुरुषपिशितोपहारे**= पुरुषाणां नराणां पिशितस्य मांसस्य उपहारे समर्पणे, **धर्मबुद्धिः**=पुण्यभावना, **साधु-**

जनविगर्हितः=साधुजनाः सज्जनाः तैः विगर्हितः विनिन्दतः, **मधुमांसादिः**=मधु मद्यं मांसं पिशितं ते आदौ यस्य स सुरापिशितादिः, **आहारः**=अशनम्, **मृगया**=आखेटः, **श्रमः**=व्यायामः, **शिवारुतम्**=शिवानां श्रृगालीनां रुतं रोदनशब्दः, **शास्त्रम्**=शासनग्रन्थः तेनैव निर्देशोपलब्धे, **सदसताम्**=सन्ति शुभानि असन्ति अशुभानि तेषाम्, **उपदेष्टारः** =उपदेशकः, **कौशिकाः**=उल्लूकाः तेषां नीतेरेव अनुसरणाद्, **शकुनिज्ञानम्**=शकुनीनां पक्षिणां ज्ञानं बोधः, **प्रज्ञा**-नवनवोन्मेषशालिनी बुद्धिः, **श्वानः**=कौलेयकाः, **परिचिताः**=आत्मीयाः, **शून्याटवीषु**=शून्याः निर्जनाः अटव्याः विपिनानि तासु, **राज्यम्**=आधिपत्यम्, **आपानकम्**=मद्यपानगोष्ठी, **उत्सवः**= प्रमोदावसरः, **क्रूरकर्मसाधनानि**=क्रूराणां नृशंसानां कर्मणां हिंसादिकृत्यानां साधनानि हेतुभूतानि, **धनूंषि**=चापाः, **मित्राणि**=सुहृदः, **भुजङ्गाः इव**=विषधरा इव, **विषदिग्धमुखा**=विषेण गरलेन दिग्धं लिप्तं मुखम् अग्रभागः येषां ते, भुजङ्गपक्षे विषदिग्धं मुखम् भुजङ्गपक्षेविषदिग्धं मुखम् आननं येषां ते इत्यर्थः, **सायकाः**=बाणाः **सहायाः**=सहाय्य-सम्पादकाः, **मुग्धमृगाणाम्**=मुग्धाः सरलहृदयाः मृगाः हरिणाः तेषाम्, **उत्सादकारि**= विनाशकारि, **गीतम्**=गानम्, **बन्दीगृहीताः**=बन्द्यः कारावासिन्यः तद्रूपेण गृहीताः धृताः अपहृता इति, **परयोषितः**=परेषां शत्रूणाम् अन्येषां वा योषितः ललनाः, **कलत्राणि**=सुन्दर्यः भोग्या इत्यर्थः, **क्रूरात्मभिः**=क्रूरः आत्मा येषां तैः दुष्टान्तः करणैः **शार्दूलैः**=व्याघ्रैः, **सह**=साकम्, **संवासः**=आवासः, **पशुरुधिरेण**= पशूनां चतुष्पादानां रुधिरं शोणितं तेन, **देवतार्चनम्**=देवतायाः अर्चनम् देवपूजनम्, **मांसेन**=पिशितेन, **बलिकर्म**=बलिः हन्तकारः तस्याः कर्म क्रिया, **चौर्येण**= तस्करवृत्त्या, **जीवनम्**=प्राणधारम्, **भुजङ्गमणयः**=भुजङ्गानां सर्पाणां मणयः फणारत्नानि, **भूषणानि**=अलङ्काराः, **वनगजमदैः**=अरण्यहस्तिदानवारिभिः, **अङ्गरागः**=शरीरलेपनम्, **यस्मिन् एव**=यत्रापि, **कानने**=विपिने, **निवसन्ति**=तिष्ठन्ति, **तद् एव**=तत्काननम् एव, **अशेषतः**=अविद्यमानः शेषः यस्य तस्मात् समग्रतया, पूर्णतः इति वा, **उत्खातमूलम्**=उत्खातं समुत्पाटितं मूलं बुध्नभागः यस्य तादृशं सर्वथा विनष्टमित्यर्थः, **कुर्वते**=कुर्वन्ति **इति**=एवम् **मयि**=वैशम्पायने **चिन्तयति एव**=विचारयति एव, **सः**=पूर्वोक्तः, **शबरसेनापतिः**=किरातदलपतिः, **अटवीभ्रमणसमुद्भवम्**=अटवीषु काननेषु भ्रमणं संचरणं तस्मात् समुद्भवम् समुत्पन्नम्, **श्रमम्**=खेदम्, **अपिनिनीषुः**=अपनेतुम् इच्छुः दूरीकर्तुम् अभिलाषुकः, **तस्य**=पूर्ववर्णितस्य, **शाल्मलीतरोः**=शाल्मलीवृक्षस्य अधःछायायाम् अधःस्थेऽनातपे, **आगत्य**=उपगम्य, **अवतारितकोदण्डः**=अवतारितं स्कन्धात् अवनामितं कोदण्डः

चापः येन तादृशः, **त्वरितपरिजनोपनीतपल्लवासने**=त्वरा संजाता अस्य इति त्वरितः शीघ्रतावान् परिजनः सेवकः तेन उपनीतं समीपे प्रापितं यत् पल्लवासनं किसलय-विष्टरः तस्मिन् तादृशे, **समुपाविशत्**=तस्थिवान्।

टिप्पणी - **मोहप्रायः**-प्रायः अज्ञान से भरा हुआ, अपने में शबर लोग चतुरता रखते हैं और दुर्गापूजन-जैसा विवेकपूर्ण कार्य भी करते हैं इसलिए उनके जीवन को प्रायः अविवेकशील बताया गया है, पूर्णतः नहीं। आपानकम्-(आ समन्तात् आगत्य पिबन्ति यत्र तद् आपानम् आपानमेव आपानकम्) शराब पीने की गोष्ठी जिसमें सभी लोग मिलकर शराब पीते हैं। यह्री आयोजन शबरों के लिए उत्सव स्वरूप है। 'भुजंगा इव' में **उपमा अलंकार** है। समुपाविशत्-सम्+उप+विश् धातु लङ् प्र० पु० ए० व०।

अन्यतमस्तु शबरयुवा ससंभ्रममवतीर्य तस्मात् करयुगलक्षोभिताम्भसः सरसो वैदूर्यद्रवानुकारि, प्रलयदिवसकरकिरणोपतापादम्बैरकदेशमिव विलीनम्, इन्दुमण्डलादिव प्रस्यन्दितम्, द्रुतमिव मुक्ताफलनिकरम्, अत्यच्छतया स्पर्शानुमेयं हिमजडम्, अरविन्दकोशरजः कषायमम्भः कमलिनीपत्रपुटेन प्रत्यग्रोद्धृताश्च धौतपंकनिर्मला मृणालिकाः समुपाहरत्। आपीतसलिलश्च सेनापतिस्ताः मृणालिकाः शशिकला इव सैंहिकेयः क्रमेणादशत्। अपगतश्रमश्चोत्थाय परिपीताम्भसा सकलेन तेन शबरसैन्येनानुगम्यमानः शनैः शनैरभिमतं दिगन्तरमयासीत्।

हिन्दी अनुवाद - उनमें से एक दूसरा नवयुवक शबर वेगपूर्ण (पम्पासरोवर में) उतरकर दोनों हाथों से विलोडित जल वाले उस सरोवर से वैदूर्यमणि के द्रव का अनुकरण करने वाले अर्थात् अत्यन्त धवल तथा प्रलयकालीन सूर्य की किरणों के उपताप (उष्णता) से पिघले हुए आकशमण्डल के एक प्रविभाग (खण्ड) सदृश, चन्द्रबिम्ब से स्रवित हुए प्रतीत होने वाले, द्रवीभूत मुक्ताफल-समूह प्रतीत होने वाले, अत्यन्त निर्मल होने के कारण (शीतल) स्पर्श से अनुमान करने योग्य, बर्फ के समान शीतल तथा कमलपुष्प के कोशजनित पराग से कसैले पड़े हुए-जल को कमलिनी के पत्तों से बने दोंने में भरकर तथा तत्काल उखाड़ी गई एवं धुले हुए कीचड़ वाली अतएव निर्मल कमलनालों को ले आया। पानी पीकर सेनापति (मातङ्ग) ने उन कमलनालों को उसी प्रकार क्रमशः (अर्थात् जलपानानन्तर अथवा धीरे-धीरे) खाया जैसे सिंहिका-पुत्र राहु चन्द्र कलाओं को (निगलता है)। थकावट दूर हो जाने पर जलपान किये हुए उस सम्पूर्ण किरात-

सैन्य से अनुसरण किया जाता हुआ धीरे-धीरे मनचाही दिशा की ओर चला गया।

संस्कृतव्याख्या - **तु**=पुन:, **अन्यतम:**=एकतम:, **शबरयुवा**=तरुणकिरात: **ससम्भ्रमम्**=सम्भ्रम: वेग: तेन सह सवेगम्, **अवतीर्य**=अन्त: प्रविश्य, **करयुगल-क्षोभिताम्भस:**=करयो: हस्तयो: युगलं करयुगलं पाणिद्वन्द्वं तेन क्षोभितं विलोडितम् अम्भ: वारि यस्य तस्मात्, **तस्मात्**=वर्णितपूर्वात्, **कमलिनपत्रपुटेन**=कमलिनी पद्मिनी तस्या: पत्रपुटं दलसंपुटं तेन, **वैदूर्यद्रवानुकारि**= वैदूर्यं हरितमणि: तस्य द्रव: द्रुतरस: तम् अनुकरोति सादृश्यं भजते इति तच्छीलम्, **प्रलयदिवसकर-किरणोपतापात्**=प्रलये कल्पान्ते य: दिवसकर: सूर्य: (अत्यन्ततीक्ष्ण इत्याशय:) तस्य किरणै: अंशुभि: उपतापात् उष्णताया:, **विलीनम्**=विगलितम्, **अम्बरैकदेशम् इव**=अम्बरस्य आकाशस्य एकदेश: भाग: तम् इव, **इन्दुमण्डलात्**= इन्द्रो: मण्डलं तस्मात् चन्द्रमण्डलात्, **प्रस्यंदितम् इव**=क्षरितम् इव, **द्रुतम्**=द्रवीभूतम्, **मुक्ताफलनिकरम् इव**= मुक्ताफलानां मौक्तिकानां निकर: समूह: तम् इव, **अत्यच्छतया**=अत्यन्तं अच्छम् स्वच्छम् अत्यच्छं तस्य भाव: तत्ता तया अत्यन्तनिर्मलतया, **स्पर्शानुमेयम्**=स्पर्शेन एव शैत्यस्पर्शेन एव (न तु दृष्ट्या इति भाव:) अनुमेयम् अनुमातुं योग्यम्, **हिमजडम्**=हिमवत् तुहिनवत् जडं शीतलम्, **अरविन्दकोशरज: कषायम्**=अरविन्दानि कमलानि तेषां कोशा: कर्णिकाधारा: तेषां रजांसि परागा: तै: कषायम् कषायरसवत्, **अम्भ:**=सलिलम्, **प्रत्यग्रोद्धृता:**= प्रत्यग्रं तत्क्षणं उद्धृता: उत्पाटिता:, **धौतपङ्कनिर्मला:**=धौत: क्षालित: पङ्क: कर्दम: यासां ता: धौतपङ्का: अतएव निर्मला: स्वच्छा:, **मृणालिका:**=कमलनालानि, **च**=समुच्चयार्थकोऽयम्, **समुपाहरत्**=समानीतवान्, **आपीतसलिल:**=आ ईषत् पीतं पानविषयीकृतं सलिलं जलं येन स:, **सेनापतिश्च**=मातङ्गनामा सेनास्वामी च, **सैंहिकेय:**=सिंहिकापुत्र: राहु:, **शशिकला: इव**=शशिन: चन्द्रस्य कला: अंशव: ता: इव, **ता:**=पूर्वनिर्दिष्टा:, **मृणालिका:**=कमलनालानि, **क्रमेण**=क्रमश: एकैकम् इत्यर्थ:, **अदशत्**=दशनै: अभक्षयत्। **अपगतश्रम:**=अपगत: दूरीभूत: श्रम: खेद: यस्य तादृश: च, **उत्थाय**=उद्गम्य। **परिपीताम्भसा**=परिपीतं तृप्तिपूर्वकं पानविषयीकृतम् अम्भ: सलिलं येन तेन, **सकलेन**=समस्तेन, **तेन**=पूर्वोक्तेन, **शबरसैन्येन**=किरातदलेन, **अनुगम्यमान:**= अनुव्रज्यमान:, **शनै: शनै:**=मन्दंमन्दम्, **अभिमतम्**=अभीष्टम्, **दिगन्तरम्**=अन्यां दिशं प्रति, **अयासीत्**=अगच्छत्।

टिप्पणी - **अन्यतम:**=उन शबरों में से एक। **अवतीर्य**-अव+तृ+क्त्वा-ल्यप्। **स्पर्शानुमेय**- छूने से ही जिसे पहचाना जा सकता था। **शशिकला इव**

सैंहिकेयः-जिस प्रकार सिंहिका पुत्र राहु चन्द्रकलाओं का भक्षण करता है। दक्ष प्रजापति की पुत्री तथा कश्यप की पत्नी सिंहिका से उत्पन्न राहु पूर्वकाल(पूर्णमासी एवं अमावस्या) पर चन्द्रमा का ग्रास करता है-यह पौराणिक मान्यता है। **परिपीताम्भसा**-पूरी तरह से जल पी चुकने वाले शवर दल के साथ। **अनुगम्यमानः** -अनु+गम्+यक्+शानच्। '**अम्बरैकदेशमिव**'-इत्यादि स्थलों मे उत्प्रेक्षा है।

एकतमस्तु जरच्छबरस्तस्मात्पुलिनवृन्दादनासादितहरिणपिशितः पिशिताशन इव विकृतदर्शनः पिशितार्थी तस्मिन्नेव तरुतले मुहूर्तमिव व्यलम्बत। अन्तरिते च तस्मिन् शबरसेनापतौ स जीर्णशबरः पिबन्निवास्माकमायूंषि रुधिर-बिन्दुपाटलया कपिलभ्रूलतापरिवेषभीषणया दृष्ट्या गणयन्निव शुककुल-कुलायस्थानानि श्येन इव विहगामिषास्वादलालसः सुचिरमारुरुक्षुस्तं वन-स्पतिमामूलादपश्यत्। उत्क्रान्तमिव तस्मिन् क्षणे तदालोकनभीतानां शुककुलानामसुभिः।

हिन्दी अनुवाद - (किन्तु) हरिण का मांस न प्राप्त कर पाने वाला (अतएव) मांसार्थी, पिशिताशन-राक्षस की भाँति भयावह स्वरूपवाला उनमें से एक वृद्धशबर (खूसट भील) उसी से सेमरवृक्ष के नीचे दो घड़ी भर ठहर गया। उस शबरसेनापति (मातङ्ग) के दृष्टि से ओझल हो जाने पर वह बुड्ढा भील मानों हम लोगों (पक्षियों) की अवस्था पीता हुआ, रक्तबिन्दुओं के समान पाटल-(श्वेतरक्त) तथा पिङ्गलवर्णी भ्रूलता की परिधि के कारण भयावह दृष्टि से मानो शुक परिवारों के घोसलों के स्थलविशेषों को गिनता हुआ, पक्षियों का मांसभक्षण करने के लिए लालायित बाज पक्षी की भाँति, चढ़ने की इच्छा से बड़ी देर तक उस सेमर के पेड़ को आमूलचूड़ देखता रहा। उस समय उसकी ताकझाँक से संत्रस्त हुए शुकपरिवारों के प्राण मानों निकल गये।

संस्कृतव्याख्या - **तु**=पुनः, **तस्मात्**=पूर्वोक्तात्, **पुलिनवृन्दात्**=पुलिनाः शबराः तेषां वृन्दं सैन्यं तस्मात्, **एकतमः**=अन्यतमः, **जरच्छबरः**=जरन् वृद्धः शबरः किरातः, **अनासादितहरिणपिशितः**=अनासादितं न लब्धं हरिणपिशितं मृगपललं येन तादृशः, **पिशिताशन इव**=पिशितं मांसम् एव अशनं भोजनं यस्य सः, **पिशाचः इव**=व्याघ्र इव वा, **विकृतदर्शनः**=विकृतं असुन्दरं दर्शनं यस्य सः, **पिशितार्थी**=मांसार्थी, **तस्मिन्**=पूर्वोक्ते, **तरुतले एव**=वृक्षमूले एव, **मुहूर्तमिव**=किञ्चित्कालमिव, **व्यलम्बत**=विलम्बम् अकरोत्, **तस्मिन्**=पूर्वोक्ते, **सेनापतौ**=दलस्वामिनि मातङ्गे, **अन्तरिते च**=वृक्षादिना व्यवहिते च, **सः**=असौ पूर्वोक्तः, **जीर्णशबरः**=वृद्धकिरातः,

अस्माकम्=पक्षिणाम्, **आयूंषि**=वयांसि, **पिबन् इव**=विलोपयन् इव, **रुधिरबिन्दुपाटलया**=रुधिरस्य रक्तस्य बिन्दुः कणः तद्वत् पाटला श्वेतरक्ता तया, **कपिलभ्रूलतापरिवेषभीषणया**=कपिले पिङ्गलवर्णे ये भ्रूलते भ्रकुट्यो तयोः परिवेषः परिधिः तेन भीषणा भयङ्करी तया, **दृष्टया**=चक्षुषा, **शुककुलकुलायस्थानानि**=शुकाः कीराः तेषां कुलानि समूहाः तेषां कुलायाः नीडानि तेषां स्थानानि तानि, **गणयन् इव**=गणनां कुर्वन् इव, **श्येनः इव**=शशादः पक्षिविशेषः इव, **विहगामिषास्वादलालसः**=विहगाः पक्षिणः तेषाम् आमिषं मासं तस्य आस्वादे भक्षणे लालसः लम्पटः, **तम्**=पूर्वोक्तम्, **वनस्पतिं**=शाल्मलीवृक्षम्, **आरुरुक्षुः**=आरोढुमिच्छुः, **आमूलात्**=मूलाद् आरभ्य, **सुचिरम्**=चिरकालं यावत्, **अपश्यत्**=विलोकयामास। **तस्मिन् क्षणे**=तस्मिन् काले, अवलोकनसमये, **तदालोकभीतानाम्**=तस्य जीर्णशबरस्य यत् अवलोकनं विलोकनं तेन भीतानां संत्रस्तानाम्, **शुककुलानाम्**=कीरगणानाम् **असुभिः**=प्राणैः, **उत्क्रान्तम् इव**=निःसृतमिव।

टिप्पणी - **जरच्छबरः**-बूढ़ा किरात। **श्येन**-बाज पक्षी। **आरुरुक्षुः**-चढने की इच्छा वाला आ+रुह्+सन्, उ प्रत्यय। असुभिः उत्क्रान्तम् इव-प्राण निकल से गये। जीर्णशबर की दृष्टि पड़ते ही पक्षियों को अपनी मृत्यु दिखाई देने लगी थी। 'पिबन्निव' तथा 'उत्क्रान्तमिव' में **क्रियोत्प्रेक्षा** है।

किमिव हि दुष्करमकरुणानाम्? यतः सः तमनेकतालतुङ्गमभ्रंकषशाखाशिखरमपि सोपानैरिवायत्नेन पादपमारुह्यताननुपाजातोत्पतनशक्तीन् कांश्चिदल्पदिवसजातान् गर्भच्छविपाटलाच्छाल्मलीकुसुमशङ्कामुपजनयतः काश्चिदुद्भिद्यमानपक्षतया नलिनसंवर्तिकानुसारिणः कांश्चिदर्कफलसदृशान्, कांश्चिल्लोहितायमानचञ्चुकोटीनीषद्विघटितदलपुटपाटलमुखानां कमलमुकुलानां श्रियमुद्वहतः, कांश्चिदनवरतशिरःकम्पव्याजेन निवारयत इव प्रतीकारासमर्थानेककैकतया फलानीव तस्य वनस्पतेः शाखासन्धिभ्यः कोटरान्तरेभ्यश्च शुकशावकानग्रहीत्, अपगतासूंश्च कृत्वा क्षितावपातयत्।

हिन्दी अनुवाद - क्योंकि अकरुणों (निर्दयों) के लिये भला क्या दुष्कर है। (अर्थात् कुछ भी नहीं!)

तभी तो उसने (वृद्ध शबर ने एक दूसरे के ऊपर स्थापित) अनेक ताड़ वृक्षों के समान ऊँचे तथा गगनचुम्बी शाखाग्रभागों वाले भी उस (सेमर के) पेड़ पर बिना प्रयास के ही मानों सीढ़ियों के सहारे चढ़कर-अनुत्पन्न आकाश सञ्चरण (उड़ने) की सामर्थ्य वाले उन शुकशावकों को फलों की भाँति उस सेमरवृक्ष की

शाखाओं के सन्धिस्थलों तथा कोटरों के भीतरी भागों से (बाहर) घसीट लिया तथा (उन्हें) निष्प्राण बनाकर जमीन पर फेंक दिया; (जिन शुकशावकों में) कुछ तो थोड़े दिन पहले की पैदाइश वाले अतएव गर्भावस्था की कान्ति के समान पाटलवर्ण वाले तथा सेमर के फूल की शङ्का उत्पन्न कर रहे थे, कुछ प्रादुर्भूयमान पंखों वाले होने के कारण कमल की नई कोपलों का अनुकरण कर रहे थे, कुछ मन्दारफल के समान थे, कुछ अरुणायमान चञ्चुओं के अग्रभाग वाले अतएव अल्पमात्र प्रस्फुटित पत्रसमूह के कारण पाटलवर्ण (श्वेतरक्त) मुखों वाले कमलकोरकों (कोयों) की शोभा वहन कर रहे थे और कुछ निरन्तर सिर की कँपकँपी के बहाने मानों (हम बच्चे हैं हम पर दया करो, मत मारो! इस प्रकार) रोकते हुए तथा प्रतीकार (वधनिवृत्त्युपाय) करने में असमर्थ थे।

संस्कृतव्याख्या - **हि**=तस्माद्धेतोः **अकरुणानाम्**=निष्ठुराणाम्, **किमिव**= कतमत इव, **दुष्करम्**=कठिनम्, न किमपि इत्यर्थः, **यतः**=यस्माद् हेतोः, **सः**= जीर्णशबरः **अनेकतालतुङ्गम्**=अनेके बहवः तालाः वृक्षविशेषाः, एकस्योपरि द्वितीय इति क्रमेण निहिताः तद्वत् तुङ्गम् अत्युच्चम्, **अभ्रंकषशाखाशिखरम्अपि**= अभ्रं मेघं कषन्ति विलिखन्ति (स्पृशन्ति इत्याशयः) इति अभ्रंकषाणि शाखानाम् पल्लवानां शिखराणि अग्राणि यस्य तम् अपि, **पादपम्**=शाल्मलीवृक्षम्, **सोपानैः इव**=आरोहणैः इव, **अयत्नेन एव**=प्रयासं विनैव, **आरुह्य**=आरोहणं कृत्वा, **अनुपजातोत्पतनशक्तीन्** =न उपजाता अनुपजाता अनुत्पन्ना उत्पतनस्य उड्डयनस्य शक्तिःसामर्थ्यं येषु तान्, **तान्**=तादृशान्, तेषु **कांश्चिदल्पदिवसजातान्**= कतिपयदिनोत्पन्नान्, अत एव, **गर्भच्छविपाटलान्**=गर्भस्य भ्रूणस्य या छविः शोभा तया पाटलान् श्वेतरक्तान्, **वर्णसाम्यात् शाल्मलीकुसुमशङ्काम्**=शाल्मलीकुसुमानां सप्तपर्णपुष्पाणां शङ्कां भ्रान्तिम्, **उपजनयतः**=उत्पादयतः, **कांश्चित् उद्भिद्यमानपक्षतया**=उद्भिद्यमानाः उत्पद्यमानाः पक्षाः पत्राणि येषां ते उद्भिद्यमानपक्षाः तेषां भावः तत्ता यया, **नलिनसंवर्तिकानुकारिणः**=नलिनानां पद्मानां संवर्तिकाः वर्तिकारूपाणि नूतनदलानि ताः अनुकुर्वन्तीति तच्छीला तान्, **कांश्चित् अर्कफलसदृशान्**=अर्काणां मन्दाराणां फलानि प्रसवाःतत्सदृशान् देहेन वर्णेन च मन्दारफलसमानाम्, **कांश्चित् लोहितायमानचञ्चुकोटीन्**=लोहितायमानाः अलोहिताः लौहिताः सम्पद्यमाना इति रक्तायमानाः चञ्चूनां त्रोटीनां कोट्यः अग्रप्रदेशाः येषां तान्, अत एव च, **ईषद्-विघटितदलपुटपाटलमुखानाम्**=ईषत् किञ्चित् विघटितैः विकसितैः दलपुटैः पत्रसंपुटैः पाटलानि श्वेतरक्तानि मुखानि अग्रभागाः येषां तेषाम्, **कमलमुकुलानाम्**=

पङ्क-जकुड्मलानाम्, **श्रियम्**=शोभाम्, साम्यमित्यर्थः, **उद्वहतः**=धारयतः, **कांश्चित्अनवरतशिरःकम्पव्याजेन**=अनवरतं सततं यः शिरःकम्पः बालतया उत्तमाङ्गनिधूननं तस्य व्याजेन मिषेण, निवारयतः, **इव**=स्ववधं प्रतिषेधतः इव, **प्रतीकारासमर्थान्**=प्रतीकारः प्रत्याघातः उड्डीयरक्षणं वा तस्मिन् असमर्थान् अशक्तान्, **शुकशावकान्**=कीरशिशून्, **फलानि इव**=वृक्षप्रसवा इव, **तस्य**=पूर्वोक्तस्य, **वनस्पतेः**=शाल्मलीवृक्षस्य, **शाखासन्धिभ्यः**=शाखानां स्कन्धानां सन्धयः ग्रन्थयः ताभ्यः, **कोटरान्तरेभ्यश्च**=स्कन्धविवरमध्येभ्यश्च, **एकैकशः**=एकमेकं कृत्वा, **अग्रहीत्** =आदात्, **अपगतासून्**=विगतप्राणान्, **कृत्वा च**=विधाय च, **क्षितौ**=पृथिव्याम्, **अपातयत्**=अक्षिपत्।

टिप्पणी - **दुष्कर**-कठिनाई से किये जाने योग्य, दुःखेन कर्तुं शक्यते (दुस्+कृञ्+खल्)। **अनेकताललतुङ्गम्**-कई ताड़ के वृक्षों को एक दूसरे के ऊपर खड़ा करके जितनी ऊँचाई हो उतना ऊँचा। **अभ्रंकष**-गगनचुम्बी। **संवर्तिका**-नया पत्ता, जिसका मुकुल अभी विकसित नहीं हो पाया है, वत्ती जैसा बना हुआ है। (संवर्तिका नवदलम्-अमरकोष) मुकुल-कली कुड्मल (कुड्मलो मुकुलोऽस्त्रियाम्, अमरकोष)। **किमिव हि**-इत्यादि में **अर्थापत्ति** सोपानैरिव में जात्युत्प्रक्षा, शाल्मली..' में भ्रान्तिमान्, नलिन.... अर्कफल..' में आर्थी उपमा, तथा कमलमुकुलानां......' में निदर्शना अलङ्कार है।

तातस्तु तं महान्तमकाण्ड एव प्राणहरमप्रतीकारमुपप्लवमुपनतमवलोक्य द्विगुणतरोपजातवेपथुर्मरणभयादुद्भ्रान्ततरलतारकां विषादशून्यामश्रुजलप्लुतां दृशमितस्ततो विक्षिपन्, उच्छुष्कतालुरात्मप्रतीकाराक्षमस्त्रासस्त्रस्तसंधिशिथिलेन पक्षसम्पुटेनाच्छाद्य मां तत्कालोचितप्रतीकारं मन्यमानः स्नेहपरवशो मद्रक्षणाकुलः किंकर्त्तव्यताविमूढः क्रोडभागेन मामवष्टभ्य तस्थौ।

हिन्दी अनुवाद - (मेरे) पिताजी तो बिना अवसर के (अर्थात् अकस्मात् ही) आए हुए उस प्राणघातक शमनोपायविहीन उपद्रव को देखकर (पहले की अपेक्षा) पैदा हुई दुगुनी कँपकँपी से युक्त, मृत्युभय से अतिशय नाचती हुई चंचल पुतलियों वाले शोक के कारण निस्तेज (बुझी हुई) तथा अश्रुजल से प्लावित (डबडबाई हुई) दृष्टि को इधर उधर दिशाओं में दौड़ाते हुए अत्यधिक शुष्क, तालुभाग वाले, अपनी विपत्ति मिटाने के उपाय में असमर्थ, भयवश विदीर्ण अस्थिबन्धों (हड्डियों के जोड़ों) के कारण शिथिल पड़े हुए दोनों पंखों से मुझे तिरोहित कर (तथा इसी को) उस समय के अनुकूल रक्षणोपाय मानते हुए, (मेरे

प्रति) वात्सल्यप्रेम से परवश होकर, मेरे बचाव के लिए व्याकुल तथा किंकर्तव्यविमूढ (मतिभ्रष्ट) होकर मुझे (अपनी) गोदी से लगाये हुए बैठे रहे।

संस्कृतव्याख्या - तु-पुनः **तातः**=जनकः अकाण्डे **एव**=असमये एव, **तम्**=पूर्वोक्तम्, **प्राणहरम्**=प्राणनाशनम्, **अप्रतीकारम्**=अविद्यमानः प्रतीकारः उपायः यस्य तम्, **महान्तम्**=अनल्पम् **उपप्लवम्**=उपद्रवम्, **उपनतम्**=आगतम्, **अवलोक्य**=दृष्ट्वा, **द्विगुणतरोपजातवेपथुः**=द्वौ गुणौ यंस्य स द्विगुणः द्विरावृत्तः अयम् अनयोः अतिशयेन द्विगुणः द्विगुणतरः पूर्वकम्पात् द्विगुणितः उपजातः उत्पन्नः वेपथुः यस्य सः अत्यन्तं कम्पित इत्यर्थः **मरणभयात्**=मरणस्य मृत्योः भयं भीतिः तस्मात्, **उद्भ्रान्ततरलतारकाम्**=उद्भ्रान्ते उद्विग्ने तरले चंचले तारके कनीनिके यस्याः ताम्, **विषादशून्याम्**=विषादेन दुःखेन कारणभूतेन शून्या दीना ताम्, **अश्रुजलप्लुताम्**=अश्रुजलेन वाष्पाम्बुना प्लुता आप्लाविता ताम्, **दृशम्**=दृष्टिम्, **इतस्ततो दिक्षु**=सर्वासु दिशासु, सर्वतो दिशम्, **विक्षिपन्**=पातयन्, **उच्छुष्कतालुः**=उत् प्राबल्येन शुष्कम् अनार्द्रं तालु काकुदं यस्य तादृशः सन्, **आत्मप्रतीकाराक्षमः**= आत्मनः स्वस्य प्रतीकारे रक्षणोपाये अक्षमः असमर्थः सन्, **त्रासस्त्रस्तसन्धि-शिथिलेन**=त्रासेन भयेन स्त्रस्ताः विदीर्णाः ये सन्धयः अस्थिबन्धाः तैः हेतुभूतैः शिथिलेन श्लथेन, **पक्षपुटेन**=पतत्रसंपुटेन, **माम्**=वैशम्पायनम्, **आच्छाद्य**=तिरोधाय, **तत्कालोचितम्**= तदवसरयोग्यम्, **प्रतीकारम्**=उपायम्, **मन्यमानः**=जानानः, **स्नेहपरवशः**=प्रेमपराधीनः, **मद्रक्षणाकुलः**=मम वैशम्पायनस्य रक्षणे त्राणे आकुलः **किंकर्तव्यताविमूढः**=किंकर्तव्यः यस्य स किंकर्तव्यः तस्य भावः तत्ता किंविधेयता यत्र विमूढः विवेकरहितः, **क्रोडभागेन**=उत्सङ्गप्रदेशेन, **माम्**=वैशम्पायनम्, **अवष्टभ्य**=अवलम्बनं कृत्वा, **तस्थौ**=तस्थिवान्।

टिप्पणी -**अकाण्ड एव**-असमय में ही, अचानक ही। मन्यमानः-मन्+यक्+ शानच्=मन्यमानः। क्रोड-गोद। अवष्टभ्य-सहारा देकर अव+स्तम्भ+क्त्वा-ल्यप्।

असावपि पापः क्रमेण शाखान्तरैः संचरमाणः कोटरद्वारमागत्य जीर्णासि-भुजङ्गभोगभीषणं प्रसार्य विविधवनवराहवसाविस्त्रगन्धिकरतलं कोदण्डगुणा-कर्षणव्रणाङ्कितप्रकोष्ठमन्तकदण्डानुकारिणं वामबाहुमतिनृशंसो मुहुर्मुहुर्दत्त-चञ्चुप्रहारमुत्कूजन्तमाकृष्य तातमपगतासुमकरोत्। मां तु स्वल्पशरीरत्वाद् भय-संपिण्डिताङ्गत्वात् सावशेषत्वाच्चायुषा कथमपि तत्पक्षपुटान्तरगतं नालक्षयत्। उपरतं च तमवनितले शिथिलशिरोधरमधोमुखममुञ्चत्। अहमपि तच्चरणान्तेर, निवेशितशिरोधरोनिभृतमङ्कनिलीनस्तेनैव सहापतम्। अवशिष्टपुण्यतया तु

पवनवशात् पुञ्जितस्य महतः शुष्कपत्रराशेरुपरि पतितमात्मानमपश्यम्। अङ्गानि येन मे नाशीर्यन्त।

हिन्दी अनुवाद - वह पापिष्ठ (बुड्ढा भील) भी क्रमशः अन्यान्य शाखाओं पर डोलता-टहलता हुआ (मेरे भी) कोटर द्वार पर आकर-पुरायठ कराइत साँप की कुण्डली के समान भयावह-अनेक बनैले सुवरों की चर्बी (लगने) से कच्चे मांस की गन्ध से युक्त हथेलीवाली निरन्तर (पशुवधार्थ) धनुष की डोरी खींचने के कारण रगड़ के चिह्न से युक्त प्रकोष्ठ (मणिबन्ध कलाई) वाली तथा यमराज के दण्ड का अनुकरण करने वाली बाईं भुजा को बढ़ाकर बारम्बार चोंच से प्रहार करने वाले, अतिशय कूजन (रोदन) करते हुए पिताजी को (कोटरान्तराल से बाहर) खींचकर (उस) अतिक्रूर ने प्राणहीन कर दिया।

बहुत छोटे डीलडौल वाला होने के कारण, भयवश अत्यधिक सिकुड़े हुए अंगों वाला होने के कारण तथा आयुष्य के अवशिष्ट होने के कारण, बड़े कष्ट से पिताजी के पक्षपुटों के भीतर घुसे हुए मुझे तो (उसने) देखा नहीं। और मृत शरीर वाले तथा शिथिल ग्रीवाभाग वाले, उन्हें (पिताजी को) मुँह के बल पृथ्वी पर फेंक दिया। मैं भी पिताजी के चरणों के बीच ग्रीवाभाग स्थापित किए हुए चुपचाप गोदी में छिपा हुआ उन्हीं के साथ (जमीन पर) आ गिरा। पुण्य अवशिष्ट रहने के कारण, हवा के प्रभाव से पुञ्जीभूत विशाल सूखे पत्तों की ढेरी पर, मैंने स्वयं को गिरा हुआ देखा, जिससे कि मेरे अङ्ग विशीर्ण (छिन्न-भिन्न) नहीं हुए।

संस्कृतव्याख्या -**असौ**=वृद्धचाण्डालोऽपि, **अतिनृशंसः**=अत्यन्तक्रूरः **पापः**=पापम् अस्य अस्तीति पापः पापी जीर्णशबरः, **क्रमेण**=पर्यायेण, **शाखान्तरैः**=अन्याः शाखाः शाखन्तराणि तैः स्कन्धान्तरैः साधनभूतैः, **संचरमाणः**=संचलन्, **कोटरद्वारम्**=स्कन्धविवरमुखम्, **आगत्य**=उपेत्य, **जीर्णासितभुजङ्गभोगभीषणम्**=जीर्णः पुरातनः असितः कृष्णः यो भुजङ्गः सर्पः तस्य भोगः शरीरं तद्वत् भीषणम् भयंकरम्, **विविधवनवराहवसाविस्रगन्धिकरतलम्**=विविधाः अनेके ये वनवराहाः जंगलसूकराः तेषां वसा स्नायुः तस्या यत् विस्रम् गन्धः अस्यास्तीति तादृशं करतलं पाणितलं यस्य तम्, **कोदण्डगुणाकर्षणाङ्कितप्रकोष्ठम्**=कोदण्डस्य धनुषः यः गुणः ज्या तस्य आकर्षणेन यः व्रणः किणः तेन अङ्कितः चिह्नितः प्रकोष्ठः मणिबन्धः यस्य तम्, **अन्तकदण्डानुकारिणम्**=अन्तकः शमनः तस्य दण्डः लगुडः तम् अनुकरोति सादृश्यं भजते इति तच्छीलः तम्, **वामबाहुम्**=सव्यभुजम्, **प्रसार्य**=विस्तार्य, **मुहुर्मुहुः**=भूयोभूयः, **दत्तचञ्चुप्रहारम्**=दत्तः कृतः चञ्च्वाः त्रोट्याः प्रहारः

आघातः येन तम्, **उत्कूजन्तम्**=उच्चस्वरेण क्रन्दन्तम्, **तातम्**=पितरम् **आकृष्य**=कोटराद् बहिः आनीय, अपगतासुम्=अपगताः विनष्टः असवः प्राणाः यस्य तादृशम् विगतप्राणम्, **अकरोत्**=कृतवान्, **स्वल्पशरीरत्वात्**=स्वल्पं अति लघुतमं शरीरं वर्ष्म यस्य सः स्वल्पशरीरः तस्य भावः तत्त्वं तस्मात्, **भयसंपिण्डिताङ्गत्वात्**=भयेन भीत्या संपिण्डितानि संकुचितानि अङ्गानि अवयवाः यस्य सः तस्य भावः तत्त्वं तस्मात्, **आयुषः**=जीवितव्यस्य, **सावशेषत्वात्**=अवशिष्टत्वात् **च**=समुच्चयार्थकमिदम्, **तत्पक्षपुटान्तरगतम्**=तस्य अपगतप्राणस्यं पितुः पक्षपुटं छदसंपुटं तस्य अन्तरे मध्ये गतं निलीनम्, **माम्**=वैशम्पायनं, **कथमपि**=केनापि अज्ञातेन हेतुना, दैववशादित्यर्थः, **न अलक्ष्यत्**=न अपश्यत्, **उपरतम्**=मृतम् अतएव च, **शिथिलशिरोधरम्**=शिथिला श्लथा शिरोधरा ग्रीवा यस्य तं तादृशम्, **अधोमुखम्**=अधः अवाक्मुखम् आननं यस्य तम्, **तम्**=पितरम् च, **अवनितले**=भूतले, **अमुञ्चत्**=अत्यजत्, **अहम् अपि**=वैशम्पायनोऽपि, **तच्चरणान्तर**=तस्यः पितुः चरणयोः पादयोः अन्तरे मध्ये, **निवेशितशिरोधरः**=निवेशिता स्थपिता शिरोधरा ग्रीवा येन तादृशः स्थापितग्रीवः, **निभृतम्**=निःशब्दम्, अङ्कनिलीनः, उत्सङ्गान्तर्हितः **तेनैव**=पित्रा एव, **सह**=समम्, **अपतम्**=पतितवान्, **तु**=किन्तु, **अवशिष्टपुण्यतया**=अवशिष्टानि सावशेषाणि पुण्यानि सुकृतानि यस्य सः तस्य भावः तत्ता तया, **पवनवशात्**=वायुवशात्, **पुञ्जितस्य**=संहतस्य, **महतः**=विशालस्य, **शुष्कपत्रराशेः**=नीरसदलसमूहस्य विगलितानिनाभवन्, **उपरि**=ऊर्ध्वम्, **पतितम्**=स्रस्तम्, **आत्मानम्**=स्वम्, **अपश्यम्**=अवलोकयम्, **येन**=पत्रराशेः उपरिपतनेन हेतुना, **मे**=मम **अङ्गानि**=अवयवाः, **न अशीर्यन्तः**=विगलितानि नाभवन्।

टिप्पणी -**पापः**-पापकर्म करने वाला पापी शबर। पापम् अस्यास्तीति पापः (अर्श आदिभ्योऽच्) इत्यादि व्युत्पत्ति से इसकी विशेषणता सिद्ध होती है। **संचरमाणः**-घूमता हुआ, तृतीयान्त पद के साथ चर् धातु से पूर्व सम् उपसर्ग होने पर आत्मनेपद होता है। (समश्च तृतीयायुक्तात्,)। सम्+चर्+शानच्। **भोग**-सर्प का शरीर (भोगः सुखे स्त्र्यादिभृताबहेश्च फणकाययोः-अमरकोष) **आकृष्य**-आङ्+कृष+क्त्वा-ल्यप्। **कोदण्ड**-धनुष। गुण-डोरी उपरत-मृत। **निभृत**-चुपचाप निःशब्द। पुञ्जित-एकत्रित। **नाशीर्य्यन्त**-टूटने से बच गये थे।

यावच्चासौ तस्मात् तरुशिखरान्नावतरति तावदहमवशीर्णपर्णसवर्णत्वादस्फुटोपलक्ष्यमाणमूर्तिः पितरमुपरतमुत्सृज्य नृशंस इव प्राणपरित्यागयोग्येऽपि काले बालतया कालान्तरभुवः स्नेहरसस्यानभिज्ञो जन्मसहभुवा भयेनैव

केवलमभिभूयमानः किञ्चिदुपजाताभ्यां पक्षाभ्यामीषत्कृतावष्टम्भो लुठन्नितस्ततः कृतान्तमुखकुहरादिव विनिर्गतमात्मानं मन्यमानो नातिदूरवर्तिनः शबरसुन्दरीकर्णपूररचनोपयुक्तपल्लवस्य संकर्षणपटनीलच्छययोपहसत इव गदाधरदेहच्छविम् अच्छैःकालिन्दीजलच्छेदैरिव विरचितच्छदस्य, वनकरिमदोपसिक्तकिसलयस्य, विन्ध्याटवीकेशपाशश्रियमुद्वहतः, दिवाप्यन्धकारितशाखान्तरस्य, अप्रविष्टसूर्यकिरणमतिगहनमपरस्येव पितरुत्सङ्गमतिमहतस्तमालविटपिनो मूलदेशमविशम्।

हिन्दी अनुवाद - जब तक वह (वृद्ध शबर) उस सेमर-वृक्ष के शिखर से उतरा नहीं कि इसी बीच (तब-तक) नीचे गिरे हुए पत्तों के समान रंग वाला होने के कारण ठीक-ठीक न दिखाई पड़ने वाली आकृति से युक्त मैं क्रूर की भाँति दिवंगत पिताजी को छोड़कर (वृद्ध पिता की मृत्यु के कारण) प्राण त्याग कर देने योग्य समय में भी लड़कपन के कारण 'कालान्तर' अर्थात् प्रबुद्ध युवावस्था में उत्पन्न होने वाले (शयन, आसन एवं भोजनादिविषयक) स्नेह के रस को न जानने वाला (प्रत्युत) जन्म के समय से ही उत्पन्न होने वाले एक मात्र भय से ही पीडित होता हुआ, कुछ कुछ उगे हुए पक्षद्वय से थोड़ी सहायता लेता हुआ, इधर-उधर लुढ़कता हुआ तथा स्वयं को यमराज के मुखविवर से मानों (सकुशल) निकला (विमुक्त) मानता हुआ अत्यन्त ऊँचे समीपस्थ तमालवृक्ष के अप्रविष्ट सूर्यकिरणों वाले, अत्यन्त सघन तथा द्वितीय पिता की गोदी के समान मूलदेश (जड़) में घुस गया जो कि किरात कामिनियों के कर्णाभरणनिर्माण में काम आने लायक पल्लवों वाला था, जो कि कृष्णाग्रज बलराम के वस्त्रों की नील प्रभा के समान अपनी नीलप्रभा से (कौमोदकी) गदा धारण करने वाले अर्थात् विष्णु (=कृष्ण) की देह प्रभा का मानों उपहास कर रहा था, जो मानों निर्मल यमुनाजल-खण्डों से विरचित पत्तियों वाला था, जो मानीं वनैले हाथियों के मदजल से सींची गई नई कोपलों वाला था जो विन्ध्यवनस्थली के केशपाश की शोभा को वहन कर रहा था तथा जो दिन में भी अन्धकाराच्छादित शाखाओं के अवकाश (मध्यभाग) वाला था।

संस्कृतव्याख्या - **यावत्**=यावत्कालपर्यन्तम्, **असौ**=स जीर्णशबरः, **तस्मात्**=पूर्वोक्तात्, **तरुशिखरात्**=तरोः शाल्मलीवृक्षस्य शिखरम् अग्रभागः तस्मात्, **न अवतरति**=न अवरोहति स्म, **तावत्**=तावता कालेन, **अहम्**=वैशम्पायनः, **अवशीर्णपर्णसवर्णत्वात्**=अवशीर्णानां तत्कालपतितानां पर्णानां पत्ताणां सवर्णः तुल्यवर्णः तस्य भावः तत्त्वं तस्मात्, **अस्फुटोपलक्ष्यमाणमूर्तिः**=न स्फुटं सुस्पष्टम् उपलक्ष्यमाणां

अवलोक्यमाना मूर्तिः वर्ष्म यस्य तादृशः, **नृशंसः इव**=क्रूरः इव, **उपरतम्**=मृतम्, **पितरम्**=तातम्, **उत्सृज्य**=त्यक्त्वा, **प्राणपरित्यागयोग्ये**=जीवनोत्सर्गोचिते, **कालेऽपि**=समयेऽपि, **बालतया**=शिशुतया, **कालान्तरभुवः**=अन्यः कालः कालान्तरं, यौवनादि तत्र भवतीति तस्य यौवनादिवयोभाविनः, **स्नेहरसस्य**=प्रेम्णः, **अनभिज्ञः**= अज्ञाता, **केवलम्**=एकमेव, **जन्मसहभुवः**=उत्पत्तिसहसमुत्पन्नेन, **भयेनैव**=भीत्या एव, **अभिभयूमानः**=स्वाधीनीक्रियमाणः, **किंचित्**=ईषत्, **उपजाताभ्याम्**= उत्पन्नाभ्याम्, **पक्षाभ्याम्**=पतत्राभ्याम्, **ईषत्कृतावष्टम्भः**=ईषत् स्वल्पमात्रं कृतः विहितः अवष्टम्भः आश्रयः यस्य तादृशः, **इतस्ततः**=उभयो पार्श्वयोः, **लुठन्**=निपतन्, **कृतान्तमुखकुहरात्**=कृतान्तः यमः तस्य मुखम् लपनम् एव कुहरं विवरं तस्मात्, **विनिर्गतम् इव**= विनिर्यातम् इव, **आत्मानम्**=निजम्, **मन्यमानः**=बुध्यमानः **नातिदूरवर्तिनः**= समीपवर्तिनः, **शबरसुन्दरीकर्णपूररचनोपयुक्तपल्लवस्य**= शबरसुन्दर्यः भिल्लरमण्यः तासां कर्णपूराणि श्रुतिभूषणानि तेषां रचनाया विनिर्मितौ उपयुक्ताः उपयोगिनः पल्लवाः किसलयानि यस्य तस्य तादृशस्य, **संकर्षणपट-नीलच्छायया**=संकर्षणः बलभद्रः तस्य पटः नीलवस्त्रं तस्य नीला नीलवर्णा छाया कान्तिः तया, **गदाधरदेहच्छविम्**= गदाधरः कृष्णः तस्य देहः शरीरं तस्य छविं शोभाम्, **उपहसतः इव**=उपहासं कुर्वतः इव, **अच्छै**=स्वच्छैः, **कालिन्दीजलच्छेदैः इव**-कालिन्दी यमुना तस्याः जलं पयः तस्य छेदाः खण्डानि तैः इव, **विरचितच्छदस्य**=विरचिताः निर्मिताः छदाः पत्राणि यस्य तस्य, **वनकरिमदोप-सिक्तकिसलयस्य**=वनकरिणां काननहस्तिनां मदेन दानवारिणा उपसिक्तानि कृतसेचनानि किसलयानि पल्लवाः यस्य तस्य, **विन्ध्याटवीकेशपाशश्रियम्**= विन्ध्याटव्याः केशपाशः बालजालं तस्य श्रियं शोभाम्, **उद्वहतः**=धारयतः, **दिवा अपि**=दिवसेऽपि, **अन्धकारितशाखान्तरस्य**=अन्धकारः संजात अस्य इति अन्धकारितं जातान्धकारं शाखान्तरं स्कन्धान्तरालप्रदेशः यस्य तस्य, **अतिमहतः**= अत्यन्तं विशालस्य, **तमालविटपिनः**=तापिच्छपादपस्य, **अप्रविष्टसूर्यकिरणम्**= अप्रविष्टाः अनन्तर्गताः सूर्यस्य दिनकरस्य किरणाः अंशवः यत्र तम्, **अतिगहनम्**= अत्यन्तगहनम्, **मूलदेशम्**=बुध्नभागम्, **अपरस्य**=द्वितीयस्य, **पितुः**=तातस्य, **उत्सङ्गम् इव**=क्रोडम् इव, **अविशम्**=प्रविष्टवान्।

टिप्पणी - **यावत्**-जब तक, इसका तावत् से नित्य-सम्बन्ध है (यत्तदोः नित्यसम्बन्धः)। **अवशीर्ण**-अव+शृ+क्त-अवशीर्ण। उत्सृज्य-उत्+सृज्+क्त्वा-ल्यप्। **अभिभूयमान**-अभि+भू+यक्+शानच्, लुठन्-लुठ्+शतृ। **कुतान्तमुखकुहरात्**

।

-यमराज के मुखरूपी विवर से। केशपाशश्रियम्-केशपाश की शोभा। यहाँ '**केशपाशश्रियमिव**' में निदर्शना तथा '**उत्सङ्गमिव**' में **क्रियोत्प्रेक्षा** अलङ्कार है।

अवतीर्य च स तेन समयेन क्षितितलविप्रकीर्णान् संहृत्य तान् शुकशिशून-नेकलतापाशसंयतानाबध्य पर्णपुटेऽतित्वरितगमनः सेनापतिगतेनैव वर्त्मना तामेव दिशमगच्छत्। मां तु लब्धजीविताशं प्रत्यग्रपितृमरणशोकशुष्कहृदयम-तिदूरपातादायासितशरीरं संत्रासजातवेपथुं सर्वाङ्गोपतापिनी बलवती पिपासा परवशमकरोत्। अनया च कालकलया सुदूरमतिक्रान्तः स पापकृदिति परिकलय्य किंचिदुन्नमितकन्धरो भयचकितया दृशा दिशोऽवलोक्य तृणेऽपि चलति पुनः प्रतिनिवृत्त इति तमेव पदे पदे पापकारिणमुत्प्रेक्षमाणो निष्क्रम्य तस्मात् तमालतरुमूलात् सलिलसमीपमुपसर्तु प्रयत्नमकरवम्।

हिन्दी अनुवाद - उस समय वह वृद्धशबर पेड़ से नीचे उतर कर पृथ्वी तल पर छिटके हुए उन शुकशावकों को बटोर कर, अनेक लताबन्धनों से उन्हें संयत कर, पत्तों से बने दोंनों में बाँधकर अत्यन्त तीव्रगति से, सेनापति द्वारा पकड़े गए मार्ग से ही उसी दिशा की ओर चल पड़ा। और इधर जीवन की आशा प्राप्त कर लेने वाले, पिताजी की तात्कालिक मृत्यु से उत्पन्न शोक के कारण शुष्क हृदय वाले (पेड़ की) अत्यधिक ऊँचाई से गिरने के कारण पीड़ित शरीर वाले, भय के कारण पसीने से लथपथ मुझे अंग-प्रत्यंग को सन्तप्त कर देने वाली तीखी प्यास ने परवश बना दिया। 'इस घड़ी (समय) तक वह नृशंस काफी दूर चला गया होगा' यह समझ कर (अपने) कन्धे को थोड़ा ऊपर उठाकर, भय के कारण सकपकाई हुई दृष्टि से दिशाओं को देखकर, पत्ता खड़कने पर भी 'फिर लौट आया!' इस प्रकार पग पग पर उसी पापिष्ठ शबर की आशङ्का करता हुआ, उस तामाल वृक्ष की जड़ से (बाहर) निकल कर जल के समीप पहुँचने का (मैंने) प्रयत्न किया।

संस्कृतव्याख्या - **तेन समयेन**=तत्कालेन, **सः**=जीर्णशबरः, **अवतीर्य**= उत्तीर्य, **क्षितितलविप्रकीर्णान्**=क्षितितले भूतले विप्रकीर्णान्-विक्षिप्तान्, **तान्**=वृक्षपातितान्, **शुकशिशून्**=कीरशिशून, **संहृत्य**=एकीकृत्य, **अनेकलता-पाशसंयतान्**=अनेकानां बहूनां लतानां व्रततीनां पाशेन बन्धनेन संयतान् बद्धान्, **पर्णपुटे**=छदपुटके, **आबध्य**=प्रपूर्य, **अतित्वरितगमनः**=अतित्वरितम् अतिशीघ्रं गमनं गतिः यस्य तादृशः, **सेनापतिगतेन**=सेनापतिना सैन्यनायकेन मातङ्गेन गतं यातं तेन, **वर्त्मना एव**=पथा एव, **ताम्**=सेनापतिगताम्, **दिशम् एव**=ककुभम् एव,

अगच्छत्=अगमत्, **तु**=पुन:, **लब्धजीविताशम्**=लब्धा प्राप्ता जीवितस्य प्राणधारणस्य आशा सम्भावना येन तादृशम्, **प्रत्यग्रपितृमरणशोकशुष्कहृदयम्**=प्रत्यग्र: नूतन: य: पितृमरणस्य तातमृत्यो: शोक: विषाद: तेन शुष्कम् अक्लिन्नं हृदयं मन: यस्य तादृशम्, **अतिदूरपातात्**=अतिदूरात् अत्युच्चकोटरात् पात: पतनं तस्माद् हेतो:, **आयासितशरीरम्**=आयासितं क्लेशितं शरीरं विग्रह: यस्य: तादृशम्, **संत्रासजात-वेपथुम्**=संत्रासेनअतिभयेन जात: उत्पन्न: वेपथु: कम्प: यस्य स तादृश: तम्, माम्=**वैशम्पायनम्**, **सर्वाङ्गोपतापिनी**=सर्वाणि-समस्तानि अङ्गानि अवयवान् उपतापयति क्लेशयति इति तच्छीला, **बलवती**=शक्तिशालिनी, **पिपासा**=तृट् **परवशम्**=पराधीनम्, **अकरोत्**=कृतवती, **च**=तथा, **अनया कालकलया**=अमुया घटिकया, **स:**=पूर्वोक्त:, **पापकृत्**=पापी जीर्णशबर:, **सुदूरम्**=अतिदूरदेशम्, **अतिक्रान्त:**=अतीत:, **इति**=एवम्, **परिकलय्य**=विचार्य, **किंचित्**=ईषत्, **उन्नमितकन्धर:**=उन्नमिता ऊर्ध्वीकृता कन्धरा ग्रीवा येन स तादृश: सन्, **भयचकितया** =भीतिचंचलया, **दृशा**=नेत्रेण, **दिशा:**=आशा:, चतुर्दिशम्, **अवलोक्य**=दृष्ट्वा, **तृणेऽपि**=यवसेऽपि, **चलति**=कम्पमाने, **स पुन:**=भूय:, **प्रतिनिवृत्त:**=प्रत्यावृत्त:, इति, **पदे पदे**=प्रतिपदम् **तम् एव**=अमुम् एव, **पापकारिणम्**= पापविधायिनं शबरम्, **उत्प्रेक्षमाण:**=उत्पश्यन्, **तस्मात्**=पूर्वोक्तात्, **तमालतरुमूलात्**=तापिच्छवृक्ष-मूलभागात्, **निष्क्रम्य**=नि:सृत्य, **सलिलसमीपम्**=जलनिकटम्, **उपसर्तुम्**=उपगन्तुम्, **प्रयत्नम्**=उद्योगम्, **अकरवम्**=कृतवान्।

टिप्पणी – **अवतीर्य**–अव+तृ+क्त्वा–ल्यप्=अवतीर्य। **विप्रकीर्ण**–बिखेर हुए (वि+प्र+कृ+क्त)। **संहृत्य**–सम्+हृ+क्त्वा–ल्यप्। **वेपथु**–वेप+अथुच्। **बलवती**–बल+मतुप्; म को व तथा ङीप्। **अतिक्रान्त:**–अति+क्रम्+क्त। पापकृत्–पाप+कृ+क्विप् तथा तुक् का आगम। **परिकलय्य**–परि+कल्+क्त्वा–ल्यप्। **अनया कालकलया**–इस समय में, इस बीच में, यहाँ 'अपवर्गे तृतीया' से तृतीया विभक्ति होती है। **उत्प्रेक्षमाण:**=सम्भावना करते हुए, घबराहट के कारण उसी पापी को ही हर समय, प्रत्येक स्थान पर देखते हुए। उत्+प्र+ईक्ष्+शानच्। **उपसर्तुं**–उप+सृ+तुमुन्।

अजातपक्षतया नातिस्थिरतरचरणसंचारस्य मुहुर्मुहुर्मुखेन पततो मुहस्तिर्यङ्निपतन्तमात्मानमेकया पक्षपाल्या संधारयत: क्षितितलसंसर्पणश्रमातुरस्या-नभ्यासवशादेकमपि दत्त्वा पदमनवरतमुन्मुखस्य स्थूलस्थूलं श्वसतो धूलिधूस-रस्य संसर्पतो मम समभून्मनसि अतिकष्टास्ववस्थावपि जीवितनिरपेक्षा न

भवन्ति खलु जगति प्राणिनां वृत्तयः। नास्ति जीवितादन्यदभिमततरमिह जगति सर्वजन्तूनाम्। धिङ् एवमुपरतेऽपि सुगृहीतनाम्नि ताते यदहमविकेलिन्द्रयः पुनरेव प्राणिमि मामकरुणमतिनिष्ठुरमकृतज्ञम्। अहो! सोढपितृमरणशोकदारुणं येन मया जीव्यते, उपकृतमपि नापेक्ष्यते। खलं हि खलु मे हृदयम्।

हिन्दी अनुवाद - (पूर्ण रूप से) पंखे न जमे रहने के कारण डगमगाते हुए पैरों से सञ्चरण करने वाले, बारम्बार मुँह के बल गिरते हुए, अनेकशः तिरछे होकर गिरते हुए अपने को एक पक्षीपाली (पंखों की पंक्ति) से संभालते हुए भूतल पर घिसटने से उत्पन्न थकावट से चूर-चूर, अनभ्यास के कारण एक भी डग आगे रख कर निरन्तर ऊपर की ओर मुँह उठाए रहने वाले, लम्बी-लम्बी साँसें लेने वाले तथा धूल से लिपटे, सञ्चरण करने वाले मेरे मन में आया- (हाय!) 'अत्यन्त कष्टमयी दशाओं में भी लोग अपने प्राणों का मोह नहीं छोड़ पाते।' निश्चय ही संसार में प्राणियों की यही प्रवृत्तियाँ हैं। इस संसार में समस्त प्राणियों के लिए जीवन से बढ़कर अधिक प्रियवस्तु और कुछ नहीं है। तभी तो मैं इन्द्रियों की विकलता से हीन होकर (अर्थात् स्वस्थ चित्तवाला) सुगृहीत नाम वाले पितृचरण के इसप्रकार (क्रूरशबर द्वारा अकालहत) स्वर्गवासी हो जाने पर भी जी ही रहा हूँ! धिक्कार है मुझ जैसे निर्दय, अत्यन्त क्रूर एवं कृतघ्न (व्यक्ति को)!! ओह, पिता जी के मृत्युशोक को सह कर जो कि मैं यातनापूर्वक (अर्थात् बेवसी में) जी रहा हूँ, (उनके द्वारा किए गए) उपकार की भी मुझे लाज नहीं है (कि मर जाऊँ!)। निश्चय ही मेरा हृदय दुष्ट (उपकारानभिज्ञ) है।

संस्कृतव्याख्या - **अजातपक्षतया**=अनुत्पन्नच्छदतया, **नातिस्थिरतरचरण-संचारस्य**=नातिस्थिरतरः अल्पस्थिरतरः चरणयोः पादयोः संचारः यस्य तादृशस्य, अत एव **मुहुर्मुहुः**=पुनः पुनः, **मुखेन**=लपनेन, **पततः**=लुण्ठतः, **मुहुः**=पुनः, **तिर्यक्**=तिरश्चीनम्, **निपतन्तम्**=लुण्ठन्तम्, **आत्मानम्**=स्वम्, **एकया**=केवलया, **पक्षपाल्या**=प्रदेशेन, **संधारयतः**=संदधतः, **क्षितितलसंसपर्णश्रमातुरस्य**=क्षितितले भूतले यत् संसर्पणं रिङ्गणं तेन यः श्रमः खेदः तेन आतुरस्य पीडितस्य, **अनभ्यासवशात्**=चलनाभ्यासाभावात्, **एकम् अपि**=केवलम् अपि, **पदम्**=चरणम्, **दत्त्वा**-निधाय, **अनवरतम्**=सततम्, **उन्मुखस्य**=उत् ऊर्ध्वीकृतं मुखं लपनं येन तादृशस्य, **स्थूलस्थूलम्**=दीर्घदीर्घम्, **श्वसतः**=प्राणतः, **धूलिधूसरस्य**=धूलिभिः भूरजोभिः धूसरस्य धूम्रवर्णस्य, **संसर्पतः**=रिङ्गतो भूम्याम्, **मम**=वैशम्पायनस्य, **मनसि**=हृदये, **समभूत्**=समुत्पन्नः, अयं विचार इति शेषः। विचारं स्पष्टयति-**खलु**=निश्चयेन,

जगति=लोके, **अतिकष्टासु**=अत्यन्तक्लेशकारिणीषु, **अपस्थासु अपि**=दशासु अपि, **प्राणिनाम्**=जीवानाम्, **वृत्तयः**=व्यापाराः मनोवृत्तयो वा, **जीवितनिरपेक्षा**=जीवितात्-प्राणधारणात् निरपेक्षाः उदासीनाः, **न भवन्ति**=न विद्यन्ते, **इह जगति**=अस्मिन् भुवने, **सर्वजन्तूनाम्**=समस्तजीवानाम्, **जीवितात्**=प्राणधारणात्, **अन्यत्**=इतरत्, **अभिमततरम्**=प्रियतरम्, **नास्ति**=न विद्यते, तदेव समर्थयन्नाह-**यत्**=यस्मात् कारणात्, **सुगृहीतनाम्नि**=संगृहीतं नाम यस्य तस्मिन् प्रातः स्मरणीये, **ताते**=जनके, **एवम्**=उक्तरूपेण, **उपरतेऽपि**=मृतेऽपि, **अहम्**=वैशम्पायनः, **अविकलेन्द्रियः**=अविकलानि स्वस्थानि (विषयग्रहणे समर्थानीत्यर्थः) इन्द्रियाणि श्रोत्रादीनि यस्य तादृशः सन्, पुनरेव=भूयोऽपि, **प्राणिमि**=श्वसिमि, **अकरुणम्**=निर्दयम्, **अतिनिष्ठुरम्**=अतिकठोरम्, **अकृतज्ञम्**=अकृतघ्नम्, अनुपकारज्ञम्, **माम्**=वैशम्पायनम्, **धिक्**=धिक्कारः, **अहो**=आश्चर्यम्, **येन**=येन हेतुना, अतः **मया**=वैशम्पायनेन, **सोढपितृमरणशोकदारुणम्**=सोढः मर्षितः यः पितुः तातस्य मरणस्य मृत्योः शोकः विषादः तेन दारुणं भयङ्करः यथा स्यात् तथा, **जीव्यते**=जीवनानि धार्यते, **उपकृतमपि**=तातविहित उपकारोऽपि, **नापेक्ष्यते**=अपेक्षा न क्रियते, **येन**=हेतुना, **खलु**=निश्चयेन, **मे**=मम, **हृदयम्**=मनः, **खलम्**=नीचं दुष्टं वा, **हि**=अवधारणार्थकमिदमव्ययपदम्।

टिप्पणी - **अजातपक्षतया**-न जातपक्षतया=अजातपक्षया, जात-जन्+क्त। **स्थिरता**-स्थिर+तरप्। **पततः**-पत्+शतृ ष.ए.व.। **पक्षपाल्या**-करवट के सहारे से, पार्श्वप्रदेश के द्वारा (पक्ष-पार्श्व, करवट, पालीप्रदेशस्थान)। 'पालिः करालितायां स्यात् प्रदेशे पंक्तिचिह्नयोः' इत्यमरः। वृत्तयः-व्यापार, व्यवहार, मनोवृत्ति, वृ+क्तिन्। उपरते-उप+रम्+क्त, स.ए.व। सुगृहीतनाम्नि-जिनका नाम सम्मान के साथ लिए जाने योग्य है; प्रातः स्मरणीय (स सुगृहीतनामा स्यात् यः प्रातरनुचिन्त्यते, त्रिकाण्ड़शेष)। सोढः-सहन किया (सह्+क्त।) दारुण-'दॄ' (भये)+उनन्। 'दारुणं भीषणं भीष्मं घोरं भीमं भयानकम्' इत्यमरः।

अहं हि लोकान्तरगतायामम्बायां नियम्य शोकावेगमाप्रसवदिवसात् परिणतवयसापि सता तैस्तैरुपायैः संवर्धनक्लेशमतिमहान्तमपि स्नेहवशाद-गणयता मत् तातेन परियालितस्तत्सर्वमेकपदे विस्मृतम्। अतिकृपणाः खल्वमी प्राणाः यदपकारिणमपि तातमद्यापि गच्छन्तं नानुगच्छन्ति। सर्वथा न कंचिन्न खलीकरोति जीविततृष्णा, यदीदृगवस्थमपि मामयमायासयति जलाभिलाषः। मन्ये चागणितपितृमरणशोकस्य निर्घृणतैव केवलमियं मम सलिलपानबुद्धिः।

हिन्दी अनुवाद – जन्म देने के बाद ही माँ के स्वर्गवासिनी हो जाने पर पत्नी के मृत्युजन्य शोक के वेग को रोक कर, पैदा होने के दिन से ही ढलती अवस्था वाले (अर्थात् वृद्धप्राय) भी सज्जन पितृचरण द्वारा (वात्सल्य) स्नेह के कारण अत्यन्त महान् पालन-पोषण संबंधी कष्ट को कुछ न समझते हुए जो मैं उन-उन अर्थात् श्रमसाध्य उपायों द्वारा पाला गया वह सब आज एकसाथ ही भूल गया। सचमुच मेरे ये प्राण अत्यन्त कृपण (क्षुद्र) हैं, जो उपकारपरायण भी परलोक जाते हुए पिताजी का आज अनुगमन नहीं कर रहे हैं। 'जीवन का लोभ किसे पामर नहीं बना देता है' ऐसी बात बिल्कुल नहीं है अर्थात् अवश्य बना देता है जो कि इस प्रकार की (दयनीय) अवस्था वाले भी मुझको जल पीने की इच्छा कष्ट दे रही है। मरने को कौन कहे ? मानता हूँ कि पिताजी के मृत्युशोक की परवाह न करने वाले मुझ सरीखे व्यक्ति की यह जल पीने की धारणा केवल निर्दयता ही है (और कुछ नहीं।)

संस्कृतव्याख्या – **हि**=निश्चयेन, **अम्बायाम्**=जनन्याम्, **लोकान्तरम्**=अन्यो लोकः लोकान्तरं तत्र **गतायाम्**-परलोकप्रयातायाम्, सत्याम्, **शोकावेगम्**=शोकस्य विषादस्य आवेगः, प्रवाहः, **तम्**=विषादप्रवाहम्, **नियम्य**=निरुध्य, **तातेन**=जनकेन, **परिणतवयसा**=परिणतं परिपक्वं वयः अवस्था यस्य तादृशेन वृद्धेन, सता **अपि**=भवता अपि, **तैः तैः**=विभिन्नैः, **उपायैः**=क्षुधापिपासाशमनात्मकैः, **अतिमहान्तम् अपि**=महत्तमम् अपि, **संवर्धनक्लेशम्**=संवर्धने पालने यः क्लेशः कष्टं तम्, **स्नेहवशात्**=वात्सल्यात्, **अगणयता**=अननुभवता, अमन्यमानेनेत्यर्थः, **यत्**=यत्स्वरूपम्, यत्किमपि, **परिपालितः**=पोषितः, अहमिति शेषः, **मया**=वैशम्पायनेन, **तत्सर्वम्**=तत्सकलं पालनादिकम्, **एकपदे**=तत्काले, त्वरितमित्यर्थः, **विस्मृतम्**=स्मृतिपथाद् अपसारितम्, **खलु**=निश्चयेन, **अमी**=इमे, **प्राणाः**=असवः, **अतिकृपणाः**=अत्यन्ततुच्छाः, **यतः**=यस्मात् कारणात् उपकारिणम्, **अपि**=परलोकं यान्तम् अपि, **न अनुगच्छन्ति**=नहि अनुसरन्ति, **जीविततृष्णा**=जीवितस्य प्राणधारणस्य तृष्णा इच्छा, **कञ्चित्**=कमपि प्राणिनम्, **सर्वथा**=समस्तप्रकारेण, **न खलीकरोति**=अखलं खलं करोतीति, खलीकरोति, न नीचं विदधाति, **इति न**=नैवम्, प्रत्येकं खलीकरोतीत्यर्थः। **यत्**=यतः, यस्माद् हेतोः, **ईदृगवस्थम् अपि**=ईदृशी अवस्था यस्य तम् अपि मृतपितृकम् अपि, **माम्**=वैशम्पायनम्, **अयम्**=अनभूयमानः, **जलाभिलाषः**=पानीयपानेच्छा, **आयासयति**=प्रयत्नं कारयति क्लेशयति वा। **च**=तथा **अहं मन्ये**=अनुभवामि, **यत्**

अगणितपितृमरणशोकस्य=अगणितः अननुभूतः उपेक्षितो वा पितुः जनकस्य मरणस्य मृत्योः शोकः विषादः येन तस्य, **मम**=वैशम्पायनस्य, **इयम्**=उत्पद्यमाना, **सलिलपानबुद्धिः**=जलाभिलाषी, **केवलम्**=एकमात्रम्, **निर्घृणता एव**=निष्करुणता एव।

टिप्पणी – **नियम्य**–नि+यम्+क्त्वा–ल्यप्। **परिणतवयसापि**=पकी हुई अवस्था वाला होकर वृद्ध होते हुए भी। **परिपालितः**–परि+पाल्+क्त। **एकपदे**–एकदम, एक पग ही, तुरन्त ही, 'तत्क्षणैकपदे तुल्ये' इति हलायुधः। **विस्मृतम्**–वि+स्मृ+क्त। **न कंचिन्न खलीकरोति** – ऐसा कोई प्राणी नहीं जिसे जीवन की अभिलाषा खल नहीं बना देती या जिससे नीच काम नहीं करा देती अर्थात् प्रत्येक प्राणी को निश्चय ही खल बना देती है। **निर्घृणतैव**=निर्दयता ही। यहाँ अर्थान्तरन्यास तथा हेतु अलंकार हैं।

अद्यापि दूर एव सरस्तीरम्। तथा हि–जलदेवतानूपुररवानुकारि दूरेऽद्यापि कलहंसविरुतम्, अस्फुटानि श्रूयन्ते सारसविरुतानि, अयं च विप्रकर्षादाशा-मुखविसर्पणविरलः संचरति नलिनीषण्डपरिमलः। दिवसस्य चेयमतिकष्टा दशा वर्तते। तथा हि–रविरम्बरतलमध्यवर्ती स्फुरन्तमातपमनवरतमनलधूलि-निकरमिव विकिरति करैः, अधिकामुपजनयति तृषमातपसंतप्तपांसुपटलदुर्गमा भूः, अतिप्रबलपिपासावसन्नानि गन्तुमल्पमपि मे नालमङ्गकानि, अप्रभुर-स्म्यात्मनः, सीदति मे हृदयम्, अन्धकारतामुपयाति चक्षुः, अपि नाम खलो विधिरनिच्छतोऽपि मे मरणमद्यैवोपपादयेत्।

हिन्दी अनुवाद – सरोवर अब भी दूर ही है; क्योंकि जलदेवता के पायलों की झनकार का अनुकरण करनेवाली कलहंसों की यह (मधुर) ध्वनि अब भी दूर है। सारस पक्षियों के कलरव स्पष्टतः नहीं सुनाई पड़ रहे हैं और यह कमलनियों के समूह से उत्पन्न सौरभ दूर होने के कारण दिशाओं में परिव्याप्त अतएव विरल (न्यून) रूप में इधर-उधर फैल रहा है।

दिन की (भी) यही अत्यन्त क्लेशमयी दशा है; क्योंकि आकाशमंडल के बीचोंबीच विद्यमान सूर्य प्रज्वलित धूप को अग्निस्फुलिङ्गों के समूह की भाँति किरणों से निरन्तर बिखेर रहा है (तथा) अत्यधिक प्यास उत्पन्न कर रहा है। (प्रचण्ड) घाम से भरपूर तपी हुई धूलियों के समूह से भूमि चलने योग्य नहीं रह गई है। अत्यन्त प्रबल प्यास से अवसन्न (निर्जीवप्राय) मेरे कोमल अंग तनिक भी आगे बढ़ने में समर्थ नहीं हैं। (अब) मैं अपना प्रभु नहीं रहा। (अर्थात् अपनी ही

देह पर मेरा नियंत्रण नहीं है) मेरा हृदय बैठ रहा है। आँखों में अंधेरा छा रहा है। कितना अच्छा होता। (यदि) दुष्ट विधाता न चाहते हुए भी मेरी मृत्यु आज ही उत्पन्न कर देता।

संस्कृतव्याख्या - **अद्य अपि**=साम्प्रतमपि, **सरस्तीरम्**=सरसः सरोवरस्य तीरं तटम्, **दूरे एव**=असमीपे एव, **तथाहि**=उक्तवचनसमर्थनाय इदमव्ययपदम्, **जलदेवतानुपूररवानुकारि**=जलदेवतानां उदकाधिष्ठातृदेवीनां नुपूराणां मञ्जीराणां रवं ध्वनिम् अनुकरोति सादृश्यं भजते इति तच्छीलम्, **कलहंसविरुतम्**=कलहंसानां कादम्बानां विरुतं कूजितम्, **अद्यापि**=अधुना अपि, **दूरे**=समीपे, **सारसरसितानां**= सारसानां लक्ष्मणानां रसितानि कूजितानि, **अस्फुटानि**=अस्पष्टानि, **श्रूयन्ते**= आकर्ण्यन्ते, **अयं च**=एष च, **नलिनीषण्डपरिमलः**=नलिनीनां कमलिनीनां षण्डः समूहः तस्य परिमलः सौरभः, **विप्रकर्षात्**=दूरात्, **आशामुखविसर्पणविरलः**= आशानां दिशां मुखेषु लपनेषु विसर्पणेन प्रसरणेन विरलः स्वल्पः सन्, **संचरति**=इतः प्रसरति, **दिवसस्य च**=दिनस्य च, **इयम्**=अनुभूयमाना, **दशा**=अवस्था, **अतिकष्टा**=अत्यन्तक्लेशकारिणी, **वर्तते**=विद्यते, **तथाहि**=उक्तवचनसमर्थनायेदम्, **अम्बरतलमध्यवर्ती**=अम्बरतलस्य आकाशतलस्य मध्ये वर्तते इति तच्छीलः मध्यगामी, मध्याह्नकालिक इत्यर्थः, **रविः**=दिनकरः, **करैः**=किरणैः, **अनवरतम्**=सततम्, **अनलधूलिनिकरम् इव**=अनलस्य वैश्वानरस्य धूलयः कणिकाः तासां निकरः समूहः तम् इव, **स्फुरन्तम्**=देदीप्यमानम्, **आतपम्**=तेजः, **विकिरति**=विक्षिपति, **आतपसंतप्तपांसुपटलदुर्गमा**=आतपेन सूर्यतेजसा संतप्तम् उष्णीकृतं यत् पांसूनां धूलिनां पटलं समूहः तेन दुर्गमा दुश्चरा, दुःखेन गन्तुं योग्या इत्यर्थः, **भूः**=धरा, **अधिकाम्**=अधिकतराम्, **तृषम्**=पिपासाम्, **उपजनयति**= उत्पादयति, **अतिप्रबलपिपासावसन्नानि**=अतिप्रबला अधिकबलवती या पिपासा तृषा तया अवसन्नानि, शिथिलानि, **मे**=मम वैशम्पायनस्य, **अङ्गानि**=लघूनि अङ्गानि अङ्गकानि क्षुद्रावयवाः, **अल्पम् अपि**=किञ्चिद् अपि, **गन्तुम्**=चलितुम्, **न अलम्**=न समर्थानि, **आत्मनः**=स्वस्य स्वशरीरस्य इत्यर्थः, **अप्रभुः**=अस्वामी, **अस्मि**=भवामि, न मे स्वदेहेऽप्यधिकारो वर्तत इत्याशयः, **मे**=मम, **हृदयम्**=चेतः, **सीदति**=सखेदं भवति। **चक्षुः**=नयनम्, **अन्धकारताम्**=अन्धं करोतीति अन्धकारः तस्य भावः तत्ता तां तिमिरताम्, **उपयाति**=प्राप्नोति। **अपि नाम**=किमिदं सम्भवम्, **खलः**=क्रूरः, **विधिः**=विश्वसृष्टाः, **अनिच्छतोऽपि**=अनभिलषतोऽपि, **मे**=मम, **मरणम्**=मृत्युम्, **अद्यैव**=अस्मिन्नेव दिने, **उपपादयेत्**=विदध्यात्।

टिप्पणी – **जलदेवता**–जलस्य देवता, देव+तल्=देवता। **अस्फुटानि**–अस्पष्ट, न स्फुटानि–अस्फुटानि। **उपजनयति**–उप+जन्+णिच्+तिप्। **पांसुपटल**–धूलि का समूह। **अपि नाम**–क्या यह सम्भव है, क्या ही अच्छा हो। यहाँ अपि शब्द प्रश्नवाचक तथा नाम सम्भावना अर्थ में है। जैसा कि कहा गया है – 'अपिः सम्भावनाप्रश्नशङ्कागर्हासमुच्चये। तथा भुक्तपदार्थे च कामाचार–क्रियासु च।' इति विश्वः।'नाम कामे (कोपे) अभ्युपगमे विस्मये स्मरणेऽपि च। सम्भाव्यकुत्साप्राकाश्य –विकल्पेपि दृश्यते।' इति मेदिनी।

एवं चिन्तयत्येव मयि तस्मात् सरसो नातिदूरवर्तिनि तपोवने जाबालिर्नाम महातपः मुनिः प्रतिवसति स्म। तत्तनयश्च हारीतनामा मुनिकुमारकः सनत्कुमार इव सर्वविद्यावदातचेताः समवयोभिरपरैस्तपोधनकुमारकैरनुगम्यमानस्तेनैव पथा द्वितीय इव भगवान् विभावसुरतितेजस्वितया दुर्निरीक्ष्यमूर्तिः, उद्यतो दिवसकरमण्डलादिवोत्कीर्णः, तडिद्भिरिव रचितावयवः, तप्तकनकद्रवेणेव बहिरुपलिप्तमूर्तिं आपिशङ्गावदातया देहप्रभया स्फुरन्त्या सबालातपमिव दिवसं सदावानलमिव वनमुपदर्शयन्, उत्तप्तलोहलोहिनीनामनेकतीर्थाभिषेकपूता–नामंसंस्थावलम्बिनां जटानां निकरेणोपेतः, स्तम्भितशिखाकलापः खाण्डव–वनदिधक्षया कृतकपटवटुवेष इव भगवान् पावकः,.........

हिन्दी अनुवाद – मेरे इस प्रकार विचार मग्न रहने पर ही उस (पम्पा) सरोवर से बहुत दूर नहीं (अपितु निकटवर्ती) तपोवन में जाबालि नाम वाले (एक) महातपस्वी मुनि रहते थे। उनका पुत्र 'हारीत' नामक मुनिकुमार स्नान करने की इच्छा से, उसी मार्ग से (जहाँ मैं था) उसी पद्मसर की ओर आया जो कि (ब्रह्मा के पुत्र) सनत्कुमार की भाँति समस्त विद्याओं (के अध्ययन) से प्रकाशित (विशुद्ध) अन्तःकरण वाला था, जो समान अवस्था वाले अन्यान्य तेजस्वियों के कुमारों द्वारा अनुगमन किया जा रहा था, जो अत्यन्त तेजस्विता के कारण कठिनतापूर्वक देख सकने योग्य स्वरूप वाले द्वितीय भगवान् सूर्य के (अथवा अग्नि) की भांति (ब्रह्मचर्यादिजनित) उत्कृष्ट तेजोमयता के कारण कठिनाईपूर्वक देख सकने शरीरवाला था, जो उदीयमान सूर्यमण्डल से उचेल लिया (उत्कीर्ण) गया प्रतीत होता था, जो विद्युत्समूह से विरचित अङ्ग–प्रत्यङ्गों वाला प्रतीत होता था, जो पिघले हुए सुनहरे घोल द्वारा बाहर से पुती हुई (कोई) मूर्ति प्रतीत होता था, जो चमचमाती हुई श्वेत–पीतवर्णवाली (अपनी) निर्मल देहप्रभा से दिन को प्रभातकालीन धूप से युक्त तथा वन को दावानल से संवलित करता हुआ प्रतीत

होता था, जो धधकते हुए लोहे के समान लालरंग वाली अनेक तीर्थों के जल (स्नान) से पवित्रित तथा स्कन्धप्रदेश पर लटकती हुई जटाओं के समूह से युक्त था, जो ज्वालापुञ्ज को भीतर समेटकर खाण्डववन को भस्मसात् करने की इच्छा से कृत्रिम ब्रह्मचारी की वेशभूषा धारण करने वाले भगवान् अग्निदेव के समान बँधे हुए चूडापाश वाला था।

संस्कृतव्याख्या - **मयि**=वैशम्पायने, **एवम्**=पूर्वोक्तप्रकारेण, **चिन्तयति एव**=विचारयति एव, **तस्मात्**=पूर्वोक्तात्, **सरसः**=पद्मसरोवरात्, **नातिदूरवर्तिनि**=समीपस्थायिनि, **तपोवने**=धर्मारण्ये, **जाबालिर्नाम**=जाबालिनामकः, **महातपाः**=महत् तपः यस्य सः उग्रतपाः, **मुनिः**=मननशीलो महात्मा, **प्रतिवसति स्म**=निवसति स्म, **तत्तनयः**=तत्सुतः, **हारीतनामा**=हारीतसंज्ञकः, **मुनिकुमारकैः**=तपस्विबालकैः, **समवयोभिः**=समानं वयः आयुः येषां तैः समवयस्कैः, **अपरैः**=इतरैः, **तपोवन-कुमारकैः**=तपस्विबालकैः, **अनुगम्यमानः**=अनुस्रियमाणः, **तेनव**=मद्गतेनैव, **पथा**=मार्गेण, सिस्नासुः तदेव कमलसरः उपागमत् इति दूरतमेन सम्बन्धः। अतः परं प्रथमान्तानि पदानि हारीतस्य विशेषणानि ज्ञेयानि। **सनत्कुमार इव**=ब्रह्मपुत्र इव, **सर्वविद्यावदातचेताः**=सर्वाभिः समस्ताभिः विद्याभिः कलाभिः अवदातं निर्मलं चेतः मनः यस्य सः, **अतितेजस्वितया**=अतिदीप्तिमत्तया, **दुर्निरीक्ष्य-मूर्तिः**=दुःखेन निरीक्षितुं योग्या दुर्निरीक्ष्या दुर्लक्ष्या मूर्तिः वपुः यस्य तादृशः, **द्वितीयः**=अपरः, **भगवान्**=ऐश्वर्यवान् तेजस्वी इत्यर्थः, **विभावसुः**=वह्निः, **इव**=उत्प्रेक्षाव्यञ्जकोऽयम्, **उद्यतः**=उदयं विदधतः, **दिवसकरमण्डलात्**=दिवसं करोतीति दिवसकरः सूर्यः तस्य मण्डलात् सूर्यबिम्बात्, **उत्कीर्ण इव**=टङ्केन उल्लिखित इव, सूर्यबिम्बम् उल्लिख्य विरचित इत्यर्थः **तडिद्भिः**=सौदामिनीभिः, **विरचितावयव इव**=विरचिताः निर्मिताः अवयवाः अङ्गानि यस्य तादृश इव, **तप्तकनकद्रवेण**=तप्तम् उष्णीकृतं यत् कनकं स्वर्णं तस्यः द्रवः रसः तेन, **बहिरुपलिप्तमूर्तिः इव**=बहिःबाह्यभागे उपलिप्ता लिम्पिता मूर्तिः वर्ष्म यस्य तादृश इव, **आपिशङ्गावदातया**=आ ईषत् पिशङ्गा पीतवर्णा चासौ अवदाता स्वच्छा तया, **स्फुरन्त्या**=देदीप्यमानया, **देहप्रभया**=देहस्य शरीरस्य प्रभा छविः तया शरीरकान्त्या, **सबालातपम्**=बालः प्रभातकालिकः आतपः तेजः बालातपः तेन सह विद्यमानं प्रातः कालिकप्रकाशसहितम्, **दिवसम् इव**=वासरम् इव, **सदावानलम्**=दवस्य अयं दावः, चासौ अनलः दावानलः तेन सह विद्यमानं दावाग्निसहितम्, **वनम् इव**=विपिनम् इव, **उपदर्शयन्**=प्रकटयन्, **उत्तप्तलोह-लोहिनीनाम्**=उत्तप्तम् उष्णीकृतं लोहम् अश्मसारः तद्वत् लोहिनीनां रक्तवर्णानाम्,

अनेकतीर्थाभिषेकपूतानाम्= अनेकानि विविधानि यानि तीर्थानि तरणोपायभूतानि गङ्गादीनि तेषु अभिषेकः स्नानं तेन पूतानाम् पवित्राणाम्, **अंसस्थलावलम्बिनीनाम्**=असंस्थलयोः भुजशिरः स्थाने अवलम्बन्ते वेल्लन्ति इति तच्छीलाः तासाम्, स्कन्धावलम्बिनीनाम्, **जटानाम्**=सटानाम्, **निकरेण**=समूहेन, **उपेतः**=युक्तः, **स्तम्भितशिखाकलापः**=स्तम्भितः बद्धः निश्चलीकृतो वा शिखानां चूडानां कलापः समूहः येन तादृशः बद्धचूडासमूहः, अग्निपक्षे निश्चलीकृतज्वालासमूहः, **खाण्डववनदिधक्षया**=खाण्डवं च तद् वनं खाण्डववनं तन्नामकं काननं तस्य दिधक्षया, **कृतकपटवटुवेषः**=कृतः विहितः कपटेन व्याजेन वटोः ब्रह्मचारिणः वेषः स्वरूपरचना आकल्पो वा येन सः तादृशः, **भगवान्**=ऐश्वर्यवान्, **पावक इव**= बह्निरिव।

टिप्पणी -**चिन्तयति**-चिति+णिच्+शतृ; स० ए० व०। **महातपाः**-महत् तपः यस्य **सः**-महातपाः। **सनत्कुमार इव...चेताः**-ब्रह्मा के पुत्र सनत्कुमार के ही समान सब विद्याओं के अध्ययन के फारण जिसका मन निर्मल हो गया था। 'सनत् सदा कुमारः' इस व्युत्पत्ति के आधार पर सनत्कुमार चिरकुमार कोटि में गिने जाते हैं। ''यथोत्पन्नस्तथैवाहं कुमार इति विद्धि माम्। तस्मात् सनत्कुमारेति नामैतन्मे प्रतिष्ठितम्''। **अनुगम्यमानः**-अनु+गम्+यक्+शानच्। **तेजस्वितया**-तेजस्+विनि+तल्+टाप्; तृ० ए० व०। **उत्कीर्ण इव**-टाँकी से छोलकर बनाया गया। 'सुवर्णात् कटकम्' प्रयोग ही तरह यहाँ दिवसकरमण्डलात्' में पञ्चमी विभक्ति है। सूर्य को गढ़कर ही मानो इस तेजस्वी मुनिकुमार को रचा गया हो, उत्+कृ+क्त। **उपलिप्त**-उप+लिप्+क्त। **स्फुरन्त्या**-स्फुर्+शतृ+ङीप्; तृ० ए० व०। **उपदर्शयन्**=उप+दृश्+णिच्+शतृ; प्र०ए०व०। **खाण्डवन......पावकः**-खाण्डव वन को जलाने की इच्छा से ब्रह्मचारी का कपट वेष बनाकर मानो भगवान् अग्निदेव ही आ गये हों। महाभारत के अनुसार श्वेतिक नामक राजा ने बारह वर्ष तक लगातार यज्ञ करके अग्नि को इतना तृप्त किया कि उसे मन्दाग्नि हो गयी। उसे दूर करने के लिए ब्रह्मा की आज्ञा से खाण्डव वन का दाह करने की इच्छा से अग्निदेव ब्रह्मचारी का वेष बनाकर अर्जुन के पास आये थे और अर्जुन ने श्रीकृष्ण की सहायता से अग्निदेव को पूर्ण रूप से परितृप्त किया था। '**कृतकपट........ पावकः**।' में उपमा अलङ्कार है।

तपोवनदेवतानूपुरानुकारिणा धर्मशासनकटकेनेव स्फाटिकेनाक्षवलयेन दक्षिणश्रवणावलम्बिना विराजमानः, सकलविषयोपभोगनिवृत्त्यर्थमुपपादितेन ललाटपट्टके त्रिसत्येनेव भस्मत्रिपुण्ड्रकेणालंकृतः, गगनगमनोन्मुखबला-

कानुकारिणा स्वर्गमिव दर्शयता सततमुद्ग्रीवेण स्फटिकमणिकमण्डलुनाध्यासितवामकरतलः, स्कन्धदेशावलम्बिना कृष्णाजिनेन नीलपाण्डुभासा तपस्तृष्णानिपीतेनान्तर्निष्पतता धूमपटलेनेव परीतमूर्तिः, अभिनवबिससूत्रनिर्मितेनेव परिलघुतया पवनलोलेन निर्मांसविरलपार्श्वकपञ्जरमिव गणयता वामांसावलम्बिना यज्ञोपवीतेनोद्भासमानः, देवतार्चनार्थमागृहीतवनलताकुसुमपरिपूर्णपर्णपुटसनाथशिखरेणाषाढदण्डेन व्यापृतसव्येततरपाणिः, विषाणशिखरोत्खातामुद्वहता स्नानमृदमुपजातपरिचयेन नीवारमुष्टिसंवर्धितेन कुशकुसुमलतायास्यमानलोलदृष्टिना तपोवनमृगेणानुगम्यमानः,........

हिन्दी अनुवाद - जो तपोवन देवता की पैजनी (पायल) का अनुकरण करने वाली-धर्मादेशों का समूह प्रतीत होने वाली (अथवा धर्ममय शासन कराने में नियुक्त सेना की भाँति) तथा दाहिने कान में लटकती हुई स्फटिकमणिनिर्मित जयमाला से शोभायमान था,जो समस्त सांसारिक भोगों से छुटकारा पाने के लिए (नाना प्रयत्नों से) प्राप्त किए गए ललाटस्थली पर(मन, वाणी एवं कार्य सम्बन्धी) तीन सत्यों की भाँति प्रतीत होने वाले-भस्मनिर्मित त्रिपुण्ड्र से अलंकृत था, जो नभोमण्डल में विहार करने के लिए ऊर्ध्वमुखी वकपंक्ति का अनुकरण करने वाले-निरन्तर ऊपर उठी ग्रीवा वाले (अतएव) मानो स्वर्गलोक के मार्ग का सङ्केत करते हुए स्फटिकमणिनिर्मित कमण्डलु से सुशोभित बाएँ हाथ वाला था, जो स्कन्धप्रदेश पर लटकते हुए नीली-एवं पीली प्रभा से युक्त काले मृगचर्म से (इस प्रकार) परिवेष्टित शरीरवाला था जो मानो तप के लोभ से (पहले) पिया गया और (अब) भीतर से निकलता हुआ धूमपुञ्ज हो, जो नवीन कमलनाल के तन्तुओं से बना हुआ प्रतीत होने वाले और भारहीन होने के कारण वायुवेग से चञ्चल होकर (अर्थात् देह पर इधर-उधर झूलता हुआ) मानो (हारीत की) मांसविहीन एवं छितराई हुई पसलियों को गिनने वाले, कन्धे पर लटकते हुए यज्ञोपवीत से देदीप्यमान था, जो देवार्चन के निमित्त चुने गये वन की लताओं के पुष्पों से परिपूर्ण पत्रपुट (दोने) से संयुक्त शिखर वाले पलाशदण्ड से भरे हुए दाहिने हाथ वाला था, जो सींगों के अग्रभाग से उखाड़ी गई स्नानोपयोगी मिट्टी को (सींगों में ही) लपेटे हुए, परिचय उत्पन्न हो जाने के कारण जङ्गली धान की मुट्ठियों (को खिलाने) से पाले-पोसे गए तथा कुशों-लताओं एवं फूलों से दुःखती हुई चञ्चल दृष्टियों वाले तपोवनमृग से अनुगमन किया जा रहा था।

संस्कृतव्याख्या - **तपोवनदेवतानूपुरानुकारिणा**=तपोवनदेवीचरणकटकस-

दृशेन, **धर्मशासनकटकेन इव**=धर्मशासनं राजभिः विप्रेभ्यः दत्तं ताम्रपत्रं तस्य कटकं ताम्रकुण्डलं तेन इव, **दक्षिणश्रवणावलम्बिना**=दक्षिणे सव्येतरे श्रवणं श्रोत्रे अवलम्बते वेल्लति इति तच्छीलः तेन, **स्फाटिकेन**=स्फटिकमणिनिर्मितेन, **अक्षवलयेन**=अक्षमालया, **विराजमानः**=शोभमानः, **सकलविषयोपभोग-निवृत्त्यर्थम्** =सकलाः समस्ताः ये विषयाः इन्द्रियार्थाः तेषाम् उपभोगः सेवनं तस्मात् निवृत्त्यर्थं विरक्त्यर्थम्, **उपपादितेन**=विहितेन, **त्रिसत्येन इव**=त्रयाणां सत्यानां समाहारः त्रिसत्यं तेन मानसिकवाचिककायिकसत्यत्रयेण इव, **ललाटपट्टके**=भालफलके, **भस्मत्रिपुण्ड्रकेण**=भस्मनः विभूतेः त्रिपुण्ड्रकं तिलकविशेषः तिर्यग्रेखात्रयात्मकः तेन, **अलंकृतः**=सुशोभितः, **गगनगमनोन्मुखबलाकानुसारिणा**=गगनगमनाय आकाशोड्डयनाय उन्मुखी ऊर्ध्वानना या बलाका बकाङ्गना ताम् अनुसरति अनुकरोति इति तच्छीलः तेन तादृशेन, **स्वर्गमार्गम् इव**=सुरलोकपथम् इव, **दर्शयता**=निर्दिशता, **सततम्**=निरन्तरम्, **उद्ग्रीवेण**=उन्नतकन्धरेण, **स्फटिक-मणिकमण्डलुना**=स्फटिककुण्ड्या, **अध्यासितवामकरतलः**=अध्यासितम् अवलम्बितं वामं सव्यं करतलं हस्ततलं यस्य सः, **स्कन्धदेशावलम्बिना**=स्कन्धदेशम् असंस्थलम् अवलम्बते आश्रयते इति तच्छीलं तेन, **नीलपाण्डुभासा**=नीला श्यामा पाण्डुः पीता च भाः कान्तिः यस्य तेन तादृशेन, **कृष्णाजिनेन**=कृष्णमृगचर्मणा, **तपस्तृष्णानिपीतेन**=तपसः तपस्यायाः तृष्णा आकाङ्क्षा तया हेतुभूतया निपीतेन निगीर्णेन, **पश्चाच्च अन्तर्निष्पतता**=अन्तः अध्यन्तरात् निष्पतता बहिर्निर्गच्छता, **धूमपटलेन इव**=धूमसमुदायेन इव, **परीतमूर्तिः**=परीता व्याप्ता मूर्तिः विग्रहः यस्य तादृशः, **अभिनवबिससूत्रनिर्मितेन इव**=अभिनवानि प्रत्यग्राणि यानि बिससूत्राणि मृणालतन्तवः तैः निर्मितेन इव कृतेन इव, **परिलघुतया**=भारशून्यतया, **पवनलोलेन**=पवनेन वातेन लोलः चञ्चलः तेन, अतएव, **निर्मांसविरलपार्श्वक-पञ्जरम्**=निर्मांसं पिशितशून्यं विरलम् असंकीर्णं पार्श्वकपञ्जरं पार्श्वास्थिनिकरम्, **गणयता इव**= गणनां कुर्वता इव, **वामांसावलम्बिना**=वामं सव्यं अंसं स्कन्धम् अवलम्बते आश्रयते इति तच्छीलं तेन, **यज्ञोपवीते**=यज्ञसूत्रेण, **उद्भासमानः**=देदीप्यमानः, **देवतार्चनार्थम्**=देवपूजनार्थम्, **आगृहीतवनलताकुसुमपरिपूर्णपर्ण-पुटसनाथशिखरेण**=आगृहीतानि आत्तानि यानि वनलतानां काननवल्लीनां कुसुमानि प्रसूनानि तैः परिपूर्णेन भृतेन पर्णपुटेन पत्रसंपुटकेन सनाथं युक्तं शिखरम् अग्र-भागः यस्य स तेन तादृशेन, **आषाढदण्डेन**=पालाशलगुडेन, **व्यापृतसव्येतरपाणिः**=व्यापृतः संयुक्तः सव्याद् इतरः सव्येतरः दक्षिणः पाणिः हस्तः यस्य स तादृशः,

विषाणशिखरोत्खाताम्=विषाणस्य श्रृङ्गस्य शिखरेण अग्रेण उत्खातम् उत्खनिताम्, **स्नानमृदम्**=स्नानार्थं स्नानात्पूर्वं मर्दनार्थे या मृत् मृत्तिका ताम्, **उद्वहता**=धारयता, **उपजातपरिचयेन**=उपजातः समुत्पन्नः परिचयः संस्तवः यस्य तेन उपजातपरिचितेन, अत एव, **नीवारमुष्टिसंवर्धितेन**=नीवाराणां मुनिधान्यविशेषाणां मुष्टिभिः मुष्टिपरिमिताभिः मात्राभिः=संवर्धितेन वृद्धिं प्रापितेन, **कुशकुसुमलतायास्यमानलोलदृष्टिना**=कुशाः दर्भाः, कुसुमानि पुष्पाणि, लताः व्रततयः तैः आकर्षणहेतुभूतैः आयास्यमाना खेदं प्राप्यमाणा लोला चञ्चलाः दृष्टिः दर्शनं यस्य तेन तादृशेन, **तपोवनमृगेण**=मुन्याश्रमहरिणेन, **अनुगम्यमानः**=अनुव्रज्यमानः।

टिप्पणी – **धर्मशासनकटकेन इव**–ताम्रपत्रों में विद्यमान कटक (कड़े) के समान। राजाओं के द्वारा ब्राह्मणों को जो भूमि दान आदि के प्रमाणरूप में ताम्रपत्र दिये जाते थे उन पर धार्मिक उपदेश भी रहा करते थे; अतः उन्हें धर्मशासन कहा जाता था। ताम्रपत्रों के ऊपरी भाग में एक ताँबे का मोटा कटक (कड़ा) डाला जाता था। जिस पर राजमुद्रा अङ्कित रहती थी, उसे धर्मशासन कटक कहा जाता था। हारीत के कान पर लटकती हुई माला उस कड़े के समान ही घेरे वाली थी। **विराजमान**–वि+राज्+शानच्। **त्रिसत्येन इव**–हारीत के मस्तक पर लगी हुई भस्म का त्रिपुण्ड्र से त्रिसत्य के समान था जो विषयों के उपभोग से मन को हटाने के लिए उसने 'मैं विषयों में अनुरक्त नहीं होऊँगा' इस सत्य को तीन बार शपथ के रूप में स्वीकार किया था। अथवा 'त्रिसत्या वै देवाः' इस वैदिक कल्पना के आधार पर मनसा, वाचा, कर्मणा विषयनिवृत्ति के लिए किया गया विविध संकल्प ही 'त्रिसत्य' कहलाता है। **अलंकृत**–अलं+कृ+क्त। **दर्शयता**–दृश्+णिच्+शतृ; तृ० ए० व०। **परीत**–परि+इण्+क्त। **उद्भासमान**–उत्+भास्+शानच्। **आषाढदण्ड**–ढाक का दण्ड। 'पलाशो दण्ड आषाढः' इत्यमरः। '**धूमपटलेनेव**' में जात्युत्प्रेक्षा है। **अनुगम्यमान**–अन्+गम्+यक्+शानच्।

विटप इव कोमलवल्कलावृतशरीर, गिरिरिव समेखलः, राहुरिवासकृदास्वादितसोमः, पद्मनिकर इव दिवसकरमरीचिपः, नदीतटतरुरिव सततजलक्षालनविमलतटः, करिकलभ इव विकचकुमुददलशकलासितदशनः, द्रौणिरिव कृपानुगतः, नक्षत्रराशिरिव चित्रमृगकृत्तिकाश्लेषोपशोभितः, घर्मकालदिवस इव क्षपितदोषः, जलधरसमय इव प्रशमितरजःप्रसरः, वरुण इव कृतोदवासः, हरिरिवापनीतनरकभयः, प्रदोषारम्भ इव संध्यापिङ्गलतारकः, प्रभातकाल इव बालातपकपिलः, रविरथ इव दृढनियमिताक्षचक्रः, सुराजेव

निगूढमन्त्रसाधनक्षपितविग्रहः, जलनिधिरिव करालशंखमण्डलावर्तनाभिगर्तः, भगीरथ इव दृष्टगङ्गावतारः, भ्रमर इवासकृदनुभूतपुष्करवनवासः, वनचरोऽपि कृतमहालयप्रवेशः, असंयतोऽपि मोक्षार्थी, सामप्रयोगपरोऽपि सततावलम्बित-दण्डः, सुप्तोऽपि, प्रबुद्धः संनिहितनेत्रद्वयोऽपि परित्यक्तवामलोचनस्तदेव कमलसरः सिस्नासुरुपागमत्।

हिन्दी अनुवाद - जो कोमल छालों (तरुत्वक्) से ढँकी शरीर वाले तने (युक्त वृक्ष) की भाँति कोमल वल्कल (वस्त्रविशेष) से आवृत्त शरीर वाला था, जो मेखलाओं (पत्तों अथवा प्रत्यन्त शिखरों) से युक्त पर्वत की भाँति (मौञ्जी) मेखला से युक्त था, जो अनेक बार चन्द्रमा को संग्रस्त करने वाले राहु की भाँति अनेक् बार सोमरस का आस्वादन कर चुका था। (अथवा अनेक बार ज्योतिष्टोम याग कर चुका था), (विकासार्थ) सूर्य की किरणों का पान करने वाले कमलसमूह की भाँति (ऊर्ध्वमुख होकर) सूर्य की रश्मियों का पान करनेवाला था, जो निरन्तर लहरों से धोए जाने के कारण निर्मल मूलभाग वाले नदी तटवर्ती वृक्ष की भाँति सदैव जल से धोने के कारण स्वच्छ जटाओं वाला था, जो खिले डुए कुमुदपुष्प की पंखुड़ियों के टुकड़ों की भाँति शुभ्र दाँतों वाले हस्तिशावक की भाँति विकसित कुमुदपुष्प के दलखण्डों की भाँति शभ्र दाँतों वाला था, जो (अपने मामा) कृपाचार्य से अनुगत द्रोणपुत्र अश्वत्थामा की भाँति अनुग्रहयुक्त था, जो चित्रा-मृगशिरा-कृत्तिका तथा आश्लेषा समन्वित नक्षत्रमण्डल की भाँति चितकबरे मृगचर्म को लपेटने (ओढ़ने) से सुशोभित था, जो रात्रि को क्षीण (अर्थात् छोटी) बना देने वाले ग्रीष्मकालीन दिन की भाँति (रागद्वेषादि) दोषों को नष्ट कर चुका था, जो धूलिसञ्चार का प्रशमन कर देने वाली पावस ऋतु की भाँति (कामादि) रजोगुण-व्यापार को शान्त कर चुका था, जो जल में निवास करने वाले (तदधिष्ठातृ) वरुणदेव की भाँति (तपश्चर्या के लिए) जल में निवास कर चुका था अथवा 'उपवास' (व्रत विशेष) सम्पन्न कर चुका था, जो नरकासुर के भय को दूर कर देने वाले भगवान् विष्णु की भाँति (समाचरित पुण्यों के कारण) नरलोक का भय दूर कर चुका था, जो सान्ध्यकालीन पिङ्गलवर्ण नक्षत्रों से युक्त प्रदोषारम्भ (गोधूलिवेला का प्रारम्भ) की भाँति सन्ध्या सदृश पिङ्गलवर्ण नेत्रकनीनिका (पुतली) वाला था, जो उदीयमान सूर्य की धूप के कारण पियराए प्रभातकाल की भाँति नूतन सूर्यप्रभा के समान कपिलवर्ण था, जो सुदृढ़रूप में कीलित (लगाए गए) धुरी एवं चक्के से युक्त सूर्य के रथ की भाँति सुदृढ़रूप से नियन्त्रित इन्द्रिय समूह वाला था, जो अत्यन्त

गोपनीय मंत्रणाओं एवं साधनों (गजाश्वादि सैन्यों) से युद्धों को शान्त कर देने वाले प्रतापी नरेश की भाँति अत्यन्त गोपनीय मंत्रसाधना (देवाराधनक्रिया) के (अभ्यास के) कारण कृशता को प्राप्त हुये शरीर वाला था, जो अगाध प्रदेशों (=गर्तों में विद्यमान 'कराल शंखमंडलों' (अर्थात् कराल=विशाल तथा टेढ़ी-मेढ़ी आकृति वाले १६ लकीरों वाले शंखों का समूह) तथा आवर्तों (=जल के भँवरों) से युक्त समुद्र की भाँति विशाल तथा उच्चावच शंखों के मण्डलावर्त (अर्थात् क्रमशः नीचे उतरी हुई वृत्ताकार भ्रमि रेखा) के समान 'गर्त'(नाभिच्छिद्र) वाला था, जो भगवती गंगा का अवतरण प्रत्यक्षीकृत करने वाले (महाराज) भगीरथ की भाँति गंगा के स्नान को देख चुका था, जो कमलवन में निवास करने का अनेकशः अनुभव किये हुए भ्रमर की भाँति जल अर्थात् संवलित वन में रहने का बारम्बार अनुभव कर चुका था (अथवा 'पुष्कर' तीर्थ तथा वन में रहने का अनेकशः अनुभव कर चुका था), जो वन में सञ्चरण करने वाला होकर भी 'महालयों' अर्थात् विशाल अट्टालिकाओं में प्रवेश कर चुका था, जो 'असंयत' अर्थात् उच्छृङ्खल अथवा असमाहित होकर भी मोक्ष का अभिलाषी था जो, 'साम' अर्थात् मधुर वचनों के प्रयोग में तत्पर होता हुआ भी निरन्तर डंडे का सहारा लिये था (अथवा सामनीति=मैत्रीनीति के प्रयोग का पक्षधर होकर भी सदैव दण्डनीति का आश्रय लेता था), जो सोता हुआ भी जगा हुआ (जाग्रदवस्था वाला) था तथा जो नेत्रद्वय के विद्यमान रहते हुए भी वामनेत्र (सुन्दरियों) का परित्याग कर चुका था।

संस्कृतव्याख्या - **विटपः इव**=तरुशाखा इव, **कोमलवल्कलावृतशरीरः**= कोमलेन मृदुलेन, वल्कलेन पादपत्वचा आवृतम् आच्छादितं शरीरं वपुः यस्य स तादृशः, **गिरिः इव**=पर्वत इस, **समेखलः**=मेखला मौञ्जी तया सह विद्यमानः, पर्वतापक्षे मेखला शैलनितम्बः मध्यमभागः इत्यर्थः तया सह वर्तमानः, **राहुः इव**=सैंहिकेय इव, **असकृद्**=बहुबारम्, **आस्वादितसोमः**=आस्वादितः पीतः सोमः सोमरसः यज्ञेषु येन सः, पक्षे आस्वादितः ग्रस्तः सोमः हिमांशुः येनेत्यर्थः, **पद्मनिकरः इव**=कमलसमूहः इव, **दिवसकरमरीचिपः**=दिवसकरः भास्करःतस्य मरीचीन् किरणान् पिबति पञ्चाग्निसाधनात्मके यज्ञे इति भावः, पक्षे स्वविकासाय दिवसकरमरीचीन् पिबति स्पृशति, कमलानां सूर्यकिरणस्पर्शेन विकासप्रसिद्धेः। **नदीतटतरुः इव**=नद्याः सरितः तटे तीरे तरुः पादपः स इव, **सततजलक्षालन-विमलजटः**=सततं निरन्तरं जलक्षालनेन-स्नानकाले सलिलधावनेन विमलाः निर्मलाः जटाः सटाः यस्य सः, पक्षे सततं निरन्तरं जलक्षालनेन स्रोतः सलिलप्रक्षालनेन

विमला जटा मूलप्रदेशः यस्य इत्यर्थः, **करिकलभः इव**=हस्तिशावकः इव, **विकचकुमुददलशकलसितदशनः**=विकचानि विकसितानि यानि कुमुददलानि कैरवपत्राणि तेषां शकलानि खण्डानि तद्वत् सिताः श्वेताः दशनाः दन्ताः यस्य सः, पक्षे सितौ शुभ्रौ दशनौ दन्तौ यस्यः स शेषं प्राग्वत्, उभयत्रापि साम्यात्। **द्रौणिः इव**=द्रोणसुतः अश्वत्थामा इव। **कृपानुगतः**=कृपा परदुःखनाशेच्छा तया अनुगतः संयुक्तः पक्षे कृपेण कृपाचार्येण स्वमातुलेन अनुगतः संयुक्तः, **नक्षत्रराशिः इव**=नक्षत्राणाम् अश्विनीप्रभृतीनां राशिः समूहः स इव, **चित्रमृगकृत्तिकाश्लेषोपशोभितः**=चित्रमृगः कृष्णसारः तस्य कृत्तिका चर्म तस्याः आश्लेषेण आसङ्गेन उपशोभितः विराजितः, पक्षे चित्रनामकं नक्षत्रं मृगं मृगशिराः कृत्तिकाः एतदाख्यं तृतीयं नक्षत्रं श्लेषा आश्लेषा वा एतदाख्यं नवमं नक्षत्रं तैः उपशोभितः सुशोभितः, **घर्मकालदिवसः इव**=घर्मकालः ग्रीष्मर्तुः तस्य दिवसः वासरः स इव, **क्षयितदोषः**=क्षयः संजातो येषां ते क्षयिताः क्षीणाः दोषाः कामक्रोधादयः यस्य सः, पक्षे क्षयिता क्षीणतां प्राप्ता दोषा निशा यस्य स तादृशः, **जलधरसमयः इव**=जलधराः जलदाः तेषां समयः प्रावृट्कालः स इव, **प्रशमितरजः प्रसरः**=प्रशमितःशान्तिं प्रापितः रजसः रजोगुणस्य प्रसरः व्यापारः येन सः, पक्षे प्रशमितः रजसां रेणूनां प्रसरः विस्तारः यत्र तादृशः, **वरुणः इव**=प्रचेता इव, **कृतोदवासः**=कृतः विहितः उदके जले वासः निवासः उदवासः जलनिवासः येन सः व्रताचरणादत्र जलवासः, पक्षे जलाधिपतित्वात्, **हरिः इव**=विष्णु इव, **अपनीतनरकभयः**=अपनीतं दूरीकृतं नरकस्य निरयस्य भयं साध्वसं येन सः, पक्षे अपनीतं दूरीकृतं नरकस्य तदाख्यस्य असुरस्य भयं येन सः, नरकासुरवधादित्यर्थः, **प्रदोषारम्भः इव**=प्रदोषस्य रजनीमुखस्य आरम्भः प्रारम्भः स इव, **सन्ध्यापिङ्गलतारकः**=संध्यावत् दिवसरजन्योः सन्धिकालवत् पिङ्गले पीतवर्णे तारके कनीनिके यस्य सः, पक्षे संध्यया सन्ध्यावर्णेन पिङ्गला पीताः तारका नक्षत्राणि यत्र सः, **प्रभातकालः इव**=प्रभातं प्रत्यूषः तस्य कालः समयः स इव, **बालातपकपिलः**= बालातपः सूर्यस्य नवीन प्रकाशः तद्वत् कपिलःपीतरक्तवर्णः, पक्षे बालातपेन सूर्यप्रकाशेन कपिलः, **रविरथः इव**=रवेः सूर्यस्य रथः स्यन्दनः स इव, **दृढनियमिताक्षचक्रः**=दृढं कठोरं यथा स्यात् नियमितं निगृहीतम् अक्षाणाम् इन्द्रियाणां चक्रं समूहः येन सः, पक्षे दृढं कठिनं यथा स्यात्तथा नियमिते निवद्धे अक्षचक्रे यस्य सः, अक्षं मध्यभागः चक्रं रथाङ्गम्, **सुराजा इव**=सुनृपः इव, **निगूढमन्त्रसाधनक्षपितविग्रहः**=निगूढं अतिगुप्तं यत् मन्त्र-साधनं स्वेष्टदेवमन्त्रसिद्धिः तेन क्षपितः क्षयं प्रापितः विग्रहः शरीरं मन्त्रेण

येन सः, व्रताद्याचरणादिति भावः, पक्षे निगूढेन सुगुप्तेन मन्त्रणया साधनेन सैन्येन च क्षपितः क्षयं प्रापितः विग्रहः युद्धं, युद्ध-सम्भावनेत्यर्थः, येन सः। **जलनिधि इव**=सागरः इव, **करालशंखमण्डलावर्तनाभिगर्तः**=करालः विशालः यः शंखः कम्बुः तस्य मण्डलावर्तः मण्डलाकारभ्रमिरेखा तद्वत् नाभिगर्तः नाभिविवरं यस्य सः, पक्षे करालशंखः विशालशंखः मण्डलावर्तःमण्डलाकारो जलभ्रमः च नाभिगर्त इव, नाभिच्छिद्रमा इव, यस्मिन् सः, **भगीरथ इव**=दिलीपपुत्रः सूर्यवंश्यो नृपः इव, **दृष्टगङ्गावतारः**=दृष्टः विलोकितः गङ्गायाः भागीरथ्याः अवतारः अवतरणभूमिः येन सः, पक्षे दृष्टः गङ्गायाः अवतारः स्वर्गाद् अवरोहणं येन सः, **भ्रमरः इव**=मधुप इवः, **असकृत**=बहुशः, **अनुभूतपुष्करवनवासः**=अनुभूतः तपस्यर्थम् अनुभव-विषयीकृतः पुष्करस्य एतन्नामकतीर्थस्य वने जले वासः स्थितिः येन स तादृशः अथवा पुष्करे तीर्थे वने विपिने च वासः येन सः, **वनचरोपि**=वने कानने चरति भ्राम्यति इति वनचरः वासी सन् अपि, **मृतमहालयप्रवेशः**=कृतः विहितः महालये महांश्चासौ आलयः महालयः तस्मिन् प्रासादे प्रवेशः अन्तर्वासः येन सः इति विरोधः, तत्परिहाराय कृतः विहितः महालये परमात्मनि मोक्षे वा प्रवेशः गतिः येनेत्यर्थः। **असंयतोऽपि**=अबद्धोऽपि, **मोक्षार्थी**=बन्धनमुक्तिकामः, अत्र विरोधः तत्परिहारस्तु मोक्षार्थी-परमपुरुषार्थरूपमुक्तिकामः इत्यर्थकरणात्, **सामप्रयोगपरोऽपि**= साम सान्त्वनं प्रथमोपायः तस्य प्रयोगे अनुष्ठाने परः परायणोऽपि, **सततावलम्बित-दण्डः**=सततं निरन्तरम् अवलम्बितः आश्रितः दण्डः नियमनं तुरीयोपायः येन सः, अत्र विरोधः तत्परिहारस्तु साम तृतीयवेदः तत्प्रयोगपरः सततम् अवलम्बितः आश्रितः दण्डः पालाशदंडः येन तादृशः इत्यर्थकरणात्, **सुप्तोऽपि**=निद्रितोऽपि, **प्रबुद्धः**=बुद्धः, अत्र विरोधपरिहाराय सुप्तः सांसारिकविषयेषु प्रबुद्धः परमात्मविषयकज्ञाने इत्यर्थः। अथवा सुप्ताः सुशोभनाः सुप्ताः जटाः यस्य तादृशः सुजटोऽसौ प्रबुद्धः ज्ञानीत्यर्थः, **संनिहितनेत्रद्वयोऽपि**=संनिहितं सम्यक् स्थापितं नेत्रद्वयं चक्षुर्युगलं येन सः तादृशः सन्नपि, **परित्यक्तवामलोचनः**=परित्यक्तं दूरीकृतं वामलोचनं सव्यनयनं येन सः अत्र विरोधः, तत्परिहारस्तु परित्यक्ताः दूरीकृताः वामलोचना सुन्दर्यः येन सः इत्यर्थकरणात्। एवं गुणविशिष्टो, **हारीतनामा मुनिकुमारकः सिस्नासुः**=स्नातुमिच्छुः, **पम्पाभिधानं**=पम्पासंज्ञकं, **कमलसरः**=पङ्कजमयसरोवरम्, **उपागमत्**=प्राप्तवान्।

टिप्पणी -आवृत-आ+वृ+क्त। **मेखला**-मून्ज की बनी हुई मेखला, पर्वतनितम्ब। **जटा**-तपस्वियों के केश, वृक्षों की जड़। **रजः**-रजोगुण, धूलि। **संध्यापिङ्गलतारकः**-सन्ध्या के समान पीले वर्ण की पुतलियों वाला, सन्ध्या के

कारण पीले नक्षत्रों वाला। सामुद्रिकशास्त्र के अनुसार-'क्षुद्रोऽपि चक्रवर्ती स्यात् पीततारकचक्षुषि'। पीली पुतलियों वाला महापुरुष समझा जाता है। **विग्रह**-शरीर, युद्ध। **करालशंखगर्त:**-विशाल शंख के मण्डलाकार जलावर्त वाला। **पुष्करवनवास:**-पुष्कर तीर्थ के जलमें निवास, पुष्कर तीर्थ में और वन में निवास; पुष्कर (जल) युक्त वन में निवास, कमलवन में निवास। यहाँ 'विटप इव' से 'भ्रमर इव' तक पूर्णोपमालङ्कार है। 'वनचर....लोचन:' में विरोधाभास है।

प्रायेणाकाणिमित्राण्यतिकरुणार्द्राणि च सदा खलु भवन्ति सतां चेतांसि। यत: स मां तदवस्थमालोक्य समुपजातकरुण: समीपवर्तिनमृषिकुमारकमन्यतममब्रवीत्-'अयं कथमपि शुकशिशुरसंजातपक्षपुट एव तरुशिखरादस्मात् परिच्युत: ।श्येनमुखपरिभ्रष्टेन वानेन भवितव्यम्। तथाहि-अतिदवीयस्तया प्रपातस्याल्पशेषजीवितोऽयमामीलितलोचनो मुहुर्मुहुर्मुखेन पतति, मुहुर्मुहुरत्युल्बणं श्वसिति मुहुर्मुहुश्चञ्चुपुटं विवृणोति, न शक्नोति शिरोधरां धारयितुम्। तदेहि। यावदेवायमसुभिर्न विमुच्यते तावदेव गृहाणेमम्, अवतारय सलिलसमीपम्, इत्यभिधाय तेन मां सरस्तीरमनाययत्।

हिन्दी अनुवाद - प्राय: महापुरुषों के चित्त सर्वदा नि:स्वार्थभाव से हितैषी तथा अतिशय करुणा (परदु:खप्रहाणेच्छा) से आर्द्र होते हैं। क्योंकि वह (मुनिकुमार हारीत) मुझे उस अवस्था वाला अर्थात् कष्टदशापन्न देखकर, करुणाविष्ट होकर निकटवर्ती (बहुतों में से) एक ऋषिकुमार से बोला-''यह सुग्गे का बच्चा पंखे न उगे होने के कारण ही इस वृक्ष की चोटी से यथाकथञ्चित् (नीचे) गिर पड़ा है अथवा बाजपक्षी के मुख से इसे छूटा हुआ होना चाहिए। देखो न, गिरने की अत्यधिक दूरी (ऊँचाई) होने के कारण अल्पमात्र अवशिष्ट जीवन वाला यह (पक्षी) आँखें बन्द किए बार-बार मुँह के बल गिर रहा है, बार-बार अत्यन्त विकट साँसें ले रहा है, बार-बार चञ्चुपुट (चोंच) खोल रहा है तथा ग्रीवाभाग को धारण करने में समर्थ नहीं हो पा रहा है। इसलिए आओ, जब तक कि यह प्राणों से विमुक्त न हो जाय उसके पूर्व ही ''इसको उठा लो और पानी के पास उतारो।''इस प्रकार कह कर (ऋषिकुमार हारीत ने) उस ऋषिपुत्र द्वारा मुझे सरोवर के तट पर पहुँचाया।''

संस्कृतव्याख्या - **खलु**=निश्चयेन, **सताम्**=सत्पुरुषाणाम्, **चेतांसि**=हृदयानि, **प्रायेण**=बाहुल्येन, **अकारणमित्राणि**=अकारणेन हेतुं विना मित्राणि स्नेहकारीणि, **सदा**=सर्वदा, **च**=समुच्चयार्थकमिदमव्ययपदम्, **अतिकरुणार्द्राणि**=अतिकरुणा

अतिशयेन परदुःखविनाशेच्छा तया आर्द्राणि सरसानि, कोमलानीत्यर्थः, **भवन्ति**=वर्तन्ते **यतः**=यस्मात् कारणात्, **सः**=मुनिकुमारः हारीतः, **माम्**=वैशम्पायनम्, **तदवस्थं**=सा दयनीया अवस्था दशा यस्य तादृशम्, **आलोक्य**=विलोक्य, **समुपजात-करुणः**=समुपजाता समुत्पन्ना करुणा दया यस्य तादृशः सन्, **समीपवर्तिनम्**=निकटस्थम्, **अन्यतमम्**=एकतमम्, **ऋषिकुमारम्**=तपस्विबालकम्, **अब्रवीत्**=जगाद, **अयम्**=पुरो दृश्यमानः, **शुकशिशुः**=कीरडिम्भः, **असंजातपक्षपुटः इव**=असंजातम् अनुत्पन्नं पक्षपुटं पतत्रसंपुटं यस्य तादृशः इव, **कथमपि**=केनापि हेतुना, **अस्मात्**=पुरो दृश्यमानात्, **तरुशिखरात्**=वृक्षप्रदेशात्, **परिच्युतः**=निपतितः, **वा**=अथवा, **अनेन**=शुकशावकेन, **श्येनमुखपरिभ्रष्टेन**=श्येनः शशादनः तस्य मुखात् चञ्च्वाः परिभ्रष्टेन परिच्युतेन, **भवितव्यम्**=भाव्यम्, **तथाहि**=पूर्वोक्तमेव समर्थ्यते, **प्रपातस्य**=परिपतनस्य, **अतिदवीयस्तया**=अतिदूरप्रदेशभावितया, **अल्पशेषजीवितः** =अल्पं किंचित् शेषम् अविशिष्टं जीवितं जीवनं प्राणशक्तिः यस्य स तादृशः, **अयम्**=शुकशावकः, **अमीलितलोचनः**=अमीलिते मुद्रिते लोचने नेत्रे यस्य सः तादृशः सन्, **मुहुर्मुहुः**=भूयोभूयः, **मुखेन**=लपनेन, **पतति**=लुठति **मुहुर्मुहुः अत्युल्बणम्**=अत्युत्कटम्, **श्वसिति**=प्राणिति, **मुहुर्मुहुः चञ्चुपुटम्**=मुखसंपुटम् (चञ्चुः त्रोटी), **विवृणोति**=व्याददाति, **शिरोधराम्**=ग्रीवाम्, **धारयितुम्**=निधातुम्, **न शक्नोति**=न पारयते, **तत्**=तस्मात्, **एहि**=आयाहि, **यावदेव**=यावत्कालपर्यन्तमेवं, **अयम्**=शुकशावकः, **असुभिः**=प्राणैः, **न विमुच्यते**=न परित्यज्यते, **तावदेव**=तावत्कालपर्यन्तमेवं, तस्मात्कालात् प्रागेवेत्यर्थः, **इमम्**=शुकशिशुम्, **ग्रहाण**=उत्थापय, **सलिलसमीपम्**=जलान्तिकम्, **अवतारय**=प्रापय, **इति**=इत्थम्, **अभिधाय**=कथयित्वा, **तेन**=तपस्विकुमारेण, **माम्**=वैशम्पायनम्, **सरस्तीरम्**=पम्पासरोवरतटम्, **अनाययत्**=प्रापयत्।

टिप्पणी - **अतिदवीयस्तया**-अतिशयेन दूर इति दवीयान्; दूर+ईयसुन्, दूर के स्थान पर दव आदेश-दवीयस्+तल्+टाप्=दवीयस्ता तया दवीयस्तया। **परिच्युतः**-परि+च्यु+क्त। **मुखेन पतति**-मुख के बल गिरता है। 'प्रकृत्यादिभ्य उपसंख्यानम्' से तृतीया विभक्ति। **गृहाण**-गृह् धातु लोट् प्र० पु० ए० व०।

उपसृत्य च जलसमीपमेकदेशनिहितदण्डकमण्डलुरादाय स्वयं मामामुक्तप्रयत्नमुत्तानितमुखमङ्गुल्या कतिचित्सलिलबिन्दूनपाययत्। अम्भःक्षोदकृतसेकञ्चोपजातनवीनप्राणमुयतटप्ररूढस्य नवनलिनीपलाशस्य जलशिशिरायां छायायां निधाय यथासमुचितमकरोत् स्नानविधिम्।

अभिषेकावसाने चानेकप्राणायामपूतो जपन् पवित्राण्यघमर्षणानि प्रत्यग्रभग्नैरुन्मुखो रक्तारविन्दैर्नलिनीपत्रपुटेन भगवते सवित्रे दत्त्वार्घ्यमुदतिष्ठत्।। आगृहीतधौतधवलवल्कलश्च सज्योत्स्न इव संध्यातपः करतलनिर्धूननविशदसटः प्रत्यग्रस्नानार्द्रजटेन सकलेन तेन मुनिकुमारकदम्बकेनानुगम्यमानो मां गृहीत्वा तपोवनाभिमुखं शनैः शनैरगच्छत्।

हिन्दी अनुवाद - जल के पास पहुँच कर दण्ड और कमण्डलु को एक ओर रखकर (अन्नपानादि शरीरानुकूल) प्रयत्नों से विहीन अर्थात् निश्चेष्ट हुए तथा उत्तानित (ऊपर उठे हुए) मुखवाले मुझको स्वयं संभाल कर अँगुली से जल की कुछ बूदों को पिलाया। पानी के छीटों से अभिषेक (सिञ्चन) किये हुये, तथा उत्पन्न हुई नूतन प्राणशक्तियों वाले मुझको तट के समीप उगी हुई नवीन कमलिनी के पत्ते की जल के कारण शीतल हुई छांव में रखकर यथोचित रूप से स्नानक्रिया सम्पादित की तथा स्नानकार्य समाप्त हो जाने पर अनेक प्राणायामों से पवित्र होने पर भी अघमर्षण (जलदेवता स्तवनरूप) मंत्रों को जपता हुआ, ऊर्ध्वमुख होकर कमलिनी के पत्ते से बने दोने द्वारा तत्काल चुने गये लाल कमलपुष्पों से भगवान् सूर्य को अर्घ (पूजा) प्रस्तुत कर उठ खड़ा हुआ। (तदनन्तर) धुले हुये धवल वल्कल-वसनों को धारण किये हुये (अतएव) चन्द्रिकाचर्चित सान्ध्यकालीन सूर्य के प्रकाश की भाँति, हथेलियों से झटकने के कारण निर्मल जटाओं वाला तथा तत्काल स्नान करने के कारण गीली जटाओं वाले उस समग्र तापसशिशुसमूह द्वारा अनुसरण किया जाता हुआ, मुझे (साथ) लेकर धीरे-धीरे तपोवन की ओर चल पड़ा।

संस्कृतव्याख्या - **जलसमीपम्**=सलिलान्तिकम्, **उपसृत्य च**=प्राप्य, **एकदेशनिहितदण्डकमण्डलुः**=एकदेशे एकस्मिन् प्रदेशे निहितौ स्थापितौ दण्डकमण्डलू लगुडकुण्डिके येन सः तादृशः, **माम्**=वैशम्पायनम्, **स्वयम्**=आत्मना, **आदाय**=गृहीत्वा, **आमुक्तप्रयत्नम्**=आमुक्तः परित्यक्तः प्रयत्नः प्रयासः येन तादृशम्, **उन्नामितमुखम्**=उन्नामितम् ऊर्ध्वीकुतं मुखम् लपनं यस्य तम्, **अङगुल्या**=कराग्रेण, **कतिचित्**=कियन्तः, **सलिलबिन्दून्**=सलिलस्य जलस्य बिन्दवः सलिलबिन्दवः तान् जलकणान्, **अपाययत्**=पानमकारयत्। **अम्भःक्षोदकृतसेकम्**=अम्भसः सलिलस्य क्षोदैः कणैः कृतः विहितः सेकः सेचनं यस्य तं तादृशम्, **अतएव च उपजातनवीनप्राणम्**=उपजाताः उत्पन्नाः नवीनाः नवाः प्राणाः जीवनशक्तिः यस्य तं तादृशम्, **उपतटप्ररूढस्य**=तटस्य समीपम् उपतटं तीरसमीपं प्ररूढस्य प्रादुर्भूतस्य,

नवनलिनीपलाशस्य=नवः नवीनः यो नलिन्या कमलिन्याः पलाशः पत्रं तस्य, **जलशिशिरायाम्**=जलेन उदकेन शिशिरा शीतला तस्याम्, **छायायाम्**=अनातपे, **निधाय**=स्थापयित्वा, **यथासमुचितम्**=समुचितं अनतिक्रम्य यथायोग्यं, **स्नानविधिम्**=मज्जनविधानम्, **अकरोत्**=कृतवान्। **च**=क्रियासमुच्चयार्थमिदम्, **अभिषेकावसाने**= अभिषेकः स्नानं तस्य अवसाने अन्ते, **अनेकप्राणायामपूतः**=अनेके बहवः ये प्राणायामाः पूरककुम्भकरेचकाः तैः पूतः **मेध्यः** सन्, **पवित्राणि**=पूतानि, **अघमर्षणनि**=पापक्षयकारीणि मन्त्राणि 'ऋतं च सत्यं चेत्यादीनि'। **जपन्**=शनैः पठन् **उन्मुखः**=पूर्वाभिमुखः, **प्रत्यग्रभग्नैः**=प्रत्यग्रं नवीनं मग्नैः अवचितैः, **रक्तारविन्दैः**=अरुणकमलैः सह इति शेषः, **नलिनीपत्रपुटेन**=नलिनी कमलिनी तस्याः पत्रपुटं पर्णपुटकं तेन साधनभूतेन, **भगवते**=ऐश्वर्यशालिने, **सवित्रे**=सूर्याय, **अर्घ्यम्**=अर्घः पूजा तस्मै हितं जलम्, **दत्त्वा**=समर्प्य, **उदतिष्ठत्**=उत्थितोऽभूत्। **आगृहीतधौतधवलवल्कलः**=आगृहीतं परिहितं धौतं क्षालितं धवलं स्वच्छम् वल्कलं वृक्षत्वक् येन सः तथोक्तः, **अतएव च सज्योत्स्नः**=ज्योत्स्ना चन्द्रिका तया सह वर्तमानः, **सन्ध्यातपः**=सन्ध्याकालिकसूर्यप्रकाशः स इव, **करतलनिर्धूनन-विशद-सटः**=करतलाभ्यां पाणितलाभ्यां यत् निर्धूननम् आस्फालनं तेन विशदाः स्वच्छाः सटाः जटाः यस्य स तादृशः, **प्रत्यग्रस्नानार्द्रजटेन**=प्रत्यग्र तत्कालं यत् स्नानं अभिषेकः तेन, आर्द्राः क्लिन्नाः जटाः सटाः यस्य सः तेन, मुनिकुमार-कदम्बकविशेषणमिदम्, **सकलेन**=सम्पूर्णेन, **तेन**=पूर्वोक्तेन, **मुनिकुमारकदम्बकेन**= मुनीनां ऋषीणां कुमारः पुत्रः तेषां कदम्बकं तेन तपस्विबालकसमूहेन, **अनुगम्यमानः**= अनुव्रज्यमानः, **माम्**=वैशम्पायनम्, **गृहीत्वा**=आदाय, **शनैः शनैः**=मन्दं मन्दम्, **तपोवनाभिमुखम्**=निजाश्रमसम्मुखम्, **अगच्छत्**=अव्रजत्।

टिप्पणी - **उपसृत्य**-उप+सृ+क्त्वा-ल्यप्। **आदाय**-आ+दा+क्त्वा-ल्यप्। **क्षोद**-जलकण, **सेक**-खींचना। **प्राणायामपूतः**-कई प्राणायामों से पवित्र होकर बाह्यशुद्धि के लिए जलमृत्तिका तथा अन्तः शुद्धि के लिए प्राणायाम का विधान धर्मशास्त्रों में विहित है। **अघमर्षणानि**-पाप शान्ति के लिये जपा जाने वाला अघमर्षण सूक्त जो संध्याकर्म का प्रधान अङ्ग है। **निर्धूनन**-फटकारना, झटका देकर स्वच्छ करना। **सटाः**-जटाएँ। **कदम्बक**-समूह। **गृहीत्वा**-ग्रह्+क्त्वा।

अनतिदूरमिव गत्वा दिशि दिशि सदा सन्निहितकुसुमफलैस्तालतिलक-तमालहिन्तालबकुलबहुलैः, एलालताकुलितनारिकेलकलापैः, आलोललोध्रलवलीलवङ्गपल्लवैः, उल्लसच्चूतरेणुपटलैः, अलिकुलझंकारमुखर-

सहकारैः, उन्मदकोकिलकुलकलालापकोलाहलिभिः, उत्फुल्लकेतकीरजः-पुञ्जपिञ्जरैः, पूगीलतादोलाधिरूढवनदेवतैः, तारकावर्षमिवाधर्मविनाशपिशुनं कुसुमनिकर-मनिलचलितमनवरतमतिधवलमुत्सृजद्भिः, संसक्तपादपैः काननैरुपगूढम्, अचकितप्रचलितकृष्णासारशतशबलाभिः, उत्फुल्लकमलिनी-लोहिनीभिः, मारीचमायामृगावलूनरूढवीरुद्दलाभिः दाशरथिचापकोटिक्षत-कन्दगर्तविषमिततलाभिर्दण्डकारण्यस्थलीभिरुपशोभितप्रान्तम्....'

हिन्दी अनुवाद - थोड़ी ही दूर (आगे) बढ़कर मैंने अत्यन्त रमणीय तथा द्वितीय ब्रह्मलोक के समान (महर्षि जाबालि के) आश्रम को देखा-जो कि प्रत्येक दिशा में सदैव विद्यमान फलों और फूलों से युक्त-ताल, तिलक, तमाल, हिन्ताल एवं मौलसिरी वृक्षों के कारण बहुल (सघन)-इलायची की लताओं से परिव्याप्त नारियल के वृक्षसमूह वाले-चंचल लोध्र (दुपहरिया फूल), लवली तथा लवङ्ग के पल्लवों वाले उड़ते हुए आम्रवृक्ष के परागपुञ्ज से युक्त-मधुकरमण्डली की 'भनभनाहट' से शब्दायमान सहकारवृक्षों (सुरभित आमों) वाले मतवाले कोकिलों की टोली के मधुर शब्दों के कोलाहल से युक्त-पुष्पित मालतीलता की पुष्पवल्लरियों के परागपुञ्ज से पीतरक्त वर्ण वाले-पूगीलता(सुपारी की लता) रूपी हिंडोले पर आरूढ़ हुई वनदेवियों वाले-अधर्म के विनाश की सूचना देने वाले 'तारकावर्ष' (उल्कापात) की भाँति वायु द्वारा प्रेङ्खोलित अत्यन्त धवल पुष्पसमूह को प्रतिपल गिराने वाले तथा परस्पर सटे हुए वृक्षों वाले वनों से संकुल था, जो असंत्रस्त भाव से सञ्चरण करने वाले सैकड़ों 'कृष्णसार' (काले) मृगों के कारण नाना रंगों वाली-खिली हुई स्थलकमलिनियों (गुलाबों) के कारण लोहितवर्ण वाली-(रावण के मामा) मारीच रूपी मायामृग द्वारा खाये गये (तदनन्तर) गपछाए हुए लतापल्लवों वाली दशरथ पुत्र श्रीराम के धनुष की नोंक से उखाड़े गए कन्दमूलों गड्ढों से उच्चावच धरातल वाली दण्डकारण्य की स्थलभूमियों से सुशोभित पिछले भाग (पृष्ठभूमि) वाला था।

संस्कृतव्याख्या - **अनतिदूरम् इव**=किंचिद्द्वीयांसं मार्गं, **गत्वा**=व्रजित्वा, **दिशि दिशि**=प्रतिदिशम्, **सदासन्निहितकुसुमफलैः**=सदा सर्वदा संनिहितानि अवस्थितानि कुसुमानि प्रसूनानि रसोद्भावानि सस्यानि च येषु तैः तादृशैः, **तालतिलकतमाल-हिन्ताल-बकुल-बहुलैः**=तालाः तिलकाः तमालाः तापिच्छाः हिन्तालाः बकुलाश्च केसराश्च एतदाख्याः वृक्षाः बहुलाः अधिकाः येषु तैः तादृशैः, **एलालताकुलितनारिकेलकलापैः**=एलालताभिः चन्द्रबालावल्लीभिः आकुलितः

व्याप्तः नारिकेलकलापः लाङ्गलीतरुसमूहः येषु तैः तादृशैः, **आलोललोध्रलवलीलवङ्गपल्लवैः**=आ समन्तात् लोलाः वायुना चञ्चलाः लोध्राणां गालावानां लवलीनां लवङ्गानां च पल्लवाः किसलयानि येषु तेषु तादृशेषु, **उल्लसच्चूतरेणुपटलैः**=उल्लसन्ति पवनवेगेन स्फुरन्ति चूतानाम् आम्रमञ्जरीणां रेणुपटलानि परागसमूहाः येषु तैः तादृशैः, **अलिकुलझङ्कारमुखरसहकारैः**=अलिकुलानां मधुकरदलानां झङ्कारेण गुञ्जितेन मुखराः वाचालाः सहकाराः रसालाः येषु तैः तादृशैः, **उन्मदकोकिलकुलकलापकोलाहलिभिः**=उन्मदानि मदमत्तानि यानि कोकिलानां पिकानां कुलानि समूहाः तेषां ये कलालापाः अव्यक्तमधुरकूजितानि तैः कोलाहलिभिः मुखरैः, **उत्फुल्लकेतकीरजःपुञ्जपिंजरैः**=उत्फुल्लाः प्रस्फुटिताः याः केतक्यः मालत्यः तासां रजःपुञ्जेन परागपटलेन, **पिंजरैः**=पीतवर्णैः, **पूगीलतादोलाधिरूढवनदेवतैः**=पूगीलताः क्रमुकवल्लयः एव दोलाः अधिरोहिण्यः ताः अधिरूढाः आश्रिताः वनदेवताः विपिनाधिष्ठातृदेव्यः येषु तैः तादृशैः, **अधर्मविनाशपिशुनम्**=अधर्मः पापं तस्य विनाशः ध्वंसः तस्य पिशुनम् सूचकम्, **अनिलचलितम्**=अनिलेन वायुना चलितम् आन्दोलितम्, **अतिधवलम्**=अत्यन्तशुभ्रम्, **कुसुमनिकरम्**=पुष्पसमूहम्, **तारकावर्षम् इव**=उल्कापातम् इव, **अनवरतम्**=सततम्, **उत्सृजद्भिः**,=परित्यजद्भिः, **संसक्त-पादपैः**=संश्लिष्टवृक्षैः, **काननैः**=विपिनैः, **उपगूढम्**=आश्लिष्टम्, **अचकितप्रचलितकृष्णसारशतशबलाभिः**=अचकिताः अभीताः प्रचलिताः सञ्चरन्त, ये कृष्णसाराः एतदाख्याः चित्रमृगाः तेषां शतं समूहः तेन शबलाभि विचित्राभिः, **उत्फुल्लकमलिनीलोहिनीभिः**=उत्फुल्लाः प्रस्फुटिताः याः कमलिन्यः स्थलपद्मिन्यः ताभिः हेतुभूताभिः लोहिनीभिः रक्तवर्णाभिः, **मारीचमायामृगावलूनरूढवीरुद्दलाभिः**=मारीचः एतन्नामासुरः स एव मायामृगः कपटहरिणः तेन अवलूनानि-छिन्नानि पश्चात् रूढानि समुपजातानि वीरुधां लतानां दलानि पत्राणि यासु ताभिः तादृशीभिः, **दाशरथिचापकोटिक्षतकन्दगर्तविषमिततलाभिः**=दाशरथी रामलक्ष्मणौ तयोः चापकोट्या कार्मुकाग्रेण क्षतानि उत्खातानि यानि कन्दानि वृक्षमूलानि तेषां गर्तैः भूविवरैः विषमितम् उच्चावचं तलं भूतलं यासां ताभिः तादृशीभिः, **दण्डकारण्यस्थलीभिः**=दण्डकारण्यस्य दण्डसंज्ञकवनस्य स्थलीभिः भूमिभिः, **उपशोभितप्रान्तम्**=उपशोभितः शोभां लम्भितः प्रान्तः पश्चात् प्रदेशः यस्य सः तं तादृशम्।

टिप्पणी – **आलोल**–चञ्चल, वायु के चलने से काँपते हुए। **मुखर**–गुञ्जित; मुखं मुखव्यापारं कथनं राति–मुख+रा+क=मुखर। **उत्सृजद्भिः**–उत्+सृज्+शतृ; तृ० ए० व०। उप+गृह्+क्त–उपगूढम्। **अचकित**–निर्भीक शत–समूह, शत व सहस्त्र

शब्द निश्चित् संख्या का बोध कराते ही हैं साथ ही ये बहुत्व के द्योतक हैं। यहाँ शत शब्द बहुत्व के अर्थ में ही प्रयुक्त हुआ है। **मारीचमायामृगावलून**-ताड़का राक्षसी के पुत्र व सुबाहु के भाई मारीच ने रावण के कहने पर कपट का वेश धारण कर जिन लताओं के पत्तों को तोड़ा था, अव+लू+क्त-अवलून। **'पूगीलता......' में अतिशयोक्ति अलङ्कार है। 'तारकावर्षमिव' में पूर्णोपमालङ्कार है।**

.......आगृहीतसमित्कुशकुसुमसमृद्भिः अध्ययनमुखरशिष्यानुगतैः सर्वतः प्रविशद्भिर्मुनिभिरशून्योपकण्ठम्, उत्कण्ठितशिखण्डिमण्डलश्रूयमाणजल-कलशपूरध्वानम्, अनवरताज्याहुतिप्रीतैश्चित्रभानुभिः, सशरीरमेव मुनिजनममर-लोकंनिनीषुभिरुद्धूयमानधूमलेखाच्छलेनाबध्यमानस्वर्गगमनसोपानसेतुमिवोप-लक्ष्यमाणम्, आसन्नवर्तिनीभिः तपोवनसंपर्कादिवापगतकालुष्याभिः तरङ्ग-परम्परासंक्रान्तरविबिम्बपङ्क्तिभिस्तापसदर्शनागतसप्तर्षिमालाविगाह्यमाना-भिरिव, अतिविकचकुमुदवनमृषिजनमुपासितुमवतीर्णं ग्रहगणमिव निशा-सूद्वहन्तीभिर्दीर्घिकाभिः परिवृतम्, अनिलावनमितशिखराभिः प्रणम्यमानमिव वनलताभिः, अनवरतमुक्तकुसुमैरभ्यर्च्यमानमिव पादपैः, आबद्धपल्लवा-ञ्जलिभिरुपास्यमानमिव विटपैः;....।

हिन्दी अनुवाद - जो समिधाओं (यज्ञोपयोगी इन्धनों) कृशों, पुष्पों एवं मृत्तिकाओं को लिए हुये-वेदपरायण के कारण वाचाल शिष्यों से अनुगत तथा चारों ओर से प्रवेश करते हुए मुनियों द्वारा अशून्य (अर्थात् भरेपूरे) उपकण्ठ (पड़ोस या सामीप्य) वाला था, जो (मेघध्वनि की आशङ्कावश) उत्कण्ठित मयूरमण्डल द्वारा सुनी जाती हुई जलकलश भरने की (भुक् भुक् भुक्) ध्वनि वाला था, जो निरन्तर प्रदान की गई घृताहुतियों से सन्तुष्ट (अतएव) मुनिजनों को सशरीर देवलोक ले जाने के अभिलाषी यज्ञाग्नियों द्वारा लहराती हुई ऊर्ध्वगामिनी धूम पंक्तियों के बहाने मानो स्वर्गपथ पर पहुँचने के लिए निर्मित किए गए सोपानसेतुओं (सीढियों की श्रृंखलाओं) से युक्त प्रतीत होता था, जो-समीपवर्तिनी-तपस्विजनों के (स्नानार्थ) सम्पर्कवश मालिन्यविहीन प्रतीत होने वाली-तरङ्गवीथियों में प्रतिबिम्बित सूर्य की परछाइयों के समूहों वाली अतएव तापसजनों के दर्शनार्थ आये हुये सप्तर्षि-समूह से विलोड्यमान प्रतीत होती हुई तथा रात्रिवेलाओं में ऋषिजनों की समर्चना के लिए (पृथ्वी पर) उतरे हुए नक्षत्रमण्डल की भाँति पूर्णतः प्रफुल्लित कुमुदवन को धारण करती हुई दीर्घिकाओं (बावलियों) से घिरा हुआ था, जो वायु द्वारा अवनमित किए गये शिखरों वाली वनलताओं से प्रणाम

किया जाता हुआ प्रतीत होता था, जो प्रतिपल फूल झरने वाले वृक्षों द्वारा समर्पित किया जाता हुआ प्रतीत होता था, जो पल्लव रूपी प्रणामाञ्जलि बाँधे हुये वृक्षों द्वारा उपासना किया सा प्रतीत होता था।

संस्कृतव्याख्या – **आगृहीतसमित्कुशकुसुमसमृद्भिः**=आगृहीता सम्यगात्ताः समिधः काष्ठानि कुशाः दर्भाः कुसुमानि मृत् मृत्तिका च यैः तैः तादृशैः, **अध्ययन-मुखरशिष्यानुगतैः**=अध्ययनेन वेदादिपाठेन मुखराः वाचालाः ये शिष्याः अन्तेवासिनः तैः अनुगताः तैः तथाभूतैः, **सर्वतः**=सर्वाभ्यः दिग्भ्यः, **प्रविशद्भिः**=प्रवेशं कुर्वद्भिः, **मुनिभिः**=तपस्विभिः, **अशून्योपकंठम्**=अशून्यः परिपूर्णः उत्कण्ठः निकटदेशो यस्य तम् तादृशम्, **उत्कंठितशिखण्डिमंडलश्रूयमाणजलकलशपूरणध्वानम्**=उत्कण्ठितैः उद्ग्रीवैः शिखण्डिनां मयूराणां मण्डलैः कदम्बकैः श्रूयमाणः आकर्ण्यमाणः जलेन सलिलेन कलशपूर्णस्य घटपूर्णस्य ध्वानः शब्दः यस्मिन् तं तादृशम्, **अनवरताज्याहुतिप्रीतैः**=अनवरतं सततं या आज्याहुतिः घृतहोमः तेन प्रीतैः प्रसन्नैः, **चित्रभानुभिः**=अग्निभिः गार्हपत्याहवनीयदक्षिणनामकैः, **मूनिजनम्**=ऋषिगणम्, **सशरीरमेव**=सदेहम् एव, **अमरलोकम्**=देवलोकम्, **निनीषुभिः**=नेतुमिच्छामिः, **उद्धूयमानधूमलेखाच्छलेन**=उद्धूयमाना उत्कम्पमाना या धूमलेखा वह्निकेतनश्रेणी, अविच्छन्ना धूमपङ्क्तिः तस्याः छलेन कपटेन, **आबध्यमानस्वर्ग-मार्गगमनसोपानसेतुम् इव**=आबध्यमानः विरच्यमानः यः स्वर्गमार्गे अमरलोकपथे गमनाय सोपानसेतुः आरोहणालिः तम् इव, **उपलक्ष्यमाणम्**=दृश्यमानम् अतः परं तृतीयान्तानि पदानि दीर्घिकाविशेषणानि खलु ज्ञेयानि। **आसन्नवर्तिनीभिः**=आसन्नं समीपं वर्तन्ते इति तच्छीलाः ताभिः समीपस्थायिनीभिः, **तपोवनसम्पर्काद् इव**=धर्मारण्यसंसर्गाद्इव, **अपगतकालुष्याभिः**=अपगतं दूरीभूतं कालुष्यंमालिन्यं यासां ताभिः **तरङ्गपरम्परासंक्रान्तरविबिम्बपङ्क्तिभिः**=तरङ्गाणां कल्लोलानां परम्परासु पंङ्क्तिषु संक्रान्ता प्रतिफलिताः रवेः दिनकरस्य बिम्बपङ्क्तयः बिम्बराजयः यासु ताभिः तादृशीभिः अतएव, **तापसदर्शनागतसप्तर्षिमालाविगाह्यमानाभिः इव**=तापसानां 'जाबाल्यादितपस्विनां दर्शनाय साक्षात्काराय आगता प्राप्ता या सप्तर्षिमाला मारीच्यादिचित्रशिखण्डिपङ्क्तिः तया विगाह्यमानाभिः विलोड्यमानाभिः इव, **निशासु**=क्षपासु, **अतिविकचकुमुदवनम्**=अतिविकचं बहुविकसितं यद् कुमुदवनं कैरवकाननं तत्, **ऋषिजनम्**=तपस्विगणम्, **उपासितुम्**=सेवितुम्, **अवतीर्णम्**=उपगतम्, **ग्रहगणम् इव**=भौमादिमण्डलम् इव, **उद्वहन्तीभिः**= धारयन्तीभिः, **दीर्घिकाभिः**=वापीभिः, **परिवृतम्**=परिवेष्टितम्, **अनिलावनमित-शिखराभिः**=

अनिलेन पवनेन अवनमितानि नम्रीकृतानि शिखराणि अग्रभागाः यासां ताभिः, **वनलताभिः**=विपिनवल्लरीभिः, **प्रणम्यमानमिव**=नमस्क्रियमाणम् इव, **अनवरत-मुक्तकुसुमैः**=अनवरतं निरन्तरं मुक्तानि त्यक्तानि कुसुमानि प्रसूनानि यैः तैः तादृशैः, **पादपैः**=वृक्षैः, **अर्च्यमानमिव**= पूज्यमानम् इव, **आबद्धपल्ल-वाञ्जलिभिः**= आबद्धाः निर्मिताः पल्लवाः किसलयानि एव अञ्जलयः यैः तैः तादृशैः, **विटपैः**= स्कन्धैः, **उपास्यमानम् इव**=सेव्यमानमिव।

टिप्पणी - **आगृहीत**-आ+ग्रह्+क्त। **शिष्य**-शास्+क्यप्। **उपकण्ठ**-पास का प्रदेश। **श्रूयमाण**-श्रु+यक्+शानच्। **चित्रभानुः**-अग्नि। (चित्राःकर्बुराः भानवः शिखाः यस्य सः चित्रभानुः)। **निनीषुभिः**-नी+सन्+उ; तृ० ब० व०। **ग्रहगण**-ग्रहसमूह 'अर्कानयो ग्रहाः' इत्यमरः। ज्योतिर्विज्ञान के आधार पर सूर्यचन्द्र आदि ग्रह हैं, किन्तु वर्तमान भूगोलवेत्ता सूर्य को केन्द्र मानकर उसके चारों ओर घूमने वाले मङ्गल आदि को ग्रह तथा ग्रहों का चक्कर लगाने वाले चन्द्र को उपग्रह मानते हैं। यहाँ बाण की मान्यता पुरातन ही है। यहाँ ग्रहगण से तात्पर्य सामान्यतः नक्षत्रमण्डल से ही है। '**तपोधनसम्पर्कादिव**' में हेतूत्प्रेक्षालङ्कार है। '**विगाह्यमानाभिः**-में क्रियोत्प्रेक्षा, 'ग्रहगणमिव' में जात्युत्प्रेक्षा, प्रणम्यमानमिव, अर्च्यमानमिव तथा उपास्यमानमिव में क्रियोत्प्रेक्षालङ्कार है।

उटजाजिरप्रकीर्णशुष्यच्छ्यामाकम्, उपसंगृहीतामलकलवलीकर्कन्धूकद-लीलकुचचूतपनसतालीफलम्, अध्ययनमुखरवटुजनम्, अनवरतश्रवण-गृहीतवषट्कारवाचालशुककुलम्, अनेकसारिकोद्घुष्यमाणसुब्रह्मण्यम्, अरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिण्डम्, आसन्नवापीकलहंसपोत-भुज्यमाननीवारबलिम्, एणीजिह्वापल्लवोपलिह्यमानमुनिबालकम्, अग्निकार्यार्ध-दग्धसिमसिमायमानसमित्कुशकुसुमम्, उपलभग्ननारिकेलरसस्निग्धशिलातलम्, अचिरक्षुण्णवल्कलरसपाटलभूतलम्, रक्तचन्दनोपलिप्तादित्यमण्डलकनिहित-करवीरकुसुमम्, इतस्ततो विक्षिप्तभस्मलेखालङ्कृतमुनिजनभोजनभूमि-भागम्.....।

हिन्दी अनुवाद - जो पर्णशालाओं के प्राङ्गणों में फैलाए गये सूखते हुए श्यामाकधान्यों (साँवा) से युक्त था, जो एकत्र किये गये (बघारे गये) आम्रलक (आँवला) लवली, कर्कन्धू (बदरीफल या बेर), केला, लकुच, आम, कटहल तथा तालफलों से युक्त था, जो पेदपाठ के कारण वाचाल बटुजनों (ब्रह्मचारियों) से संकुल था, जो निरन्तर श्रवणमात्र से शिक्षित 'वषट्कार' के कारण वाचालभूत

शुकसमूह वाला था, जो असंख्य सारिकाओं द्वारा उच्चस्वर से पढ़े जाते हुए वेदमंत्र वाला था, जो बनैले कुक्कुटों (वनमुर्गों) द्वारा खाये जाते हुये देवयज्ञों के बलिपिण्डों (भक्ष्यसामग्री) वाला था, जो निकटवर्तिनी बावड़ी के कलहंस-शिशुओं द्वारा भक्षित की जाती हुई नीवार (वन्यधान्य) की बलि वाला था, जो हरिणियों के रसना (जीभ) रूपी पल्लवों से चाटे जाते हुए मुनिबालकों वाला था, जो अग्निकार्यों (यज्ञों) में अधजले अतएव, 'सिमसिम' शब्द उत्पन्न करने वाले, कुशों, समिधाओं तथा पुष्पों वाला था, जो पत्थरों पर द्वैधीकृत (तोड़े गये) नारिकेल फल के रस से चिकने शिलातल वाला था, जो तत्काल (वृक्षों से) निकाले गये वल्कलों के रस से श्वेतरक्तभूतल वाला था, जो लाल चन्दन से लिप्त करके (भूतल पर आलिखित) सूर्यमण्डल पर चढ़ाये गये करवीर पुष्पों वाला था, जो इधर-उधर खींची गयी भस्मरेखाओं से अलंकृत मुनिजनों के रसोई घर वाला था।

संस्कृतव्याख्या – **उटजाजिरप्रकीर्णशुष्यच्छ्यामाकम्**=उटजानां पर्णशालानाम् अजिरेषु प्राङ्गणेषु प्रसारिताः अतएव शुष्कतां शोषं प्राप्नुवन्तः श्यामाकाः धान्यविशेषाः यस्मिन् स तादृशम्, **उपसंगृहीतामलकलवलीकर्कन्धूकदली-लकुचचूतपनस-तालीफलम्**=उपसंगृहीतानि एकत्रीकृतानि आमलकं धात्री लवली लताविशेषः कर्कन्धूः बदरी कदली रम्भा लकुचः डहुः चूतः आम्रः पनसं कण्ट कीताली तृणरा ाः एतानि फलानि यत्र स तं तादृशं तम्, **अध्ययनमुखरबटुजनम्** =अध्ययनेन वेदादिपाठेन मुखराः शब्दायमानाः बटुजनाः ब्रह्मचारिवर्गाः यत्र स तं तादृशम्, **अनवरतश्रवणगृहीतवषट्कारवाचालशुककुलम्**=अनवरतं सततं श्रवणेन आकर्णनेन गृहीतः शिक्षितः यः वषट्कारः देवेभ्यो हविर्दाने उच्चारितः शब्दः 'इन्द्राय वषट्' इत्यादिरूपः तेन वाचालानि शब्दायमानानि शुककुलानि कीरसमूहाः यत्र स तादृशम्, **अनेकसारिकोद्घुष्यमाणसुब्रह्मण्यम्**=अनेकाभिः बह्वीभिः सारिकाभिः पीतपदाभिः उद्घुष्यमाणम्, उच्चैः अभ्यस्यमानं सुब्रह्मण्यं वेदः यत्र स तं तादृशम्, **अरण्यकुक्कुटोपभुज्यमानवैश्वदेवबलिपिण्डम्**=अरण्यकुक्कुटैः काननताम्रचूडैः उपभुज्यमानाः भक्ष्यमाणाः वैश्वदेवस्य देवयज्ञस्य बलिपिण्डाः इन्तकाराः यत्र तम्, **आसन्नवापीकलहंसपोतभुज्यमाननीवारबलिम्**=आसन्ना समीपस्था या वापी दीर्घिकाः तस्याः ये कलहंसपोताः कादम्बशावकाः तैः भुज्यमानाः भक्ष्यमाणाः नीवारबलयः मुन्यन्नोपहाराः यत्र स तं तादृशम्, **एणीजिह्वापल्लवोपलिह्यमानमुनि-बालकम्**=एणीभिः हरिणीभिः कर्तृभूताभिः जिह्वाः रसनाः एव पल्लवाः किसलयानि तैः करणभूतैः उपलिह्यमानाः आस्वाद्यमानाः मुनिबालकाः ऋषिशिशवः यत्र स तं

तादृशम्, **अग्निकार्यार्धदग्धसिमसिमायमानसमित्कुशकुसुमम्**=अग्निकार्येषु यज्ञेषु अर्धदग्धानि अर्धभस्मितानि अतएव सिमसिमायमानानि 'सिम् सिम्' इति शब्दं कुर्वाणानि समिधः काष्ठानि कुशाः दर्भाः कुसुमानि प्रसूनानि च यत्र तं तादृशम्, **उपलभग्ननारिकेलरसस्निग्धशिलातलम्**=उपलैः प्रस्तरैः भग्नानि त्रुटुतानि यानि नारिकेलानि श्रीफलानि तेषां रसैः द्रवैः स्निग्धानि चिक्कणानि शिलातलानि, प्रस्तराः यत्र स तं तादृशम्; **अचिरक्षुण्णवल्कलरसपाटलभूतलम्**=अचिरं तत्कालं क्षुण्णानि उत्पाटितानि यानि वल्कलानि वृक्षत्वच तेषां, रसैः निर्यासैः पाटलं श्वेतरक्तं भूतलं पृथ्वीतलं यत्र स तं तादृशम्, **रक्तचन्दनोपलिप्तादित्यमण्डलकनिहितकरवीर-कुसुमम्**=रक्तचन्दनेन पत्राङ्गेन उपलिप्तम् आलिखितं यद् आदित्यमण्डलम् एव आदित्यमण्डलकं सूर्यबिम्बं तस्मिन् निहितानि स्थापितानि करवीरकुसुमानि हयमारप्रसूनानि यत्र स तं तादृशम्, **इतस्ततः**=परितः, **विक्षिप्तभस्मलेखालङ्कृत-मुनिजनभोजनभूमिभागम्**=विक्षिप्ताभिः प्रसृताभिः भस्मलेखाभिः भूतिपङ्क्तिभिः अलङ्कृताः भूषिताः मुनिजनानां ऋषिगणानां भोजनभूमिभागा भक्षणस्थलदेशाः यत्र स तं तादृशम्।

टिप्पणी – **उजट**=पर्णशालायें। **अजिर**=प्राङ्गण। **श्यामाक**=मुनिधान्यविशेष। **लकुच**=बड़हर का फल। **ब्रह्मण्यं**–ब्रह्मणे हितं ब्रह्मण्यं शोभनं च तद् ब्रह्मण्यं, सुब्रह्मण्यम् सुब्रह्मन्+यत्। ब्रह्मज्ञान के लिए हितकारी वेद, वैदिक वाङ्मय ब्रह्मसम्बन्धी पवित्र चर्चा। **उपभुज्यमान**–उप+भुज्+यक्+शानच्। **वैश्वदेव**–देवयज्ञ, पञ्चमहायज्ञों में देवयज्ञ प्रधान यज्ञ है, इसमें देवताओं के निमित्त हवन किया जाता है। सभी देवताओं के कारण इनका नाम वैश्वदेव है। पाँच महायज्ञ इसप्रकार हैं– १. देवयज्ञ-होम २. ऋषियज्ञ–वेदपाठ ३. पितृयज्ञ–तर्पण–श्राद्ध ४. मनुष्ययज्ञ–अतिथिसेवा ५. भूतयज्ञ–बलि। **एणी**–हिरनी। **क्षुण्ण**–उपाडा गया, उखाड़ा गया, उत्पाटित। **भोजन**–भुज्+ल्युट्।

परिचितशाखामृगकराकृष्टयष्टिनिष्कास्यमानप्रवेश्यमानजरदन्धतापसम्, इभकलभार्धोपभुक्तपतितैः सरस्वतीभुजलताविगलितैः शङ्खवलयैरिव मृणा-लशकलैः कल्माषितम्, ऋषिजनार्थमेणकैर्विषाणशिखरोत्खन्यमानविविधकन्द मूलम्, अम्बुपूर्णपुष्करपुटैर्वनकरिभिरापूर्यमाणविटपालवालकम्, ऋषिकुमार-काकृष्यमाणवनवाहदंष्ट्रान्तराललग्नशालूकम्, उपजातपरिचयैः कलापिभिः पक्षपुटपवनसंधुक्ष्यमाणमुनिहोमहुताशनम्, आरब्धामृतचरुचारुगन्धम्, अर्धपक्वपरोडाशपरिमलामोदितम, अविच्छिन्नाज्यधाराहुतिहुतभुगहुङ्कारमुखरितम्।

हिन्दी अनुवाद - जो परिचित वानरों के हाथों द्वारा आकृष्ट (ले जाई गई) छड़ियों के सहारे बाहर ले जाये जाते हुए तथा भीतर प्रवेश कराए जाते हुए वृद्ध अन्धे तपस्विजनों वाला था, जो हस्तिशावकों द्वारा अर्धचर्चित (दशा में) नीचे गिरे हुए अतएव देवी सरस्वती की बाहुलताओं से परिभ्रष्ट शंखनिर्मित करकङ्कण प्रतीत होने वाले कमलनाल के टुकड़ों से चित्रित था, जो ऋषिजनों के (भक्षण) निमित्त वनहरिणों द्वारा (अपने) श्रृङ्गाग्रभागों से उखाड़े जाते हुए नाना प्रकार के कन्दमूलों वाला था, जो जल से भरे हुए 'पुष्करपुटों' (शुण्डाओं) वाले वनगजों द्वारा भरे जाते हुए वृक्षों के थाल्हों वाला था, जो मुनिशिशुओं द्वारा खींचे जाते हुए वनशूकरों की दाढ़ों में फँसे हुए शालूकों (कमल की जड़ों) वाला था, जो परिचय उत्पन्न हो जाने वाले (अर्थात् चिरपरिचित) मयूरों द्वारा (अपने) दोनों पंखों की हवा से धौंकी जाती हुई मुनियों की यज्ञाग्नि वाला था, जो तैयार किये गये 'अमृतचरु' (अमृत=घी या दूध में पकाया गया चावल ही अमृतचरु है) की मनोहर गन्धवाला था, जो अधपके पुरोडाश की पवित्र परिमल आमोदित (सुगन्धित अथवा हर्षजननशील) था, जो अटूट घृतधारा के हवन से (उत्पन्न) अग्निहुङ्कारों से शब्दायमान था।

संस्कृतव्याख्या - **परिचितशाखामृगकराकृष्टयष्टिनिष्कास्यमानप्रवेश्यमानजरदन्धतापसम्**=परिचितैः पूर्वत एव समुत्पन्नपरिचयैः शाखामृगैः कपिभिः करेण आकृष्टा यष्टिः कराकृष्टयष्टिः तया हस्तालम्बितदण्डेन निष्कास्यमानाः निःसार्यमाणाः प्रवेश्यमाना अन्तः नीयमानाः जरन्तः वृद्धाः ते च अन्धाः नेत्रहीनाः तापसाः तपस्विनः यस्मिन् स तं तादृशम्, **इभकलभार्धोपभुक्तपतितैः**=इभानां गजानां कलभाः शावकाः तैः अर्धोपभुक्तैः अर्धचर्वितैः पश्चाच्च पतितैः च्युतैः, **सरस्वतीभुजलताविगलितैः**=सरस्वत्याः भारत्याः, भुजै एव लते भुजलते बाहुवल्ल्यो, ताभ्यां विगलितैः स्रस्तैः, **शङ्खवलयैः इव**=कम्बुकटकैः इव, **मृणालशकलैः**=बिसखण्डैः, **कल्माषितम्**=कर्बुरितम्, **ऋषिजनार्थम्**=तपस्विगणभक्षणार्थम्, **एणकैः**=हरिणैः कर्तृभिः, **विषाणशिखरोत्खन्यमानविविधकन्दमूलम्**=विषाणशिखरै श्रृङ्गाग्रैः करणभूतैः उत्खन्यमानानि उत्पाट्यमानानि विविधानि अनेक-विधानि कन्दाः शालूकादीनि मूलानि मूलकप्रभृतीति यत्र स तं तादृशम्, **अम्बुपूर्णपुष्करपुटैः**=अम्बुभिः सलिलैः पूर्णानि संभृतानि पुष्करपुटानि शुण्डाग्रणि येषां तैः तादृशैः, **वनकरिभिः**=विपिनगजैः, **आपूर्यमाणविटपालवालकम्**=आपूर्यमाणानि भ्रियमाणानि विटपानां स्कन्धानाम्, आलवालकानि आवापस्थानानि तत्र स तं तादृशम्, **ऋषिकुमरकापकृष्यमाणवन-**

वराहदंष्ट्रान्तराललग्नशालूकम्=ऋषिकुमारकैः तपस्विबालकैः आकृष्यमाणानि निःसार्यमाणानि वनवराहाणां काननसूकराणां दंष्ट्रान्तराले दशनमध्ये लग्नानि संसक्तानि शालूकानि नलिनकन्दाः यत्र स तं तादृशम्, **उपजातपरिचयैः**=उपजातः उत्पन्नः परिचयः संस्तवः आत्मीयता येषां तैः तादृशैः, **कलापिभिः**=मयूरैः, **पक्षपुटपवन-संधुक्ष्यमाणमुनिहोमहुताशनम्**=पक्षपुटानां छदपुटानां पवनेन वातेन संधुक्ष्यमाणाः प्रज्वाल्यमानाः मुनीनाम् ऋषीणां होमहुताशनाः यज्ञाग्नयः यत्र स तं तादृशम्, **आरब्धामृतचरुचारुगन्धम्**=आरब्धः प्रवर्तितः अमृतचरोः सघृतयवौदनस्य चारुः मनोहरः गन्धः आमोदः यत्र स तं तादृशम्, **अर्धपक्वपुरोडाशपरिमलामोदितम्**= अर्धपक्वस्य अर्धविक्लित्तिमापन्नस्य पुरोडाशस्य हवनीयद्रव्यस्य परिमलेन गन्धेन आमोदितं सुरभितम्, **अविच्छिन्नाज्यधाराहुतिहुतभुगहुङ्कारमुखरितम्**=अविच्छिन्ना अत्रुटिता या आज्यधारा घृतप्रपातः तस्याः आहुतिः होमः तया यः हुतभुजः अग्नेः हुङ्कारः 'हुम्' ध्वनिः तेन मुखरितं वाचालितम्।

टिप्पणी – **शाखामृग**–बन्दर। **कल्माषित**–रंगबिरंगा, चितकबराः कल्माषः संजातोऽस्येति कल्माषितम् क़ल्माष–कई रंग जो अलग–अलग दिखाई दे रहे हों, कल्माष+इतच्–कल्माषित। **उत्खन्यमान**–उत्+खन+यक्+शानच्। **पुष्करपुट**–हाथी की सूंड का अग्रभाग 'शुण्डाग्रं त्वस्य पुष्करम्', इत्यमरः। **शालूक**–कमलिनी की जड़ को कहते हैं। **अमृतचरु**–होमद्रव्यः; जिसे घी, जौ चावल आदि से पकाया जाता है, 'हव्यपाके चरुः पुमान्' इत्यमरः (देवता लोग अग्नि हव्यवाहन) के द्वारा इस चरु का भोजन करते हैं यही उनके लिए अमृत है; अतः चरु को ही अमृतचरु कहते हैं। **पुरोडाश**–हवि, हवनीय द्रव्यः; 'पुरोडाशो हविभेदे' विश्वकोष। हुतभुक्–अग्नि (हुतं भुङ्क्ते इति हुतभुक्) **शङ्खवलयैरिव** में जात्युत्प्रेक्षालङ्कार है।

.....उपचर्यमाणातिथिवर्गम्, पूज्यमानपितृदैवतम्, अर्च्यमानहरिहरपिताम-हम्, उद्दिश्यमानश्राद्धकल्पम्, व्याख्यायमानयज्ञविद्यम्, आलोच्यमानधर्म-शास्त्रम्, वाच्यमानविविधपुस्तकम्, विचार्यमाणसकलशास्त्रार्थम्, आरभ्य-माणपर्णशालम्, उपलिप्यमानाजिरम्, उपमृज्यमानोटजाभ्यन्तरम्, आबध्यमान-ध्यानम्, साध्यमानमन्त्रम्, अभ्यस्यमानयोगम्, उपह्रियमाणवनदेवताबलिम्, निर्वर्त्यमानमौञ्जमेखलम्, प्रक्षाल्यमानवल्कलम्, उपसंगृह्यमाणसमिधम्, उपसंस्क्रियमाणकृष्णाजिनम्, गृह्यमाणगवेधुकम्, शोष्यमाणपुष्करबीजम्, ग्रथ्यमानाक्षमालम्, गृह्यमाणत्रिपुण्ड्रकम्, न्यस्यमानवेत्रदण्डम्, सत्क्रियमाण-परिव्राजकम्, आपूर्यमाणकमण्डलुम्.....।

हिन्दी अनुवाद - जो सत्कार किये जाते हुए अतिथिगणों वाला था, जो पूजित किये जाते हुए पितृगणों एवं देवताओं वाला था, जो अर्चना किये जाते हुए विष्णु-महेश एवं ब्रह्मा वाला था, जो पढ़ाये जाते हुए (महर्षि गोभिल आदि द्वारा प्रणीत) श्राद्धकल्प वाला था, जो व्याख्या की जाती हुई यज्ञविद्या वाला था, जो आलोचित किये जाते हुए धर्मशास्त्रों वाला था, जो पढ़ी जाती हुई अनेक प्रकार की पुस्तकों वाला था, जो युक्तियों के साथ स्थापित किये जाते हुए समस्त शास्त्रों वाला था, जो नये बनाये जाते हुए पर्णकुटीरों वाला था, जो (गोमयादि से) लीपे जाते हुए आँगनों वाला था, जो झाड़ू लगाये जाते हुए पर्णशालाओं के भीतरी भागों वाला था, जो बाँधे जाते हुए (लगाए जाते हुए) ध्यानों (प्रत्ययैकतानता) वाला था, जो (होमादि द्वारा) सिद्ध किये जाते हुए मंत्रों वाला था, जो अभ्यास किये जाते हुए (चित्तवृत्तिनिरोधात्मक) योगों वाला था, जो वनदेवियों के लिए भेंट चढ़ाये जाते हुए बलिपदार्थों वाला था, जो बटी जाती हुई मौञ्जी मेखलाओं वाला था, जो धोये (पछारे) जाते हुए वल्कल वस्त्रों वाला था, जो एकत्र किये जाते हुए यज्ञ के ईंधनों वाला था, जो शुद्ध किये जाते हुए काले मृगचर्मों वाला था, जो ग्रहण किये जाते हुए 'गवेधुका' (धान्यविशेष) वाला था, जो सुखाये जाते हुए कमलगट्टों वाला था, जो गूँथी जाती हई जपमालाओं वाला था, जो धारण किये जाते हुए त्रिपुण्ड्रकों वाला था, जो रखे जाते हुए वेत्रदण्डों वाला था, जहाँ परिव्राजकों का सत्कार किया जा रहा था, जो जल से भरे जाते हुए कमण्डलुओं वाला था।

संस्कृतव्याख्या - **उपचर्यमाणातिथिवर्गम्**=उपचर्यमाणःसत्कारं प्राप्यमाणः अतिथिवर्गः अभ्यागतसमूहः यत्र तं तादृशम्, **पूज्यमानपितृदैवतम्** =पूज्यमानानि अर्च्यमानानि पितरः पितृपितामहादयः दैवतानि देवा च यत्र तम् अथवा पूज्यमानानि पितृदैवतानि पितरः यत्र तं तादृशम्, **अर्च्यमानहरिहरपितामहम्**=अर्च्यमानाः पूज्यमानाः हरिः विष्णु हरः महेश्वरः पितामहः प्रजापतिश्च एते यत्र तं तादृशम्, **उद्दिशमयमानश्राद्धकल्पम्**=उद्दिश्यमानः उपदिश्यमानः श्राद्धकल्पः आश्वलायनादि -रचितः श्राद्धविधिः यत्र तं तादृशम्, **व्याख्यायमानयज्ञविद्यम्**=व्यख्यायमाना स्पष्टी-क्रियमाणा यज्ञविद्या यज्ञविज्ञानं यत्र तं तादृशम्, **आलोच्यमानधर्मशास्त्रम्**= आलोच्यमानानि धर्मशास्त्राणि मन्वादिप्रणीतधर्मशास्त्राणि यत्र तं तादृशम्, **वाच्यमानविविधपुस्तकम्**= वाच्यमानानि पठ्यमानानि विविधानि अनेकप्रकाराणि पुस्तकानि शास्त्राणि यत्र तम् तादृशम्, **विचार्यमाणशकलशास्त्रार्थम्**=विचार्यमाणाः युक्त्या स्थाप्यमानाः सकलानां सम्पूर्णानां शास्त्राणां शासनग्रन्थानाम अर्थाः आशयाः

यत्र तम्, **आरम्भ्यमाणपर्णशालम्**=आरभ्यमाणाः विरच्यमानाः पर्णशालाः उटजाः यत्र तं तादृशम्, **उपलिप्य-मानाजिरम्**=उपलिप्यमानानि संस्क्रियमाणानि अजिराणि प्राङ्गणानि यत्र तं तादृशम्, **उपमृज्यमानोटजाभ्यन्तरम्**=उपमृज्यमानानि शोध्यमानानि उटजानां पर्णशालानाम् अभ्यन्तराणि अन्तरालानि यत्र तं तादृशम्, **आवध्यमानध्यानम्** =आबध्यामानं विधीयमानं ध्यानं चिन्तनं यत्र तं तादृशम्, **साध्यमानमन्त्रम्**=साध्यमानाः वशीक्रियमाणाः मंत्राः देवाधिष्ठातृकाः वर्णसमाम्नायाः यत्र तं तादृशम्, **अभ्यस्यमानयोगम्**=अभ्यस्यमानः पुनः पुनः क्रियमाणः योगः चित्तवृत्तिनिरोधः यत्र तं तादृशम्, **उपह्रियमाणवनदेवताबलिम्**=उपह्रियमाणाः समर्प्यमाणाः वनदेवताभ्यः अरण्याधिष्ठातृदेवीभ्यः बलय उपहाराः यत्र तं तादृशम्, **निर्वर्त्यमानमौ-ञ्जमेखलम्**=निर्वर्त्यमानाः निर्मीयमाणाः मौञ्जयः मुञ्जमस्यः मेखलाः कटिबन्धनानि यत्र तं तादृशम्, **प्रक्षाल्यमानवल्कलम्**-प्रक्षाल्यमानानि जलेन निर्मलीक्रियमाणानि वल्कलानि वृक्षत्वयः यत्र तं तादशृम्, **उपसंगृह्यमाणसमिधम्**=उपसंगृह्यमाणाः उपादीयमानाः समिधः काष्ठानि यत्र तं तादृशम्, **उपसंस्क्रियमाणकृष्णाजिनम्**= उपसंस्क्रियमाणानि विशुद्धीक्रियमाणानि कृष्णाजिनानि कृष्णमृगचर्माणि यत्र तं तादृशम्, **गृह्यमाणगवेधुकम्**=गृह्यमाणाः आदीयमानाः गवेधुकाः कन्दाः धान्यविशेषाः वा यत्र तं तादृशम्, **शोष्यमाणपुष्करबीजम्**=शोष्यमाणानि शुष्कतां नीयमानानि पुष्करबीजानि कमलफलानि यत्र तं तादृशम्, **गृह्यमाणत्रिपुण्ड्रकम्**=ग्रथ्यमानाः ग्रन्थि प्राप्यमाणः अक्षमालाः अक्षस्त्रजः यत्र तं तादृशम्, **ग्रथ्यमाणत्रिपुण्ड्रकम्**= गृह्यमाणानि ध्रियमाणानि त्रिपुण्ड्रकाणि तिर्यग्रेखात्रयात्मकाः तिलकविशेषाः यत्र तं तादृशम्, **न्यस्यमानवेत्रदण्डम्**=न्यस्यमानाः स्थाप्यमानाः वेत्रदण्डाः वेतसलगुडाः, यत्र तं तादृशम्, **सत्क्रियमाणापरिव्राजकम्**=सत्क्रियमाणाः परिव्राजकाः संन्यासिनः यत्र तं तादशृम्, **आपूर्यमाणकमण्डलुम्**=आपूर्यमाणाः भ्रियमाणाः कमण्डलवः जलपात्राणि यत्र तं तादृशम्।

टिप्पणी - **उपचर्यमाणा**-उप+चर्+यक्+शानच्। **अतिथि**-अभ्यागत 'प्राघुणस्त्वतिथिर्द्वयोः' इति त्रिकाण्डशेषः, जिसके आने की कोई तिथि निश्चित न हो (अनिश्चिता तिथिर्यस्य) अथवा वह महात्मा जो सदा घूमता रहता हो। (अतति सदा गच्छति इति अतिथिः-अत्+इथिन्) और होम(वैश्वदेव) के समय गृहस्थ के घर उपस्थित हो (दूराच्चोपगतं श्रान्तं वैश्वदेव उपस्थितम्। अतिथिं तं विजानीयान्नतिथिः पूर्वमागतः। (व्यास) अथवा जिस महात्मा ने तिथिपर्व आदि सबका त्याग कर

दिया हो, सर्वथा निर्लेप (तिथिपर्वोत्सवाः सर्वे त्यक्ता येन महात्मना। सोऽतिथिः सर्वभूतानां शेषानभ्यागतान् विदुः॥ यम) **पूज्यमान**-पूज्+यक्+शानच्। **पितृदेवत**-पितर। **अर्च्यमान**-अर्च्+यक्+शानच्। **उपदिश्यमान**-उप+दिश्+यक्+शानच्। **श्राद्धकल्प/श्राद्ध** का विवेचन करने वाले आश्वलायन आपस्तम्ब आदि ऋषियों से प्रोक्त ग्रन्थ जिन्हें वेदाङ्ग की श्रेणी में गिना जाता है। कल्प वेद के हाथ हैं (हस्तौ कल्पोऽथ उच्यते)। **आलोच्यमान**-आ+लोच्+यक्+शानच्। **धर्मशास्त्र**-वे स्मृतिग्रन्थ जिनमें मानवजीवन की सर्वाङ्गीण मीमांसा करते हुए उनके लिए नीतिनिर्देश किया गया है। (श्रुतिस्तु वेदो विज्ञेयः धर्मशास्त्रं तु वै स्मृतिः) **पठ्यमान**-पठ्+यक्+शानच्। **उपलिप्यमान**-उप+लिप्+यक्+शानच्। **पुष्करबीज**-कमलगट्टे। **परिव्राजक**-संन्यासी, (परित्यज्य सर्वं गृहकलत्रादिकं व्रजति वनायेति परिव्राजकः)। **आपूर्यमाण**-आ+पूर्+यक्+शानच्।

...अदृष्टपूर्वं कलिकालस्य, अपरिचितमनृतस्य, अश्रुतपूर्वमनङ्गस्य, अब्जयोनिमिव त्रिभुवनवन्दितम्, असुरारिमिव प्रकटितवराहनरसिंहरूपम् सांख्यमिव कपिलाधिष्ठितम्, मथुरोपवनमिव बलावलीढदर्पितधेनुकम् उदयनमिवानन्दितवत्सकुलम्, किंपुरुषाधिराज्यमिव मुनिजनगृहीतकलशाभिषिच्यमानद्रुमम्, निदाघसमयावसानमिव प्रत्यासन्नजलप्रपातम् जलधरसमयमिव वनगहनमध्यसुखसुप्तहरिम्, हनुमन्तमिव शिलाशकलप्रहारसंचूर्णिताक्षास्थिनिचयम्, खाण्डवविनाशोद्य तार्जुनमिव प्रारब्धाग्निकार्यम्, सुरभिविलेपनधरमपि सतताविर्भूतहव्यधूमगन्धम्, मातङ्गकुलाध्यासितमपि पवित्रम्, उल्लसितधूमकेतुशतमपि प्रशान्तोपद्रवम्, परिपूर्णद्विजपतिमण्डलसनाथमपि सदा संनिहिततरुगहनान्धकारम्, अतिरमणीयमपरमिव ब्रह्मलोकमाश्रममपश्यम्।

हिन्दी अनुवाद - जो कलियुग द्वारा पहले (कभी) नहीं देखा गया था, जो असत्य से अपरिचित था, जो कामदेव द्वारा पहले (कभी) नहीं सुना गया था, (अर्थात् कामप्रभावशून्य था), जो त्रिलोकी द्वारा वन्दना करने योग्य कमलयोनि ब्रह्मा की भाँति त्रिभुवन श्रेष्ठ था, जो (हिरण्याक्ष के वधार्थ) वराह एवं (हिरण्यकशिपु के वधार्थ) नृसिंहरूप प्रकट करने वाला असुरारि 'विष्णु' की भाँति वराह-मनुष्य-सिंह एवं मृगों को प्रकट करने वाला था, जो महर्षि कपिल द्वारा अधिष्ठित (प्रतिपादित अथवा आश्रित) सांख्यदर्शन की भाँति 'कपिलाओं' अर्थात् गायों द्वारा

समाश्रित था, जो 'बलावलीढ' अर्थात् बलवान् (अथवा बल=बलराम द्वारा अवलीढ=अभिभूत) तथा दर्पयुक्त धेनुकासुर से युक्त मथुरा के निकटवर्ती वन की भाँति बलशालिनी एवं मतवाली गायों (अथवा हथिनियों) वाला था, जो (पाण्डुवंश में समुत्पन्न महाराज) वत्स के कुल को आनन्दित करने वाले (महाराज) उदयन की भाँति बछड़ों अथवा (मानव) शिशुओं को आनन्दित करने वाला था, जो मुनिजनों द्वारा (राज्याभिषेक करने के लिए) ग्रहण किये गए कलशों से स्नान कराये जाते हुए 'द्रुम' नामक राजा से युक्त किन्नर साम्राज्य की भाँति मुनिजनों द्वारा ग्रहण किये गए कलशों से सींचे जाते हुए वृक्षों वाला था, जो समीपवर्तिनी जलवृष्टि वाले ग्रीष्मावसान की भाँति निकटवर्ती जलप्रपातों (झरनों) वाला था, जो 'वन' अर्थात् क्षीरसागरीय जलराशि के 'गहन मध्य' अर्थात् गम्भीर (गहरे) अभ्यन्तर प्रदेश में सुख की नींद सोये हुए हरि (विष्णु) से युक्त वर्षाकाल की भाँति वनों की गुफाओं के भीतर सुखपूर्वक सोये हुए सिंहों वाला था, जो शिलाखण्डों के आघात से (रावणपुत्र) अक्ष अथवा अक्षयकुमार के अस्थिपिञ्जर को चूर-चूर कर देने वाले (पवनसुत) हनुमान की भाँति पत्थर के टुकड़ों की मार से चूर-चूर कर दिये गए अक्षफलों (बहेड़ा) के अस्थिपिञ्जरों (अर्थात् गुठलियों) वाला था, जो 'अग्निकार्य' अर्थात् दहनव्यापार प्रारम्भ कर देने वाले-खाण्डववन के विनाशार्थ प्रस्तुत (मध्यमपाण्डव) अर्जुन की भाँति प्रारम्भ कर दिये गये अग्निकार्य (देवसन्तर्पणक्रिया) वाला था जो[१] सुरभित विलेपन अङ्गराज से युक्त होकर भी निरन्तर प्रकट होने वाले हविर्धूम की गन्ध वाला था, जो मातङ्गों अर्थात् चाण्डालों के समुदाय से समाश्रित होकर भी पवित्र था, जो समुदित हुए सैकड़ों धूमकेतुओं पुच्छलतारों ये युक्त होकर भी उपद्रवविहीन था, और जो परिपूर्ण 'द्विजपतिमण्डल' (पार्वण चन्द्रबिम्ब) से अलंकृत होने पर भी सदैव आसन्नवर्ती सघन वृक्षों के कारण अन्धकाराच्छादित था।

---

१. इस वाक्य से अनुच्छेदान्त तक विरोधालंकार का प्रयोग है। परिहारपक्ष इसप्रकार होगा, जो सुरभि (दाय) के विलेपन (गोबर का लेप) से युक्त धरा (पृथ्वी) वाला होकर भी निरन्तर उत्पन्न हविर्धूम की गन्ध से परिपूर्ण था, जो माखङ्गकुलों अर्थात् मदोन्मत्त गजयुधों से समाश्रित होकर भी पवित्र था, जो उठती हुई सैकड़ों धूमकेतुओं (यज्ञग्नियों) से युक्त होकर भी उपप्लवहीन था तथा जो पूर्णज्ञानी द्विजपतियों (ब्राह्मणों) के मण्डल (समुदाय) से सनाथ होता हुआ भी सदैव सघन वृक्षों के कारण गहने अन्धकार वाला था।

संस्कृतव्याख्या - **कलिकालस्य**=कलियुगस्य, **अदृष्टपूर्वम्**=अनवलोकितपूर्वम्, **अनृतस्य**=असत्यस्य, **अपरिचितम्, अनङ्गस्य**=कामस्य, **अश्रुतपूर्वम्**=अनाकर्णितपूर्वम्, **अब्जयोनिम् इव**=अप्सु जातम् अब्जं कमलं तद् योनिः उत्पत्तिस्थानं यस्य सः अब्जयोनिः तं पितामहम् इव, **त्रिभुवनवन्दितम्**=त्रयाणां भुवनानां समाहारः त्रिभुवनं त्रिलोकी तेन वन्दितं पूजितम्, **असुरारिम् इव**=असुराणां दैत्यानाम् अरिः रिपुः विष्णुः तम् इव, **प्रकटितवराहनरसिंहरूपम्**=प्रकटितानि प्रकाशितानि वराहाः शूकराः नरसिंहाः पुंस्त्वविशिष्टमृगेन्द्राः रूपाणि मृगाश्च येन तम्, पक्षे प्रकटिते प्रदर्शिते वराहस्य सूकरस्य नरसिंहस्य हिरण्यकशिपुविदारकस्य पुरुषकेसरिणः रूपम् आकृतिः येन तं तादृशम्, **सांख्यम् इव**=सांख्यदर्शनम् इव, **कपिलाधिष्ठितम्**=कपिलाभिः कनकवर्णाभिः, गोभिः अधिष्ठितम्, पक्षे कपिलेन तदाख्येन मुनिना अधिष्ठितम् आश्रितम्, **मथुरोपवनम् इव**=मथुरायाः एतदाख्यायाः नगर्याः उपवनम् द्वादशवनमध्यमं विपिनं तद् इव, **बलावलीढदर्पितधेनुकम्**=बलेन शक्त्या अवलीढाः संश्लिष्टाः अतएव दर्पिताः गर्विताः धेनुकाः करेण्वः यत्र तम् पक्षे बलेन बलरामेण अवलीढः इतः दर्पितः अभिमानी धेनुकः धेनुकासुरः यत्र तं तादृशम्, **उदयनम् इव**=एतदाख्यं वत्सराजं **कौशाम्बीनरेशम् इव, आनन्दितवत्सकुलम्**=आनन्दितानि हर्षितानि वत्सकुलानि गोवत्समूहाः येन तम् पक्षे आनिन्दितं हर्षितं वत्सकुलं वत्सदेशीयनः येन तं तादृशम्, **किंपुरुषाधिराज्यम् इव**=किन्नरराज्यम् इव, **मुनिजनगृहीतकलशाभिषिच्यमानद्रुमम्**=मुनिजनैः ऋषिजनैः गृहीताः धृताः ये कलशाः घटाः तै अभिषिच्यमानाः संतर्प्यमाणाः द्रुमाः पादपाः यत्र तम्, पक्षे मुनिजनगृहीतकलशैः अभिषिच्यमानः द्रुमः एतन्नामकः अधिपतिः यत्र तं तादृशम्, **निदाघसमयावसानम् इव**=निदाघसमयः ग्रीष्मकालः तस्य अवसानः समाप्तिः तम् इव, **प्रत्यासन्नजलप्रपातम्**=प्रत्यासन्नः समीपस्थः जलप्रपातः निर्झरः यस्य तम् पक्षे प्रत्यासन्नः समीपवर्ती जलप्रपातः जलवर्षणं यस्य तं तादृशम्, **जलधरसमयम् इव**=जलधराणां जलदानां समयः कालः वर्षर्तुः तम् इव, **वनगहनमध्यसुखसुप्तहरिम्** =वने विपिने यद् गहनं गुहा तस्य मध्ये अन्तः सुखं सुखपूर्वकं सुप्ता शयिताः हरयः सिंहा यत्र तम् पक्षे वनस्य जलस्य यद् गहनं गम्भीरं मध्यं मध्यभागः तत्र सुखं सुप्तः हरिः विष्णुः यत्र तम्, **हनुमन्तम् इव**=मारुतिम् इव, **शिलाशकलप्रहारसंचूर्णिताक्षास्थिनिचयम्**=शिलाशकलस्य प्रस्तरखण्डस्य प्रहारेण आघातेन संचूर्णितः पिष्टः तैलनिष्कासनाय अक्षाणां विभीतकफलानां अस्थिनिचयः बीजसमूहः यत्र तं तादृशम् पक्षे शिलाशकलस्यप्रहारेण संचूर्णितः भञ्जितः अक्षस्य एतदाख्यस्य रावणपुत्रस्य

अस्थिनिचयः अस्थिसमूहः येन तं तादृशम्, **खाण्डवविनाशोद्यतार्जुनम् इव**=खाण्डवस्य एतन्नाम्नः वनस्य विनाशे भस्मीकरणे उद्यतः तत्परः यः अर्जुनः कनिष्ठपाण्डवः तम् इव, **प्रारब्धाग्निकार्यम्**=प्रारब्धम् उपक्रान्तम् अग्निकार्यं होमः नवाङ्कुरणाय कुशमुञ्जादिवाहो वा यत्र तम्, पक्षे प्रारब्धम् अग्निकार्यम् अग्नितृप्तिः दाहविघ्ननिवारणे येन तम्; अतः परं विरोधाभासोऽलङ्कारः-**सुरभिविलेपनधरम् अपि**=सुरभिः घ्राणतर्पणं विलेपनम् अङ्गरागं धरति धारयति इति तादृशः तम् अपि, **सततविर्भूतहव्यधूमगन्धम्** =सततं निरन्तरम् आविर्भूतं, हव्यस्य हवनीयद्रव्यस्य धूमगन्धः अग्निकेतनगंधः यस्मिन् तम् सौरभधारणेनाऽपि धूमगन्धप्रकटने विरोधः तत्परिहाराय सुरभेः गोविलेपनं गोमयं धरतीति अर्थः करणीयः, **मातंगकुलाध्यासितम् अपि**=मातङ्गकुलेन चाण्डालसमूहेन अध्यासितम् आश्रितम् अपि, **पवित्रम्**=पावनम्, चाण्डालाध्यासे पवित्रतायां विरोधः तत्परिहारस्तु, **मातंगकुलेन**=गजसमूहेन, **इत्यर्थकरणेन ज्ञेयः। उल्लसितधूमकेतुशतम् अपि**=उल्लसितम् उदितं धूमकेतूनाम् उत्पातग्रहाणां शतं समूहः यत्रेति तादृशम् अपि, **प्रशान्तोपद्रवम्**=प्रकर्षेण पूर्णतया शान्तः समाप्तः उपद्रवः उत्पातः यत्र तम्, अत्र धूमकेतुल्लासेऽपि उपद्रवशान्तौ विरोधः तत्परिहाराय उल्लसितं धूमकेतूनां यज्ञाग्नीनां शतं यत्रेत्यर्थः, **परिपूर्णद्विजपतिमण्डलसनाथम् अपि**=परिपूर्णेन षोडशकलेन द्विजपतिमण्डलेन हिमांशुबिम्बेन सनाथं युक्तम् अपि, **सदासंनिहिततरुगहनान्धकारम्**=सदा सर्वदा संनिहितः तरुगहनेषु वृक्षगह्वरेषु अंधकारः तमः यत्र तं तादृशम्, अत्र पूर्णचन्द्रनाथेऽपि अन्धकार-सत्तायां विरोधः तत्परिहारस्तु परिपूर्णेन ज्ञानसम्पन्नेन द्विजपतिमण्डलेन ब्राह्मणसमूहेन सनाथमिति अनेन प्रकारेण कार्यः, **अतिरमणीयम्**= अत्यन्तमनोहरम्, **अपरम्**=द्वितीयम्, **ब्रह्मलोकम् इव**=सुरलोकमिव, **आश्रमम्**=तपोभूमिम्, **अपश्यम्**=अद्राक्षम्।

***टिप्पणी* - ब्रह्मा,** भगवान् विष्णु के नाभिकमल से ब्रह्माजी की उत्पत्ति मानी जाती है। **वलावलीढदर्पितधेनुकम्**-मथुरा के उपवन में बलराम जी ने अभिमानी धेनुकासुर को मारा था, यहाँ आश्रम में गर्वीली धेनुकायें (हथिनियाँ) रहा करतीं थीं। धेनुकासुर गधे का रूप बनाकर तालवन में रहा करता था, यह अत्यन्त भयंकर दैत्य था। **अवलीढ**-अव+लिह्+क्त। **वनगहनमध्यं**-वन की गुफा के भीतर, जल की गहराई में। भगवान विष्णु क्षीरसागर के मध्य में आषाढ़ शुक्ल एकादशी से लेकर कार्तिक शुक्ल एकादशी तक शयन करते हैं। वैदिक भाषा में समुद्र का अर्थ है आकाश और विष्णुरूप आदित्य वर्षाकाल में स्वप्न की

अवस्था में रहते हैं। विष्णु की पालिकाशक्ति इस समय आवृत्त रहती है। इसीलिए इस बीच में हमारा स्वास्थ्य मन्दाग्नि आदि रोगों से आक्रान्त रहता है। विष्णु के जागरण पर शीतलकाल में स्वास्थ्य की वृद्धि होने लगती है। अभिषिच्यमान- अभि+षिच्+ यक्+शानच्। अक्ष-बहेड़ा, रावण का पुत्र जिसे लङ्कादहन के समय हनुमान जी ने मारा था। **अस्थिनिचय**-बहेड़ों की गुठलियों का समूह, हड्डियों का समूह। **अग्निकार्य**-होम या नये अङ्कुरण के लिए कुशा, मूँज आदि के ऊपरी भाग को काट लेने पर आग लगाना, जैसा किसान लोग आज भी ईख के खेतों में किया करते हैं,अग्नि की तृप्ति अर्थात् वनदाह में इन्द्र की ओर से आने वाली बाधा को दूर करना और खाण्डववन का पूरी तरह से दाह होना। मातंग-हाथी, चाण्डाल। कश्यप के पुत्र क्रोध की मातङ्ग नामक कन्या से इस जाति का जन्म हुआ है, अतः इसे मातङ्ग कहा जाता है। मातङ्ग ऋषि के शाप से एक यक्ष को यह योनि प्राप्त हुई थी अतएव इसे मातङ्गज या मातङ्ग कहते हैं। 'अब्जययोनिमिव' इत्यादि में पूर्णोपमा अलङ्कार है। 'वनगहन' में पुनरुक्तवदाभास अलङ्कार है। 'सुरभि......से लेकर गहनान्धकारम्' तक विरोधाभास अलङ्कार है।

यत्र च मलिनता हविर्धूमेषु न चरितेषु, मुखरागः शुकेषु न कोपेषु, तीक्ष्णता कुशाग्रेषु न स्वभावेषु, चञ्चलता कदलीदलेषु न मनःसु, चक्षूरागः कोकिलेषु न परकलत्रेषु, कण्ठग्रहः कमण्डलुषु न सुरतेषु, मेखलाबन्धो व्रतेषु नेर्ष्याकलहेषु, स्तनस्पर्शो होमधेनुषु न कामिनीषु, पक्षपातः कृकवाकषु न विद्याविवादेषु, भ्रान्तिरलनप्रदक्षिणासु न शास्त्रेषु, वसुसंकीर्तनं दिव्यकथासु न तृष्णासु, गणना रुद्राक्षवलयेषु न शरीरेषु, मुनिबालनाशः क्रतुदीक्षया न मृत्युना, रामानुरागो रामायणेन न यौवनेन, मुखभङ्गविकारो जरया न धनाभिमानेन यत्र च महाभारते शकुनिवधः पुराणे वायुप्रलपितम्, वयः परिणामेन द्विजपतनम्, उपवनचन्दनेषु जाड्यम्, अग्नीनां भूतिमत्त्वम्, एणकाणां गीतश्रवणव्यसनम्, शिखण्डिनां नृत्यपक्षपातः, भुजङ्गमानां भोगः, कपीनां श्रीफलाभिलाषः मूलानामधोगतिः।

हिन्दी अनुवाद - (और) जिस आश्रम में मलिनता (कालिमा) होमाग्नि के धुएँ में थी (किन्तु लोगों के) आचरण में मलिनता (कौलीन्य अथवा कलङ्क) नहीं था। मुख की अरुणाई (रक्तचञ्चुत्व) शुकपक्षियों में थी (किन्तु लोगों के)क्रोधों में मुँह का लाल हो जाना नहीं था। तीक्ष्णता (चर्मास्थिभेदनसमर्थशक्तिविशेष) कुशों के अग्रभागों में थी, (किन्तु लोगों के स्वभावों में तीक्ष्णता (क्रूरता) नहीं थी।

चञ्चलता (तरलता) केले के पत्तों में थी (किन्तु लोगों के) चित्त में चञ्चलता (वृत्ति–विशेष) नहीं थी। चक्षूराग (नेत्रों की लाली) कोकिलों में था (किन्तु लोगों का) चक्षूराग (आसक्ति या अभिलाषा) पराई स्त्रियों में नहीं था। कण्ठग्रह (अर्थात् मुँहकड़े की पकड़) कमण्डलुओं में था (किन्तु लोगों की) गलबाँही सम्भोग-व्यापारों में नहीं थी। मेखलाबन्धन (मौञ्जीमेखला का धारण) व्रतों में था (किन्तु लोगों के) ईर्ष्याजनित कलहों में 'मेखलाबन्धन'(जञ्जीर से बाँधा जाना) नहीं था। स्तनस्पर्श (दुग्धदोहनार्थ धन का छुआ जाना।) होमधेनुओं में था किन्तु ललनाओं में (लोगों द्वारा) कुचमर्दन नहीं था। पक्षपात (पंखों का गिरना युद्धरत) कुक्कुट पक्षियों में था (किन्तु लोगों का) पक्षपात (सोपाधिकस्वीकृति या मुँहदेखी) शास्त्रीय विवादों में नहीं था। भ्रान्ति (परिवृत्ति या फेरी लगाना) यज्ञाग्नि की प्रदक्षिणाओं में थी (किन्तु लोगों की) भ्रान्ति (मिथ्याज्ञान) शास्त्रों में नहीं था। वसुसङ्कीर्तन (अर्थात् घर-ध्रुव-सोमादि आठ देवगणों का उल्लेख) देव सम्बद्ध कथाओं में था (किन्तु) लालच के सन्दर्भ में धन की चर्चा नहीं थी। गणना (संख्या या गिनती) रुद्राक्षवलयों में थी (किन्तु लोगों की) गणना (आदरभाव या स्पृहा नश्वर) शरीरों में नहीं थी। मुनियों के बालों (केशों) का नाश (कर्तन) यज्ञदीक्षा के कारण था, मृत्यु के कारण मुनियों के बालों (शिशुओं) का नाश (मृत्यु) नहीं था। राम के प्रति (आराध्यत्वेन) अनुराग रामायण (ग्रंथ-विशेष के अध्ययन) के कारण था, यौवन के कारण रामाओं (सुन्दरियों) के प्रति अनुराग (आसक्ति) नहीं था। मुख पर झुर्रियों का विकार बुढ़ौती के कारण था धन के दुरभिमानवश मुँह पर ऐंठन का रुआव नहीं था।

जिस (जाबालि आश्रम) में महाभारत में (दुर्योधन के मामा गन्धार नरेश) शकुनि का वध मिलता था (किन्तु आश्रम में शकुनियों अर्थात् पक्षियों का वध नहीं होता था), पुराणग्रन्थों में वायुदेव के कथन मिलते थे (किन्तु आश्रम में वायुविकार के कारण अनर्गल प्रलाप नहीं होता था), 'वयः परिणाम' अर्थात् वृद्धावस्था के कारण 'द्विजपतन' अर्थात् दाँतों का गिरना था (किन्तु आश्रम में द्विजों ब्राह्मणों का चारित्रिक-पतन नहीं होता था), उपवन के चन्दनों में जड़ता (शीतलता) थी (किन्तु आश्रमवासीमुनियों में जड़ता अर्थात् मूर्खता नहीं थी), अग्नियों में भूतिमत्त्व अर्थात् भस्मयुक्तता थी (किन्तु आश्रमवासी मुनियों में ऐश्वर्यशीलता नहीं थी), हरिणों में गीत सुनने की आसक्ति मिलती थी (किन्तु आश्रमवासियों में संगीत सुनने का अभिलाषातिरेक नहीं था), मयूरों का नृत्यवेला

में-पक्षपात (पंखों का पतन) होता था। (किन्तु आश्रमवासी मुनियों में नाचगान के प्रति स्वारस्य नहीं था), भुजंगमों अर्थात् सर्पों का ही भोग (कुण्डली अथवा फण) होता था (किन्तु मुनियों का स्त्र्यादिजनित सुखोपभोग नहीं था), वानरों की श्रीफल (बेल) में इच्छा होती थी। (किन्तु मुनियों की लक्ष्मी रूपीफल अर्थात् भौतिकसुख में अभिलाषा नहीं थी), 'मूलों' अर्थात् पेड़ों की जड़ों का ही अधोगमन होता था (किन्तु आश्रमवासी मुनियों का नरकपात नहीं होता था)।

संस्कृतव्याख्या - **च**=अपि च, **यत्र**=यस्मिन् आश्रमे, **मलिनता**=मालिन्यम्, **हविर्धूमेषु**=हविषः धूमेषु हव्यसम्बन्धिवह्निकेतनेषु, **चरितेषु**=आचरणेषु व्यवहारेषु वा न, विशुद्धाचरणत्वादिति भावः। **मुखरागः**=मुखस्य लपनस्य रागः रक्तिमा, **शुकेषु**=कीरेषु, **कोपेषु**=क्रोधेषु न, क्रोधानुदयादिति भावः। **तीक्ष्णता**=प्रखरता, **कुशाग्रेषु**=दर्भशिखरेषु, **स्वभावेषु**=प्रकृतिषु, न, क्रूरतायाः अभावादित्याशयः। **चञ्चलता**=चपलता, **कदलीवलेषु**=रम्भापत्रेषु, **मनःसु**=मानसेषु न, अधीरतायाः अभावात्, **चक्षुरागः**=चक्षुषोः नयनयोः रागः आरुण्यम्, **कोकिलेषु**=पिकेषु, **परकलत्रेषु**=अन्यस्त्रीषु, रागः अनुरोधः आसक्तिः, वा न, तपस्विनामासक्तिविरहात्, **कण्ठग्रहः**=गलधारणम्, **कमण्डलुषु**=कुण्डिकासु, **सुरतेषु**=सम्भोगेसु कण्ठाश्लेषः न, मुनीनां तत्राप्रवृत्तेः। **मेखलाबन्धः**=मौञ्जीबन्धनम्, **व्रतेषु**=उपनयनादिदीक्षासु, **ईर्ष्याकलहेषु**=ईर्ष्या पराभ्युदयाक्षमा तया हेतुभूतया ये कलहाः विग्रहाः तेषु मेखलाबन्धः खड्गबन्धो वा न ईर्ष्याभावात्, **स्तनस्पर्शः**=कुचसंपर्कः, होमधेनुषु होमाय धेनवः गावः तासु, **कामिनीषु**=सुन्दरीषु कुचमर्दनं न, विषयानुदयात्। **पक्षपातः**=पत्रपतनम्, **कृकवाकुबु**=कुक्कुटेषु, **विद्याविवादेषु**=विद्यायै ज्ञानाय ये विवादाः गोष्ठयः तेषु पक्षपातः निर्णायकस्य अनुचितपक्षस्वीकारः न, निर्णायकानां निष्पक्षत्वात्, **भ्रान्तिः**=भ्रमणम्, **अनलप्रदक्षिणासु**=वह्निपरिक्रमासु, **शास्त्रेषु**=वेदादिषु, भ्रान्तिः भ्रमः न, यथार्थज्ञानात्। **वसुसंकीर्तनम्**=वसूनां देवविशेषाणां संकीर्तनम् चर्चा, **दिव्यकथासु**=स्वर्गीयाख्यानेषु, **तृष्णासु**=आकाङ्क्षासु, वसुनः धनस्य संकीर्तनं चर्चा न, ऋषीणां वितृष्णत्वात्, **गणना**=संख्या, **रुद्राक्षवलयेषु**=रुद्राक्षमालासु, **शरीरेषु**=नश्वरदेहेषु गणना आदरः न, तपस्विनां विदेहत्वात्, **मुनिबालनाशः**=मुनीनां तपस्विनां बालानां कचनां नाशः मण्डनम्, **ऋतुदीक्षया**=यज्ञव्रतेन, **मृत्युना**=मरणेन, बालानां शिशूनां नाशः न, तपोमाहात्म्येनाकाल-मृत्योरभावात्। **रामानुरागः**=रामे रामचन्द्रे अनुरागः प्रेम, **रामायणेन**=वाल्मीकिरचितेन ग्रन्थेन, **यौवनेन**=तारुण्येन रामासु रमणीषु अनुरागः आसक्तिः न। **मुखमङ्गविकारः**=

मुखस्य लपनस्य भङ्गेण त्वचादिशैथिल्येन विकारः विकृतिः, **जरया**=वृद्धावस्थया, **धनाभिमानेन**=धनस्य अर्थस्य अभिमानेन गर्वेण मुखस्य भङ्गेन भ्रकुट्यादिङ्गग्या विकृतिः न, वित्तगर्वयोः उभयोः अभावादिति भावः, **च**=अपि, **यत्र**=आश्रमपदे, **महाभारते**=व्यासप्रणीते ग्रन्थविशेष, **शुकनिवधः**=शकुनेः दुर्योधनमातुलस्य वधः मरणम्, शकुनिवधकथा महाभारतग्रन्थे, शकुनीनां पक्षिणां वधः आश्रमे न, **पुराणे**=वायुपुराणे, **वायुप्रलपितम्**=वायोः वायुदेवस्य प्रलपितं जल्पितम् आश्रमे वायुना वायुरोगेण प्रलपितं प्रलापो न, **वयः परिणामेन**=वयसः आयुषः परिपाकः परिपक्वता तेन वार्धक्येन इत्यर्थः, **द्विजपतनम्**=द्विजानां पतनं विगलनम् आश्रमे द्विजानां ब्राह्मणानां पतनं चरित्रभ्रष्टता न, **उपवनचन्दनेषु**=उपवानानां विपिनानां चन्दनेषु गन्धसारेषु, **जाड्यम्**=शीतलता, मुनिषु जाड्यं जडता अविवेको वा न। **भूतिमत्त्वम्**=भस्मवत्ता, **अग्नीनां**=वह्नीनाम् मुनीनाम् भूतिमत्त्वं धनसम्पत्तिमत्ता न, **एणकानाम्**=हरिणानाम्, **गीतश्रवणव्यसनम्**=गीतस्य गानस्य श्रवणे आकर्णने व्यसनम् आसक्तिः मुनीनां गीतश्रवणव्यसनं न। **शिखण्डिनाम्**=मयूराणाम्, **नृत्यपक्षपातः**= नृत्ये नर्तनसमये पक्षाणां कलपानां पातः पतनम् मुनीनां नृत्यं प्रति उत्कटाभिलाषो न, **भुजङ्गमानाम्**=सर्पाणाम्, भोगः शरीरं, फणा वा, मुनीनां विषयसेवनं न। **कपीनाम्**=मरकटानाम्, **श्रीफलाभिलाषः**=श्रीफलेषु विल्वफलेषु अभिलाषः इच्छाः, मुनीनां लक्ष्मीरूपे फलेऽभिलाषो न। **मूलानाम्**=वृक्षादिकन्दानाम्, **अधोगतिः**=भूतलाधोदेशगमनम्, न तु मुनीनाम् अधोगतिः।

टिप्पणी **– मलिनता**–कालिमा, कलङ्क। मलिन+तल्+टाप्। **मेखला**–आश्रम में ब्रह्मचर्यव्रत में मूंज आदि की बनी हुई पगड़ी पहनी जाती थी, ईर्ष्या के कारण कलह छिड़ने पर एक दूसरे को मारने के लिए तलवार की मूंठ कमर में नहीं लटकाई जाती थी या जंजीर से एक दूसरे को नहीं बाँधा जाता था। **कृकवाकु**–मुर्गा 'कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः' इत्यमरः। वसुदेवविशेष, धनसम्पति। **क्रतुदीक्षा**–यज्ञ करने से पूर्व आवश्यक योग्यता प्राप्त करने के लिए जो आवश्यक कर्मसंपादन होता है उसे यज्ञदीक्षा कहते हैं। आश्रम में मुनि लोगों का मुण्डन इसी दीक्षा के कारण होता था, मृत्यु के द्वारा शिशुओं का विनाश नहीं होता था। **पुराण**–व्यास रचित वायु पुराण। पुराण अठारह हैं, इनमें वायुपुराण और विष्णुपराण को आज के इतिहासकार भी बहुत सम्मान देते हैं। **द्विज**–दाँत, ब्राह्मण। 'दन्तविप्राण्डजा द्विजाः' इत्यमरः। **भूति**–राख, सम्पति या ऐश्वर्य। **भोग**–सर्प का शरीर या फण, विषय का उपभोग। 'भोगः सुखे स्त्र्यादिभृताहेश्च फणकाययोः' तथा 'अहेः शरीरं

भोगः स्यात्' इति कोषः। **अधोगतिः**-नीचे जाना, अधःपतन। **'महाभारते से अधोगतिः'** तक परिसंख्या अलङ्कार है।

तस्य चैवंविधस्य मध्यभागमलंकुर्वाणस्य, अलक्तकालोहितपल्लवस्य, मुनिजनालम्बितकृष्णाजिनजलकरकसनाथशाखस्य, तापसकुमारिकाभिरालवालदत्तपीतपिष्टपञ्चाङ्गुलस्य, हरिणशिशुभिः पीयमानालवालसलिलस्य, मुनिकुमारकाबद्धकुशचीरदाम्नो हरितगोमयोपलेपनविविक्ततलस्य, तत्क्षणकृतकुसुमोपहाररमणीयस्य, नातिमहतः परिमण्डलतया विस्तीर्णावकाशस्य रक्ताशोकतरोरधश्छायायामुपविष्टम्, उग्रतपोभिर्भुवनमिव सागरैः, कनकगिरिमिव कुलपर्वतैः, क्रतुमिव वैतानवह्निभिः, कल्पान्तदिवसमिव रविभिः, कालमिव कल्पैः, समन्तान्महर्षिभिः परिवृतम्......।

हिन्दी अनुवाद - पूर्वोक्त रीति से वर्णित उस (आश्रम) के मध्यभाग वाले वर्तुलाकार प्रदेश को अलंकृत करने वाले, अलक्तक (महावर) की भाँति रक्तवर्णी पल्लवों वाले मुनिजनों द्वारा लटकाए गए काले मृगचर्मों तथा जलकरकों (कमण्डलुओं) से संवलित शाखाओं वाले, तापसकुमारियों द्वारा मूलभागों पर लगाये गये हरिद्राचूर्ण के अनेक हस्तबिम्बों वाले, मृगशावकों द्वारा पिये जाते हुए थाल्हे के जल वाले, मुनिकुमारों द्वारा बाँधे कुशनिर्मित चीर (वस्त्र) की रस्सियों वाले, गीले गोबर के उपलेपन से पवित्र अधस्तल वाले, तत्काल चढ़ाए गए पुष्पोपहार के कारण रमणीय तथा अत्यन्त विशाल न होने पर (भी) चारों ओर से मण्डलाकार होने के कारण विस्तृत अभ्यन्तर प्रदेश (नीचे की जगह) वाले रक्ताशोक वृक्ष की अधोवर्तिनी छाया में बैठे हुए भगवान् जाबालि को (मैंने) देखा-जो कि सागरों से (परिवृत) लोक के समान वैतान (दक्षिणाग्नि, गार्हपत्य तथा आहवनीय) अग्नियों से (परिवृत) यज्ञ के समान, द्वादश आदित्यों से (परिवृत) प्रलयकालीन दिन के समान तथा कल्पों अथवा कालखण्डों से (परिवृत) अखण्डकालावधि के समान चारों ओर से अत्यन्त तीक्ष्ण तपश्चर्या वाले महर्षियों से घिरे हुए थे।

संस्कृतव्याख्या - **एवंविधस्य**=पूर्वोक्तप्रकारस्य, **तस्य**=आश्रमस्य, **मध्यभागम्**=मध्यप्रदेशम्, **अलंकुर्वाणस्य**=शोभमानस्य, **अलक्तकलोहितपल्लवस्य**=अलक्तकवत् लाक्षावत् आलोहिताः ईषद्रक्ताः पल्लवाः किसलयानि यस्य तस्य, **मुनिजनालम्बितकृष्णाजिनजलकरकसनाथशाखस्य**=मुनिजनैः तपस्विलोकैः आलम्बिमानि स्थापितानि यानि कृष्णाजिनानि कृष्णमृगचर्माणि

जलकरकाः सलिलकमण्डलवः च तैः सनाथाः समुपेताः शाखाः स्कन्धाः यस्य तस्य, **तापसकुमारिकाभिः**=तपस्विकन्याभिः, **आलवालदत्तपीतपिष्टपञ्चांगुलस्य**=आलवाले आवापे दत्तानि अङ्कितानि पीतपिष्टस्य हरिद्रारूपपटवासचूर्णस्य पञ्चाङ्गुलानि हस्तबिम्बानि यस्य तस्य, **हरिणशिशुभिः**=मृगपोतैः, **पीयमानालवालसलिलस्य**=पीयमानं धीयमानं आलवालस्य आवापस्य सलिलं जलं यस्य तस्य, **मुनिकुमारकाबद्धकुशचीरदाम्नः**=मुनिकुमारकैः तपस्विबालकैः आबद्धं परिवेष्टितं कुशचीराणां दर्भच्छदपत्राणां दाम रज्जुः यस्मिन् तस्य, **हरितगोमयोपलेपनविविक्ततलस्य**=हरितगोमयेन नवीनगोपुरीषेण यत् उपलेपनं शोधनं तेन विविक्तं पूतं तलम् अधोभागः यस्य तस्य, **तत्क्षणकृतकुसुमोपहाररमणीयस्य**=तत्क्षणं तत्कालं कृतः यः कुसुमोपहारः पुष्पविसर्जनं रमणीयस्य सुन्दरस्य, **नातिमहतः**=नातिविशालस्य, तथापि **परिमण्डलतया**=परिगतं मण्डलं परिधिः यस्य सः तस्य भावः तत्ता **तया** गोलाकारतया, **विस्तीर्णावकाशाय**=विस्तीर्णः अतिविस्तृतः अवकाशः अभ्यन्तरप्रदेशः यस्य तस्य, **रक्ताशोकतरोः**=अरुणाशोकवृक्षस्य, **अधश्छायायाम्**=अधस्तनेऽनातपे, **उपविष्टम्**=आसीनम्, **सागरैः**=समुद्रैः, **भुवनम् इव**=जगत् इव, **कुलपर्वतैः**=कुलाचलैः, **कनकगिरिम् इव**=मेरुपर्वतम् इव, **वैतानिकवह्निभिः**=याज्ञिकोग्निभिः, **क्रतुम् इव**=यज्ञम् इव, **रविभिः**=सूर्यैः, **कल्पान्तदिवसम् इव**=प्रलयदिनम् इव, **कल्पैः**=चतुर्दशमन्वन्तरात्मकैः सहस्रयुगैः, **कालम् इव**=समयम् इव, **उग्रतपोभिः**=**उग्रं** तीव्रं तपःतपस्या येषां तैः तादृशैः, **महर्षिभिः**=तपस्विभिः, **समन्तात्**=परितः, **परिवृतम्**=परिवेष्टितम्।

टिप्पणी – **अलङ्कुर्वाणस्य**–अलं+ कृ+शानच्, ष० ए० व०। **अलक्तक**-लाक्षारस, लाख। **जलकरक**–कमण्डलु करवा। 'करकस्तु पुमान् पक्षिविशेषे दाडिमेऽपि च। द्वयोर्मधोपलेन स्त्रीकरङ्के च कमण्डलौ' 'इति मेदिनी। **पीतपिष्ट पञ्चांगुल**–पीली पीसी हुई हल्दी की लेप बनाकर उसके थापे वृक्ष के थालहे पर लगा दिये गये थे। पानी के दोष से बचने के लिए, दैवी प्रकोप की शान्ति के लिए आज भी कुमारिकाएँ हल्दी या गोबर के थापों को घरों में लगाती हैं। **पीयमान**-पा+यक्+शानच्। **विविक्त**–शुद्ध, पवित्र,। **कुलपर्वतैः**–सातुकुलाचल महेन्द्र, मलय, सह्य, शक्तिमान्, ऋक्षवान्, विन्ध्य एवं पारियात्रिक। **कल्पान्त**–प्रलय, 'संवर्तः प्रलयः कल्पः क्षयः कल्पान्त इत्यपि' इत्यमरः । परिवृतम्–परि+वृ+क्त। यहाँ **मालोपमा** अलंकार है।

........उग्रशापभीतयेव कम्पितदेहया प्रणयिन्येव विहितकेशग्रहया कुद्धयेव

कृतभ्रूभङ्ग्या मत्तयेवाकुलितगमनया प्रसाधितयेव प्रकटिततिलकया जरया गृहीतव्रतयेव भस्मधवलया धवलीकृतविग्रहम्, आयामिनीभिः पलितपाण्डुराभिस्तपसा विजित्य मुनिजनमखिलं धर्मपताकाभिरिवोच्छ्रिताभिरमरलोकमारोढुं पुण्यरज्जुभिरिवोपसंगृहीताभिरतिदूरप्रवृद्धस्य पुण्यतरोः कुसुममञ्जरीभिरिवोद्गताभिर्जटाभिरुपशोभितम्, उपरचितभस्मत्रिपुण्ड्रकेण तिर्यक्प्रवृत्तत्रिपथगास्त्रोतस्त्रयेण हिमगिरिशिलातलेनेव ललाटफलकेनोपेतम्.......

हिन्दी अनुवाद – जो कि मानो (महर्षि जाबालि के) दारुण शाप से डरी हुई अतएव देह कँपानेवाली, मानो (महर्षि जाबालि की) प्रणयिनी होने के कारण (रतिकलहवश) केश पकड़ने वाली अर्थात् महर्षि के केशों को श्वेत बना देनेवाली, मानो क्रोधाविष्ट होने के कारण टेढ़ी चितवन वाली अर्थात् महर्षि की भौंहों को विकृत कर देने वाली, मानो उन्मादिनी होने के कारण लडखड़ा कर चलनेवाली अर्थात् महर्षि को स्खलद्गति बना देनेवाली, मानो सजी-धजी दुलहिन होने के कारण (अपना) तिलक अर्थात् बिंदिया दिखाने वाली अर्थात् महर्षि की देह में काले तिलों को उत्पन्न कर देने वाली तथा मानो व्रतधारिणी होने के कारण भस्म मलने से धवल बनी हुई अर्थात् भस्म के समान धवल वृद्धावस्था से शुभ्रीकृत शरीर वाले थे। जो (महर्षि जाबालि) विस्तार युक्त, वार्द्धक्यजनित शुक्लता के कारण पाण्डुर (श्वेत) वर्णवाली, समस्त मुनिजनों को (अपनी) तपोराशियों से जीतकर (सौभाग्यप्रदर्शनार्थ) ऊपर फहराई गई धर्मपताकाओं सी प्रतीत होने वाली स्वर्गारोहण के निमित्त बटोरी गयी पुण्यरज्जुओं-सी प्रतीत होने वाली तथा बहुत दूर तक बढ़े हुए तपश्चरण रूपी की वृक्ष-प्रादुर्भूत हुई-पुष्पवल्लरियों-सी प्रतीत होने वाली जटाओं से शोभायमान थे। जो कि तिरछे (परस्पर पृथक्) होकर बहने वाले त्रिपथ गङ्गा के (ऊपर नीचे तथा समानान्तर (स्थित) तीन स्त्रोतों से युक्त हिमिगिरि का शिलातल प्रतीत होने वाले भस्मनिर्मित त्रिरेखामय तिलक वाले भाल प्रदेश से संयुक्त थे।

संस्कृतव्याख्या – **उग्रशापभीतया इव**=उग्रेण कठिनेन शापेन अभिसम्पातेन भीता त्रस्ता तया, नायिकया इति शेषः, इव, **कम्पितदेहया**=कम्पितः चलितः देहः शरीरं यया तया, नायिकापक्षे कम्पितः देहः यस्याः सा तया, **प्रणयिन्या इव**=प्रेमवत्या इव, **विहितकेशग्रहया**=विहितः केशानां कचानां ग्रहः श्वैत्यापादानेन ग्रहणं यया तया नायिकापक्षे विहितः केशग्रहः रतिकाले कचग्रहणं यया तया, **क्रुद्धया**=कुपितया इव, **कृतभ्रूभङ्ग्या**=कृतः भ्रुवोः भ्रूलतयोः भङ्गः शैथिल्यं यया तया, नायिकापक्षे-

कृतः भ्रूभङ्गः भ्रुकुटीकौटिल्यं यया तया, **मत्तया इव**=उन्मादिन्या इव, **आकुलित-गमनया**=आकुलितम् उच्चावचीकृतं गमनं गतिः यया तया नायिकापक्षे आकुलितं मदपानेन स्खलितं गमनं यस्याः सा तया, **प्रसाधितया इव**=अलङ्कृतया इव, **प्रकटिततिलकया**=प्रकटिताः प्रकाशिताः तिलकाः श्यामवर्णचिह्नानि यया तया, नायिकापक्षे प्रकटितं प्रदर्शितं तिलकं भालबिन्दुः यया तया इव, **गृहीतव्रतया इव**=गृहीतं धृतं व्रतं नियमः यया तया इव, **भस्मधवलया**=भस्म भूतिः तद्वत् धवलतया श्वेतया नायिकापक्षे भस्मना अङ्गलिप्तेन भसितेन धवलया धूसरया, **जरया**=वृद्धावस्थया, **धवलीकृतविग्रहम्**=अधवलः धवलः कृत इति धवलीकृतः शुभ्रीकृतः विग्रहः देहः यस्य तम्, **आयामिनीभिः**=दीर्घाभिः, **पलितपाण्डुराभिः**=पलितं जरया शौक्ल्यं तेन पाण्डुराभिः श्वेताभिः, **अखिलम्**=समस्तम्, **मुनिजनम्**=तपस्विगणम्, **तपसा**=तपश्चर्यया, **विजित्य**=जित्वा, **उच्छ्रिताभिः**=ऊर्ध्वीकृताभिः, **धर्मपताकाभिः इव**=पुण्यकेतुभिः इव, **अमरलोकम्**=स्वर्गलोकम्, **आरोढुम्**=आरोहणं कर्तृम्, **उपसंगृहीताभिः**=अङ्गीकृताभिः, **पुण्यरज्जुभिःइव**=पवित्रप्रग्रहैः, **अतिदूरप्रवृद्धस्य**=अत्यधिकम् एधितस्य, **पुण्यतरोः**=पुण्यम् सुकृतम् एव तरुः वृक्षः तस्य धर्मवृक्षस्य, **उद्गताभिः**=प्रादुर्भूताभिः, **कुसुममञ्जरीभिः इव**=पुष्पवल्लरीभिः इव, **जटाभिः**=सटाभिः, **उपशोभितम्**=विभूषितम् , **उपरचितभस्म-त्रिपुण्ड्रकेण**=उपरचितं विहितं भस्मनः भूतेः त्रिपुण्ड्रकं तिर्यग्रेखातिलकं यत्र तेन, **अतएवात्रोत्प्रेक्षतेतिर्यक्प्रवृत्तत्रिपथगस्त्रोतस्त्रयेण**=तिर्यक् कुटिलं प्रवृत्तं प्रचलितं त्रिपथगायाः गङ्गायाः स्रोतस्त्रयं त्रिप्रवाहः यत्र तादृशेन, **हिमगरिशिलातलेन**= हिमगिरेः हिमाचलस्य शिलातलं पाषाणतलं तेन इव, **ललाटफलकेन**=भालपट्टेन, **उपेतम्**=संयुक्तम् ।

टिप्पणी - क्रोध में कहा गया कठोर वचन। **तिलक**-वृद्धावस्था में पड़ने वाले शरीर के काले मस्से, मस्तक की बन्दी। **पलित**-बुढ़ापे के कारण शरीर के बालों में आने वाली सफेदी 'पलितं जरया शौक्ल्यम्' इत्यमरः। **विजित्य**-वि+जि+क्त्वा-ल्यप्। **आरोढुं**-आ+ रुह्+ तुमुन्। **उच्छ्रूता**-ऊपर को उठाई गयी, फहराई गयी पताका। **त्रिपथगा**-तीन मार्गों से चलने वाली गङ्गा, आकाशगङ्गा व पातालगङ्गा रूप में गङ्गा के वहने के तीन मार्ग हैं। प्रस्तुत प्रकरण में हिमालय पर ही उनके तीन वक्र स्रोतों के बहने की उत्प्रेक्षा की गई है जो ललाट का उपमान है। यहाँ पूर्णोपमा, उत्प्रेक्षा एवं रूपक अलंकार हैं।

.....अधोमुखचन्द्रकलाकाराभ्यामवलम्बितवलिशिथिलाभ्यां भ्रूलताभ्या-

मवष्टभ्यमानदृष्टिम्, अनवरतमन्त्राभ्यासविवृताधरपुटतया निष्पतद्भिरति-शुचिभिः सत्यप्ररोहैरिव स्वच्छेन्द्रियवृत्तिभिरिव विद्यागुणैरिव करुणारस-प्रवाहैरिव दशनमयूखैर्धवलितपुरोभागम्, उद्वमदमलङ्गाप्रवाहमिव जह्नुम्, अनवरतसोमोद्गारसुगन्धिनि श्वासावकृष्टैमूर्तिमद्भिः शापाक्षरैरिव सदा मुखभागसंहितैः परिस्फुरद्भिरलिभिरविरहितम्, अतिकृशतया निम्नतरगण्डगर्तम्, उन्नततरहनुघोणम्, आकारालतारकम्, अवशीर्यमाणविरलनयनपक्ष्ममालम्, उद्गतदीर्घरोमरुद्धश्रवणविवरम्, आनाभिलम्बितकूर्चकलापमाननमा-दधानम्.....।

हिन्दी अनुवाद - जो अधोमुखी चन्द्रकलाओं के आकार के समान आकार वाली तथा (वार्द्धक्य के कारण) आश्रित त्रिवलियों (झुर्रियों) के कारण शिथिलीभूत भ्रूलताओं से अवरुद्ध दृष्टि वाले थे, जो निरन्तर मन्त्राक्षरों का अभ्यास (पौनः पुन्येन उच्चारण) करने से खुल हुए दोनों होठ वाले होने के कारण बाहर निकलते हुए अत्यन्त परिपूत सत्याङ्कुरों के समान निर्मल इन्द्रिय प्रवृत्तियों के समान (दया-दाक्षिण्यादि) विद्या गुणों के समान तथा करुणारस की धाराओं के समान दन्तकिरणों के शुभ्रीकृत सम्मुखभाग वाले अतएव निर्मल गंगाधारा उद्वमन करने वाले (महाराज) जह्नु के समान थे, जो निरन्तर (यज्ञों में पिये गये) सोमरस के उद्गारों (डकारों) से सुगन्धित निःश्वासों से आकर्षित किये गये, मूर्तिमान् शाप के अक्षरों के समान (अर्थात् कृष्णवर्ण) तथा सर्वदा मुखाग्रभाग से सटकर सञ्चरण करने वाले मधुकरों से संवलित अत्यन्त दुबले पतले होने के कारण बहुत गहरे गाल के गड्ढों वाले अत्यन्त ऊँची दाढ़ी तथा नासिका वाले टेढ़ी कुछ अथवा (भयावह) नेत्रकनीनिकाओं वाले (वार्द्धक्यवश) झड़ती हुई तथा विरलीभूत नेत्रों की बरौनियों के समूहों वाले हुए तन्तुरोओं (बालों) से ढके हुए कर्णविवरों वाले तथा नाभिपर्यन्त लटकते हुए दाढ़ियों के समूह वाले मुखमण्डल को धारण कर रहे थे।

संस्कृतव्याख्या - **अधोमुखचन्द्रकलाकाराभ्याम्**=अधोमुखी निम्नाश्रिता या चन्द्रकला सुधांशुलेखा तस्याः आकारः इव आकारः स्वरूपं ययोः ताभ्याम्, **अवलम्बितवलिशिथिलाभ्याम्**=अवलम्बिता आश्रिता या वलिः शिथिलचमरेखा तया शिथिलाभ्याम् अधःश्लथाभ्याम्, **भ्रूलताभ्याम्**=कोमलभ्रूभ्याम्, **अवष्टभ्य-मानदृष्टिम्**=अवष्टभ्यमाना अवलम्ब्यमाना दृष्टिः दर्शनसामर्थ्यं यस्य तं तादृशम्, **अनवरतमन्त्राभ्यासविवृताधरपुटतया**=अनवरतं सततं यः मन्त्राभ्यासः मन्त्रजपः तेन विवृतं व्यात्तम् अधरपुटम् ओष्ठसंपुटं यस्य तस्य भावः तत्ता तया, **निष्पतद्भिः**=

निर्गच्छद्भिः, **अतिशुचिभिः**=अत्यन्तस्वच्छैः, **सत्यप्ररोहैः इव**=सत्यस्य तथ्यस्य प्ररोहाः अंकुराः तैः इव, **स्वच्छेन्द्रियवृत्तिभिः इव**=स्वच्छाः या इंद्रियवृत्तयः इन्द्रियव्यापाराः ताभिः इव, **विद्यागुणैः इव**=विद्यानाम् आन्वीक्षिक्यादीनां गुणैः विनयादिभिः इव, **करुणारसप्रवाहैः इव**=करुणा एव रसः निर्यासः तस्य प्रवाहैः इव स्रोतोभिः इव, **दशनमयूखैः**=दशनानां दन्तानां मयूखैः रश्मिभिः, **धवलित-पुरोभागम्**=धवलितः श्वेतीकृतः पुरोभागः अग्रप्रदेशः येन तं तादृशम्, अतएव **उद्वमदमलगंगाप्रवाहम्**= उद्वमन् उद्गच्छन् अमलः स्वच्छः गङ्गाप्रवाहः भागीरथी-स्रोतः यस्मात् तं तादृशम् , **जह्नुम् इव**=एतदाख्यं मुनिम् इव, **अनवरतसोमोद्गार-सुगन्धिनिश्वासावकृष्टैः**=अनवरतं सततं यः सोमोद्गारः सोमपानेन प्रकटितः वायुजनितशब्दः तेन सुगन्धिः सौरभः यः निश्वासः वायुनिर्गमः तेन अवकृष्टैः आकृष्टैः, **मूर्तिमद्भिः**=शरीरधारिभिः, **शापाक्षरैः इव**=शापवर्णैः इव, **सदा**=निरन्तरम्, **मुखभागसंनिहितैः**=मुखभागे लपनप्रदेशे संनिहितैः पार्श्वस्थैः सद्भिः, **स्फुरद्भिः**=सञ्चरद्भिः, **अलिभिः**=मधुकरैः, **अविरहितम्**=संश्लिष्टम्, **अतिकृशतया**=अत्यन्त-क्षीणतया, **निम्नतरगण्डगर्तम्**=निम्नतरौ गम्भीरतरौ गण्डयोः कपोलयोः गतौ अवटीभूतौ यत्र तत् तादृशम्, **उन्नततरहनुघोणम्**=उन्नततरे उच्चतरे हनुः चिबुकं घोणा नासिका च यत्र तत् तादृशम्, **अवशीर्यमाणविरलनयनपक्ष्ममालम्**=अवशीर्यमाणे क्षीयमाणे अतएव विरले असान्द्रे नयनयोः नेत्रयोः पक्ष्ममाले लोमराजी यत्र तत् तादृशम्, **उद्गतदीर्घरोमरुद्धश्रवणविवरम्**=उद्गतानि उत्पन्नानि यानि दीर्घरोमाणि विस्तृतलोमानि तैः रुद्धे आवृते श्रवणयोः कर्णयोः विवरे छिद्रे यत्र तत् तादृशम्, **आनाभिलम्बितकूर्चकलापम्**= आनभेः नाभिपर्यन्तं लम्बितः वेल्लितः कूर्चकलापः श्मश्रुसमूहः यत्र तत् तादृशम्, **आननम्**=मुखम्, **आदधानम्**=धारयन्तम्।

टिप्पणी - **बलि**-शिथिलचर्म, **'**बलिदैत्यप्रभेदे च करचामरदण्डयोः, उपहारे पुमान् स्त्री तु जरया श्लथचर्मणि**'**।। इति मेदिनी। **अधरपुट**-ओष्ठपट, दोनों होठ। **सत्यप्ररोहः**-सत्य के अंकुर। सत्य को श्वेत मानकर दन्त किरणों के लिए सत्य के अंकुरों की उत्प्रेक्षा की गई है। इसी प्रकार स्वच्छ इन्द्रियवृत्तियों और करुण रस के प्रवाह को श्वेत मानकर उनकी उत्प्रेक्षा की गई है। **उद्वमद.....जह्नुम्**-मुख से निकलती हुई सफेद किरणों को गङ्गा मानकर जाबालि की जुह्नु ऋषि से उपमा दी गई है। भगीरथ की प्रार्थना पर शिवकी जटाओं में आती हुई गंगा जब जह्नु ऋषि की कुटिया को बहाने लगीं, जह्नु ने उसका पान कर लिया। पुनः भगीरथ के अनुनय-विनय पर जह्नु ने गंगा को बाहर निकाला, उस समय की उपमा यहाँ

जाबालि के लिए दी गई है। **आदधानम्**-आ+धा+शानच्। **शापाक्षैरिव**-यहाँ गुणोत्प्रेक्षालङ्कार है। इसके अतिरिक्त लुप्तोपमा, काव्यलिङ्ग, उपमा आदि अलङ्कार हैं।

अतिचपलानामिन्द्रियाश्वानामन्तःसंयमनरज्जुभिरिवातताभिः कण्ठनाडीभिर्निरन्तरावनद्धकन्धरम्, समुन्नतविरलास्थिपञ्जरम्, अंसावलम्बितधवलयज्ञोपवीतम्, अनिलवशजनिततनुतरङ्गभङ्गमुत्प्लवमानमृणालमिव मन्दाकिनीप्रवाहमकलुषमङ्गमुद्वहन्तम्, अमलस्फटिकशकलघटितमक्षवलयमत्युज्ज्वलस्थूलमुक्ताफलग्रथितं सरस्वतीहारमिव चलदंगुलिविवरगतमावर्तयन्तम्, अनवरतभ्रमिततारकाचक्रमपरमिव ध्रुवम्........,

हिन्दी अनुवाद - जो कि अत्यन्त चञ्चल इन्द्रिय रूपी अश्वों को भीतर ही भीतर संयमित करने के लिए लगामों की भाँति फैली हुई गले की नसों से निरन्तर जकड़े हुए ग्रीवा प्रदेश वाले उभरे तथा छितराए हुए अस्थिपञ्जरों वाले-कन्धे पर लटकते हुये धवल यज्ञोपवीत (जनेऊ) वाले अतएव हवा के प्रभाव से उत्पन्न सूक्ष्म एवं टूटती लहरों वाले तथा तैरते हुए नूतन श्वेत कमल युक्त मन्दाकिनी के जलप्रवाह की भाँति निष्कलङ्क शरीर को धारण कर रहे थे, जो कि अत्यन्त धवल तथा बृहदाकार मोतियों के मनकों से गूंथे गये देवी सरस्वती के हार के समान स्वच्छ स्फटिक शिलाखण्डों से निर्मित तथा (जपविधि में) घूमती हुई अंगुलियों के मध्यवर्ती विवरस्थान में विद्यमान जपमाला को फेरते हुए अतएव निरन्तर परिक्रमा करने वाले नक्षत्रमण्डल से युक्त द्वितीय ध्रुव (नक्षत्रविशेष) सरीखे थे।

संस्कृतव्याख्या - **अतिचपलानाम्**=अतीवचञ्चलानाम्, **इन्द्रियाश्वानाम्**= इन्द्रियाणि एव अश्वाः घोटकाः तेषाम्, **अन्तःसंयमनरज्जुभिः इव**=अन्तः मध्ये संयमनाय बन्धनाय रज्जुभिः इव, **आतताभिः**=विस्तृताभिः, **कण्ठनाडीभिः**= गलशिराभिः, **निरन्तरावनद्धकन्धरम्**=निरन्तरं सान्द्रं यथा स्यात् तथा अवनद्धा बद्धा कन्धरा ग्रीवा यस्मिन् तत्, **समुन्नतविरलास्थिपञ्जरम्**=समुन्नतम् ऊर्ध्वगतं विरलम् अनिबिडम् अस्थिपञ्जरं कङ्कालं यस्य तत्, **अंसावलम्बितधवलयज्ञोपवीतम्**=अंसे वामस्कन्धे अवलम्बितं लम्बमानं धवलं शुभ्रं यज्ञोपवीतं यज्ञसूत्रं यस्मिन् तत् तादृशम्, अतएव **अनिलवशजनिततनुतरङ्गभङ्गम्**=अनिलवशेन वायुप्रभावेण जनिताः तनवः लघवः तरङ्गभङ्गाः कल्लोलखण्डाः यत्र तत् तादृशम्, **उत्प्लवमानमृणालम्**=उत्प्लवमानं संतरत् मृणालं कमलनालं यत्र तत् तादृशम् , **मन्दाकिनीप्रवाहम् इव**=गङ्गास्रोतः इव, **अकलुषम्**=निर्मलम् निष्पापम्, **अङ्गम्**=शरीरम्, **उद्वहन्तम्**=धारयन्तम्, **अत्युज्ज्वलस्थूलमुक्ताफलग्रथितम्**=

अत्युज्ज्वलानि अतिनिर्मलानि स्थूलानि पृथुलानि यानि मुक्ताफलानि मौक्तिकानि तैः ग्रथितं गुम्फितम्, **सरस्वतीहारम् इव**=सरस्वत्याः भारत्याः हारः मुक्तावली तम् इव, **चलदङ्गुलिविवरगतम्**=चलन्तीनां स्पन्दमानाम् अङ्गुलीनां करावयवानां विवरगतं छिद्रस्थितम्, **अमलस्फटिकशकलघटित**=अमलानि स्वच्छानि यानि स्फटिकशकलानि स्फटिकखण्डानि तैः घटितं रचितम्, **अक्षवलयम्**=अक्षमालाम्, **आवर्तयन्तम्**=भ्रामयन्तम्, अतएव **अनवरतभ्रमिततारकाचक्रम्**=अनरवरतं सततं भ्रमितं पर्यटितं तारकाचक्रं नक्षत्रमण्डलं येन तम्, **अपरम्**=द्वितीयम्, **ध्रुवम् इव**=उत्तानपादम् इव।

टिप्पणी - **अवरुद्ध**-कसकर बँधी हुई। **उत्प्लवमानमृणालम्**-तैरता हुआ कमलनाल। उभरते हुए अस्थिपञ्जर पड़े हुए यज्ञोपवीत के लिए वायुवंश उत्पन्न तरङ्गों वाले गङ्गाप्रवाह पर तैरते मृणाल की उपमा जहाँ दृश्यसाम्य की कुशलता को प्रस्तुत करती है, वहीं शरीर यज्ञोवीत की पावनता तथा स्वच्छता का भी स्पष्ट संकेत देती है। **शकल**-टुकड़ा, माला के दाने बनाने के लिये किये गये स्फटिकमणि के छोटे-छोटे टुकड़े। **अनवरत....ध्रुवम्**-उत्तर दिशा में विद्यमान ध्रुव प्रवहपवन के द्वारा सारे नक्षत्र मण्डल को घुमाता है। कहा भी गया है-'भयकृद्ध्रुवयोर्बद्ध-माक्षिप्तप्रवहानिलैः। पर्येत्यजस्रं तन्नद्धा ग्रहकक्षा यथाक्रमम्।।' 'अमल घुवम्' में उपमा, काव्यलिङ्ग तथा द्रव्योत्प्रेक्षा की संसृष्टि है।

.......उन्नमता शिराजालकेन जरत्कल्पतरुमिव परिणतलतासंचयेन निरन्तरनिचितम्, अमलेन चन्द्रांशुभिरिवामृतफेनैरिव गुणसन्तानतन्तुभिरिव निर्मितेन मानससरोजलक्षालनशुचिना दुकूलवल्कलेन द्वितीयेनेव जराजालकेन संछादितम्, आसन्नवर्तिना मन्दाकिनीसलिलपूर्णेन त्रिदण्डोपविष्टेन स्फाटिककमण्डलुना विकचपुण्डरीकराशिमिव राजहंसेनोपशोभमानम्, स्थैर्येणाचलानां गाम्भीर्येण सागराणां तेजसा सवितुः प्रशमेन तुषाररश्मेर्निर्मलतयाम्बरतलस्य संविभागमिव कुर्वाणम्,......

हिन्दी अनुवाद - जो परिपक्व लताजाल से निरन्तर जकड़े हुए प्राचीन कल्पद्रुम की भाँति ऊपर की ओर उभरी हुयी धमनियों के समूह से निरन्तर व्याप्त थे, जो निर्मल अतएव मानो चन्द्रकिरणों से-मानो अमृत के फैनों से तथा मानो (विद्या-तपश्चरणादि) गुणसमूहरूपी धागों से निर्मित एवं मानसरोवर के जल के समान जल से धुले हुए अतएव पवित्र-द्वितीय वार्धक्यजाल प्रतीत होने वाले दुकूल (रेशमी वस्त्र) सदृश वल्कल वस्त्र से समावृत थे। जो कि निकटवर्ती गंगा

जल से सन्तृप्त तथा तीन दण्ड (की कालावधि) से बैठे हुए राजहंस से सुशोभित प्रफुल्लित श्वेतकमलराशि के समान निकटवर्ती गंगाजल से परिपूर्ण तथा त्रिपादिका (तिपाई) पर रखे हुए स्फटिक मणिनिर्मित कमण्डलु से सुशोभित हो रहे थे। जो कि स्थैर्यगुण से पर्वतों का, गम्भीर्यगुण से समुद्रों का, प्रताप से सूर्य का, प्रशमन (इन्द्रियनिग्रह) गुण से अर्थात् सौम्यमूर्ति होने के कारण चन्द्रमा का तथा (हृदय की) स्वच्छता से आकाशमण्डल को मानो 'सविभाग'(अर्थात् उनके बराबर का हिस्सा ग्रहण) कर रहे थे।

संस्कृतव्याख्या - **परिणतलतासंचयेन**=परिणतानां पाकमुपगतानां लतानां व्रततीनां संचयेन समूहेन, **निरन्तरनिचितम्**=निरन्तरं सान्द्रं यथा स्यात् तथा निचितं वेष्टितं, **जरत्कल्पतरुम् इव**=वृद्धकल्पवृक्षम् इव, **उन्नमता**=उपरिस्फुरता, **शिराजालकेन**=नाडीसमूहेन निरन्तरं व्याप्तम्, **अमलेन**=स्वच्छेन अतएव, **चन्द्रांशुभिः इव**=सुधांशुकिरणैः इव, **अमृतफेनैः इव**=पीयूषडिण्डीरैः इव, **गुणसन्तानतन्तुभिः इव**=गुणानां दयादाक्षिण्यादीनां सन्तानानां समूहाः तेषां तन्तवः सूत्राणि तैः इव, **निर्मितेन**=विरचितेन, **मानसरोजलक्षालनशुचिना**=मानसरसः मानसाख्यसरोवरस्य जलेन उदकेन यत् क्षालनं मलनिराकणं तेन शुचिना निर्मलेन, **दुकूलवल्कलेन**=दुकूलवत् क्षौमवसनवत् सूक्ष्मेन वल्कलेन वृक्षत्वचा सूक्ष्मत्वात् श्वैत्याच्च, **द्वितीयेन**=अपरेण, **जराजालकेन इव**=परिणतावस्थासमूहेन इव जरायाः जालकेन जालाकारेण वस्त्रेण वा, **संछादितम्** =समावृतम्, **राजहंसेन**=हंसानां राजा राजहंसः लोहितचञ्चुचरणः सितोहंसः तेन, **उपशोभमानम्**=विराजमानम्, **विकचपुण्डरीकराशिम्**=विकचानां विकसितानां पुण्डरीकाणां श्वेतकमलानां राशिः संघातः तम् इव, **आसन्नवर्तिना**=आसन्नं निकटं वर्तते इति तच्छीलः तेन समीपवर्तिना, **मंदाकिनीसलिलपूर्णेन**=गंगाजलसंभृतेन, **त्रिदण्डोपविष्टेन**=त्रयो दण्डाः सन्ति अस्येति त्रिदण्डः-त्रिपादिका तत्र उपविष्टेन स्थितेन, **स्फाटिककमण्डलुना**= स्फटिकस्य अयं स्फाटिकः स चासौ कमण्डलुः तेन-स्फटिकमणिमयकुण्डया उपशोभमानम्, **स्थैर्येण**=स्थिरतया, **अचलानाम्**=गिरीणाम्, **गाम्भीर्येण**=गम्भीरतया, **सागराणाम्**=समुद्राणाम्, **तेजसा**=प्रतापेन, **सवितुः**=दिनकरस्य, **प्रशमेन**=शान्त्या, **तुषाररश्मेः**=तुषारः हिमं तद्वत् रश्मयः किरणाः यस्य तस्य हिमांशोः, **निर्मलतया**= स्वच्छतया, **अम्बरतलस्य**=गगनतलस्य, **संविभागम्**=संविभाजनं, **कुर्वाणाम्**= विदधानम्।

टिप्पणी - **निचित**-अभिव्याप्त। **दुकूलवल्कल**-रेशमी वस्त्र के समान महीन

छाल का वस्त्र। **जराजालक**-बुढ़ापे का समूह। **त्रिदण्ड**-तीन डण्डों को ऊपर से बाँधकर खड़ी की गयी तिपाही जिस पर कमण्डलु रखा था। **उपशोभमानम्**- उप+शुभ्+शानच्। **संविभागमिव**-मानो वितरण-सा दान-सा। 'पुण्डरीकराशिमिव, में उपमालङ्कार है। 'कुर्वाणमिव में क्रियोत्प्रेक्षा अलङ्कार है।

वैनतेयमिव स्वप्रभावोपात्तद्विजाधिपत्यम्, कमलासनमिवाश्रमगुरुम्, जरच्चन्दनतरुमिव भुजङ्गनिर्मोकधवलजटाकुलम्, प्रशस्तवारणपतिमिव प्रलम्बकर्णबालम्, बृहस्पतिमिवाजन्मसंवर्धितकचम्, दिवसमिवोद्यदर्कबिम्ब-भास्वरमुखम्, शरत्कालमिव क्षीणवर्षम्, शान्तनुमिव प्रियसत्यव्रतम्, अम्बिकाकरतलमिव रुद्राक्षग्रहणनिपुणमिव, शिशिरसमयरसूर्यमिव कृतोत्तरासङ्गम्, वडवानमिव संततपयोभक्षम्, शून्यनगरमिव दीनानाथविपन्न-शरणम्, पशुपतिमिव भस्मपाण्डुरोमाश्लिष्टशरीरं भगवन्तं जाबालिमपश्यम्।

हिन्दी अनुवाद - जो अपने प्रभाव (पराक्रम) से समस्त 'द्विजों' अर्थात् पक्षियों का स्वामित्व प्राप्त करने वाले विनतानन्दन गरुड की भाँति अपने (तपः) प्रभाव से समस्त ब्राह्मणों का प्रभुत्व प्राप्त कर चुके थे। जो ब्रह्मचर्य, गार्हस्थ्य, वानप्रस्थ एवं संन्यास वर्णाश्रमों के प्रवर्तक कमलासन-ब्रह्मा की भाँति आश्रम (तपोवन) के गुरु थे। जो सर्पकञ्चुकों के कारण धवलभूत मूलभागों से परिव्याप्त पुराने चन्दनतरु की भाँति सर्पकञ्चुकी जैसी श्वेत जटाओं से संकुल थे। जो अत्यधिक लम्बे कानों तथा (पूँछ के) बालों वाले सर्वलक्षणोपेत गजराज की भाँति लम्बे कर्णकेशों वाले थे। जो जन्मकाल से ही (अपने पुत्र) कुमार कच का संवर्धन अर्थात् पालन-पोषण करने वाले, देवगुरु बृहस्पति की भाँति जन्मकाल से ही केश बढ़ाये हुय थे। जो उदीयमान सूर्यमण्डल के कारण देदीप्यमान मुखभाग (अर्थात् प्रभातवेला) वाले दिन की भाँति उदीयमान रविबिम्ब के समान कान्तिमान मुखवाले थे। जो स्वल्प जलवृष्टि वाले शरत्काल की भाँति बीते हुए वर्षों वाले अर्थात् अत्यन्त वृद्ध थे। जो वल्लभभूत (मनपसन्द) सत्यव्रत-भीष्म वाले (उनके पिता महाराज) शान्तनु की भाँति सत्यरूपी व्रत के पक्षधर थे। जो (रतिवेला में अपरिहार्य चन्द्रकला के कारण) भगवान् शंकर के नेत्र उपहित कर देने में चतुर देवी पार्वती के करतल की भाँति रुद्राक्षमाला ग्रहण करने (फेरने) में प्रवीण थे। जो उत्तर दिशा का 'आसङ्ग' (आश्रय) लेने वाले अर्थात् उत्तरायणभूत शीतकालीन सूर्य की भाँति उत्तरीय वस्त्र धारण किये थे। जो निरन्तर (सागर) जल का भक्षण करने वाले वाडवाग्नि की भाँति निरन्तर दुग्धाहारी थे। जो दीन (शोभाहीन)

अनाथ स्वामिहीन एवं विपन्न (विपत्तिग्रस्त) शरणों (घरों) वाले सूनसान उजड़े नगर की भाँति दु:खियों, अनाथों एवं (व्याधि आदि से) विपत्तिग्रस्तों के परित्राण हेतु थे। जो भस्म (मलने) के कारण धवलभूत तथा देवी पार्वती द्वारा आलिङ्गित शरीर वाले पशुपति भगवान् शंकर की भाँति भस्म जैसे श्वेत रोम समूह से संकुल शरीर वाले थे।

संस्कृत व्याख्या –**वैनतेयम् इव**=गरुडम् इव, **स्वप्रभावोपात्तद्विजाधिपत्यम्**= स्वस्य आत्मन: प्रभावेण उपात्तं अर्जितं द्विजानां ब्रह्मणानाम् आधिपत्यं स्वामित्वं येन स तं तादृश्, वैनतेयपक्षे स्वप्रभावेण उपात्तं द्विजानां पक्षिणाम् आधिपत्यं येनं स तादृशम्, **कमलासनं**=कमलम् आसनं यस्य स: ब्रह्मा तम् इव **आश्रमगुरुम्**= आश्रमस्य तपोभूमे: गुरुम् आचार्यम्, कमलासनपक्षे आश्रमाणां ब्रह्मचर्यादीनां गुरु: नियामकम्, **जरच्चन्दनतरुम् इव**=जरन् पुरातन: य: चन्दनतरु: मलयजपादप: तम् इव, **भुजङ्ग–निर्मोकधवलजटाकुलम्**=भुजङ्गानां सर्पाणां निर्मोका: कञ्चुका: तद्वत् धवलाभि: श्वेताभि: जटाभि: सटाभि: आकुलं व्याप्तम्, चन्दनतरुपक्षे भुजङ्गनिर्मोकै: धवला: श्वेता: जटा: वृक्षमूलानि ताभि: आकुलं अभिव्याप्तम्, **प्रशस्तवारणपति इव**=प्रशस्त: प्रख्यात: य: वारणपति: गजेन्द्र: तम् इव, **प्रलम्बकर्षबालं**=प्रलम्बा:, दीर्घा: कर्णयो: श्रोत्रे बाला: पुच्छकेशाश्च यस्य तम्, **बृहस्पतिम् इव**=सुरगुरुम् इव, **आजन्मसंवर्धितकचम्**=आजन्मन: जीवनधारणा-दारभ्य संवर्धिता: क्षौराभावात् वृद्धिं प्रापिता: कचा: बाला: येन स: तम्, बृहस्पतिपक्षे, **आजन्मन**:=संवर्धित: पोषित: कच: एतदाख्य: स्वपुत्र: येन तम्, **दिवसम् इव**=दिनम् इव, **उद्यदर्कबिम्बभास्वरमुखम्**=उद्यत् उद्गच्छत् यत् अर्कबिम्बं रविमण्डलं तद्वत् भास्वरं तेजस्वि मुखं लपनं यस्य तम् तादृशम्, दिवसपक्षे उद्यता उद्गच्छता अर्कबिम्बेन भास्वरं प्रभाशीलं मुखम् आद्यभागो यस्य स तं तादृशम्, **शरत्कालम् इव**=शरत्समयम् इव, **क्षीणवर्षम्**= क्षीणानि वर्षाणि वयस: हायनानि यस्य स तम्, **शान्तनुम् इव**=भीष्मपितरम् इव, **प्रियसत्यव्रतम्**=प्रियं प्रीतिदायकं सत्यस्य सत्याचरणस्य व्रतं नियम: यस्य तम्, शान्तनुपक्षे प्रिय: प्रेमास्पदं सत्यव्रत: एतन्नामा स्वुपत्र: भीष्म इत्याशय: यस्य तम्, **अम्बिकाकरतलम् इव**=अम्बिका पार्वती तस्या: करतलम् इव पाणितलम् इव, **रुद्राक्षग्रहणनिपुणम्**=रुद्राक्षस्य रुद्राक्षबीजस्य, ग्रहणे दयदाने निपुणं चतुरम्, अम्बिकाकरतलपक्षे रुद्रस्य अक्षीणि रुद्राक्षा: शिवनेत्रत्रयं तस्य ग्रहणे क्रीडायां विधाने कुशलम्, **शिशिरसमयसूर्यम् इव**=शिशिरसमयस्य शिशिरकालस्य सूर्यम् इव दिनकरम् इव, **कृतोत्तरासङ्गम्**=कृत: उत्तरासङ्ग:

उत्तरीयवसनं स्कन्धभागे येन तम्, **सूर्यपक्षे कृतः विहितः उत्तरस्याः दिशि कौबेराशायाः आसङ्गः संसर्गः येन तम्, वडवानल इव**=वडवा अश्वा तदाकारः अग्निः वडवाग्निः समुद्रानलः तम् इव, **संततपयोभक्षं**=संततं पयः क्षीरं भक्षः भोजनं यस्य तम्, वडवानलपक्षे संततं पयः समुद्रजलं भक्षः यस्य तम्, **शून्यनगरं इव**=विजनं पुरम् इव, **दीनानाथविपन्नशरणम्**=दीनानां दुर्गतानाम् अनाथानां अस्वामिकानां विपन्नानां विपत्तिग्रस्तानां शरणं रक्षकम् शून्यनगरपक्षे दीनानि शोभारहितानि अनाथानि स्वामि-शून्यानि विपन्नानि नष्टानि शरणानि गृहाणि यत्र तत् तादृशम्, **पशुपतिम् इव**=शिवम् इव, **भस्मपाण्डुरोमाश्लिष्टशरीरम्**=भस्मना भूतिलेपनेन पाण्डूनि श्वेतवर्णानि यानि रोमाणि लोमानि तैः आश्लिष्टं संसक्तं शरीरं वपुः यस्य तं तादृशम्, पशुपतिपक्षे भस्मना पाण्डुरं श्वेतम् उमया पार्वत्या आश्लिष्टं सम्पृक्तं च शरीरं यस्य तं तादृशम्, **भगवन्तम् जाबालिम्**=एतदाख्यं मुनिराजम्, **अपश्यम्**=अद्राक्षम्।

टिप्पणी - **वैनतेय**-विनता+ढक्=वैनतेय। **आधिपत्यम्**=अधिपति+ष्यञ्। 'गरुत्मान् गरुडस्तार्क्ष्यो, वैनतेयः खगेश्वरः' इत्यमरः। **'शान्तनु...प्रियसत्यव्रतं**= चन्द्रवंशी राजा प्रतीप के पुत्र शान्तनु अपने पुत्र सत्यव्रत से अत्यन्त प्रेम करते थे। निषाद द्वारा अपनी पुत्री सत्यवती के विवाह के लिए उसके गर्भ से उत्पन्न पुत्र को ही राजगद्दी देने का प्रस्ताव रखने पर इन्होंने सुतस्नेह के कारण ही उसे ठुकरा दिया था और बाद में भीष्म द्वारा सत्यवती अर्पित किये जाने पर इन्होंने पुत्र प्रेम प्रदर्शित करते हुए भी भीष्म को स्वच्छन्द मृत्यु का वरदान दिया था। जाबालि भी सत्य के व्रत से प्रेम करने वाले हैं। **उत्तरासङ्ग**-उत्तरीय वस्त्र, जिसे शरीर के ऊपरी भाग पर धारण किया जाता है। 'उत्तरस्मिन् देहभागे आसज्यते इति उत्तराङ्गः' उत्तर दिशा से संसर्ग, शिशिर ऋतु में मकर की संक्रान्ति आने पर सूर्य उत्तरायण में पहुँच जाते हैं। **वडवानल**-पौराणिक मान्यता के अनुसार समुद्रस्थित वडवा (घोड़ी) के मुख की अग्नि को वडवाग्नि या वडवानल कहा जाता है। अश्विनी नामक अप्सरा ने वडवा का रूप धारण करके सूर्य के द्वारा गर्भ को धारण किया था। **शरण**-रक्षक, 'शरणं गृहरक्षित्रोः' इत्यमरः। '**वैनतेयमिव**' से 'पशुपतिमिव' तक....पूर्णोपमालङ्कार है। **'जरच्चन्दनः....कुलम्'** यहाँ लुप्तोपमा तथा पूर्णोपमा का सङ्कर है।

अवलोक्य चाहमचिन्तयम्-अहो प्रभावस्तपसाम्। इयमस्य शान्तापि मूर्तिरुत्तप्तकनकावदाता परिस्फुरन्ती सौदामिनीव चक्षुषः प्रतिहन्ति तेजांसि, सततमुदासीनापि महाप्रभावतया भयमिवोपजनयति प्रथमोपगतस्य। शुष्कन-लकाशकुसुमनिपतितानलचटुलवृत्ति नित्यमसहिष्णु तपस्विनां तनुतपसामपि

तेजः प्रकृत्या दुःसहं भवति, किमुत सकलभुवनतलवन्दितचरणानामनवरतपः क्षपितमलानां करतलामलकवदखिलं जगदालोकयतां दिव्येन चक्षुषा भगवतामेवंविधानामघक्षयकारिणां। पुण्यानि हि नामग्रहणान्यपि महामुनीनाम्, किं पुनर्दर्शनानि।

हिन्दी अनुवाद - (महर्षि जाबालि को) देखकर मैंने सोचा-तपश्चर्या का माहात्म्य आश्चर्य का विषय है! (तभी तो) दहकते सोने की भाँति निर्मल इन (महर्षि जाबालि) की मूर्ति (शरीर) शान्त होती हुई भी, दमकती हुई बिजली की भाँति आँखों की ज्योति को चकाचौंध किये दे रही है, निरन्तर उदसीन होती हुई भी महाप्रतापशालिनी होने के कारण नवागन्तुक के लिए भय-सा उत्पन्न कर देती है। स्वल्प तपश्चर्यावाले भी तपोधनियों का सूखे हुए नरकुल एवं कास के फूलों पर गिरे हुये अग्नि की चञ्चलवृत्ति (अर्थात् तत्काल प्रसरणशील होना) के समान चञ्चलवृत्ति बाल-तपस्तेज स्वभावतः निरन्तर असहनशील होता है, तब फिर इस प्रकार के महात्माओं का क्या कहना जो कि समस्त भूमण्डल द्वारा समर्चित किये गए चरणों वाले हैं, जो निरन्तर तपश्चर्या रूप जल से धुले हुए पापों वाले हैं, जो दिव्य दृष्टि से कमल सरीखी हथेली पर रखे हुए आमलक फल (आँवले) की भाँति समस्त संसार को देखने वाले हैं और जो पापों का विनाश करने वाले हैं, क्योंकि महामुनियों का (तो) नामोच्चारण मात्र भी पुण्यजनक होता है फिर (उनके प्रत्यक्ष) दर्शन का क्या कहना?

संस्कृतव्याख्या - **अवलोक्य**=प्रेक्ष्य च, **अहम्**=वैशम्पायनः, **अचिन्तयम्**=व्यचारयम्, **अहो**=महदाश्चर्यम्, **तपसाम्**=तपश्चर्याणाम्, **प्रभावः**=माहात्म्यम्, **अस्य**=मुनेः, **इयं**=पुरो दृश्यमाना, **शान्ता अपि**=शान्तिसम्पन्ना अपि, **मूर्तिः**=स्वरूपम्, **उत्तप्तकनकावदाता**=उत् प्राबल्येन तप्तम् उष्णीकृतं यत् कनकं काञ्चनं तद्वत् अवदाता निर्मला सती, **परिस्फुरन्ती**=संचरन्ता, **सौदामिनी इव**=तडित् इव, **चक्षुषः**=दृष्टेः, **तेजांसि**=ज्योतींषि, **प्रतिहन्ति**=प्रतिरुणद्धि, **सततं**=अजस्रम्, **उदासीना अपि**=निरपेक्षा अपि, **महाप्रभावतया**=महनीयप्रभावशालितया, **प्रथमोपगतस्य**=प्रथमम् उपगतः तस्य प्रथमवारं आगतस्य, **भयं इव**= साध्वसम् इव, **उपजनयति**=उत्पादयति, **यदा तनुतपसाम्**=तनु स्वल्पं तपः तपश्चरणं येषां तेषां तपस्विनाम् तापसानाम् अपि, **तेजः**=प्रतापः, **शुष्कनलकाशकुसुमनिपतितानलचटुलवृत्ति**=शुष्केषु विरसेषु नलेषु नडाख्यतृणेषु काशकुसुमेषु काशपुष्पेषु च निपतितः यः अनलः वह्निः तद्वत् चटुला चपला वृत्तिः व्यापारो यस्य तादृशम्, **प्रकृत्या**=स्वभावेन,

नित्यं=सततम्, **असहिष्णु**=असहनशीलम्, **किमतु**=किं पुनः, **सकलभुवनतल-वन्दितचरणानाम्**=सकलेन समस्तेन भुवनतलेन जगता वन्दितौ पूजितौ चरणौ पादौ येषां तेषाम्, **अनवरततपःक्षपितमलानां**=अनवरतं सततं यत् तपः तपस्या तेन क्षपितं नाशितं मलं दुंष्कृतं यैः तेषाम्, **दिव्येन**=अलौकिकेन, **चक्षुषा**=दृष्ट्या, **अखिलम्**=समस्तम्, **जगत्**=भुवनतलम्, **करतलामलकवत्**=करतले पाणितले यः आमलकः धात्रीफलं तद्वत्, **आलोकयतां**=पश्यताम्, **एवंविधानां**=ईदृशानाम्, **अघक्षयकारिणां**=अघानां पापानां क्षयं विनाशं कुर्वन्तीति तच्छीलाः, तेषां तादृशाम्, **भगवताम्**=ऐश्वर्यादिमताम्, **हि**=निश्चयेन, **महामुनीनां**=महर्षीणाम्, **नामग्रहणानि अपि** =अभिधानोच्चारणानि अपि, **पुण्यानि**=सुकृतजनकानि, **किं पुनः**=किं वक्तव्यम्, **दर्शनानि**=तेषां साक्षात्काराः।

टिप्पणी - **अवलोक्य**-अव+लोक्+क्त्वा-ल्यप्। **अचिन्तयम्**-चिन्त् धातु लङ् उ० पु० ए० व०। **सौदामिनी**-बिजली, सुदामा मेघ से उत्पन्न होने वाली। 'सुदामा तु पुमान् वारिधरपर्वतभेदयोः'। ''तडित्सौदामिनी विद्युच्चञ्चला चपला अपि'' इत्यमरः। **दिव्येन**-अलौकिक, दिव+यत्-दिव्य तृ० ए० व०। 'उत्तप्त-कनकावदाता' में लुप्तोपमा तथा 'उपजनयतीव' में क्रियोत्प्रेक्षा है।

धन्यमिदमाश्रमपदमयमधिपतिर्यत्र। अथवा भुवनतलमेव धन्यमखिलमनेनाधिष्ठितमवनितलकमलयोनिना। पुण्यभाजः खल्वमी मुनयो यदहर्निशमेनमपरमिव नलिनासनमपगतान्यव्यापारा मुखावलोकननिश्चलदृष्टयः पुण्याः कथाः श्रृण्वन्तः समुपासते। सरस्वत्यपि धन्या यास्य तु सततमतिप्रसन्ने करुणाजलनिस्यन्दिन्यगाधगाम्भीर्ये रुचिरद्विजपरिवारा मुखकमलसम्पर्कसुखमनुभवन्ती निवसति राजहंसीव मानसे चतुर्मुखकमलवासिभिश्चतुर्वेदैः सुचिरादिव द्वितीयमिदमासादितं स्थानम्। एनमासाद्य शरत्कालमिव कलिकाल-जलधरसमयकलुषिताः प्रसादमुपगताः पुनरपि जगति सरित इव सर्वविद्याः।

हिन्दी अनुवाद - धन्य है यह आश्रमस्थान जिसमें ये (महर्षि जाबालि) अधिपति हैं। अथवा पृथ्वीतल के कमलयोनि ब्रह्मा इन (महर्षि जाबालि) से सम्पूर्ण भूमण्डल ही धन्य है। निश्चय ही पुण्यभागी हैं ये मुनिगण जो कि इतरेतर कार्यों को छोड़कर, इन (महर्षि जाबालि) के मुखावलोकन के कारण अपलक चितवन वाले होकर पवित्र कथाएँ सुनते हुए द्वितीए ब्रह्मा प्रतीत होने वाले इन (जाबालि) की सेवा करते हैं। सरस्वती भी धन्य है जो कि मनोहर (शिष्यभूत) द्विजों-ब्राह्मणों से परिवृत होकर तथा (महर्षि जाबालि के) मुखरूपी कमल के

साहचर्य-सुख का अनुभव करती हुई-निरन्तर अतिशय प्रसादगुणसम्पन्न, करुणारूपी जल का निस्यन्दन (टपकाव) करने वाले तथा अथाह गम्भीरता वाले मानस (मन) में उसीप्रकार निवास करती हैं जैसे मनोहर 'द्विज' अर्थात् पक्षियों के परिवार वाली तथा (भक्षणार्थ) मुख में रखे गये कमल के सम्पर्क सुख का अनुभव करती हुई राजहंसिनी-अत्यन्त निर्मल, करुणासदृश जल को प्रवाहित करने वाले तथा अतलस्पर्शी गहराई वाले मानसरोवर में निवास करती है।

चतुर्मुख ब्रह्मा के मुख कमलों में निवास करने वाले चारों वेदों ने मानो बहुत दिनों बाद (रहने योग्य महर्षि जाबालि के मुखरूपी) इस द्वितीय स्थान को प्राप्त कर लिया है। संसार कलिकाल सदृश वर्षा ऋतु के कारण मलिनता को प्राप्त तथा शरत्काल को प्राप्त पुनः (जल की) निर्मलता से युक्त नदियों की भाँति पावसऋतु सरीखे कलियुग के सम्पर्क से कलुषित समस्त (१४ हों) विद्याएँ इन (महर्षि जाबालि) को प्राप्त कर निर्दोष बन गईं।

संस्कृतव्याख्या - **इदम्**=प्रत्यक्षम्, **आश्रमपदम्**=ऋषिजनस्थानम्, **धन्यम्**=कृत्यकृत्यम्, **यत्र**=यस्मिन् आश्रमे, **अयम्**=एष जाबालिः, **अधिपतिः**=अध्यक्षः, **अथवा**=यद्वा, **अवनितलकमलयोनिना**=अवनितलस्य भूतलस्य कमलयोनिः ब्रह्मा तेन तत्सदृशेन इत्यर्थः, **अनेन**=महामुनिना, **अधिष्ठितम्**= आश्रितम्, **अखिलम्**=समस्तम्, **भुवनतलम् एव**=धरातलम् एव, **धन्यम्**=कृतकृत्यम्, **खलु**=निश्चयेन, **अमी**=आश्रमनिवासिनः, **मुनयः**=ऋषयः, **पुण्यभाजः**=पुण्यं भजन्ते इति पुण्यभाजः सुकृतवन्तः, **यत्**=यस्मात् कारणात्, **अपगतान्यव्यापाराः**=अपगताः दूरीभूताः अन्ये एतत्सेवातिरिक्ताः व्यापाराः कर्माणि येषां ते तादृशाः, **मुखावलोकन-निश्चलदृष्टयः**=मुखस्य लपनस्य अवलोकने दर्शने निश्चला निर्निमेषा दृष्टिः नेत्रवृत्तिः येषां ते तादृशाः मुनयः, **पुण्याः**=सुकृतभाजः, **कथाः**=कथानकानि, **श्रृण्वन्तः**=आकर्णयन्तः, **अपरम्**=द्वितीयम्, **नालिनासनम् इव**=कमलासनम् ब्रह्माणम् इव, **अहर्निशम्**=रात्रिन्दिवम्, **समुपासते**=सेवन्ते, **तु**=पुनरर्थे, **सरस्वती अपि**=भारती अपि, **धन्या**=श्लाघनीया, **या अस्य**=महर्षेः, **अतिप्रसन्ने**=अत्यन्तप्रसादगुणयुक्ते, पक्षे अतिस्वच्छे, **करुणाजलनिस्यन्दिनि**=करुणा परदुःखनाशेच्छा सा एव जलं सलिलं तत् निस्यन्दयतीति स्रावयतीति तच्छीलं तस्मिन्, पक्षे करुणा इव जलं करुणाजलं तस्य निस्यन्दिनि, **अगाधगाम्भीर्ये**=अगाधम् इयत्ताशून्यं गाम्भीर्यं दुःखगाहस्वभावत्वं यस्य तादृशे, पक्षे अगाधम् अतलस्पर्शं गाम्भीर्यं गम्भीरता यस्य तादृशे, **मानसे**=चित्ते, पक्षे मानसरोवरे, **राजहंसी इव**=लोहितचञ्चुचरणा सितवर्णा मराली इव, **रुचिरद्विज**-

परिवारा=रुचिराः तेजस्विनः द्विजाः शिष्यभूताः ब्राह्मणाः एव परिवारः परिजनः यस्या पक्षे रुचिराः सुन्दराः द्विजाः पक्षिणः एव परिवारः यस्या सा तादृशी, **मुखकमलसम्पर्कसुखम्**=मुखं वदनं कमलं नलिनं इव मुखकमलं तस्य सम्पर्कः संस्पर्शः तस्य सुखम्, पक्षे मुखे यत् कमलं तस्य संपर्कसुखम्, **अनुभवन्ती**= आस्वादमाना, **सततम्**=सर्वदा, **निवसति**=वासं कुरुते, **चतुर्मुखकमलवासिभिः**= चत्वारि चतुः संख्यकानि मुखानि वदनानि, यस्य सः चतुर्मुखः प्रजापतिः तस्य मुखकमलेषु वसन्ति वासं कुर्वन्तीति तच्छीलाः तैः, **चतुर्वेदैः**=चत्वारश्च ते वेदाः चतुर्वेदाः, **तैः**=ऋग्यजुः सामाथर्वसंज्ञकैः, **सुचिरात्**=चिरकालात्, **इव**=उत्प्रेक्षाव्यञ्जकमिदम्, **इदम्**=एतत् मुनिमुखरूपम्, **द्वितीयम्**=अपरम्, **स्थानम्**=निवासस्थलम्, **आसादितम्**=प्राप्तम्, **एनम्**=महामुनिजाबालिम्, **आसाद्य**=लब्ध्वा, **कलिकालजलधरसमयकलुषिताः**=कलिकालः कलियुगः जलधरसमयः इव वर्षासमयः इव तेन कलुषिताः दूषिताः, सरित्पक्षे कलिकालः इव जलधरसमयः तेन कलुषिताः मलिनीकृताः, **सर्वविद्याः**=चतुर्दशविद्याः, **शरत्कालम्**=शरदृतुम्, **आसाद्य**=लब्ध्वा, **सरितः इव**=नद्यः इव, **जगति**=लोके, **पुनरपि**=भूयोऽपि, **प्रसादम्**=विशदताम्, पक्षे नैर्मल्यम् **उपगताः**=प्राप्ताः।

टिप्पणी – **नलिनासन**–कमल है आसन जिसका ऐसे ब्रह्मा जी। **सरस्वती**–वाणी, वाणी की अधिष्ठात्री देवी। मुनि के मानस में मुखकमल के सम्पर्क सुख का अनुभव करते हुए सरस्वती का निवास बतलाने से यहाँ सरस्वती का वाणी रूप ही इष्ट है। इस अर्थ के अनुरूप 'रुचिरद्विजपरिवारा' पद का यह अर्थ भी हो सकता है कि चमकीली दन्तपङ्क्ति उस वाणी का परिवार है। **द्विज**–ब्राह्मण, दन्त, पक्षी। 'दन्तविप्राण्डजा द्विजाः' इत्यमरः। **सर्वविद्याः**–चौदह विद्यायें, समस्त विद्यायें (अङ्गानि वेदाश्चत्वारो मीमांसा न्यायविस्तरः। धर्मशास्त्रं पुराणं च विद्या ह्येताश्चतुर्दश।) कोई लोग चौदह विद्याओं में चार बढ़ाकर अष्टादश विद्यायें बतलाते हैं–"आयुर्वेदो धनुर्वेदो गान्धर्वश्चेति ते त्रयः। अर्थशास्त्रं चतुर्थं तु विद्या ह्यष्टादशैव तु॥" **अवनित-लकमलयोनिना' में निरङ्ग केवल रूपक है। 'नलिनासनमिव' में द्रव्योत्प्रेक्षा, 'हंसीव' में पूर्णोपमालङ्कार तथा 'सुचिरादिव'** में गुणोत्प्रेक्षा है।

नियतमिह सर्वात्मना कृतावस्थितिना भगवता परिभूतकलिकालविल-सितेन धर्मेण न स्मर्यते कृतयुगस्य। धरणितलमनेनाधिष्ठितमालोक्य न वहति नूनमिदानीं सप्तर्षिमण्डलनिवासाभिमानमम्बरतलम्। अहो! महासत्त्वेयं जरा यास्य प्रलयरविरश्मिनिकरदुर्निरीक्ष्ये रजनिकरकिरणपाण्डुशिरोरुहे जटाभारे

फेनपुञ्जधवला गङ्गेव पशुपतेः क्षीराहुतिरिव शिखाकलापे विभावसोर्निपतन्ती न भीता। बहलाज्यधूमपटलमलिनीकृताश्रमस्य भगवतः प्रभावाद् भीतमिव रविकिरणजालमपि दूरतः परिहरति तपोवनम्। एते च पवनलोलपुञ्जीकृतशि-खाकलापा रचिताञ्जलय इवात्र मन्त्रपूतानि हवींषि गृह्णन्त्येतत्प्रीत्याशुशुक्षणयः। तरलितदुकूलवल्कलोऽयं चाश्रमलताकुसुमसुरभिपरिमलो मन्दमन्दसंचारी सशङ्क इवास्य समीपमुपसर्पति गन्धवाहः।

हिन्दी अनुवाद - निश्चित ही इस आश्रम में सर्वतोभावेन आश्रम बनाये हुए तथा कलिकाल की समस्त (हीन) चेष्टाओं को न्यग्भूत (तिरस्कृत) कर देने वाले भगवान् धर्मदेव सत्ययुग का स्मरण नहीं करते हैं। भूतल को इन (महर्षि जाबालि)से अलंकृत देखकर निश्चय ही अब गगनमण्डल (अपने क्षेत्र में) सप्तर्षि मण्डल के निवास करने के कारण उत्पन्न अभिमान (सुभगम्मन्यता) का वहन नहीं करता है। आश्चर्य! (इनकी) यह वृद्धावस्था बड़े जीवट की है जो कि युगान्तकालीन सूर्य के किरण समूह की भाँति देखा न जा सकने योग्य तथा चन्द्रकिरणों के समान धवलवर्ण जटापुञ्ज पर गिरती हुई (उसी प्रकार) संत्रस्त नहीं हुई जैसे फेनराशि के कारण शुभ्रवर्णा गङ्गा भगवान् शङ्कर के जटाकलाप पर तथा दुग्धाहुति अग्निदेवता के शिखाकलाप पर गिरती हुई भयभीत नहीं होती। प्रचुर घृत (की आहुतियों) के धूपसमूह से आश्रम को श्यामवर्ण बना देने वाले भगवान् (जाबालि) के माहात्म्य से मानो संत्रस्त हुए सूर्य किरणों का समूह भी दूर से ही तपोवन को छोड़ देता है। पवन के कारण चञ्चल अतएव ज्वालपुञ्ज को समेटे हुई ये (आहवनीय, दाक्षिणात्य तथा गार्हपत्य) यज्ञाग्नियाँ इन (महर्षि जाबालि) के प्रति प्रीति होने के कारण मानो हाथ जोड़कर मन्त्रशोधित हव्यों को ग्रहण कर रही हैं। दुकूलवल्कलों को झकझोर देने वाला,आश्रमलताओं के पुष्पों के सौरभ से सुवासित तथा धीरे-धीरे सञ्चरण करता हुआ यह पवन मानो सशङ्क होकर महर्षि जाबालि के समीप प्रस्तुत हो रहा है।

संस्कृतव्याख्या - **नियतम्**=सुनिश्चितम्, **इह**=अस्मिने आश्रमे, **सर्वात्मना**= सर्वविधिना, **कृतावस्थितिना**=कृता विहिता अवस्थितिः निवासः येन तेन, **परिभूतकलिकालविलसितेन**=परिभूतानि तिरस्कृतानि कलिकालस्य कलियुगस्य विलसितानि चेष्टितानि येन तेन, **भगवता**-माहात्म्यवता, **धर्मेण**-धर्मराजेण, **कृत-युगस्य**=सत्ययुगस्य, **न स्मर्यते**=न चिन्त्यते, **नूनम्**=नियतम्, **अम्बरतलम्**= आकाशतलम्, **अनेन**=जाबालिना, **अधिष्ठितम्**=आश्रितम्, **धरणितलम्**=भूतलम्,

आलोक्य=विलोक्य, **इदानीम्**=अधुना, **सप्तर्षिमण्डलनिवासाभिमानम्**=सप्त च ते **ऋषयः** सप्तर्षयः तेषां यत् मण्डलं मरीच्यादिसमूहः तस्य यो निवासः अधिष्ठानं तेन यो अभिमानः दर्पः तम्, **न वहति**=न धारयति। **अहो**=आश्चर्यम्, **इयम्** =पुरोदृश्यमाना, **जरा**=वृद्धावस्था, **महासत्त्वा**=महत् सत्त्वं यस्याः साः अत्यन्त-साहसवती, **या अस्य**=मुनेः, **प्रलयरविरश्मिनिकरदुर्निरीक्ष्ये**= प्रलयस्य कल्पान्तस्य ये रविरश्मयः दिनकरकिरणाः तेषां यो निकरः समूहः तद्वत् दुर्निरीक्ष्ये दुःखेन विलोकयितुं शक्ये दुर्दर्शे इत्यर्थः, **रजनिकरकिरणपाण्डुशिरोरुहे**=रजनीं करोति इति रजनिकरः चन्द्रमाः, रजनिकरस्य ये किरणाः मयूखाः तद्वत् पाण्डवः श्वेताः शिरोरुहाः कचाः यस्मिन् तस्मिन्, **जटाभारे**=सटासमूहे, **पशुपतेः**=शिवस्य जटाभारे, **फेनपुञ्जधवला**=फेनपुञ्जेन डिण्डीरसमूहेन धवला उज्ज्वला, **गंगा इव**=भागीरथी **इव, विभावसोः**=अग्नेः, **शिखाकलापे**=ज्वालासमूहे, **क्षीराहुतिः इव**=क्षीरस्य दुग्धस्य **आहुतिः** प्रक्षेपः इव, **निपतन्ती**=पदं निधाना, **न भीता**=न त्रस्ता, **रविकिरणजालम्**= **रवेः सूर्यस्य** किरणानां रश्मीनां जालं समूहः अपि, **बहलाज्यधूमपटलमलिनी-कृताश्रमस्य**=बहलानां निबिडानाम् आज्यधूमानां हविर्धूमानां पटलेन मण्डलेन **मलिनीकृतः** अमलिनः मलिनः कृत इति श्यामीकृतः आश्रमः तपोभूमिः येन तस्य, **भगवतः**=महात्मनः जाबालेः, **प्रभावात्**=प्रतापात्, **भीतम् इव**=त्रस्तम् इव, **तपोवनम्**= **धर्मारण्यम्, दूरतः इव**=दूराद् एव, **परिहरति**=परित्यजति, **अत्र**=आश्रमे, **एते**=वेदीषु **दृश्यमानाः पवनलोलपुञ्जीकृतशिखाकलापाः**=पवनेन समीरेण लोलः चञ्चलः **पुञ्जीकृतः** राशीकृतश्च शिखाकलापः ज्वालासमूहः येषां ते, अतएव च **रचिताञ्जलयः इव**=रचिताः बद्धाः अञ्जलयः निकुब्जपाणियोगाः यैः ते इव, **आशुशुक्षणयः**=वह्नयः **एतत्प्रीत्या**=एतस्य मुनेः प्रीत्या प्रेम्णा, **मन्त्रपूतानि**=मन्त्रैः ऋग्भिः पूतानि पवित्राणि, **हवींषि**=हव्यानि, **गृह्णन्ति**=स्वीकुर्वन्ति, **तरलितदुकूलवल्कलः**=तरलितानि प्रकम्पि-तानि दुकूलवत् क्षौमवसनवत् वल्कलानि वृक्षत्वग्वस्त्राणि येन सः, **आश्रमलताकु-सुमसुरभिपरिमलः**=आश्रमे याः लताः तपोभूमिवल्लर्यः तासां यानि कुसुमानि प्रसूनानि तेषां सुरभिः घ्राणतर्पणः परिमलः गन्धः यस्मिन् सः, **मन्दमन्दसंचारी**=मन्दमन्दं शनैः शनैः संचरति प्रवहति इति तच्छीलः सः तादृशः, **गन्धवाहः**=गन्धं वहतीति सः वायुः, **सशङ्क इव**=शङ्कया सह विद्यमान इव, भीत इव, **अस्य**=मुनेः, **समीपम्**= **अन्तिकम्, उपसर्पति**=उपगच्छति।

टिप्पणी –**अवस्थितिना**–अव+स्था+क्तिन्; तृ० ए० व०। **कृतयुग**–सत्ययुग। **विभावसु**–अग्नि, विभा अर्थात् तेज ही है वसु धन जिसका। **बहल**–अत्यन्त घना,

घुटा हुआ। **आज्य**-घृत हवि 'घृतमाज्यं हविः सर्पिः', इत्यमरः **आशुशुक्षणयः**- अग्नियाँ, आहवनीय, गार्हपत्य, दक्षिण अग्नि। आ समन्तात् शोषितुम् इच्छति- आ+शुष्+सन्+अनि, अभ्यास को द्वित्वा 'गङ्गेव' तथा 'आहुतिरिव' में उपमा, 'भीतमिव', 'रचिताञ्जलयः इव' में क्रियोत्प्रेक्षालङ्कार है। सशङ्क इव में गुणोत्प्रेक्षा है।

प्रायो महाभूतानामपि दुरभिभवानि भवन्ति तेजांसि। सर्वतेजस्विनामयं चाग्रणीः। द्विसूर्यमिवाभाति जगदनेनाधिष्ठितं महात्मना। निष्कम्पेव क्षितिरेतदवष्टम्भात्। एष प्रवाहः करुणारसस्य, संतरणसेतुः संसारसिन्धोः, आधारः क्षमाम्भसाम्, परशुस्तृष्णालतागहनस्य, सागरः सन्तोषामृतरसस्य, उपदेष्टा सिद्धिमार्गस्य, अस्तगिरिरसद्ग्रहस्य, मूलमुपशमतरोः, नाभिः प्रज्ञाचक्रस्य, स्थितिवंशो धर्मध्वजस्य, तीर्थं सर्वविद्यावताराणाम्, वडवानलो लोभार्णवस्य, निकषोपलः शास्त्ररत्नानाम्, दावानलो रागपल्लवस्य, महामन्त्रः क्रोधभुजङ्गस्य, दिवसकरो मोहान्धकारस्य, अर्गलाबन्धो नरकद्वाराणाम्, कुलभवनमाचाराणाम्, आयतनं मङ्गलानाम् अभूमिर्मदविकाराणाम्, दर्शकः सत्पथानाम्, उत्पत्तिः साधुतायाः, नेमिरुत्साहचक्रस्य, आश्रयः सत्त्वस्य, प्रतिपक्षः कलिकालस्य, कोशस्तपसः, सखा सत्यस्य, क्षेत्रमार्जवस्य, प्रभवः पुण्यसंचयस्य, अदत्तावकाशो मत्सरस्य, अरातिर्विपत्तेः, अस्थानं परिभूतेः अननुकूलोऽभिमानस्य, असंमतो दैन्यस्य, अनायत्तो रोषस्य, अनभिमुखः सुखानाम्।

हिन्दी अनुवाद - प्रायः (पृथ्वी आदि) महाभूतों अथवा महाप्राणियों के भी तेज अतिक्रमण करने योग्य नहीं होते हैं और ये (महर्षि जाबालि तो) समस्त तेजस्वियों में अग्रणी (प्रधान, अगुवा) हैं। इन महापुरुष से समलङ्कृत यह भूतल दो सूर्यों से संवलित प्रतीत होता है, इनके अवलम्बन से पृथ्वी मानो सुस्थिर है। ये कारुण्यरस के प्रवाह हैं, संसार रूपी सागर का सन्तरण करने के लिये सेतुबन्ध (पुल)सदृश हैं, क्षमारूपी जलराशि के आधार हैं, तृष्णारूपीलतावन के (विनाशार्थ) कुठार हैं, सन्तोष रूपी अमृत द्रव के सागर हैं, मोक्षपथ के उपदेशक हैं, अनिष्टकारी ग्रह के अस्ताचल (विलयबिन्दु) हैं, शान्तितरु के मूल हैं, प्रतिभाचक्र के केन्द्र बिन्दु हैं, सुकृतपताका के धारक वंशदण्ड हैं, समस्त विद्याओं में उतरने (प्रवेश करने) के लिए 'तीर्थ' अर्थात् घाट हैं, लोभरूपी समुद्र की (शोषक) वाडवाग्नि हैं, शास्त्ररूपी रत्नों के (परीक्षणार्थ) निकषभूत पाषाणखण्ड हैं, वासनारूपी नई कोपल के दावानल हैं, क्रोधरूपी भुजङ्ग के (वशीभूत कर लेने वाले) महामन्त्र हैं, अज्ञानरूपी अन्धकार के (अपसारक) सूर्य हैं, नरकद्वारों के (अवरोधक)

अर्गलबन्ध (सिटकनी या कुण्डी) हैं, शुभाचरणों के मूलगृह हैं, कल्याण के मन्दिर हैं, अहंकारजनित वृत्तियों के ऊपर क्षेत्र हैं, शोभनमार्गों के उपदेष्टा हैं, सज्जनता के उद्गम बिन्दु हैं, उत्साहरूपी चक्र (पहिये) की नेमि (तीली या परिधि) हैं, सत्त्व (धैर्य) के आधार हैं, कलियुग के शत्रु हैं, तपश्चर्या के भण्डारागार हैं, सत्य के मित्र हैं, मृदुता अथवा सरलता के क्षेत्र (सस्योत्पत्तिस्थल) हैं, धर्मसमूह के उत्पत्तिस्थल हैं, ईर्ष्याभाव को अवकाश (बढ़ावा) न देने वाले हैं, विपत्ति के शत्रु हैं, पराभव के अपात्र हैं, अहङ्कार के अहितकर हैं, दीनता से असहमत हैं, क्रोध के वशीभूत नहीं हैं, तथा सुखों की ओर अभिमुख नहीं हैं।

संस्कृतव्याख्या - **प्रायः**=बाहुल्येन, **महाभूतानाम् अपि**=महाजन्तूनामपि, **तेजांसि**=महांसि, **दूरभिभवानि**=दुःखेन कठिनतया अभिभवितुं न्यक्कर्त्तुं योग्यानि दुर्धर्षाणि इत्यर्थः, **भवन्ति**=वर्तन्ते, **च**=पुनरर्थे, **अयम्**=एषः महात्मा जाबालिः, **सर्वतेजस्विनाम्**=अखिलधामवताम्, **अग्रणीः**=नेता, **अनेन**=एतेन, **महात्मना**=तपस्विना, **अधिष्ठितम्**=आश्रितम्, **जगत्**=भुवनम्, **द्विसूर्यम् इव**=द्वौ उभौ सूर्यौ दिनकरौ यत्र तादृशम् इव, **आभाति**=प्रतीयते, **एतदवष्टम्भाद् इव**=एतस्य मुनेः अवष्टम्भः आश्रयः तस्मादिव, **क्षितिः**=धरा, **निष्कम्पा**=निर्गता कम्पात् निष्कम्पा- निश्चला, **एषः**=अयं मुनिः, **करुणरसस्य**=दयासलिलस्य, **प्रवाहः**=स्रोतः, **संसारसिन्धोः**=संसारः जगत् एव सिन्धुः समुद्रः तस्य, **सन्तरणसेतुः**=संतरणाय पारगमनायसेतुः उत्तरणम्, **क्षमाम्भसाम्**=क्षमा सहनशीलता एव अम्भांसि सलिलानि तेषाम्, **आधारः**=आशयः, **तृष्णालतागहनस्य**=तृष्णा विषयलिप्सा लताः वल्लयः तासां गहनस्य विपिनस्य, **कर्तनाय परशुः**=कुठारः, **सन्तोषामृतरसस्य**=संतोषः तृप्तिः स एव, **अमृतरसः**=पीयूषरसः तस्य, **सागरः**=समुद्रः, **सिद्धिमार्गस्य**=सिद्धिः अणिमादिसिद्धिः तस्याः मार्गः पन्था तस्य, **उपदेष्टा**=उपेदशकः, **असद्ग्रहस्य**=न सत् असत् दुष्टतां तदेव ग्रहः शनैश्चरप्रभृतिः तस्य अथवा असद्ग्रहः दुराग्रहः स एव असद्ग्रहः अशुभग्रहः शनिसदृशः तस्य, **अन्तगिरिः**=अस्ताचलः, **उपशमतरोः**=उपशमः शान्तिः स एव तरुः पादपः तस्य, **मूलम्**=हेतुः, **प्रज्ञाचक्रस्य**=प्रज्ञा प्रज्ञानम् एव चक्रं रथाङ्गम्, **नाभिः**=मध्यपिण्डिका, **धर्मध्वजस्य**=धर्मः सुकृतं स एव ध्वजः पताका तस्य, **स्थितिवंशः**=स्थितये अवस्थानाय वंशः वेणुदण्डः इत्यर्थः, **सर्वविद्यावताराणाम्**=सर्वाः सकलाः या विद्याः ज्ञानशास्त्राणि तासु ये अवताराः प्रवेशाः तेषाम्, **तीर्थम्**=घट्टः, **लोभार्णवस्य**=लोभः लोलुपता एव अर्णवः सागरः तस्य, **वडवानल**=समुद्राग्नि, **शास्त्ररत्नानाम्**=शास्त्राणि वेदादिग्रन्थाः तानि एव रत्नानि

मणयः तेषाम्, **निकषोपलः**=उत्कर्षपरीक्षकप्रस्तरः, **रागपल्लवस्य**=रागः विषयाभिलाषः स एव पल्लवं किसलयं तस्य, **दावानलः**=दवस्य वनस्य अयं दावः वनसम्बन्धी स च अनलः वह्निः, **क्रोधभुजंगमस्य**=क्रोधः कोपः स एव भुजङ्गमः सर्पः तस्य, **महामन्त्रः**=महाँश्चासौ मन्त्रः-वशीकरणमन्त्रः, **मोहान्धकारस्य**=मोहः अविवेकः स एव अन्धकारः तिमिरः तस्य, **दिवसकरः**=रविः, **नरकद्वाराणाम्**=निरयकपाटानाम्, **अर्गलाबन्धः**=कपाटप्रतिबन्धकः, **आचाराणाम्**=सदाचाराणाम्, **कुलभवनम्**=मूलगृहम्, **मङ्गलानाम्**=कल्याणानाम्, **आयनम्**=आवासस्थलम्, **मदविकाराणाम्**= मदः-अहंकारः तस्य ये विकाराः व्यापाराः तेषां दर्पवृत्तीनाम्, **अभूमिः**=अप्रशस्ता भूमिः अविषयः, **सत्पथानाम्**=सन्तः शोभनाः पन्थानः मार्गाः सत्पथाः तेषाम्, **दर्शकः**=निर्देशकः, **साधुतायाः**=साध्नोति परकार्यमिति साधुः तस्य भावः तत्ता तस्याः सज्जनतायाः, **उत्पत्तिः**=प्रसवस्थली, **उत्साहचक्रस्य**=उत्साहः उद्योगः स एव चक्रं रथाङ्गं तस्य, **नेमिः**=प्रान्तभागः, **सत्त्वस्य**=आत्मबलस्य, **आश्रयः**=आधारः, **कलिकालस्य**=कलियुगस्य, **प्रतिपक्षः**=विरोधी, **तपसः**=तपश्चर्याः, **कोशः**=निधिः, **सत्यस्य**=तथ्यस्य, **सखा**=सुहृत्, **आर्जवस्य**= सरलतायाः, **क्षेत्रम्**=आवासभूमिः, **पुण्यसंचयस्य**=पुण्यानि सुकृतानि तेषां सञ्चयः पुञ्जः तस्य, **प्रभवः**=उत्पत्तिस्थानम् **मत्सरस्य**=ईर्ष्यायाः, **अदत्तावकाशः**=न दत्तः अवकाशः येन सः, **विपत्तेः**=आपदः, **अरातिः**=अरिः, **परिभूतेः**=अनादरस्य, **अस्थानम्**=अपदम्, **अभिमानस्य**=अहंकारस्य, **अननुकूलः**=न अनुकूलः प्रतिकूलः, **दैन्यस्य**=दीनतायाः, **असंमतः**=न सम्मतः, **रोषस्य**=क्रोधस्य, **अनायत्तः**=न आयत्तः अनायत्तः अनधीनः, **सुखानाम्**=ऐहलौकिकतृप्तीनाम्, **अनभिमुखः**=अनभीप्सुकः।

टिप्पणी - **तेनस्विनाम्**-तेजस्+विन्=तेजस्विन्; ष० ब० व०। **अवष्टम्भ**-सहारा, आधार। **गहन**-वन 'गहनं काननं वनम्' इत्यमरः। **अवतार**-उतरना, प्रवेश करना। **अभूमिः**-अप्रशस्त भूमि, ऊसर, जहाँ कोई बीज नहीं जमता। मुनि के अन्दर भी विकार उत्पन्न नहीं होते। **आर्जव**-ऋजुता, सरलता। **अराति**-शत्रु। न राति ददाति सुखं यः स अरातिः न-रा+क्तिन्। **अनायत्त**-अपराधीन, क्रोध जिन्हें वश में नहीं कर सका था। 'अधीनो निघ्न आयत्तोऽस्वच्छन्दो गुह्यकोऽप्यसौ 'इत्यमरः। यहाँ '**करुणारसस्य** से लेकर **मोहान्धकारस्य**' तक सर्वत्र परम्परित रूपकालंकार है। **नेमिरुत्साहचक्रस्य** में परम्परित रूपक है।

अस्य भगवतः प्रभावादेवोपशान्तवैरमपगतमत्सरं तपोवनम्। अहो! प्रभावो महात्मनाम् अत्र हि शाश्वतिकमपहाय विरोधमुपशान्तात्मानस्तिर्यञ्चोऽपि

तपोवनवसतिसुखमनुभवन्ति। तथाहि एष विकचोत्पलवनरचनानुकारिणमुत्पतच्चारुचन्द्रकशतं हरिणलोचनद्युतिशबलमभिनवशालमिव विशति शिखिनः कलापमातपाहतो निःशङ्कमहिः। अयमुत्सृज्य मातरमजातकेसरैः केसरिशिशुभिः सहोपजातपरिचयः शरत्क्षीरधारं पिबति कुरङ्गशावकः सिंहीस्तनम्। एष मृणालकलापाशङ्किभिः शशिकरधवलं सटाभारमामीलितलोचनो बहु मन्यते द्विरदकलभैराकृष्यमणं मृगपतिः।

हिन्दी अनुवाद - इन भगवान् (जाबालि) के प्रभाव से ही तपोवन प्रशान्त वैरभाववाला तथा विलीन ईर्ष्याभाव वाला (हो गया) है। महात्माओं का प्रभाव भी क्या है, (अर्थात् आश्चर्य का विषय है) क्योंकि इस तपोवन में पशुपक्षी भी सनातन (जन्मजात) वैरभाव को छोड़ कर, प्रशान्त अन्तरात्मा वाले बन कर, तपोवन में रहने के सुख का अनुभव करते हैं। उदाहरणार्थ-विकसित नीलकमल की वनसृष्टि का अनुकरण करने वाले, ऊपर उठे हुए सैकड़ों मनोहर चन्द्रकों (चन्द्राकार चिह्नों) वाले अतएव हरिणों की नेत्रकान्ति के समान चितकबरे तथा कोमल घासों का कछार प्रतीत होने वाले मयूर के पिच्छभार में (प्रचण्ड) सूर्यताप से पीड़ित हुआ यह सर्प निर्विशङ्क भाव से प्रवेश कर रहा है। अनुत्पन्न स्कन्धकेसरों वाले सिंहशावकों के साथ परिचित हुआ यह हरिण का छौना (अपनी) माँ को छोड़कर, स्रवित होती हुई दुग्धधारा वाले सिंहनी के स्तन को पी रहा है। मृणालपुञ्ज के भ्रमवश गजशावकों द्वारा खींचे जाते हुए चन्द्रिकाधवल केसरसमूह को झँपकी हुई आँखों वाला यह वनकेसरी बहुत (सुखद) मान रहा है।

***संस्कृत व्याख्या* - अस्य भगवतः**=ऐश्वर्यशालिनः जाबालेः, **प्रभावात् एव**=माहात्म्यात् एव, **तपोवनम्**=आश्रमपदम्, **उपशान्तवैरम्**=उपशान्तानि विनष्टानि वैराणि विरोधाः यत्र तत् तादृशम्, **अपगतमत्सरम्**=अपगतः दूरीभूतः मत्सरः अन्यशुभद्वेषः तस्मात् तत् तादृशं वर्तते इति शेषः, **अहो**=अत्याश्चर्ये, **महात्मनाम्**=महर्षीणाम्, **प्रभावः**=तेजः, **हि**=निश्चयेन, **अत्र**=आश्रमे, **शाश्वतिकम्**=शाश्वत् सदा भवं शाश्वतिकं सनातनम्, **विरोधम्**=विद्वेषः, **अपहाय**=परित्यज्य, **उपशान्तात्मानः**=उपशान्ताः विरोधशून्याः आत्मनः अन्तःकरणानि येषां ते तादृशः, **तिर्यञ्चोऽपि**=पशुपक्ष्यादिजीवा अपि, **तपोवनवसतिसुखम्**=तपोवने आश्रमपदे या वसतिः निवासः तस्याः सुखम् आनन्दम्, **अनुभवन्ति**=प्राप्नुवन्ति, **तथा हि**=पूर्वोक्तमेव समर्थ्यते, **एषः**=पुरो दृश्यमानः, **अहिः**=भुजंगः, **आतपाहतः**=आतपेन धर्मेण आहतः पीडितः सन्, **विकचोत्पलवनरचनानुकारिणाम्**=विकचानां विकसितानाम्

उत्पलानां नीलकमलानां यद् वनं काननं तस्य रचना सृष्टिः ताम् अनुकरोति सादृश्यं भजते इति तच्छीलः तम्। **उत्पतच्चारुचन्द्रकशतम्**=उत्पतत् उद्दीप्यमानं चारु चन्द्रकाणां सुन्दरमेचकानां शतं समूहः यत्र तं तादृशम्, अतएव **हरिणलोचनद्युतिशबलम्**=हरिणानां मृगाणां लोचनद्युतिभिः नयनप्रभाभिः शबलं कर्बुरितम्, **अभिनवशाद्वलम् इव**=नवोत्पन्नतृणसंकुलप्रदेशम् इव, **शिखिनः**=मयूरस्य, **कलापम्**=पिच्छम्, **निःशङ्कम्**=निर्भयम्, **विशति**=आश्रयते, सर्पमयूरयोः, **अयम्**=दृश्यमानः, **करङ्गशावकः**=मृगपोतः, **मातरम्**=जननीं मृगीम्, **उत्सृज्य**=त्यक्त्वा, **अजातकेसरैः**=न जाताः उत्पन्नाः केसराः जटाः येषां तैः, **केसरिशिशुभिः**= सिंहशावकैः, **सह**=सार्द्धम्, **उपजातपरिचयः**=उपजातः उत्पन्नः परिचयः संस्तवः यस्य स परिचितः सन्, **क्षरत्क्षीरधारम्**=क्षरन्ति स्रवन्ति क्षीरधारा दुग्धप्रवाहः यस्मात् तम्, **सिंहीस्तनम्**=सिंह्याः केसरिण्याः स्तनं पयोधरम्, **पिबति**=धयति, **आमीलितलोचनः**=आ ईषत् मीलिते मुद्रिते लोचने नेत्रे येन स तादृशः, **एषः**=पुरोदृश्यमानः, **मृगपतिः**=सिंहः, **शशिकरधवलम्**=शशिनः हिमांशोः कराः रश्मयः तद्वत् धवलं स्वच्छम्, **सटाभारम्**= सटानां जटानां भारः समूहः तम्, **मृणालकलापाशङ्किभिः**= मृणालानां कमलनालानां कलापं समूहम् आशङ्कन्ते सम्भावयन्ति इति तच्छीलाः तैः, **द्विरदकलभैः**=गजशावकैः, **आकृष्यमाणम्**=अवकृष्यमाणम् **बहु**=अत्यन्तम्, **मन्यते**=समादरं करोति।

टिप्पणी – **अपहाय**–अप+हा+क्त्वा–ल्यप्, **शाद्वल**–(शादाः हरिततृणानि सन्ति अस्मिन् इति शाद्वलः) हरी घास से अभिव्याप्त प्रदेश। **शिखिनः**–शिखा+इनि; ष० ए० व०। **आमीलितलोचनः**–कुछ–कुछ नेत्र बन्द किये हुए। जटा समूह में मृणाल समूह के भ्रम होने से भ्रान्तिमान् अलङ्कार है। साथ ही लुप्तोपमा तथा स्वभावोक्ति है।

इदमिह कपिकुलमपगतचापलमुपनयति मुनिकुमारकेभ्यः स्नातेभ्यः फलानि। एते च न निवारयन्ति मदान्धा अपि गण्डस्थलीभाञ्जि मदजलपाननिश्चलानि मधुकरकुलानि संजातदयाः कर्णतालैः करिणः। किं बहुना तापसाग्निहोत्रधूमलेखाभिरुत्सर्पन्तीभिरनिशमुपपादितकृष्णाजिनोत्तरासङ्गशोभाः फलमूलभृतो वल्कलिनो निश्चेतनास्तरवोऽपि सनियमा इव लक्ष्यन्तेऽस्य भगवतः किं पुनः सचेतनाः प्राणिनः।

हिन्दी अनुवाद – इस तपोवन में चञ्चलता को छोड़कर यह वानर समूह स्नान किए हुए मुनिदारकों के लिए फल ला रहा है। और ये हाथी–मदोन्मत्त होते हुए भी–कपोलपाली (मलपट) पर बैठे हुए तथा मदजल पीने के कारण (सर्वथा)

अचञ्चल भ्रमरसमूह को-दया उत्पन्न हो जाने के कारण-कान के चपेटों से भगा नहीं रहे हैं। अधिक (कहने) से क्या लाभ ऊपर उठती हुई तापसजनों के अग्निहोत्रों की धूमपंक्तियों के कारण निरन्तर प्राप्त की गई काले मृगचर्म रूपी उत्तरीयवस्त्र की शोभावाले, फल और मूल (जड़) को धारण करने वाले वल्कल (छाल) धारण करने वाले चैतन्य विहीन वृक्ष भी इन भगवान् (जाबालि) के आश्रमस्थ व्रतधारियों की भाँति दिखाई पड़ रहे हैं, जो कि ऊपर उठती हुई-तापसजनों के अग्निहोत्रों की-धूमलेखाओं के कारण प्राप्त हुई, काले मृगचर्म रूपी उत्तरीयवस्त्र की शोभा वाले हैं, जो फल एवं कन्दमूल पर आश्रित हैं, जो वल्कलवसन धारण करने वाले हैं तथा 'निश्चेतन' अर्थात् अनपेक्षित सांसारिक ज्ञान से शून्य अथवा सर्वतोभावेन तपस्संलग्न हैं। तब फिर सचेतन प्राणियों का क्या कहना! (अर्थात् वे तो इस प्रकार के होते ही हैं)

संस्कृतव्याख्या - **इह**=अस्मिन् तपोवने, **अपगतचापलम्**=अपगतं दूरीभूतं चापलं चपलता यस्य तादृशम्, **इदम्**=पुरोदृश्यमानम्, **कपिकुलम्**=कपीनां वानराणां कुलं समूहः, **स्नातेभ्यः**=कृतस्नानेभ्यः, **मुनिकुमारकेभ्यः**=मुनीनाम् ऋषीणाम् कुमारकाः बालकाः तेभ्यः, **फलानि**=सस्यानि, **उपनयति**=आहरति, **एते**=इमे पुरो दृश्यमानाः, **च**=समुच्चयार्थकमिदम्, **करिणः**=गजस्य, **मदान्धाः अपि**=मदोन्मत्ता अपि, **संजातदयाः**=संजाता दया कृपा येषु ते तादृशाः सन्तः, **गण्डस्थलीभाञ्जि**=करटस्थलस्थानि, **मदजलपाननिश्चलानि**=मदस्य जलं मदजलं दानवारि तस्य पानेन सेवनेन निश्चलानि स्थिराणि, **मधुकरकुलानि**=मधुकराणां भ्रमराणां कुलानि समूहान्, **कर्णतालैः**=कर्णयोः तालाः तैः श्रवणचपेटैः, **न निवारयन्ति**=न अपसारयन्ति, **बहुना**=अधिकेन, **किम्**=किं प्रयोजनम्, न कोऽपि लाभः, **अस्य**=पुरोदृश्यमानस्य, **भगवतः**=महात्मनः जाबालेः आश्रमे इति शेषः, **निश्चेतनाः**=जडाः, **तरवः अपि**=वृक्षाः अपि, **अनिशम्**=सततम्,**उत्सर्पन्तीभिः**=उद्गच्छन्तीभिः, **तापसाग्निहोत्रधूमलेखाभिः** =तापसानां तपस्विनां यानि अग्निहोत्राणि यज्ञाः तेषां धूमलेखाभिः अग्निकेतनधाराभिः, **उपपादितकृष्णाजिनोत्तरासङ्गशोभाः**=उपपादिता विहिता कृष्णाजिनस्य कृष्णसार-मृगचर्मणः उत्तरासङ्गस्य उत्तरीयस्य शोभा छविः येषां ते, **सनियमाः इव**=नियमैः सह वर्तमानाः सनियमाः व्रतिनः इव, **लक्ष्यन्ते**=दृश्यन्ते, **किं पुनः**=किं भूयः, तेषां विषये ये, **सचेतनाः**=ज्ञानवन्तः, **प्राणिनः**=मानवादयः।

टिप्पणी - **कर्णतालैः**-कानों के थपेड़े। **उत्सर्पन्तीभिः**-ऊपर को उठती हुई धूमलेखा। उठती हुई धूमलेखा मानो। नियमधारी वृक्षों के कृष्णमृगचर्मधारण की

शोभा का सम्पादन कर रही थी। उत+सृप्+ङीप्; तृ० ब० व०। **निश्चेतनः**-निर्गतः चेतनायाः। '**सनियमा इव**' में गुणोत्प्रेक्षालङ्कार है। '**कृष्णाजिनः.......**' इत्यादि में लुप्तोपमालंकार है।

इत्येवं चिन्तयन्तमेव मां तस्यामेवाशोकतरोरधश्छायायामेकदेशे स्थापयित्वा हारीतः पादावुपगृह्य कृताभिवादनः पितुरनतिसमीपवर्तिनि कुशासने समुपाविशत्। आलोक्य तु मां सर्व एव मुनयः 'कुतोऽयमासादितः शुकशिशुः' इति तमासीनमपृच्छन्। असौ तु तानब्रवीत्-अयं मया स्नातुमितो गतेन कमलिनीसरस्तीरतरुनीडपतितः शुकशिशुरातपजनितक्लान्तिरुत्तप्तपांसुपटलमध्यगतो दूरनिपतनविह्वलतनुरल्पावशेषायुरासादितस्तपस्विदुरारोहतया च तस्य वनस्पतेर्न शक्यते स्वनीडमारोपयितुमिति जातदयेनानीतः।

हिन्दी अनुवाद - इस प्रकार बात करते हुए मुझको उसी रक्ताशोक वृक्ष की छाया में एक ओर रखकर (मुनिकुमार) हारीत पिता के चरणों में विनत होकर तथा प्रणाम निवेदित कर कुछ दूर पर विद्यमान कुशासन पर बैठ गया। मुझे तो देखकर सभी मुनियों ने 'यह सुए का बच्चा कहाँ से मिला?' इस प्रकार बैठे हुए उस (मुनिकुमार हारीत) से पूछा। हारीत ने उनसे कहा-'पद्मसरोवर के तटवर्ती (सेमर) वृक्ष के नीड घोंसले से गिरा हुआ, गर्मी के कारण उत्पन्न थकावट वाला, भभकते धूलसमूह में पड़ा हुआ, ऊँचाई से गिरने के कारण व्याकुल शरीर वाला तथा अत्यल्प बची-खुची आयु वाला यह सुग्गे का बच्चा स्नान करने के लिए यहाँ से गये हुए-मुझको प्राप्त हुआ। उस सेमरवृक्ष के तपस्विजनों द्वारा न चढ़े जा सकने योग्य होने के कारण चूँकि (इसका) अपने घोंसले पर चढ़ाया जाना सम्भव नहीं था इसलिए दयावश (साथ) लाया गया।

संस्कृतव्याख्या - **इत्येवम्**=पूर्वोक्तविधिना, **चिन्तयन्तम् एव**=विचारयन्तम् **एव, माम्**=वैशम्पायनम्, **तस्यामेव**=पूर्वनिर्दिष्टायाम् एव, **अशोकतरोः**=अशोक-पादपस्य, **अधश्छायायाम्**=अधस्तनेऽनापते, **एकदेशे**=एकभागे, **स्थापयित्वा**=निधाय, **हारीतः**=एतदाख्यः जाबालिपुत्रः, **पादौ**=पितुः चरणो, **उपगृह्य**=संस्पृश्य, **कृताभिवादनः**=कृतं विहितम् अभिवादनं प्रणामः येन सः तादृशः, **पितुः**=तातस्य जाबालेः, **अनतिसमीपवर्तिनि**=न अतिसमीपे वर्तते इति तच्छीलं तस्मिन् किञ्चिद्दूरस्थे,**कुशासने**=कुशानां दर्भाणाम् आसने विष्टरे, **समुपाविशत्**= उपविष्टः, **तु**=पुनः, **माम्**=वैशम्पायनम्, **आलोक्य**=प्रेक्ष्य, **सर्वे एव**=सकलाः एव, **मुनयः**=ऋषयः, **अयम्**=पुरो दृश्यमानः, **शुकशिशुः**=कीरपोतः, **कुतः**=कस्मात्

स्थानात्, **आसादितः**=प्राप्तः, **इति**=एवम्, **आसीनम्**=उपविष्टम्, **तम्**=हारीतम्, **अपृच्छन्**=पृष्टवन्तः, **तु**=पुनः, **असौ**=हारीतः, **तान्**=**मुनीन्**, **अब्रवीत्**=जगाद, **अयम्**=पुरो दृश्यमानः, **शुकशिशुः**=कीरपोतः, **अस्मात्**=आश्रमात्, **स्नातुम्**=अवगाहितुम्, **गतेन**=प्रस्थितेन, **मया**=हारीतेन, **कमलिनीसरस्तीरतरुनीडपतित**=कमलिनीनां नलिनीनां सरः जलाशयः पद्मसरः तस्य तीरे तटे यः तरुः द्रुमः तस्य नीडात् कुलायात् पतितः भ्रष्टः,**आतपजनितक्लान्तिः**=आतपेन सूर्यतेजसा जनिता उत्पादिता क्लान्तिः श्रमः यस्मिन् स तादृशः, **उत्तप्तपांसुपटलमध्यगतः**=उत्तप्तः उष्णीकृतः यः पांसुपटलः रेणुसमूहः तस्य मध्यगतः अभ्यन्तरवर्ती, **दूरनिपतन-विह्वलतनुः**=दूरात् दविष्ठात् यत् निपतनं भ्रंशः तेन विह्वला विकला तनुः देहः यस्य तादृशः अतएव, **अल्पावशेषायुः**=अल्पं न्यूनम् अवशेषम् अवशिष्टम् आयुः वयः जीवनं यस्य स तादृशः, **आसादितः**=प्राप्तः, **तस्य**=पद्मसरस्तीरस्थितस्य, **तरोः**=पादपस्यः, **तपस्विदु-रारोहतया**=दुःखेन आरोढुं शक्यः दुरारोहः दुरधिरोहणः तपस्विभिः ऋषिभिः दुरारोहः तपस्विदुरारोहः तस्य भावः तत्ता तया, **अयं स्वनीडम्**=निजकुलायम्, **आरोपयितुम्**=प्रापयितुं, **न शक्यते**=न पार्यते, इति हेतोः, **जातदयेन**=जाता समुत्पन्ना दया करुणा यस्मिन् तादृशेन मया, अयम्, **अनीतः**=अवानायि।

टिप्पणी - **चिन्तयन्तमेव**-विचार करते हुए ही। चिन्त्+शतृ; द्वि० ए० व०। **अभिवादन**-अपने नाम गोत्र का उच्चारण करते हुए चरणस्पर्श करने की क्रिया। अभिवादन की विशेषता-''अभिवादनशीलस्य नित्यं वृद्धोपसेविनः। चत्वारि तस्य वर्धन्ते आयुर्विद्या यत्रो बलम्॥''-**दुरारोह**-जिस पर चढना कठिन हो। दुर्+आ+रह्+खल्। **आनीतः**-आ+नी+क्त।

तद्यावदयमप्ररूढपक्षतिरक्षमोऽन्तरिक्षमुत्पतितुं तावदत्रैव कस्मिंश्चिदाश्रम-तरुकोटरे मुनिकुमारकैरस्माभिश्चोपनीतेन नीवारकणनिकरेण विविधफलरसेन च संवर्ध्यमानो धारयतु जीवितम्। अनाथपरिपालनं हि धर्मोऽस्मद्विधानाम्। उद्भिन्नपक्षतिस्तु गगनतलसंचरणसमर्थो यास्यति यत्रास्मै रोचिष्यते। इहैवोपजा-तपरिचयः स्थास्यति इत्येवमादिकमस्मत्संबद्धमालापमाकर्ण्य किंचिदुपजात-कुतूहलो भगवान् जाबालिरीषदावलितकन्धरः पुण्यजलैः प्रक्षालयन्निव मामति-प्रशान्तया दृष्ट्या दृष्ट्वा सुचिरमुपजातप्रत्यभिज्ञान इव पुनः पुनर्विलोक्य 'स्वस्यैवाविनयस्य फलमनेनानुभूयते' इत्यवोचत्। स हि भगवान् कालत्रयदर्शी तपः प्रभावाद् दिव्येन चक्षुषा सर्वमेव करतलगतमिव जगदवलोकयति, वेत्ति

च जन्मान्तराण्यप्यतीतानि। कथयत्यागामिनमप्यर्थम्, ईक्षणगोचरगतानां च प्राणिनामायुषः संख्यामावेदयति।

हिन्दी अनुवाद – अतएव जब तक पक्षमूल न उगने के कारण आकाश में उड़ने के लिए यह समर्थ नहीं होता तब तक यहीं किसी आश्रमस्थ वृक्ष के कोटर में-मुनियों के बच्चों तथा हम लोगों द्वारा लाए गये जंगली धान के कणसमूह तथा नाना प्रकार के फलों के रस से पालन-पोषण किया जाता हुआ-जीवन धारण करे; क्योंकि दीनजनों का संरक्षण हम जैसे लोगों (तपस्वियों) का धर्म है। पंख उग जाने पर, गगन मण्डल में उड़ान भरने लायक बनकर जायेगा, जहाँ इसकी रुचि होगी। अथवा परिचित हो जाने पर यहीं (तपोवन में ही) रह जायेगा। इस प्रकार के अनेक मद्विषयक कथनोपकथन सुनकर उत्पन्न हुए कुछ कुतूहल वाले-भगवान् जाबालि तनिक गर्दन मोड़कर-मानो पवित्र जलराशि से मुझे धोते हुए-अत्यन्त प्रसन्न दृष्टि से बड़ी देर तक देखकर तथा उत्पन्न हुए प्रत्यभिज्ञान (पुरानी पहचान वाले व्यक्ति) की भाँति बारम्बार निहार कर बोले-'अपने ही अशिष्ट आचरण का फल यह भुगत रहा है।' क्योंकि (भूत-भविष्य-वर्तमान) त्रिकालदर्शी वह भगवान् जाबालि तपश्चर्या के प्रभाव से दिव्य दृष्टि से सम्पूर्ण भूतल को ही हथेली पर आये हुए' की भाँति देखते थे तथा बीते हुए अन्यान्य जन्मों को भी जानते थे, भावी विषयों (घटनाओं) को भी कहते थे तथा दृष्टिपथ में आये हुए प्राणियों की आयु की इयत्ता बता देते थे।

संस्कृतव्याख्या – **तत्**=तस्माद्धेतोः, **यावत्**=यावत् समयपर्यन्तम्, **अयम्**=शुकशावकः, **अप्ररूढपक्षतिः**=न प्रकर्षेण पूर्णतया रूढा उत्पन्ना पक्षतिः पक्षमूलं यस्य तादृशः, **अन्तरिक्षम्**=गगनम्, **उत्पतितुम्**=उड्डयितुम्, **अक्षमः**=असमर्थः, **तावत्**=तावत्कालपर्यन्तम्, **अत्रैव**=अस्मिन् एव आश्रमे, **कस्मिंश्चित्**=कस्मिन्नपि एकस्मिन्, **आश्रमतरुकोटरे**=आश्रमस्य तपोभूमेः ये तरवः द्रुमाः तेषां कोटरे स्कन्ध-विवरे, **मुनिकुमारकैः**=ऋषिशिशुभिः, **अस्माभिश्च**=मया सहितैः मुनिभिश्च, **उपनीतेन**=आनीतेन, **नीवारकणनिकरेण**=नीवारस्य मुनिधान्यविशेषस्य कणानां उण्डुकानां निकरेणः समूहेन, **विविधफलरसेन च**=विविधानां बहुप्रकाराणां फलानां सस्यानां रसेन द्रवेण च, **संवर्ध्यमानः**=वृद्धिं प्राप्यमाणः, **जीवितम्**=जीवनम्, **धारयतु**= दधातु, **हि**=यतः, **अस्मद्विधानाम्**=वयं मुनयः विधाः प्रकाराः येषां तेषाम् अस्मत्सदृशानां साधूनाम्, **अनाथपरिपालनम्**=अनाथानाम् दीनानां परिपालनं संरक्षणम्, **धर्मः**=कर्त्तव्यम्, **तु**=पुनः, **उद्भिन्नपक्षतिः**=उद्भिन्ना स्फुटिता पक्षतिः

पक्षमूलं यस्य स तादृशः, **यत्र**=यस्मिन् स्थाने गमनं व्रजनम्, **अस्मै**=शुकशावकाय, **रोचिष्यते**=रुचिकरं भविष्यति, **तत्र यास्यति**=गमिष्यति, **वा**=अथवा, **उपजात-परिचयः**=उपजातः उत्पन्नः परिचयः संस्तवः यस्य सः तादृशः सन्, **इहैव**= अस्मिन् आश्रमे एव, **स्थास्यति**=निवत्स्यति इति, **एवमादिकम्**=एवम् इत्थंभूतं वृत्तम् आदौ यस्य तम्, **अस्मत्सम्बद्धम्**=मया वैशम्पायनेन संबद्धं नद्धं मद्विषयकमित्यर्थः, **आलापम्**=संलापं प्रश्नोत्तररूपम्, **आकर्ण्य**=श्रुत्वा, **किञ्चिदुपजातकुतूहलः**= किञ्चित् स्वल्पम् उपजातम् उत्पन्नं कुतूहलं कुतुकं यस्य स तादृशः, **भगवान्**= ऐश्वर्यशाली, जाबालिः, **ईषदावलितकन्धरः**=ईषत् किञ्चित् आवलिता आनमिता कन्धरा ग्रीवा येन सः, **पुण्यजलैः**=पुण्यानि सुकृतानि एव जालानि सलिलानि तैः, **प्रक्षालयन् इव**=धोतीकुर्वन् इव, **माम्**=वैशम्पायनम्, **अतिप्रशान्तया**= अत्यन्तशान्तिसम्पन्नया, **दृष्ट्या**=चक्षुषा, **सुचिरम्**=बहुकालं यावत्, **दृष्ट्वा**=विलोक्य, **उपजातप्रत्यभिज्ञानः इव**=उपजातं प्रत्यभिज्ञानं 'सोऽयम्' इत्याकारकं ज्ञानं यस्य स इव, **पुनः पुनः**=मुहुर्मुहुः, **विलोक्य**=दृष्टवा, **अनेन**=शुकशावकेन, **स्वस्य**=आत्मनः, **एव अविनयस्य**=अशिष्टाचारस्य, **फलम्**=परिणामः, **अनुभूयते**= भुज्यते, **इति**=एवम्, **अवोचत्**=जगाद, **हि**=निश्चयेन, **सः**=असौ, **भगवान्**=महात्मा जाबालिः, **कालत्रयदर्शी**=कालानाम् अतीतानागतवर्तमानानां त्रयं त्रिकं पश्यतीति तच्छीलः त्रिकालदर्शी, **तपःप्रभावात्**=तपसः तपश्चर्यायाः, प्रभावः तेजः तस्मात्, **दिव्येन**=अलौकिकेन, **चक्षुषा**=दृष्ट्या, **सर्वम् एव**=सकलम् एव, न तु अंशमात्रमित्यर्थः, **जगत्**=भुवनम्, **करतलागतम् इव**=हस्ततलस्थितम् इव, **अवलोकयति**=पश्यति, **च**=तथा, **अतीतानि**=गतानि, **जन्मान्तराणि**=अन्यत् जन्मान्तरं तानि भवान्तराणि, अपि किं पुनः वर्तमानम्, **वेत्ति**=जानाति, **आगामिनम्**= आगमिष्यन्तम्, **अर्थम्**=विषयम् अपि, **कथयति**=निरूपयति, **च**=तथा, **ईक्षणगोचर-गतानाम्**=ईक्षणयोः नयनयोः गोचरः विषयतां गतानां प्राप्तानाम्, **प्राणिनाम्**=जीवानाम्, **आयुषः**=जीवितव्यस्य, **संख्याम्**=इयत्ताम्, **आवेदयति**=बोधयति।

टिप्पणी – **अप्ररूढ**–नञ्+प्र+रुह्–क्त। **ईषदावलितकन्धरः**–थोड़ी गरदन मोड़कर, 'ईषत्' पद से जाबालि मुनि की गम्भीरता प्रकट हो रही है 'किंचिदुपजातकुतूहलः' कथन से थोड़ा कुतूहल उत्पन्न होना थोड़ी गरदन मोड़कर अति प्रशान्त दृष्टि से देखना, ये सब क्रियाएँ उनकी धीरता की पोषक हैं। **संवर्ध्यमानः**–सम्+वृध्+शानच्। **'अस्मै रोचिष्यते'**–रुच्यर्थानां प्रीयमाणः' से चतुर्थी। **प्रत्यभिज्ञान**–पूर्वदृष्ट व्यक्ति का कुछ दिनों के पश्चात् पुनः साक्षात्कार होने पर

'यह वही व्यक्ति है' इस प्रकार का ज्ञान प्रत्यभिज्ञान कहलाता है। '**पुण्यजलैः**' में निरङ्गकेवलरूपक है। '**प्रक्षालयन्निव**' में क्रियोत्पेक्षालङ्कार है।

ततः सर्वैव सा तापसपरिषच्छ्रुत्वा विदिततत्प्रभावा कीदृशोऽनेनाविनयः कृतः, किमर्थं वा कृतः, क्व वा कृतः, जन्मान्तरे वा कोऽयमासीद् इति कुतूहलिन्य भवत्। उपनाथितवती च तं भगवन्तम् आवेदय, प्रसीद भगवन्! कीदृश्याविनयस्य फलमनेनानुभूयते, कश्चायमासीज्जन्मान्तरे, विहगजातौ वा कथमस्य संभवः, किमभिधानो वायम्। अपनयतु नः कुतूहलम्। आश्चर्याणां किं सर्वेषां, भगवान् प्रभवः।

हिन्दी अनुवाद - इसके बाद, उनके माहात्म्य को जानने वाली सारी की सारी वह मुनिसभा (पूर्वोक्त वक्तव्य को) सुनकर-'इसने किस प्रकार का अशिष्टाचरण किया था? अथवा किसलिये किया था? अथवा कहाँ (किस प्रदेश में) किया था! अथवा पूर्वजन्म में यह कौन था?' इस प्रकार कौतुक सम्पन्न (जिज्ञासु) हो उठी तथा बारम्बार उस भगवान् जाबालि से अभ्यर्थना करने लगी- 'हे भगवन्! बताइए, प्रसन्न हो जाइये। किसी प्रकार को उद्दण्डता का फल यह भोग रहा है? और पूर्वजन्म में यह था कौन? अथवा पक्षियोनि में कैसे इसका जन्म हुआ? अथवा इसका नाम क्या है? हम लोगों का आश्चर्य दूर कीजिए! क्योंकि भगवान् (आप) समस्त आश्चर्यों के उद्भवस्थान हैं।'

संस्कृतव्याख्या - **ततः**=तदनन्तरम्, **सर्वा एव**=समस्तैव, **सा**=पूर्ववर्णिता, **तापसपरिषद्**=तापसानां तपस्विनां परिषद् सभा, **श्रुत्वा**=शुकवृत्तान्तं निशम्य, **विदित-तत्प्रभावा**=विदितः ज्ञातः तस्य महर्षेः प्रभावः माहात्म्यं येन सा, **अनेन**=शुक-शिशुना, **कीदृशः**=किं प्रकारः, **अविनयः**=असदाचारः, **कृतः**=विहितः **वा**= अथवा, **किमर्थम्**=कस्मै हेतवे, कृतः, अथवा, **क्व**=कस्मिन् स्थाने, कृतः अथवा, **अयम्**=एष शुकशावकः, **जन्मान्तरे**=अन्यत् जन्म जन्मान्तरं तस्मिन् पूर्वजन्मनि, **कः आसीत्**= अभवत्, **इति**=इत्थम्, **कुतूहलिनी**=कौतुकवती, **अभवत्**=बभूव, **च**=तथा, **तम्**= पूर्वोक्तम्, **भगवन्तम्**=महात्मानं जाबालिम्, **उपनाथितवती**= प्रार्थयामास, **भगवन्**= महात्मन्, **प्रसीद**=प्रसन्नो भव, **आवेदय**=कथय, **अनेन**= शुकशिशुना, **कीदृशस्य**=किं प्रकारस्य, **अविनयस्य**=अशिष्टतायाः, **फलम्**=भोगः, **अनुभूयते**=भुज्यते, **च**=तथा, **अयम्**=शुकशिशुः, **जन्मान्तरे**=अन्यत् जन्म जन्मान्तरं तस्मिन् पूर्वजन्मनि, **कः आसीत्** =अभवत्, **वा**=अथवा, **अस्य**=शुकशावकस्य, **विहगजातौ**=विहगः खगः तस्य जातौ योनौ, वंशे वा, **कथम्**=केन हेतुना, **संभवः**=उत्पत्तिः, **वा**=अथवा, **अयम्**=

शुकशिशुः, **किमभिधानः**=किम् अभिधानं यस्य सः किंनामा, **नः**=अस्माकम्, **कुतूहलम्**=आश्चर्यम्, **अपनयतु**=दूरीकरोतु, **हि**=यतः, **भगवान्**=महात्म्यवान् भवान्, **सर्वेषाम्**=समस्तानाम्, **आश्चर्याणाम्**= विस्मयानाम्, **प्रभवः**=हेतुः।

टिप्पणी –परिषद्–'समज्या परिषद् गोष्ठी सभासमितिसंसदः। आस्थानी क्लीबमास्थानं स्त्रीनपुंसकयोः सदः'। इत्यमरः। **श्रुत्वा**–श्रु+क्त्वा=श्रुत्वा। **कुतूहल**–कौतुक, जिज्ञासा, आश्चर्य। ''कौतूहलं कौतुकं च कुतूकं च कुतूहलम्'' इत्यमरः। **उपनाथितवती**–उप+नाथ+क्तवतु+ङीप्। **अभिधान**–''आख्याह्वोऽभिधानं च नामधेयं च नाम च'' इत्यमरः। **भगवान्**–भग+मतुप्+भगवत्; प्र० ए०व०।

इत्येवमुपयाचितस्तपोधनपरिषदा स महामुनिः प्रत्यवदत्–अतिमहदिदमाश्चर्यमाख्यातव्यम्। अल्पशेषमहः। प्रत्यासीदति च नः स्नानसमयः। भवतामप्यतिक्रामति देवार्चनविधिवेला। तदुत्तिष्ठन्तु भवन्तः सर्व एवाचरन्तु यथोचितं दिवसव्यापारम्। अपराह्णसमये भवतां पुनः कृतमूलफलाशनानां विस्रब्धोपविष्टानामादितः प्रभृति सर्वमावेदयिष्यामि योऽयम्, यच्चानेन कृतमपरस्मिन् जन्मनि, इह च लोके यथास्य संभूतिः, अयं च तावदपगतक्लमः क्रियतामाहारेण। नियतमयमप्यात्मनो जन्मान्तरोदन्तं स्वप्नोपलब्धमिव मयि कथयति सर्वमशेषतः स्मरिष्यति इत्यभिदधदेवोत्थाय सह मुनिभिः स्नानादिकमुचितदिवसव्यापारमकरोत्।

हिन्दी अनुवाद – मुनिसभा द्वारा इस प्रकार अभ्यर्थित होकर उन महामुनि (जाबालि) ने कहा– ''वर्णन करने योग्य यह आश्चर्य (पूर्ण वृत्तान्त) अत्यन्त विशाल है। दिन थोड़ा रह गया है। हमारे स्नान का समय हो रहा है। आप लोगों की भी देवपूजन–वेला बीतती जा रही है। इसलिए आप लोग उठें। सभी यथायोग्य दैनिक–कृत्य सम्पादित कर लें, दुबारा कन्दमूल एवं फलों का आहार किए हुए तथा सावधान (स्वस्थचित्त) होकर बैठे हुए आप लोगों के लिए अपराह्ण वेला में प्रारम्भ से लेकर समस्त वृत्तान्त निवेदित करूँगा। (पूर्वजन्म में) यह जो था और पूर्वजन्म में इसने जो कुछ किया तथा इस पृथ्वी तल पर जैसे इसका जन्म हुआ। तब तक इसे भी खिला–पिला कर विगतश्रम (थकावटहीन) बनाइये। निश्चय ही (अपनी रामकथा) मेरे वर्णित करने पर वह (सुआ) भी मानो स्वप्न में प्राप्त हुए (अपने) पूर्वजन्म के सम्पूर्ण वृत्तान्त को आमूलचूड स्मरण कर लेगा।'' इस प्रकार कहते हुए ही उन मुनियों के साथ उठकर स्नानादि यथोचित दैनिक कार्यकलाप सम्पन्न किया।

संस्कृतव्याख्या - **इत्येवम्**=अनेन विधिना, **तपोधनपरिषदा**=तपः एव धनं येषां ते तपोधनाः तापसाः तेषां परिषद् समज्या तया, **उपयाचितः**=प्रार्थितः, **सः**= पूर्वोक्तः, **महामुनिः**=महर्षिः जाबालिः, **प्रत्यवदत्**=प्रत्युवाच, **इदम्**=शुकशिशु-परिचयात्मकम्, **अतिमहत्**=अतिविस्तृतम्, **आश्चर्यम्**=विस्मयः, **आख्यातव्यम्**= विस्तेरण वक्तव्यम्, **अहः**=वासरः, **अल्पशेषम्**=स्वल्पावशिष्टम्, **च**=तथा, **नः**= अस्माकम्, **स्नानसमयः**=अवगाहकालः, **प्रत्यासीदति**=निकटमायाति, **भवताम्**= युष्माकं मुनीनाम् अपि, **देवार्चनविधिवेला**=देवस्य परमेश्वरस्य अर्चनं पूजनं तस्य विधिः विधानं वा तस्य वेला कालः, **अतिक्रमति**=अत्येति, **तत्**=तस्मात् कारणात्, **भवन्तः**=यूयम्, **उत्तिष्ठन्तु**=उत्थानं कुर्वन्तु, **सर्वे एव**=समस्ताः एव, **यथोचितम्**= उचितम् अनतिक्रम्य यथायोग्यम्, **दिवसव्यापारम्**=दिवसस्य दिनस्य व्यापारः तं दैनिकक्रियाम्, **आचरन्तु**=कुर्वन्तु, **अपराह्णसमये**=अपराह्णश्चासौ समयः अपराह्णसमयः तस्मिन् सायंकाले, **पुनः**=भूयः, **कृतमूलफलाशनानाम्**=कृतं विहितं मूलानां कन्दानां फलानां सस्यानां च अशनं भोजनं यैः तेषाम्, **विस्रब्धोपविष्टानाम्**= विस्रब्धं विश्वस्तं यथा स्यात् तथा उपविष्टानाम् स्थितानाम्, **भवताम्**=युष्माकम्, **आदितः**=प्रारम्भतः, **प्रभृति**=आदाय, **सर्वम्**=समस्तम्, **आवेदयिष्यामि**= कथयिष्यामि, किं तदाख्यातव्यमित्याह, **अयम्**=शुकशिशुः यः आसीत्, **अनेन**= शुकशिशुना, **यत्**=कर्मं, **कृतम्**=विहितम्, **अपरस्मिन्**=पूर्वस्मिन्, **जन्मनि**=जन्मान्तरे, भवे, **इह**=अस्मिन्, **लोके**=संसारे च, **अस्य**=शुकशिशोः, **यथा**=येन हेतुना, **संभूतिः**=उत्पत्तिः, **तावत्**=तत्कालपर्यन्तम्, **अयम्**=शुकशावकः, **आहारेण**=भोजनेन, **अपगतक्लमः**=अपगतः विनष्टः क्लमः श्रमः यस्य स तादृशः, **क्रियताम्**= विधीयताम्, **नियतम्**=निश्चितम्, **अयम् अपि**=शुकशावकः अपि, **मयि**=जाबालौ, **कथयति**=आवेदयति सति, **सर्वम्**=समस्तम्, **जन्मान्तरोदन्तम्**=पूर्वजन्मवृत्तम्, **स्वप्नोपलब्धम् इव**=स्वप्ने स्वापे उपलब्धं प्राप्तम् इव, **अशेषतः**=पूर्णतः, **स्मरिष्यति**= स्मरणं करिष्यति, **इति**=इत्थम्, **अभिदधत् एव**=कथयन् एव, **उत्थाय**=उत्थानं कृत्वा, **मुनिभिः**=ऋषिभिः, **सह**=सार्द्धम्, **स्नानादिकम्**=स्नानम् अवगाहनम्। आदौ प्रारम्भे यस्य तम्, **उचितदिवसव्यापारम्**=उचितः योग्यः स चासौ दिवसव्यापारः दैनिकक्रिया तम्, **अकरोत्**=विहितवान्।

टिप्पणी - **प्रत्यवदत्**-प्रति+वद् धातु लङ् लकार प्र० पु० ए० व०। **आख्यातव्यम्**-आङ्+चक्षिङ् (ख्या)+तव्यम्, **अभिदधत्**-कहते हुए। अभि+धा+शतृ। **उत्थाय**-उत्+स्था+क्त्वा-ल्यप्।

अनेन च समयेन परिणतो दिवसः। स्नानोत्थितेन मुनिजनेनार्धविधिमुपपादयता यः क्षितितले दत्तस्तमम्बरतलगतः साक्षादिव रक्तचन्दनाङ्गरागं रविरुदवहत। ऊर्ध्वमुखैरर्कबिम्बविनिहितदृष्टिभिरूष्मपैस्तपोधनैरिव परिपीयमानतेजःप्रसरो विरलातपस्तनिमानमभजत् उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षयेव संहृतपादः पारावतपादपाटलरागो रविरम्बरतलादवालम्बत। आलोहितांशुजालजलशयनमध्यगतस्य मधुरिपोर्विगलन्मधुधारमिव नाभिनलिनं प्रतिमागतमपरार्णवे सूर्यमण्डलमलक्ष्यत। विहाय धरणीतलमुन्मुच्य च कमलिनीवनानि शकुनय इव दिवसावसाने तरुशिखरेषु पर्वताग्रेषु च रविकिरणाः स्थितिमकुर्वत। आलग्नलोहितातपच्छेदा मुनिभिरालम्बितलोहितवल्कला इव तरवः क्षणमदृश्यन्त।

हिन्दी अनुवाद - इस समय तक दिन ढल गया। स्नान से निबटे हुए तपस्विवर्ग ने (लाल चन्दन एवं लाल फूल आदि द्वारा) पूजाविधि निष्पन्न करते हुए भूतल पर जिसे प्रदान किया था, उस रक्तचन्दन के अङ्गराग को आकाशमण्डल में विराजमान सूर्य ने मानो (रक्तवर्ण होकर) साक्षात् रूप से धारण कर लिया। ऊपर की ओर मुख उठाए हुए, सूर्यमण्डल पर आँखें टिकाए हुए तथा उष्मा का पान करने वाले तपोधनों द्वारा मानो भलीभाँति पिये जाते हुए कान्तिविस्तार वाला अतएव अत्यल्प प्रकाश से युक्त (सूर्य) क्षीणता को प्राप्त हो गया। उदीयमान सप्तर्षि मण्डल के स्पर्श को मानो बचाने की इच्छा से 'चरणों' (अर्थात् किरणों) को समेट कर, कपोतपक्षियों के चरणों की भाँति श्वतेरक्त अरुणिमावाला सूर्य गगनमण्डल से (नीचे) लटक गया। कुछ-कुछ ललछौंह किरणपुञ्जवाला तथा पश्चिमी समुद्र में प्रतिबिम्बित होने वाला सूर्यमण्डल जलशय्या पर विद्यमान 'मधुरिपु' भगवान् विष्णु के झरती हुई मकरन्दधारा वाले नाभिकमल के समान दिखाई पड़ा। भूतल को छोड़कर तथा कमलिनियों के वनों को विदा देकर दिनान्तवेला में वृक्षों की चोटियों तथा पर्वत-शिखरों पर 'स्थिति' अर्थात् बसेरा लेने वाले पक्षियों की भाँति सूर्यकिरणों ने (भी) दिन-ढल जाने पर धरातल को छोड़कर एवं कमलिनियों के वनों को विदा देकर तरुशिखरों तथा पर्वताग्रभागों पर स्थान ले लिया। (सूर्य के) लोहित वर्ण वाले प्रकाशखण्डों से ईषत् सम्बद्ध आश्रम के वृक्ष क्षण भर के लिए (ऐसे) दिखाई पड़े मानो मुनियों द्वारा (शोषणार्थ) लटकाए गए लाल रंग वाले वल्कलवस्त्रों से संवलित हों।

संस्कृतव्याख्या - **अनेन**=एतेन च, **समयेन**=कालेन, **दिवसः**=वासरः,

परिणतः=समाप्तप्रायः, **स्नानोत्थितेन**=स्नानात्, अवगाहनात्, **उत्थितेन**=निवृत्तेन, **मुनिजनेन**=ऋषिवर्गेण, **अर्घविधिम्**=अर्घस्य विधिः अर्घविधिः तं, रक्तचन्दनमिश्रितजलदानात्मकं पूजाकर्म, **उपपादयता**=सम्पादयता, **यः**=रक्तचन्दनाङ्गरागः, **क्षितितले**=भूतले, **दत्तः**=अर्पितः, **तम्**=मुनिजनप्रदत्तम्, **रक्तचन्दनाङ्गरागं**=रक्तचन्दनं रञ्जनम् एव अङ्गरागः उपलेपः तम्, **अम्बरतलगतः**=गगनस्थितः, **रविः**=दिनकरः, **साक्षादिव**=प्रत्यक्षम् इव, **उदवहत्**=अधारयत्, **ऊर्ध्वमुखैः**=ऊर्ध्वम् उपरिष्टाद् मुखम् लपनं येषां तैः, **अर्कबिम्बविनिहितदृष्टिभिः**=अर्कस्य दिनकरस्य बिम्बे मण्डले विनिहता स्थापिता दृष्टिः नेत्रं यैः तैः तथाभूतैः **ऊष्मपैः**=ऊष्मणं पिबन्तीति तैः पञ्चाग्नितपोऽङ्गत्वेन वह्निपायिभिः **तपोधनैः**=तप एव धनं येषां तैस्तथोक्तैः तपस्विभिः, **परिपीयमानतेजः प्रसरः इव**=परिपीयमानजः आस्वाद्यमानः तेजसां कान्तीनां प्रसरः प्रचार समूहो वा यस्य स तादृशः इव, **विरलातपः**=विरलः स्वल्पः स चासौ आतपः आलोकः, **तनिमानम्**=क्षीणमानम्, **अभजत्**=अगच्छत्, **उद्यत्सप्तर्षिसार्थस्पर्शपरिजिहीर्षया इव**=उद्यतः उदयं प्राप्नुवतः सप्तर्षिसार्थस्य सप्तर्षिमण्डलस्य सः स्पर्शः पादसंसर्गः तस्य परिजिहीर्षा परिहर्तुम् इच्छा तया इव, **संहृतपादः**=संहृताः संकोचिताः पादाः चरणाः येन सः, **पारावतपादपाटलरागः** = पारावतः कपोतः तस्य पादवत् चरणवत् पाटलः श्वेतरक्तः रागः कान्ति यस्य सः **रविः**=दिनकरः , **अम्बरतलात्**=गगनतलात्, अवालम्बत=अवारत्, **अपरार्णवे**=अपरः पश्चिमः अर्णवः सागरः तस्मिन्, **प्रतिमागतम्**=प्रतिमां प्रतिबिम्बतां गतं प्राप्तम्, **आलोहितांशुजालम्**=आ ईषत् लोहितं रक्तवर्णम् अंशुजालं रश्मिपटलं यस्य तत्, **सूर्यमण्डलम्**=भास्करबिम्बम्, **जलशयनमध्यगतस्य**=जले सलिले यत् शयनं शय्या मध्यगतस्य मध्यस्थितस्य, **मधरिपोः**=मधुः एतन्नामा दैत्यः तस्य रिपुः विष्णुः तस्य विष्णोः, **विगलन्मधुधारम्**=विगलन्त्यः स्रवन्त्यः मधुनः परागस्य धाराः स्रोतांसि यस्मात् तत् , **नाभिनलिनम् इव**=नाभेः नलिनं कमलम् इव, **अलक्ष्यत**=अदृश्यत, **दिवसावसाने**=दिवसस्य दिनस्य अवसाने समाप्तौ, **रविकिरणाः**=रवेः सूर्यस्य किरणाः मयूखाः, **शकुनयः इव**=खगाः इव, **धरणीतलम्**=भुवनतलम्, **विहाय**=त्यक्त्वा, **कमलिनीवनानि च**=कमलिनीनां पद्मिनीनां वनानि गहनानि च, **उन्मुच्य**=मुक्त्वा, **तरुशिखरेषु**=तरूणां वृक्षाणां शिखरेषु शाखाग्रेषु, **पर्वताग्रेषु च**=पर्वतानां शिखराणाम् अग्रेषु शिखरेषु च, **स्थितम्**=निवासम्, **अकुर्वन्**=कृतवन्तः, **आलग्नलोहितातपच्छेदाः**=आ ईषत् लग्नाः संसक्ताः लोहिताः रक्तवर्णाः आतपच्छेदाः आलोकखण्डाः येषु ते, **तरवः**=पादपाः, **क्षणम्**=किञ्चित्कालम्, **मुनिभिः**=

तपस्विभिः, **आलम्बितलोहितवल्कलाः इव**=आलम्बितानि आश्रितानि लोहितानि रक्तवर्णानि वल्कलानि तरुत्वचः येषु ते तादृशा इव, **अदृश्यन्त**=अलक्ष्यन्त।

टिप्पणी - **उदवहत्**=उत्+वह् धातु लङ् प्र. पु. ए. व.। ऊष्मपः=वह्निपायी तपस्वी, तपस्या करने वाले महात्मा अपने चारों ओर अग्नि जलाकर तो तप करते ही हैं, पंचम अग्नि के रूप में सूर्य की ऊष्मा का भी पान करते हैं। **जलशयन-नाभिनलिनम्**=जल के मध्य शय्या पर शयन करने वाले मधुदैत्यविनाशी भगवान् विष्णु की नाभि के उस कमल के समान जिससे मधुधाराएँ निकलकर वह रही हों। **नाभिनलिनमिव** में उपमालङ्कार है।

अस्तमुपगते च भगवति सहस्त्रदीधितावपरार्णवतलादुल्लसन्ती विद्रुमलतेव पाटला संध्या समदृश्यत् यस्यामाबध्यमानध्यानम्, एकदेशदुह्यमानहोमधेनुदुग्धधाराध्वनितधन्यतरातिमनोहरम्, अग्निहोत्रवेदिविकीर्यमाणहरित्कुशम्, ऋषिकुमारिकाभिरितस्ततो विक्षिप्यमाणदिग्देवताबलिसिक्थमाश्रमपदमभवत्। क्वापि विहृत्य दिवसावसाने लोहिततारका तपोवनधेनुरिव कपिला परिवर्तमाना सन्ध्या तपोधनैरदृश्यत।

हिन्दी अनुवाद - सहस्त्र किरणों वाले भगवान् सूर्य के अदृश्य हो जाने पर पश्चिमी सागरतट के ऊपर उठती हुई तथा मूँगे की लता के समान पाटलवर्ण वाली सन्ध्या दिखाई पड़ी जिसमें कि आश्रमस्थान (मुनियों द्वारा) लगाए जाते हुए ध्यानकर्म वाला, एक ओर दुही जाती हुई होमधेनुओं की दुग्धधाराओं के ध्वनन से मन को आकृष्ट करने वाला, अग्निहोत्र की वेदी पर फैलाए जाते हुए हरे कुशों वाला तथा ऋषिकुमारिकाओं द्वारा दिग्देवताओं की पूजा के निमित्त चारों ओर बिखेरे जाते हुए बलि (उपहार या नैवेद्य) सम्बन्धी सिद्धान्तों वाला हो गया।

कही घूम-टहल कर, सन्ध्याकाल में (घर) लौट कर आती हुई लाल पुतलियों वाली 'कपिला' तपोवन की गाय के समान - कहीं (अर्थात् पर्वतों, नदियों, वनों आदि में) पर्यटन करके, दिन ढलते ही लालरङ्ग के तारकों (नक्षत्रों) से संकुल पिङ्गलवर्ण लौटती हुई सन्ध्या को मुनिजनों ने देखा।

संस्कृतव्याख्या - **भगवति**=प्रभवति, **सहस्त्रदीधितौ**=दिनकरे च, **अस्तम्**=अदृश्यताम्, **उपगते**=प्राप्ते सति, **अपरार्णवतलात्**=पश्चिमसमुद्रतीरात्, **उल्लसन्ती**=प्रस्फुरन्ती, **विद्रुमलता इव**=प्रवालपङ्क्तिः इव, **पाटला**=श्वेतरक्ता, **संध्या**=सन्धिबेला, **समदृश्यत**=समलक्ष्यत, **यस्याम्**=संध्यायाम्, **आश्रमपदम्**=आश्रमभूमिः, **आबध्यमानध्यानम्**=आबध्यमानं विधीयमानं ध्यानम्, **एकतानवृत्तिः**

यत्र तत् तादृशम्, **एकदेशदुह्यमानहोमधेनुदुग्धधाराध्वनितधन्यतरातिमनोहरम्**= एकदेशे एकभागे दुह्यमानानां दोहनविषयीक्रियमाणानां होमधेनूनां यज्ञगवीनां दुग्ध-धाराभिः पयः प्रवाहैः ध्वनितं शब्दायितम् अतएव धन्यतरं श्लाघ्यतरम् अतएव च अतिमनोहरम् अत्यधिकसुन्दरम्, **अग्निहोत्रवेदिविकीर्यमाणहरित्कुशम्**=अग्निहोत्राणां यज्ञविशेषाणां वेदिषु चतुरस्त्रभूमिषु विकीर्यमाणाः निक्षिप्यमाणाः हरिताः श्यामवर्णाः कुशाः दर्भाः यत्र तत् तादृशम्, **ऋषिकुमारिकाभिः**=ऋषीणां मुनीनां कुमारिकाभिः पुत्रीभिः, **इतस्ततः**=चतुर्षु दिक्षु, **विक्षिप्यमाणदिग्देवताबलिसिक्थम्**=विक्षिप्यमाणाः विकीर्यमाणाः दिग्देवताभ्यः दिक्पालेभ्यः बलिसिक्थाः उपहारान्नानि यत्र तत् तादृशम्, **अभवत्**=आसीत्, **क्वापि**=कस्मिन्नपि अज्ञातप्रदेशे, **विहृत्य**=पर्यटनं विधाय, **दिवसावसाने**=दिवसस्य दिनस्य अवसाने समाप्तौ, **परिवर्तमाना**=प्रत्यागता, **लोहिततारका**=लोहिते रक्तवर्णे तारके कनीनिके यस्याः सा, सन्ध्यापक्षे लोहिताः रक्तवर्णाः तारकाः नक्षत्राणि यस्यां सा, **कपिलः**=कनकवर्णा, **तपोवनधेनुः इव**= तपोवनस्य आश्रमस्य, धेनुः गौः इव, **संध्या**=सायंसमयः, **तपोधनैः**=तापसैः, **अदृश्यत**=अलक्ष्यत।

टिप्पणी - **भगवति**=भग+मतुप्, म को व, स. ए. व.। **उल्लसन्ती**= उत्+लस्+शतृ +ङीष। **विग्देवताबलिसिक्थ**=दिक्पालों के लिए दिया जाने वाला बलिरूप अन्न जो चावलों को पकाकर तैयार किया जाता है। इसे भक्तसिक्थ या पुलाव भी कहते हैं। पौराणिक मान्यता के अनुसार दशों दिशाओं के दश स्वामी हैं जिन्हें दिक्पाल कहा जाता है। ये पूर्वादिक्रम से १. इन्द्र, २. अग्नि, ३. यम, ४. नैर्ऋत, ५. वरुण, ६. मरुत्, ७. कुबेर, ८. शिव, ९. ब्रह्मा तथा १०. अनन्त हैं। **दुह्यमान**-दुह् + यक् + शानच्। **विक्षिप्यमाण**-वि+क्षिप्+यक्+शानच्। **विहृत्य**-वि+हृ+क्त्वा-ल्यप्। **कपिला**-भूरे रङ्ग की गाय, कपिलवर्ण वाली संध्या। **परिवर्तमान**-परि+वृत्+शानच्। **विद्रुमलतेव** तथा **तपोवनधेनुरिव** में **पूर्णोपमा-लङ्कार** है।

अचिरप्रोषिते सवितरि शोकविधुरा कमलमुकुलकमण्डलुधारिणी हंससितदुकूलपरिधाना मृणालधवलयज्ञोपवीतिनी मधुकरमण्डलाक्षवलय-मुद्वहन्ती कमलिनी दिनपतिसमागमव्रतमिवाचरत् अपरसागराम्भसि पतिते दिवसकरे वेगोत्थितमम्भः सीकरनिकरमिव तारागणमम्बरमधारयत्। अचिराच्च सिद्धकन्यकाविक्षिप्तसंध्यार्चनकुसुमशबलमिव तारकितं वियदराजत। क्षणेन चोन्मुखेन मुनिजनेनोर्ध्वविप्रकीर्णैः प्रणामाञ्जलिसलिलैः क्षाल्यमान

इवागलदखिलः संध्यारागः।

हिन्दी अनुवाद - (अपने पतिस्वरूप) सूर्य के तत्काल प्रोषित (अस्तङ्गत) हो जाने पर विछोह के कारण विह्वल, कमलकोरक रूपी कमण्डलु को धारण करने वाली, हंस रूपी श्वेतरेशमी वस्त्र पहने हुई, कमलन्तु रूपी धवल यज्ञोपवीत से युक्त तथा भ्रमरसमूह रूपी रुद्राक्ष जपमाला का वहन करती हुई कमलिनी (अपने परदेशी प्रियतम) सूर्य के समागम-हेतु मानो व्रत का आचरण करने लगी। पश्चिमी सागर की जलराशि में सूर्य के गिर जाने पर, उस पतन के वेग से उछले हुए जलबिन्दु-समूह की भाँति नक्षत्रमण्डल को आकाश ने धारण कर लिया। थोड़ी ही देर में तारकखचित आकाशमण्डल मानो विद्याधर कन्याओं द्वारा बिखेरे गए सन्ध्याकालीन पूजापुष्पों के कारण चितकबरा सुशोभित हो उठा और क्षण भर में ही ऊर्ध्वमुख मुनिजनों द्वारा (ऊपर) छिड़के गए प्रणामकालीन अञ्जलि के जल से मानो धोया जाता हुआ सम्पूर्ण सन्ध्याराग गल गया।

संस्कृतव्याख्या - **सवितरि**=भगवति भास्करे, **अचिरप्रोषिते**=अचिरं सद्यः प्रोषिते प्रवासं गते, **शोकविधुरा**=शोकेन विरहदुःखेन विधुरा व्याकुला, **कमलिनी**=नलिनी, **कमलमुकुलकमण्डलुधारिणी**=कमलस्य नलिनस्य मुकुलः कोरकः एव कमण्डलुः करकः तं धारयति वहतीति सा तादृशी, **हंससित-दुकूलपरिधाना**-हंसा मानसौकसः एव सितदुकूलं तत् परिधानं शाटी अधोवस्त्रं वा यस्याः सा, **मृणालधवलयज्ञोपवीतिनी**=मृणालश्वेतयज्ञसूत्रधारिणी, **मधुकरमण्डलाक्षवलयम्**=मधुकराणां भ्रमराणां मण्डलं वलय एव अक्षवलयं जपमाला तत्, **उद्वहन्ती**=धारयन्ती, **दिनपतिसमागमव्रतम् इव**=दिनपतेः सूर्यस्य समागमाय-संमेलनाय व्रतं नियमः तद् इव, **आचरत्**=अपालयत्, अकरोत् प्रोषित-पतिकापक्षे कमलमुकुलवत्, **हंसवत्**, मृणालवत्, मधुकरमण्डलवत् इत्येवं विग्रहं कृत्वा अर्थैः संगमनीयः, **दिवसकरे**=भास्करे, **अपरसागराम्भसि**=अपरः पश्चिमः सागरः समुद्रः तस्य अम्भसि जले, **पतिते**=च्युते, **अम्बरम्**=आकाशम्, **वेगोत्थितम्**=वेगेन रभसेन उत्थितम् उद्गतम्, **अम्भःसीकरनिकरम् इव**=अम्भसः सलिलस्य सीकराणां कणानां निकरः समूहः तम् इव, **तारागणम्**=नक्षत्रमण्डलम्, **अधारयत्**=दधार। **चिरात् च**=शीघ्रमेव च, **सिद्धकन्याविक्षिप्तसंध्यार्चनकुसुमशबलं इव**=सिद्धकन्याभिः विद्याधरबालिकाभिः विक्षिप्तानि विकीर्णानि यानि संध्यार्चने सायंकालिकपूजने कुसुमानि प्रसूनानि तैः शबलम् इव कर्बुरितम् **इव, तारकितम्**=तारकाः नक्षत्राणि संजाताःअस्येति तादृशम्, **वियत्**=आकाशम्, **अराजत**=अशोभत।

क्षणेन च=स्वल्पकालेन च, **उन्मुखेन**=उत् ऊर्ध्वं मुखं वदनं यस्य तादृशेन, **मुनिजनेन**=ऋषिवर्गेण, **ऊर्ध्वविप्रकीर्णैः**=उर्ध्वम् उपरिदिशि विप्रकीणैः विक्षिप्तैः, **प्रणामाञ्जलिसलिलैः**=प्रणामस्य नमस्कारस्य यः अञ्जलिः न्युब्जपाणिविन्यासः तस्य सलिलैः जलैः, **क्षाल्यमानः इव**=धौतः इव, **अखिलः**=समस्तः, **संध्यारागः**= संध्यायाः रागः संधिवेलालौहित्यम्, **अगलत्**=अपतत्।

टिप्पणी - **अचिरप्रोषिते सवितरि**-कुछ समय के पूर्व ही भगवान् सूर्य के प्रवास चले जाने पर, यहाँ प्रोषित शब्द का प्रयोग करके कवि ने समासोक्ति अलंकार के द्वारा कमलिनी सविता सम्बन्ध के साथ प्रोषितपतिकानायिका तथा नायक सम्बन्ध की व्यञ्जना की है। **मृणालधवलयज्ञोपवीतिनी**-मृणाल ही कमलिनी का सफेद यज्ञोपवतीत था, इससे यह ध्वनि निकलती है कि पुरातन समय में स्त्रियाँ भी यज्ञोपवीत धारण करती थीं। महर्षि यम ने लिखा है कि 'पुराकल्पे तु नारीणां मौञ्जीबन्धनमिष्यते। अध्यापनं च वेदानां सावित्रीवाचनं तथा॥' महर्षि हारीत ने भी 'द्विविधाः स्त्रियः ब्रह्मवादिन्यः सद्योवध्वश्च। तत्र ब्रह्मवादिनीनामु-पनयनमग्नीन्धनं वेदाध्ययनं स्वगृहे भिक्षाचर्या। कहकर ब्रह्मवादिनी स्त्रियों के यज्ञोपवीत की व्यवस्था दी है। **उद्वहन्ती**-उत्+वह्+शतृ+ङीप्। **तारकित**-तारक+इतच्। **अराजत**- राज् धातु लङ् प्र पु० ए० व०। '**प्रक्षाल्यमान इव**' में **क्रियोत्प्रेक्षालङ्कार** है। '**अचिरादिव**' में-क्रियोत्प्रेक्षा तथा कमलिनी और सूर्य में स्त्री-पुरुष के व्यवहार के समारोप होने से 'समासोक्ति' अलङ्कार है।

क्षयमुपगतायां संध्यायां तद्विनाशदुःखिता कृष्णाजिनमिव विभावरी तिमि-रोद्गममभिनवमवहत्। अपहाय मुनिहृदयानि सर्वमन्यदन्धकारता तिमिरमनयत्। क्रमेण च रविरस्तं गत इत्युदन्तमुपलभ्य जातवैराग्यो धौतदुकूलवल्कल-धवलाम्बरः सतारान्तःपुरपर्यन्तस्थिततनुतिमिरतमालवृक्षलेखसप्तर्षिमण्डला-ध्युषितमरुन्धतीसंचरणपूतमुपहिताषाढमालक्ष्यमाणमूलमेकान्तस्थितचारु-तारकमृगममरलोकाश्रममिव गगनतलममृतदीधितिरध्यतिष्ठत्।

हिन्दी अनुवाद - (सखीस्वरूपा) सन्ध्या के विनष्ट हो जाने पर, उसके विनाश से दुःख हुई रात्रि ने नवीन कृष्ण मृगचर्म के समान अभिनव अन्धकारोदय को धारण कर लिया। मुनियों के हृदयों को छोड़ कर अन्धकार ने अन्य सब कुछ आत्मसात् कर लिया अर्थात् सब अन्धकार में डूब गए। 'सूर्य अस्त हो गया' परम्परया यह समाचार पाकर चौहद्दियों पर विद्यमान धुँधले (अर्कात् हल्के) अन्धकर के समान तमाल वनपंक्तियों वाले, वसिष्ठ प्रभृति सप्तर्षि-समूह द्वारा

अध्यासित, (वसिष्ठपत्नी) देवी अरुन्धती के सञ्चरण से पवित्रित, संस्थापित किये गए पलाशदण्डों युक्त चतुर्दिक् दिखाई पड़ने वाले (भक्ष्य) कन्दमूलों से युक्त तथा एक होने में विद्यमान आकर्षक (आँख की) पुतलियों वाले मृग से अलंकृत स्वर्गलोकरूपी आश्रमस्थान में रहने वाले वैराग्यभावना से संवलित, धुले हुए दुकूल सदृश वल्कल वस्त्रों रूपी निर्मल परिधान वाले तथा (सतार, तार=प्रणव या ओंकार) ओङ्कार युक्त (अन्तःपुर, पुर=शरीर, अन्तर्=हृदय) शरीरस्थ हृदयवाले (किसी तपस्वी की भाँति) वैराग्य अर्थात् अरुणिमा से युक्त, धुले हुए दुकूल वल्कल रूपी निर्मल गगनमण्डलवाला तथा नक्षत्र मण्डल से युक्त अन्तःपुर अथवा (बृहस्पति की पत्नी एवं चन्द्रमा की प्रेयसी) तारा से अलङ्कृत अन्तःपुर वाला अमृतकिरण चन्द्रमा चौहद्दियों (क्षितिजों पर) विद्यमान तमाल वनपंक्तियों के समान स्वल्पमात्र अन्धकार वाले, सप्तर्षिमण्डल (नक्षत्र विशेष) से अलंकृत, अरुन्धती (नामक नक्षत्र विशेष) के सञ्चरण से पवित्र,नियराए हुए 'उत्तराषाढ' नामक नक्षत्र से युक्त, दृष्टिगोचर होते हुए मूलनक्षत्र वाले तथा एक कोने में विद्यमान मनोहर तारकों से युक्त मृगशिरा नक्षत्र वाले आकाश-मण्डल में सुशोभित हो गया।

संस्कृतव्याख्या - **संध्यायाम्**=संधिवेलायायाम्, **क्षयम्**=विनाशम्, **उपगतायाम्**=प्राप्तायाम्, **तद्विनाशदुःखिताः**=तस्याः संध्यायाः विनाशेन दुःखिता शोकाकुला, **विभावरी**=रजनी, **कृष्णाजिनम् इव**=कृष्णसामृगचर्मवत्, **अभिनवम्**=नवीनम्, **तिमिरोद्गमं**=तिमिरस्य तमसः उद्गमः प्राकट्यं तम्, **अवहत्**=धारणमकरोत्, **तिमिरम्**=तमः, **मुनिहृदयानि**=मुनीनाम् ऋषीणां हृदयानि चेतांसि, **विहाय**=परित्यज्य, **अन्यत्**=इतरत्, **सर्वम्**=अखिलम्, **अन्धकारताम्**=तमोमयताम्, **अनयत्**=प्रापयत्, **क्रमेण च**=क्रमशः च, **रविः**=सूर्यः स्वसखा इति भावः, **अस्तम्**=लोपं विनाशंवा, **गतः**=प्राप्तः, **इति**=इत्थम्, **उदन्तम्**=वृत्तान्तम्, **उपलभ्य**=लब्ध्वा, **अमृतदीधितिः**=अमृतं सुधा दीधितिषु रश्मिषु यस्य तादृशः सुधांशुः, **जातवैराग्यः**=जातं समुत्पन्नं वैराग्यं विरक्तिः यस्य स तादृशः, **धौतदुकूल-वल्कलधवलाम्बरः**=धौतं प्रक्षालितं यत् दुकूलं क्षौमवस्त्रं तद्वत् वल्कलं वृक्षत्वक् धवलं स्वच्छम् अम्बरं आकाशम् एव यस्य सः तादृशः वस्तुस्थितौ धौतदुकूलवल्क-लवत् धवलम् अम्बरं येन सः, **सतारान्तःपुरम्**=सतारं तारयति तारः ब्रह्म तेन सह विद्यमानं सतारं सप्रणवम् अन्तःपुरं पुरस्य शरीरस्य अन्तः मध्यं कुण्डलिनी नाडी यस्य स तादृशः, **पर्यन्तस्थिततनुतिमिरतमालवनलेखम्**=पर्यन्ते प्रान्तभागे स्थितं विद्यमानं यत् तनु स्वल्पं तिमिरं अन्धकारः तदिव तमालानां तापिच्छानां वनलेखा

काननश्रेणी यत्र तं तादृशम्, गगनतलपक्षे पर्यन्ते स्थितं तनुतिमिरं तमालवनलेखा इव यस्य तत्, **सप्तर्षिमण्डलाध्युषितम्**=सप्त च ते ऋषयः सप्तर्षयः वसिष्ठादिसप्त-तपस्विनः तेषां मण्डलेन समूहेन अध्युषितम् आश्रितम्, गगनतलपक्षे सप्तर्षीणां चित्रशिखण्डिनां सप्ततारकाणां मण्डलेन समूहेन अध्युषितं संयुक्तम्, **अरुन्धतिसंचरणपूतम्**=अरुन्धत्याः वसिष्ठपत्न्याः संचरणेन पूतं मेध्यम्, गगनतलपक्षे अरुन्धत्याः नक्षत्रविशेषस्य संचरणेन, भ्रमणेन पूतम्, **उपहिताषाढम्**=उपहिताः संनिहिताः आषाढाः पलाशदण्डाः यत्र तं तादशृम् गगनपक्षे उपहिते संनिहिते आषाढे पूर्वाषाढोत्तराषाढानक्षत्रे यत्र तत् तादृशम्, **आलक्ष्यमाणमूलम्**=आ समन्तात् लक्ष्यमाणानि विलोक्यकानानि मूलानि कन्दानि यत्र तं तादृशम्, गगनपक्षे आलक्ष्य-माणं दृश्यमानं मूलं मूलनक्षत्रं यत्र तत्, **एकान्तस्थितचारुतारकमृगम्**=एकान्ते एकप्रदेशे स्थिताः विद्यमानाःचारुतारकाः मनोहरकनीनिकाः मृगाः हरिणाः यत्र तं तादृशम्, एकान्ते स्थितः चारुतारकामनोहरनक्षत्रं मृगः मृगशिराः यत्र तत्, **अमरलोकाश्रमम् इव**=अमरलोकस्य स्वर्गस्य यः आश्रमः तपोवनभूमिः तम् इवः, **गगनतलम्**=आकाशतलम्, **अध्यतिष्ठत्**=अधितस्थौ।

टिप्पणी - **उदन्त**-वृत्तान्त, समाचार। 'वार्ता प्रवृत्तिर्वृत्तान्त उदन्तः स्यात्' इत्यमरः। **अपहाय**-अप+हा+क्त्वा-ल्यप्। **अन्धकारताम्**-अन्धकार+तल्। **सतारान्तःपुरः**-वैराग्यधारी चन्द्रमा के शरीर के मध्य कुण्डलिनी नाड़ी में तारक (प्रणव) का निवास स्थान था। अथवा चन्द्रमा का हृदय तारा शक्ति से युक्त था यह तारा महाशक्ति या महाविद्या के १० रूपों में से एक है। ये दश शक्तियाँ इस प्रकार हैं-काली, तारा, षोडशी, छिन्नमस्ता, धूमावती, बगला, मातङ्गी तथा कमला। चन्द्रमा के पक्ष में-ताराओं सहित अन्तःपुर वाला। **सप्तर्षिमण्डल**-सात ऋषियों का समूह, आकाश में उत्तर की ओर दिखाई देने वाला सात नक्षत्रों का समूह। **आलक्ष्यमाण**-आ+लक्ष्+यक्+शानच्। यहाँ **श्लेषानुप्राणित उपमा है।**

चन्द्राभरणभृतस्तारकाकपालशकलालंकृतादम्बरतलात् त्र्यम्बकोत्तमाङ्गादिव गङ्गा सागरानापूरयन्ती हंसधवला धरण्यामपतज्ज्योत्स्ना। हिमकरसरसि विकचपुण्डरीकसितचन्द्रिकाजलपानलोभादवतीर्णो निश्चलमूर्तिरमृगतपङ्कलग्न इवादृश्यत हरिणः। तिमिरजलधरसमयापगमानन्तरम्भिनवसितसिन्दुवार-कुसुमपाण्डुरैरर्णवागतैरगाह् यन्त हंसैरिव कुमुदसरांसि चन्द्रपादैः। विगलित-सकलोदयरागं रजनिकरबिम्बमम्बरावगाहधौतसिन्दूरमैरावतकुम्भस्थलमिव तत्क्षणमलक्ष्यत।

हिन्दी अनुवाद – चन्द्रमा रूपी अलंकरण को धारण करने वाले तथा तारकों के समान (शुभ्र) नरकपाल खण्ड़ों से अलंकृत भगवान् त्र्यम्बक (शङ्कर) के ललाटस्थल से भूतल पर गिरने वाली तथा समुद्र को पूर्ण करती हुई, (तटवर्ती) हंसों के कारण धवलीभूत गङ्गा की भाँति-(उदीयमान) चन्द्रमा रूपी आभरण से युक्त तथा 'कपालशकल' (खपड़े के टुकड़े) प्रतीत होने वाले तारकों से खचित आकाशमण्डल से-समुद्र को समन्ततः भरने वाली तथा हंसों के समान धवल-चाँदनी पृथ्वीतल पर बिखर गई। खिले हुए श्वेत कमलों के समान श्वेत चन्द्रमा रूपी सरोवर में चन्द्रिका रूपी जल पीने के लोभवश उतरा हुआ (चन्द्रमा का लाञ्छनभूत) हरिण मानो अमृतपङ्क में फँसा हुआ अतएव स्पन्दनविहीन आकृति वाला दिखाई पड़ने लगा। अन्धकार सदृश पावस ऋतु की समाप्ति के बाद नूतन श्वेत सिन्धुवार पुष्प के समान धवलवर्ण वाले, अर्णव अर्थात् जलाशयों में उतरे हुए, तथा कुमुद संकुल सरोवरों में अवगाहन करने वाले राजहंसों की भाँति-वर्षाऋतु सरीखी अन्धकारराशि के विलीन हो जाने के बाद, अभिनव श्वेत सिन्धुवार पुष्प के समान शुभ्रवर्ण वाली तथा 'अर्णव' अर्थात् समुद्र पर गहराई हुई चन्द्रकिरणें कुमुद-सरोवरों को व्याप्त करने लगीं। गली हुई-उदयकालीन सारी अरुणाई वाला चन्द्रबिम्ब, उस समय आकाश गंगा में अवगाहन के कारण धुले हुए सिन्दूर वाले (इन्द्रवाहन) ऐरावत गजराज के कुम्भस्थल की भाँति दीखने लगा।

संस्कृतव्याख्या – **चन्द्राभरणभृतः**=चन्द्रः सुधांशुः एव आभरणम् आभूषणं तद् बिभर्ति धारयति इति तस्मात्, **तारकाकपालशकलालंकृतात्**=तारकाः नक्षत्राणि कपालशकलानि इव मनुष्यमस्तकास्थिखण्डानि इव तैः अलंकृतात् विभूषितात् उत्तमाङ्गपक्षे तारकाः इव कपालशकलानिः तैः अलंकृतान्, **अम्बरतलात्**=आकाशतलात्, **त्र्यम्बकोत्तमाङ्गात्**=त्रीणि त्रिसंख्यामितानि अम्बकानि नेत्राणि यस्य सः शिवः तस्य उत्तमाङ्गात् शिरसः, **सागरान्**=समुद्रान्, **आपूरयन्ती**=आप्लावयन्ती गङ्गापक्षेआप्लावयिष्यन्ती, अवतीर्य समुद्रपुरणादिति भावः, **हंसधवला**=हंसवत् श्वेतगरुद्वत् धवला शुभ्रा गङ्गापक्षे हंसैः श्वेतगरुद्भिः धवला श्वेतगरुद्भिः धवला श्वेता, **ज्योत्स्ना**=कौमुदी, **गङ्गा इव**=भगीरथी इव, **धरण्याम्**=धरायाम्, **अपतत्**=पपात, उपागच्छत्। **विकचपुण्डरीकसिते**=विकचानि यानि पुण्डरीकाणि श्वेतकमलानि तद्वत् सिते श्वेतवर्णे सरः जलाशयः तस्मिन्, **चन्द्रिकाजलपानलोभात्**=चन्द्रिका ज्योत्स्ना एव जलं सलिलं तस्य पानाय लोभः लोलुपता तस्मात्, **अवतीर्णः**=प्रविष्टः, **हरिण**=मृगः, **अमृतपङ्कलग्न इव**=अमृतस्य सुधायाः पङ्के **कर्दमे लग्नः इव**,

निश्चलमूर्तिः=निश्चला सुस्थिरा मूर्तिः तनुः यस्य सः तादृशः, **अदृश्यत**=अवालोक्यत। **तिमिरजलधरसमयापगमानन्तरम्**=तिमिरं तमः जलधरसमयः जलदकालः इव तस्य अपगमः दूरीभावः तस्माद् अनन्तरम् अव्यवहितोत्तरम्, हंसपक्षे तिमिरम् इव जलधरसमयः तस्य अपगमानन्तरम्, **अभिनवसितसिन्धुवारकुसुमपाण्डुरैः**= अभिनवानि नूतनानि सितानि श्वेतानि यानि सिन्दुवारकुसुमानि निर्गुण्डीपुष्पाणि तद्वत् पाण्डुरैः शुभ्रैः, **अर्णवागतैः**=अर्णवात् अन्तरिक्षात् हंसपक्षे समुद्रात् आगतैः आयातैः, **चन्द्रपादैः**=चन्द्रस्य सुधांशोः पादैः मयूखैः, **हंसैः इव**=श्वेतगरुद्भिः इव, **कुमुदसरांसि**=कुमुदानां कैरवाणां सरांसि जलाशयाः, **अगाह्यन्त**=आलोड्यन्त। **विगलितसकलोदयरागम्**=विगलितः विलयं प्राप्तः सकलः समस्तः उदयरागः उदयकालिकलौहित्यं यस्य तत्, **रजनिकरबिम्बम्**=रजनिकरः चन्द्रः तस्य बिम्बं मण्डलम्, **तत्क्षणम्**=तत्काले, **अम्बरापगावगाहधौतसिन्दूरम्**=अम्बरस्य गगनस्य आपगा सरित् आकाशगङ्गा यस्याम् अवगाहेन स्नानेन धौतं प्रक्षालितं सिन्दूरं नागजं यस्य तत् तादृशम्, **ऐरावतकुम्भस्थलम् इव**= ऐरावतस्य इन्द्रगजस्य कुम्भस्थलम् इव मूर्धास्थलम् इव, **अलक्ष्यत**=अदृश्यत।

टिप्पणी - **तारकाकपालशकलालंकृतः**-कपाल के खण्डों जैसे नक्षत्रों से सुशोभित आकाश। **उत्तमाङ्ग**-सिर। **हरिण**-चन्द्रमा के मध्य में चमकने वाल काला धब्बा, जिसके कारण चन्द्रमा हरिणाङ्क कहा जाता है। हरिण का पर्याय मृग भी मृगाङ्क आदि नामों में प्रचलित है। वस्तुतः (हरति सर्वान् वर्णान् इति हरिणः=श्यामः हरितो वा वर्णः) हरे रंग या श्यामरंग के लिए इस शब्द का प्रयोग करके (हरिणः अङ्के यस्य) जिसके बीच में धब्बा हो उसे हरिणांक कहते हैं। **अम्बरापगा**-आकाशगङ्गा (आपगा-नदी)। **'गङ्गा इव'** में **पूर्णोपमा, 'अमृतपङ्कलग्न इव'** में **क्रियोत्प्रेक्षा** तथा **'हंसैरिव'** में **उपमा** है। **'कुम्भस्थलमिव'** में उपमा अलङ्कार है।

शनैः शनैश्च दूरोदिते भगवति हिमस्त्रुति सुधाधूलिपटलेनेव धवलीकृते चन्द्रातपेन जगति, अवश्यायजलबिन्दुमन्दगतिषु विघटमानकुमुदवनकषायपरिमलेषु समुपोढनिद्राभरालसतारकैरन्योन्यग्रथितपक्षपुटैरारब्धरोमन्थमन्थरमुखैः सुखासीनैराश्रममृगैरभिनन्दितागमनेषु प्रवहत्सु निशामुखसमीरणेषु अर्धयाममात्रावखण्डितायां विभावर्यां हारीतः कृताहारं मामादाय सर्वैस्तैर्महामुनिभिरुपसृत्य चन्द्रातपोद्भासिनि तपोवनैकदेशे वेत्रासनोपविष्टमनतिदूरवर्तिना जालपादनाम्ना शिष्येण दर्भपवित्रधवित्रपाणिना मन्दमन्दमुपवीज्यमानं पितरमवोचत्-तात ! सकलेयमाश्चर्यश्रवणकुतूहलाकलितहृदया समुपस्थिता तापसपरिषदाबद्ध-

मण्डला प्रतीक्षते। व्यपनीतमश्च कृतोऽयं पतत्रिपोतः। तदावेद्यतां यदनेन कृतम्, अपरस्मिन् जन्मनि कोऽयमभूद् भविष्यति च' इति। एवमुक्तः स महामुनिरग्रतः स्थितं मामवलोक्य तांश्च सर्वानेकाग्रान् श्रवणपरान् मुनीन् बुद्ध्वा शनैः शनैरब्रवीत्-श्रूयतां यदि कुतूहलम्।'

हिन्दी अनुवाद - धीरे-धीरे भगवान् हिमाँशु (चन्द्रमा) के ऊँचे चढ़ जाने पर, चूने की धूलिराशि प्रतीत होने वाली चाँदनी द्वारा संसार के धवल बना दिये जाने पर, तुषार-जलबिन्दुओं के कारण मन्थर गति वाले-विकसित होते हुए कुमुदवनों की कसैली मँहक वाले, भरपूर बढ़ी हुई निद्रा के भारवश अलसाई हुई पुतलियों से युक्त, परस्पर उलझी हुई बरौनियों से युक्त, प्रारम्भ की गई जुगाली के कारण अलसाए मुँहों से युक्त तथा सुखपूर्वक बैठे हुए आश्रममृगों द्वारा अभिनन्दन किये गये आगमनवाले प्रदोषकालीन समीरणों(हवाओं) के प्रवाहित होने पर, आधा पहर रात बीत जाने पर (मुनिकुमार) हारीत भोजन से निबटे हुए मुझको लेकर, उन समस्त मुनियों के साथ पास पहुँच कर, चन्द्रिकाचर्चित तपोवन के एक खण्ड में वेत्रासन पर सानन्द बैठे हुए समीप ही विद्यमान कुशों के समान पवित्र मृगचर्म-निर्मित तालवृन्त (पंखा) से अलंकृत हाथवाले 'जालपाद' नामक शिष्य द्वारा धीरे-धीरे हवा किये जाते हुए (अपने) पितृचरण (महर्षि जाबालि) से बोला - पिताजी! (शुकविषयक) आश्चर्यजनक (वृत्तान्त) सुनने के लिए उत्कण्ठा से परिपूर्ण हृदयवाली यह सम्पूर्ण तापस-सभा समुपस्थित हो गई है तथा मण्डल बाँधकर (आपकी) प्रतीक्षा कर रही है। इस शुकशावक की थकावट भी (भोजनादि) से अच्छी तरह मिटा दी गई है। इसलिए (अब आप कृपा करके) बतायें कि इसने पूर्वजन्म में क्या किया था? अथवा (पहले) यह कौन था? अथवा (भविष्य) में यह कौन होगा?

इस प्रकार पूछे जाने पर वे महामुनि (जाबालि) सम्मुख विद्यमान मुझे देखकर और उन समस्त मुनियों को (भी) एकाग्रचित्त तथा श्रवणाभिमुख समझ कर धीरे-धीरे कह उठे-(अच्छा तो) सुनिये यदि (सुनने के लिए) उत्कण्ठा है तो।

संस्कृतव्याख्या - **शनैः शनैः**=मन्दं मन्दम्, **भगवति**=ऐश्वर्यशालिनि, **हिमस्रुति**=चन्द्रमसि, **दूरोदिते**=दूरम् उच्चम् उदिते आरूढे सति, **सुधाधूलिपटलेन इव**=सुधायाः भवनविलेपनद्रव्यस्य धूलयः पांसवः तासां पटलेन समूहेन इव, **चन्द्रातपेन**=चन्द्रस्य हिमांशोः आतपेन प्रभया, **जगति**=संसारे, **धवलीकृते**= शुभ्रीकृते,

अवश्यायजलबिन्दुमन्दगतिषु=अवश्यायः तुषारः तस्य ये जलबिन्दवः सलिलकणानि तैः मन्दा धीरा गतिः संचारः येषां तेषु, **विघटमानकुमुदवनकषाय-परिमलेषु**=विघटमानानां विकसतां, कुमुदवनानां कैरवकाननानां कषायः कषायगुण-विशिष्टः परिमलः गन्धः येषु तेषु, **समुपोढनिद्राभरालसतारकैः**=समुपोढः सम्यक् धारितः यः निद्रायाः भरः तन्द्राभारः तेन अलसे मन्थरे तारके कनीनिके येषां तैः, **अन्योन्यग्रथितपक्ष्मपुटैः**=अन्योन्यं परस्परं ग्रथिते गुम्फिते पक्ष्मपुटे लोभसंपुटे यैःतैः, **आरब्धरोमन्थमन्थरमुखैः**=आरब्धः उपक्रान्तः यः रोमन्थः चर्वितचर्वणम्, तेन मन्थरं सालसं मुखं लपनं येषां तैः, **सुखासीनैः**=सुखं सानन्दम् आसीनैः उपविष्टैः, **आश्रममृगैः**=तपोभूमिहरिणैः, **अभिनन्दितागमनेषु**=अभिनन्दितं श्लाघितम् आगमनम् उपस्थानं येषां तेषु, **निशामुखसमीरणेषु**= निशायाः क्षपायाः मुखं निशामुखं प्रदोषः तस्य समीरणेषु पवनेषु, **प्रवहवत्सु**=संचरत्सु, **विभावर्याम्**=रजन्याम्, **अर्धयाम-मात्रावखण्डितायाम्**=अर्धयामस्य अर्धयामः केवलः अर्धयामः अर्धयाम् मात्रः तेन अर्धप्रहरमात्रेण अवखण्डितायां न्यूनत्वं प्राप्तायां सत्याम्, **हारीतः**=जाबालिपुत्रः, **कृताहारम्**=कृतः आहारः, फलादिभक्षणं येन तादृशम्, **माम्**=वैशम्पायनम्, **आदाय**=गृहीत्वा, **तैः**=पूर्वोक्तैः, **सर्वैः**=समस्तैः, **महामुनिभिः**=महर्षिभिः, **उपसृत्य**=उपगम्य, **चन्द्रातपोद्भासिनि**=चन्द्रस्य हिमांशोः आतपेन प्रभया उद्भासते दीप्यते इति तच्छीलः तस्मिन्, **तपोवनैकदेशे**=तपोवनस्य धर्माचरणस्य एकदेशे एकभागे आश्रमे इत्यर्थः, **वेत्रासनोपविष्टम्**=वेत्रस्य वेतसस्य आसने विष्टरे **उपविष्टम्**=अवस्थितम्, **अनतिदूरवर्तिना**=समीपस्थेन, **जालपादनाम्ना**=जालपादः नाम यस्य तेन जालपादाभिधानेन, **शिष्येण**= अन्तेवासिना, **दर्भपवित्रधवित्रपाणिना**= दर्भः कुशः तद्वत् पवित्रं पावनं धवित्रं मृगचर्मव्यजनं पाणौ हस्ते यस्य तेन तादृशेन सता, **मन्दमन्दम्** = शनैः शनैः, **उपवीज्यमानम्**= व्यजनविषयीक्रियमाणम्, **पितरम्**= तातं जाबालिम्, **अवोचत्**= अवादीत्, **तात**= पितः, **इयम्**= पुरो दृश्यमाना, **आश्चर्यश्रवणकुतूहलाकलितहृदया**=आश्चर्यस्य विस्मयस्य श्रवणाय आकर्णनाय यत् कुतूहलम् कौतुकं तेन आकलितं व्याप्तं हृदयं चित्तं यस्याः सा तादृशी, **समुपस्थिता**=समागता, **आबद्धमण्डला**= आबद्धं रचितं मण्डलं परिधिः यया सा, **सकला**=समस्ता, **तापसपरिषद्**=तपस्विसभा, **प्रतीक्षते**=प्रतिपालयते, **च**=तया, **अयम्**=पुरो दृश्यमानः, **पतत्रिपोतः**=शुकशिशुः, **व्यपनीतश्रमः**=व्यपनीतः दूरीकृतः श्रमः क्लान्तिः यस्य स तादृशः, **कृतः**=विहितः, **तत्**=तस्मात् कारणात्, **आवेद्यताम्**= बोध्यताम्, **अनेन**=शूकशावकेन, **यत्**=यत्किमपि, **कृतम्**=विहितम्, **अपरस्मिन्**=

अस्मद् जन्मनः अन्यस्मिन्, पूर्वस्मिन्, **जन्मनि**=भवे, **अयम्**=शुकशिशुः, **कः अभूत्**=किं नामासीत्। **भाविनि जन्मनि च कः भविष्यति**=कस्यां जातां उत्पत्स्यते। इति, **तु**=पुनः, **एवम्**=इत्थम्, **उक्तः**=पृष्टः सन्, **सः**=पूर्वोक्तः, **महामुनिः**=तपस्वी जाबालिः, **अग्रतः**=पुरतः, **स्थितम्**=विद्यमानम्, **माम्**=वैशम्पायनम्, **अवलोक्य**=दृष्ट्वा, च तथा, **तान्**=पूर्वोक्तान्, **सर्वान्**=समस्तान्, **मुनीन्**=तपस्विनः, **एकाग्रान्**=एकतातान्, **श्रवणपरान्**=श्रवणोत्सुकान्, **बुद्ध्वा**=अवगम्य, **शनैः शनैः**=मन्दं मन्दम्, **अब्रवीत्**=अगादीत्, **यदि**=चेत्, **कुतूहलं**=आश्चर्यम्, तर्हि **श्रूयताम्**=निशम्यताम्।

टिप्पणी - **उदित** - उत्+इ+क्त **हिमुस्त्रत**-चन्द्रमा। **सुधाधूलि**-भवनों को पोतने के काम में आने वाली कलई। **अवश्याय**-ओस, 'अवश्यायस्तु नीहारस्तुषार-स्तुहिनं हिमम्' इत्यमरः। **सुमपोढ**=सम+उप+वह्+क्त। **रोमन्थ**=जुगाली, खाये हुए चारे को पुनः निकालकर थोड़ा-थोड़ा करके चबाते रहना। **निशामुख**=प्रदोषकाल। 'प्रदोषो रजनीमुखम् अमरकोश। **पवित्र**-मृगचर्म से बना हुआ पंखा 'पवित्रं व्यजनं तद् यद् रचितं मृगचर्मणा' अमरकोश। पतत्रिपोत-पक्षी का बच्चा। **उपसृत्य**=उप+सृ+क्त्वा+ल्यप्। **आदाय**=आङ्+दा+क्त्वा-ल्यप्। **वि[illegible]**-वि=घट्+शानच्। **समीरण**-वायु, 'समीरमारुत-मरुज्जगत्प्राणसमीरणाः' [illegible]ः। **विभावरी**-'अथ शर्बरी'॥ निशा निशीथनी रात्रिस्त्रियामा क्षणदा क्षण[illegible]नावरीतमस्विन्यौ रजनी यामिनी तमी॥'' इत्यमरः। **स्थितम्**-स्था+क्त। [illegible]**लोक्य**-अव+लोक+क्त्वा-ल्यप्। **कौतूहलम्**=कौतूहल, 'कौतूहलं कौतुकं [illegible]ुतुकं च कुतूहलम्' इत्यमरः।

पदव्याकरणोपेता गभीरार्थप्रका[illegible]का।
आचन्द्रतारकं चन्देदस्माकं कापि [illegible]॥

॥ कादम्बरी-कथामुख समाप्त॥

◆◆◆

हंसा प्रकाशन, जयपुर